श्रीः

श्रीमदुदयनाचार्यविरचितः

न्यायकुसुमाञ्जलिः

श्रीशैलशतमखचतुराम्नायकुमारतातदेशिकदिव्यवंशमुक्ताफल

नावल्पाक्काभिजनश्रीनृसिंहतातार्यमहादेशिकचरणारविन्दपरागपरमाणु

रामानुजसिद्धान्तभास्कर - देशिकदर्शनधुरन्धर

अय्या श्रीदेवनाथताताचार्यविरचितया

न्यायवासनया

व्याख्यया समेतः

प्रकाशकः

श्रीमदण्णयार्यमहादेशिकविद्वत्सभा

श्री. नावल्पाक्कम् पोस्ट्, वन्दवाशि

सिद्धार्थी कटक आर्द्रा]　　१९७९　　[मूल्यम् रू. २५

श्रीः

NYĀYAKUSUMĀÑJALI

BY

UDAYANĀCĀRYA

with a commentary

NYĀYAVĀSANĀ

BY

Rāmānuja Siddhānta Bhāskara Deśikadarśana Dhurandhara
Tirumalai Chaturveda Śatakratu Navalpakkam
AYYA DEVANATHA TATACHARYA

INTRODUCTION

BY

Dr. V. VARADACHARYA
Retired Professor of Sanskrit, S. V. University, Tirupati.

Published by

Srimadannayaryamahadesika Vidvatsabha
Navalpakkam P.O. Vandavasi N.A.Dt., Tamil Nadu.

July 1979

Copies can be had of :

Sri K. S. PADMANABHACHARIAR
"GOKULAM"
Dandeeswara Nagar Main Road, Velacheri,
Madras-600 042.

KANAKAMBUJAM SRINIVASAN TRUST
35, Sannadhi Street, Kancheepuram-3.
Tamil Nadu.

~~Price Rs. 25/-~~
PRICE - Rs. 30/-

Printed at the Rathnam Press, 41, Badrian Street, Madras-600 001.

Publishers Note

The publishers have great pleasure in placing before the general public, the new edition of "Udayana's Nyaya Kusumanjali" with "Nyaya Vasana" the rare commentary of Navalpakkam Sri Ayya Devanathatatacharyaswamy. The task of bringing out the present edition was originally contemplated by "Navalpakkam Sri Ayya Devanatatatatacharyaswami Sathabhisheka Celebration Committee" in the year 1976. On the request of the above committee to publish the edition with a donation of Rs. 2000/-. We undertook the task which has been completed successfully. In this connection we acknowledge with gratitude the spontaneous financial assistance rendered by Sri S. D. Srinivasachariar through the Kanakambujam Srinivasan Trust in bringing out this publication by meeting the whole of balance cost.

We beg to express our indebtdeness to Navalpakkam Sri Ayya Devanathatatacharyaswamy for granting permission to publish the rare commentary and for giving valuable suggestions in the course of preparation of this edition.

Our profound thanks are due to Dr. V. Varadachari, Retired Professor of Sanskrit, S. V. University, Tirupathi for his introduction in English and to Dr. N. S. Ramanujatatacharya, Professor, Kendriya Sanskrit Vidyapeeta, Tirupathi for editing this work. We also acknowledge with thanks for the services rendered by Kothimangalam Sri K. S. Padmanabhacharya Siromani for his earnest cooperation in bringing out this edition.

We also thank Veerapuram Sri V. R. Venkata Deekshidar Siromani and Dr. K. E. Govindan for preparing the press copy of this work in a nice manner. Our thanks are also due to Orathi Sri V. G. Rangacharya Siromani, and Navalpakkam Sri N. V. Ramanujacharya Siromani for proof reading and valuable guidance.

Finally we thank the "Rathnam Press" G. T. Madras for their earnest co-operation in printing the book in time.

Navalpakkam,
16—7—79.

Srimadannayaryamahadesika,
VIDVATSABHA.

॥ श्रीः ॥

श्रीमते श्रीनिवासपरब्रह्मणे नमः

उपोद्घातः

करिशैले विरिञ्चेन परिचर्यार्थिनाऽर्चितम् ।
गिरिशादिसुराधीशं हरिमाहुर्महेश्वरम् ॥
इह त्वदृष्टाधिष्ठाता गीतावक्ता कृतागमः ।
अबाधितः प्रमातैव प्रमाणैरीश्वरो मतः ॥

विदितमिदं सर्वेषामेव विदुषां यत् न्यायाचार्यसमाख्याविख्यातप्रतिभाविभवः श्रीमानुदयनाचार्यः दुस्तरसंसारदुःखमूलं देहात्मभ्रमं विनिवर्तयितुं आत्मतत्त्वविवेकं, स्वतन्त्रात्मभ्रमं च उन्मूलयितुं कुसुमाञ्जलिग्रन्थं च प्रणिनायेति ।

स च ग्रन्थः प्रौढमनोहरसङ्ग्रहविस्तरावबोधिकारिकावाक्यगुम्भगम्भीरः झटित्यर्थावबोधाजननेऽपि सुमनसां कथञ्चिदर्थावबोधसपादनप्रवृत्त्युत्तम्भकः परमात्मनिरूपणार्थं प्रवृत्तोऽपि न्यायग्रन्थान्तरोक्तसकलार्थानामेव प्रायशः प्रसङ्गात् व्युत्पादनपरः प्रायेण सर्वैरादरणीय एव जागर्ति । तत्रादौ "स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः । यदुपास्तिमसावत्र परमात्मा निरूप्यते" इत्यभिधाय, अनन्तरं "न्यायचर्चेयमीशस्य मनन व्यपदेशभाक् । उपासनैव क्रियते श्रवणानन्तरागता" इति ईश्वरस्य परमात्मनः निरूपणं प्रतिज्ञातम् । यद्यपि ईश्वरव्यक्तिविशेषः विशेषरूपेण अत्र ग्रन्थे कुत्रापि न निर्दिष्टः, प्रत्युत उपक्रमे

"यं कमपि पुरुषार्थमर्थयमानाः शुद्धबुद्धस्वभाव इत्यौपनिषदाः, आदिविद्वान् सिद्ध इति कापिलाः, क्लेशकर्मविपाकाशयैरस्पृष्टः निर्माणकायमधिष्ठाय संप्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः, लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः, शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, यज्ञपुरुष इति याज्ञिकाः, सर्वज्ञ इति सौगताः, निरावरण इति दिगम्बराः, उपास्यत्वेन देशित इति मीमांसकाः, लोकव्यवहारसिद्ध इति चार्वाकाः, यावदुक्तोपपन्न इति नैयायिकाः । किं बहुना,

कारवोऽपि यं विश्वकर्मेत्युपासते, तस्मिन्नेवं जातिगोत्रप्रवरचरणकुलधर्मादिवत्,
आसंसारं प्रसिद्धानुभावे भगवति भवे सन्देह एव कुतः"

इति वाक्यभङ्ग्या सर्वदेवतातादात्म्यमेव अभ्युपगतमिव प्रतिभाति ।

यदि, "यद्यद्विभूतिमत्सत्वं" इत्युक्तरीत्या सर्वत्रेश्वरावेशेनापि तदुपपद्यते, तथोक्तमत्रैव पञ्चमस्तबके 'सर्वावेशनिबन्धनश्च सर्वतादात्म्यव्यवहार इति' इत्युच्यते, तथापि परमात्मव्यक्तिविशेषासाधारणशब्देन निर्देशमन्तरेण कथं परमात्मव्यक्तिविशेषनिर्णयस्स्यात् । निर्णयाभावे निरूपणस्य किं प्रयोजनम् । भवादिशब्दसत्त्वेऽपि सर्वेषां प्रागुदाहृतानां साधारण्याय योगार्थमात्रपरत्वावधारणात, न तेन निर्णयस्स्यात् । अग्रेऽपि विशेषनिर्देशः न दृश्यते ।

तथाहि—कार्यवर्गस्य कादाचित्कतया नियतजातीयतया क्रमिकतया विचित्रतया च नियतानेकक्रमिकविचित्रावधिमत्त्वं, आशुतरविनाशिनां यागादीनां कालान्तरभाविफलसाधनत्वोपपत्तये अदृष्टस्यापि हेतुत्वं, तस्य च भूतधर्मत्वे भोगव्यवस्थानुपपत्त्या भोक्तृपुरुषधर्मत्वं च निरूप्य, प्रसङ्गात् भूतधर्मतया सहजाधेयशक्तिकल्पनं साङ्ख्यमतक्षणभङ्गादिकं च निराकृत्य, अदृष्टस्य अचेतनतया तदधिष्ठानाय तद्दर्शनक्षमः जीवातिरिक्तः चेतनविशेषः स्वीकरणीयः इत्येतावदेवोक्तं प्रथमस्तबके ।

द्वितीये च ईश्वराभावेऽपि अदृष्टव्यवहारः नित्यनिर्दोषवेदमूलकः योगसिद्धमूलको वा भवितुमर्हतीति अन्यथासिद्धिशङ्कायां वेदे प्रामाण्यनिश्चयं विना तन्मूलकव्यवहारायोगात् प्रामाण्यस्योत्पत्तौ ज्ञप्तौ च परतस्त्वसाधनेन वक्तृगुणापेक्षायां वक्तारमीश्वरं विना तदसंभवात् वर्णानामुत्पत्तिविनाशदर्शनेन अनित्यत्वात् तत्समुदायात्मकवेदस्य नित्यत्वासंभवात् सर्गप्रळयसाधनाच्च, सर्गादौ वेदस्य तन्मूलकव्यवहारस्य च कर्तुरन्यस्याभावात्, योगसिद्धेषु भ्रमस्यापि संभावनया समाश्वासाभावाच्च जीवविलक्षणः कश्चित् वेदकर्ता अभ्युपेय इत्येवोक्तम् ।

तृतीये तु प्रमाणबाधात् ईश्वरासिद्धिशङ्कायां योग्यानुपलब्धिविरहात् प्रत्यक्षस्य, आश्रयासिद्धिसाध्याप्रसिद्धिबाधादिदोषग्रासात् अनुमानस्य च न बाधकत्वम् । उपमानस्य संज्ञासंज्ञिसंबन्धमात्रविषयत्वात न बाधकत्वप्रसक्तिः । आप्तोक्तशब्दस्य प्रमाणत्वेऽपि वेदादौ ईश्वरनिषेधादर्शनात्, कर्तृनिषेधस्य अन्यपरत्वावश्यंभावाच्च न बाधकत्वम् । अर्थापत्त्यनुपलब्ध्योः स्वतन्त्रप्रमाणत्वाभावादेव न बाधकत्वप्रसक्तिः इत्युक्तम् ।

चतुर्थे पुनः ईश्वरज्ञाने प्रमालक्षणस्य अनधिगतार्थगोचरत्वस्याभावेन तस्य अप्रमात्वात् तद्वदीश्वरे परं कथं समाश्वासः संभवेत् इत्याशङ्कायां अनधिगतार्थगोचरत्वस्य धारावाहिज्ञाने अव्याप्तेः विपर्यये अतिव्याप्तेश्च न प्रमालक्षणघटकत्वम् । यथार्थानुभवत्वमेव च स्मृतिव्यावृत्तं प्रमालक्षणम् । तदीश्वरज्ञानेऽप्यक्षतम् । किञ्च द्विक्षणावस्थायिन्यां प्रमायां द्वितीयक्षणावच्छेदेन अधिगतार्थगोचरत्व-सत्त्वेन अप्रमात्वापत्तिवारणाय, समानाधिकरणातीतज्ञानानन्तराधिगतार्थगोचरं यत् तदन्यत्वस्यैव अनधिगतार्थगोचरत्वरूपताया वक्तव्यतया ईश्वरे ज्ञानान्तराभावेन तादृशज्ञानान्तरानधिगतार्थगोचरत्व-मप्यस्तीति निरूपिते ज्ञातताूपकार्यस्य तदभिज्ञपूर्वकत्वावश्यंभावेन ईश्वरज्ञानजन्यज्ञाततायां सत्यां तदभिज्ञानं, तदभिज्ञाने सति ज्ञातता इति परस्पराश्रयापत्त्या तद्वारणाय ईश्वरेऽपि ज्ञानान्तरं अभ्यु पेत्यमिति भाट्टाक्षेपे, ज्ञाततां ज्ञानस्य अतीन्द्रियतां क्षणिकतां च निरस्य, ईश्वरज्ञानस्य प्रमात्वं प्रतिष्ठाप्य, तत्समवायेन ईश्वरस्य प्रमातृत्वं तदयोगव्यवच्छेदेन प्रमाणत्वमपीत्येवोक्तम् ।

पञ्चमे स्तबके, प्रमाणाभावात् ईश्वरासिद्धिमाशङ्क्य, 'कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः । वाक्यात् सङ्ख्याविशेषाच्च साध्यो विश्वजिदव्ययः ॥' इति कारिकोक्तकार्यत्वादिलिङ्गकानुमाना-दिप्रमाणैः नित्येश्वरसिद्धिरित्येवोक्तम्, न तु कुत्रापि ईश्वरव्यक्तिविशेषनिर्देशपूर्वकं अयमेव ईश्वर इत्युक्तम् ।

तथापि ईश्वरे प्रमाणतया दर्शितानां अनुमानानां आगमसंवादप्रदर्शनावसरे उपनिषद्गीतावच-नानामेव उदाहरणात् गीतावचनस्थास्मच्छब्दवाच्यगीताचार्य एव परमात्मेत्याशयः प्रकाशितो भवति । अयमेवाशयः अन्ते च 'तदेनमेवंभूतं अधिकृत्य श्रूयते' इत्यारभ्य, शब्दप्रमाणस्यापि प्रदर्शनावसरे 'न द्रष्टुः दृष्टेः विपरिलोपो विद्यते' इति, एकमेवाद्वितीयं, इति, 'पश्यत्यचक्षुस्स शृणोत्यकर्णः, इति, 'यज्ञेन यज्ञमयजन्त देवाः' इति, 'यज्ञो वै विष्णुः' इति, 'मामेकं शरणं व्रज' मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु, मामेवैष्यसि युक्त्वैवं आत्मानं मत्परायणः' 'भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरं । सुहृदं सर्वभूतानां ज्ञात्वा मां शान्ति मृच्छति, इत्युपसंहारावसरे वेदवाक्येषु विष्णु-शब्दस्यैव, स्मृतिवाक्येषु गीताचार्येदंपरास्मच्छब्दस्यैव विशेषवाचकस्य निर्देशात् सामान्यविशेषन्याय-विदा स्फुटीकृतः ।

'अस्माकं तु निसर्गसुन्दरचिराच्चेतो निमग्नं त्वयि' इत्युक्तनिसर्गसुन्दरत्वमपि गीताचार्य-रूपस्यैव उपपन्नम् । 'दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ।' इति तद्रूपस्यैव सौम्य-

त्वाभिधानात्। तथा 'अमरेशगुरोर्गुरुस्तु प्रीतोऽस्त्वनेन पदपीठसमर्पितेन' इति सर्वान्तिमवचनेन देवेन्द्रगुरोः ब्रह्मणोऽपि 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इत्युक्तरीत्या गुरुः विष्णुरेव प्रीतो भवत्विति प्रार्थनया गीतोपदेष्टा विष्णुरेव परमात्मेति यथाप्रतिज्ञं सम्यगेव निरूपितं भवतीति न किञ्चिदपहीनम्।

न्यायग्रन्थान्तरेषु उक्तानां सर्वेषां अर्थानां अत्र प्रायशः निरूपणमस्ति। अनुक्तानामपि प्रतिबन्धकोपाधिपदविधिप्रत्ययाद्यर्थानामपि अत्र विशदं प्रतिपादनं अधिकं अस्ति। तस्मात् अस्य ग्रन्थस्य सम्यगुपस्थितौ सत्यां न्यायग्रन्थान्तराणां अपठनेऽपि न हानिः इत्यपि वक्तुं शक्यम्। ग्रन्थस्यास्य शैली विस्मयनीया। असकृत् पठतामपि पुनः पुनः पठनीयेति बुद्धिमादधाति। न्यायभाष्यादिवत् अस्य काठिन्याभावेऽपि नवीनग्रन्थवत् अतिसुगमत्वाभावात् व्याख्यानापेक्षा अस्त्येव। सन्ति बहूनि व्याख्यानानि, तथापि तेषामतिविस्तृतत्वात् क्वचित् मूलस्थपदानामेव केषांचित् अर्था नाधिगन्तुं शक्यन्ते। एवं स्थिते पञ्चाशतो वत्सरेभ्यः प्राक् न्यायशिरोमणिपरीक्षोचितविद्यार्थिभिः अर्थितेन मया गृह एव कुसुमाञ्जलिप्रवचनमसकृत् कृतमासीत्। तदानीं प्रतीकग्रहणपूर्वकं मूलस्थपदानां अनतिविस्तरं विवरणं अस्ति चेत्, उपकारकं स्यादिति केषांचिदाशयं अनुरुध्य न्यायवासनाभिधानं इदं व्याख्यानं क्वचित् मूकप्रतीकेन, क्वचित् इतिकरणान्तेन प्रतीकेन पदानां वाच्यार्थतात्पर्यप्रकाशकं अनतिविस्तृतमेव मया कृतम्। तत्र प्रायेण प्राचीनव्याख्यानान्येवानुरुध्यन्ते। क्वचित् क्वचित् स्वातन्त्र्यमेवावलम्ब्यते। दुर्ग्रहानुगमपरिष्कारादिकं नाधिकमाद्रियते। व्युत्पित्सूनां अधिकमायासमन्तरेण अर्थबोधः स्यादिति मन्ये। तदेतावत्पर्यन्तं अमुद्रितमेव कुशललिखितबहुपुत्रिकं लब्धजीवितमासीत्। सन्निहिते समये द्वित्रवर्षेभ्यः पूर्वमेव शताभिषेकसमित्या अर्थप्रदानपूर्वकं आरब्धमुद्रणं इदानीमेव मुद्रणपरिपूर्त्या सुवर्णगणपरिभूषितं बहिः प्रकाशनक्षमां अवस्थां अवगाहत इति विदुषां परितोषावहमेव। अस्य मुद्रणोपयुक्ततया प्रतिलेखनेन चि. वेंकटदीक्षितेन चि. गोविन्देन च बहूपकृतं न विस्मर्तुं शक्यम्। मुद्रणसमयसमापतिताशुद्धिशोधनभरः श्रीपदपुरविद्यापीठाधिकृतेन चि. रामानुजेन सम्यक् निर्व्यूढः। तदुचितप्रत्यवेक्षणादिकमन्यत्सर्वमपि मुद्रणालयसमीपवासिना चि. पद्मनाभेन विनानवधानं कृतमेव। अथापि समापतितानां अशुद्धीनां शोधनाय शुद्धाशुद्धपत्रिकामपि योजयितुं प्रवृत्तिरस्ति। सर्वेषामेषां सर्वाणि मङ्गळान्यनुगृह्णन् श्रीनिवासः सर्वेश्वरः प्रसीदतु इति।

व्याख्याता

॥ श्रीः ॥

प्रस्तावना

शठक्रतुकुलाराध्यचतुर्वेदशिरोमणिम् ।
श्रिया गिरौ समाश्लिष्टं श्रीनिवासं भजामहे ॥

श्रीशैलवंशकलशाम्बुधिपूर्णचन्द्रं
श्रीमन्नृसिंहगुरुवर्यकृपात्तविद्यम् ।
अन्तेवसद्बुधगणेड्यपदारविन्दं
श्रीदेवनाथगुरुमन्वहमानतोऽस्मि ॥

विदितचरमिदं समेषां विदुषां यत् न्यायाचार्य इति सबहुमानं कीर्त्यमानैः सर्वतन्त्रस्वतन्त्रैः श्रीमदुदयनाचार्यैः विरचितः न्यायकुसुमाञ्जलिनाम ईश्वरास्तित्वस्थापनैदम्परः प्रबन्धः प्राचीनन्याय-शास्त्रार्णवमथनसमुद्भूतः नवीनन्यायशास्त्रनिर्माणमार्गप्रदर्शकः सकलतार्किकविद्वद्वरैः शिरसा श्लाघ्यमानः शब्दतः अर्थतः शैल्या चानितरसाधारणो विराजत इति । अयं हि प्रबन्धः—

'न्यायचर्चेयमीशस्य मननव्यपदेशभाक् ।
उपासनैव क्रियते श्रवणानन्तरागता ॥'

इत्युक्तरीत्या श्रुतस्येश्वरस्य मननरूपेण प्रवृत्तः ईश्वरसाधने प्रधानतात्पर्यवानपि प्रसङ्गात् कार्यकारण-भावः, अदृष्टं, प्रामाण्यं, शब्दानित्यत्वं, वेदपौरुषेयत्वम्, पदानां विशिष्टे शक्तिः, षट्प्रमाणविवेचनम्, प्रमालक्षणम्, ईश्वरस्य प्रमाणत्वम्, अशरीरस्येश्वरस्य जगत्कर्तृत्वम् आप्ताभिप्रायस्य विध्यर्थत्वम् इत्यादीन् प्रमेयान् असाधारणयुक्तिजालैः निरूपयन् तत्र विषये बौद्ध-सांख्य-मीमांसकादीनां सिद्धा-न्तांश्च अनूद्य धूनयन् बहूपकरोति शास्त्रमर्मजिज्ञासूनां विदुषाम् । तत्कालादृतया अधुना अति-प्रौढया शैल्या गुम्फितोऽयं ग्रन्थः प्रतिपङ्क्ति अवतरणविवरणादिरूपव्याख्यानापेक्षां विना दुर्बोध इति प्रसिद्धं पण्डितसमाजे । अतोऽस्य सुबोधतासम्पादनाय प्राक्तनैरनेकैर्विद्वद्भिः प्रकर्षेण येते, व्याख्यानानि चानेकानि निर्ममिरे । तानि यथा—

(1) श्रीवरदराजप्रणीता बोधनी

(2) वर्धमानोपाध्यायकृतः प्रकाशः

(3) उपस्कारकृता श्रीशंकरमिश्रेण विरचितः आमोदः

(4) श्रीगुणानन्दविद्यासागररचितः विवेकः

इत्यादीनि । एतेषां व्याख्यानानामपि प्रौढत्वात् कालमहिम्ना अहरहरपचीयमानज्ञानशक्तीनां नैतैर्व्याख्यानैरतीवोपकार इत्याशयानाः अधुनातना विद्वांसोऽपि नैकविधानि व्याख्यानानि व्यरचयन् । तानि च यथा—

(1) तर्कार्णव-पण्डितरत्नेत्यादिविरुदालंकृतैः शताधिकग्रन्थग्रथनविख्यातैः उत्तमूरुवीरराघवाचार्यैः कृतः विस्तरः

(2) कस्तूरि सोमशेखरशास्त्रिकृतः आमोदः

(3) महामहोपाध्याय श्रीहरिहरकृपालुद्विवेदिविरचितः परिमलः

इत्यादीनि । तेषु अधुना प्रकाश्यमानं रामानुजसिद्धान्तभास्करैः पदवाक्यप्रमाणपारावारीणैः तिरुमलै चतुर्वेदशतक्रतु-तावरबाकम्, अय्या देवनाथताताचार्यैः प्रणीतं न्यायवासनाभिधानं व्याख्यानमिदमप्यन्यतमम् ।

प्रकृतव्याख्याकारपरिचयः

एते ह्याचार्याः 'विंशत्यब्दे विश्रुतनानाविधविद्यः' इति देशिकोक्तरीत्या विंशत्यब्द एव वेदाध्ययनेन सह न्यायमीमांसावेदान्तशास्त्रग्रन्थान् अधीत्य महीशूरादिराजसभासु परीक्षां दत्त्वा उत्तनतयोत्तीर्णाः बाल्यात् प्रभृति अद्य पर्यन्तं प्रायः षष्टिवर्षैः स्वसमीपमुपगतान् छात्रान् विदुषश्च न्यायमीमांसादिसामान्यशास्त्राणि वेदान्तशास्त्रं चाविच्छेदेनाध्यापयन्तीति प्रत्यक्षमीक्षामहे । अनध्ययनतिथीर्वर्जयित्वा इतरासु सर्वासु तिथिषु प्रातरध्यात्मशास्त्रं सायं सामान्यशास्त्राणि च यः कश्चिदेतेषां सविधे यथावदधीयान एवास्तीति वैशिष्ट्यमेतेषां विख्यातचरम् । पुस्तकावलोकनं विनैव सर्वान् ग्रन्थानध्यापयन्ति । तादृशी ग्रन्थोपस्थितिरेतेषाम् । अतिदुरूहानपि विषयान् स्वयमनायासेन पाठयन्ति शिष्या अप्यनायासेन गृह्णन्ति । तादृशमध्यापनचातुर्यममीषाम् । सावधानं कश्चिदेतेषामध्यापनं शृणोति चेत् तथैव चित्ते अध्याप्यमानो विषयः संलग्नो भवति, न कदापि विस्मरणपथमुपयातीत्यनुभवैकवेद्यं मादृशस्य जनस्य । पक्षिणामिव मानवस्य द्विजस्य द्वौ पक्षौ स्तः ज्ञानमनुष्ठानं चेति । अनयोरन्यतरः पक्षः विकलश्चेत् नास्ति मानवस्योर्ध्वगमनशक्तिः । एतत्पक्षद्वयमपि आबाल्यादविकलमेवानुवर्तत इति

वैशिष्ट्यमेतेषाम् । विशिष्य चाचार्यपीठमलंकुर्वाणानां आचार्यसार्वभौमानामपेक्षिताः कामक्रोधलोभ-मदमात्सर्यादिराहित्यं दयालुता स्मयमानमुखाम्बुजत्वम् वात्सल्यम् इत्यादयो गुणाः एतेषु सर्वदा प्रकाशमानाः सर्वानावर्जयन्ति । वृद्धतमा एते अधुनापि प्रातश्चतुर्वादनात् प्रागेवोत्थाय भगवन्नाम-स्मरणादिपूर्वकं उदयोपस्थानमनुष्ठाय औपासनादिक्रमेण पञ्चकालप्रक्रियया भगवन्मुखोल्लासकराणि चोदि-तकर्माण्यनुतिष्ठन्तीत्यहो भाग्यम् अस्मिन् वर्धमाने कलावपि आचार्योत्तमान् एतान् सेवमानानां जनानाम् । क्रमबद्धेनानुष्ठानेन अध्यापनेन च सर्वं कालमवन्ध्ययन्त एते शिष्यजनानुजिघृक्षया कानि-चित् ग्रन्थरत्नान्यपि निरमासुः । तेषु न्यायवासनाभिधानं कुसुमाञ्जलिव्याख्यानमिदमप्येकतमम् ।

प्रकृतव्याख्यानोद्देश्यम्

प्रायः त्रिंशद्वर्षेभ्यः पूर्वं यदा दासोऽहम् एतेषां सविधे न्यायशास्त्रमधीयमान आसम्, तदा एकस्मिन् दिने दासमाहूय इत्थम् अन्वग्रहीषुः—"अतिप्रौढस्य कुसुमाञ्जलेः सत्स्वपि प्राक्तनेषु व्याख्यानेषु, बहुषु स्थलेषु तैर्बोधो वा सन्देहनिराकरणं वा न भवति । अतो मयैकं व्याख्यानमधुना चिकीर्ष्यते । तदर्थं पुस्तिकाः आपणादानीयन्ताम् । तत्र प्रतिपृष्ठपन्ते षट् सप्त वा रेखाः वर्जयित्वा इतरासु रेखासु कुसुमाञ्जलिमूलं भवता विलिख्यताम् । अधस्तनरेखासु टिप्पणीरूपं व्याख्यानं मया लिख्यते" इति । दासेनापि आचार्याज्ञानुसारं मूलं विलिख्य दत्तम् । तदानीं विषमस्थलटिप्पणीरूपं व्याख्यानमेवाचार्यैः संकल्पितमासीत् । व्याख्यानलेखनारम्भानन्तरं तु प्रतिपङ्क्ति अवतरणं विवरणं च अपेक्षितमिति स्वामिनां प्रत्यभात् । परं तु पुस्तिकायां अपेक्षितस्थलाभावात् अधस्तात् पार्श्वे च यावत् स्थलं वर्तते तावत्येव तत्तत्पृष्ठस्थमूलव्याख्यानसमापनं कार्यमिति निर्बन्धात् व्याख्यानसंकोचः अवर्जनी-योऽभूदिति पुस्तिकानां दर्शनेन ज्ञातुं शक्यते । अधुना तु दासेन खिन्नेनानुतप्तेन च भूयते यत् तदानीं आचार्याज्ञामनुसरतापि दासेनानुचितमेव कृतमिति । यदि तु मूललेखनार्थं पञ्चषरेखा उपयुज्य अवशिष्टा रेखाः व्याख्यानलेखनार्थं व्यसृक्ष्यन्त तदा व्याख्यानं विपुलमकरिष्यत आचार्यैः । परं तु यावत् आचार्यैः व्याख्यानं लिखितं तावदपि सावधानमवलोकयतां विदुषां स्पष्टमेव भविष्यति एतेषां वैदुष्यम्, सरलया शैल्या प्रतिपादनशक्तिः, कुसुमाञ्जलिगूढार्थवेदित्वम् इत्यादिकम् ।

व्याख्यानस्था विशेषाः

व्याख्यातुः कौशलस्य पाण्डित्यस्य च निकषायमाणानि बहूनि स्थलान्यत्र व्याख्याने सन्ति । तेषु कानिचित् स्थलानि अत्र निदर्श्यन्ते ।

(1) 'सत्पक्षप्रसरः' इत्यादि प्रथमश्लोकेइष्टदेवताकीर्तनरूपं मङ्गलमाचरितमिति प्राक्तनैर्व्याख्यातम्। अनेन ईश्वररूपवस्तुनिर्देशात्मकं मङ्गलं कृतमिति तेषामाशयः प्रतीयते। प्रकृतव्याख्याकारैः—"ईश्वरपदयुगसमर्पणार्थमिह कुसुमाञ्जलित्वारोपो न्यायनिबन्धनस्य नाम्ना अभिव्यज्यते। तेन नमस्क्रिया, रमयत्वित्यनेन आशीः, ईशस्येत्यनेन न्यायेत्यनेन वा वस्तुनिर्देश इति त्र्यात्मकमिदं मङ्गलम्" इति आशीर्नमस्क्रियावस्तुनिर्देशात्मकमङ्गलत्रयानुष्ठानमुपपादितमिति विशेषः।

(2) तत्रैव श्लोके 'अनघः' इति पदेन प्रतिपादितं दोषराहित्यमेव सत्पक्षप्रसर इत्यादिना विवृतमिति पूर्वैर्व्याख्यातम्। आचार्यैस्तु तथा सति अनघपदवैयर्थ्यप्रसङ्गमालोचयद्भिः 'अनघ इति निग्रहस्थानादिदोषराहित्यं विवक्षितम्' इत्युक्तम्। तेन पूर्वार्धे यादृशदोषराहित्यं नोक्तं तादृशदोषराहित्यमनघपदेनोच्यते। अतो न वैयर्थ्यमिति विशेषो लभ्यते।

(3) आधेयशक्तिनिराकरणावसरे 'देवताः संनिधानेन प्रत्यभिज्ञानतोऽपि वा' इति कारिकांशो वर्तते। प्रतिमादौ प्रतिष्ठातः पूर्वं पूजनतदभावाभ्यां न धर्माधर्मौ, प्रतिष्ठानन्तरं तु पूजनतदभावाभ्यां धर्माधर्मौ इत्येतत् प्रतिष्ठाधेयशक्त्यनभ्युपगमे कथं संगच्छत इत्याशङ्कासमाधानार्थमयं कारिकाभागः प्रवृत्तः। देवता इत्यत्र आराधनीयतामासादयन्तीत्यध्याहार्यम्। प्रतिमाद्यभिमानिन्यः देवताः प्रतिष्ठादिकृतसंनिधानेन आराधनीया भवन्ति इति तदर्थः प्रकाशे उक्तः। परं तु प्रत्यभिज्ञानतः इत्यत्र प्रतिमादय इत्यध्याहृत्य भावो वर्णनीयः। यतः पूजितत्वादिप्रत्यभिज्ञाविषयत्वं प्रतिमादीनामेव न तु तदभिमानिदेवतायाः इति प्रतिमादयः प्रत्यभिज्ञानतः आराधनीयाः भवन्ति इति भावो वर्णनीयो भवति। तत्र अध्याहारद्वयं, संनिधानेन आराध्यत्वं देवतायाः प्रत्यभिज्ञया आराध्यत्वं प्रतिमादीनामिति वैरूप्यं चेति क्लेशोऽस्ति।

बोधनीकारास्तु 'देवतानां संनिधानादाराधनीयाः प्रतिमादयः' इति वदन्तः देवतासंनिधानेनेति निर्विसर्गपाठमाश्रयन्तः प्रतिमादयः देवतानां संनिधानेन वा प्रत्यभिज्ञया वा आराधनीयतामासादयन्तीति व्याचक्षते। एतत्पक्षे यद्यपि वैरूप्यं नास्ति, तथापि 'प्रतिमादयः' इति 'आराधनीयतामासादयन्ति' इति चाध्याहर्तव्यमिति क्लेशोऽस्ति।

आमोदकाराः शंकरमिश्रास्तु 'प्रतिमादयस्तु देवता भवन्ति पूजनीयतामासादयन्तीत्यर्थः' इति व्याचक्षते। अत्र पक्षे प्रतिमादयः इत्यध्याह्रियते। 'आराधनीयतामासादयन्ती'ति तु नाध्याह्रियते। देवता भवन्तीत्यस्यैव तदर्थकत्वात् इति विशेषः।

न्यायवासनाभिधानप्रकृतव्याख्याकारास्तु लोके प्रतिमास्वेव देवताशब्दप्रयोगदर्शनात् देवता इति शब्दस्यैव प्रतिमादय इत्यर्थः । 'आराधनीयतामासादयन्ति' इत्येतावन्मात्रमध्याहार्यमिति व्याख्यानं कुर्वन्तीति वैलक्षण्यं द्रष्टव्यम् ।

(4) तत्रैव 'घटादिषु का वार्ता, कुशलैवेति चेन्न' इत्यादिवाक्यस्य धर्मशास्त्रवचनाद्युदाहरणपूर्वकं व्याख्यानप्रकारः नूतनः चमत्कृतिमादधाति ।

(5) तृतीयस्तबके (पृष्ठ. 124) 'एतेन दृष्टासंनिकृष्टप्रत्यभिज्ञानं व्याख्यातम्' इत्यादिकुसुमाञ्जलिसंदर्भस्य पूर्वव्याख्यानापेक्षया विलक्षणं 'वस्तुतस्तु' इत्यादिना एतैः कृतं व्याख्यानं विद्यावतां मोदाय कल्पते ।

(6) तत्रैव (पृष्ठ. 158) 'अस्ति च भावाभावविपर्ययः' इत्यादिसंदर्भस्य भावेऽभावभ्रम इत्यर्थं मनसिकृत्य व्याख्यानं पूर्वैः कृतम् । प्रकृतव्याख्याकारैस्तु 'अत्राभावोऽस्ति स नास्तीत्याकारकः अभावे सत्त्वासत्त्वभ्रम इत्यर्थः' इत्यादिना नूतना व्याख्यानरीतिराद्दतेति विशेषो दृश्यते ।

इत्थं स्थालीपुलाकन्यायेन कतिपयस्थलानि प्रदर्शितानि । 'इत्थं विचिन्त्याः सर्वत्र भावाः सन्ति पदे पदे' इति रीत्या सावधानं दृष्ट्वा अवगन्तव्याः विशेषा बहवः सन्ति अस्मिन् व्याख्याने । अन्यदत्र वक्तव्यं आङ्गलोपोद्घाते डाक्टर वे. वरदाचार्यैः विस्तरेणोक्तमिति नेह वितन्यते ।

बहोः कालात् पूर्वमेव आचार्यैः स्वहस्तेन ग्रन्थलिप्यां लिखितस्यास्य ग्रन्थस्य देवनागरलिप्यां विद्वद्वरैः वीरापुरं वेङ्कटदीक्षितैः प्रतित्रयं लिखितमासीत् । अनन्तरं स्वामिनामन्तेवासिना डाक्टर के. इ. गोविन्दमहाशयेन मुद्रणोपयोगिनी प्रतिलिपिः सज्जीकृता । स्वामिनां शताभिषेकसमारोहार्थं 1976 तमे वत्सरे उपकल्पितया सभया एतद्ग्रन्थप्रकाशनार्थं सहस्रद्वयरूप्याणि दत्तानि । तानि मूलत्वेन गृहीत्वा अवशिष्टमपेक्षितं सर्वमपि धनं 'कनकाम्बुजं श्रीनिवासट्रस्ट्' द्वारा श्रीमद्भिः S. D. श्रीनिवासाचार्यैः दापयित्वा ग्रन्थोऽयं मुद्रापितः प्रकाशितश्च । एते हि श्रीनिवासाचार्याः लौकिके उत्तमपदे स्थितवन्तः भगवद्भागवतभक्ताः परया श्रद्धया अनेकविधानि कैंकर्याणि कुर्वन्तः प्रकृतव्याख्याकारस्वामिपादानां पदपद्मयोः निरतिशयभक्तिमन्तः न्यस्तभराश्च विराजन्ते । एतद्ग्रन्थप्रकाशनार्थं तैः कृतस्योपकारस्य कृते हार्दी कृतज्ञता निवेद्यते । अस्य ग्रन्थस्य प्रकाशनविषये श्री K. S. पद्मनाभाचार्याणां महोपकारः न विस्मर्तुमर्हति ।

अस्य ग्रन्थस्य आङ्गलभाषायां यदि कश्चित् उपोद्घातो लिख्येत तर्हि विदेशीयानां भाषान्तरविदुषां च महानुपकारः कृतः स्यादिति पर्यालोच्य श्रीवेंकटेश्वरविश्वविद्यालयस्य भूतपूर्वसंस्कृतप्राध्यापकाः डाक्टर वे. वरदाचार्याः भूमिकालेखनार्थं प्रार्थिताः। अस्मत्प्रार्थनामङ्गीकृत्य तैः आङ्गलभाषायामुपोद्घातो विलिख्य दत्त इति तदर्थं तेभ्यः हार्दिकी कृतज्ञता प्रकाश्यते ।

अस्य ग्रन्थस्य प्रतिलिपिकर्त्रोः वीरापुरं वेंकटदीक्षितडाक्टर्गोविन्दयोः धन्यवादाः वितीर्यन्ते। वार्धक्यहेतुना एतद्ग्रन्थशोधनभरः दासे निवेशितः स्वामिचरणैः। यथामति विषयसूच्यादिनिर्माणपूर्वक मुद्रितपत्रशोधनादिकं दासेन कृतम्। अनवधानतः मुद्रकदोषाच्च संजाताः अशुद्धयः शोधनिकायां शोधयित्वा प्रदर्शिताः। एवं सत्यपि ये केऽपि दोषा यदि स्युः तर्हि तानपि विद्वांसः शोधयित्वा पठेयुरिति प्रार्थ्यन्ते ।

दक्षिणप्रान्ते देवनागरलिप्यां मुद्रणार्थाः संस्थाः अतीव विरलाः। अत एव कस्यचित् ग्रन्थस्य मुद्रणे महान् कालविलम्बो जायते। सत्यप्येवं यथानिर्देशं समुचितकाले ग्रन्थस्यास्य समीचीनया रीत्या मुद्रणं कृतवद्भ्यः मद्रपुरीस्थरत्नमुद्रालयाधिकृतेभ्यः कृतज्ञता सादरं निवेद्यते ।

इति विद्वज्जनविधेयः
स्वामिपादपद्मपरागपरमाणुश्च
एन्. एस्. रामानुजताताचार्यः
प्राध्यापकः
केन्द्रीयसंस्कृतविद्यापीठम्
तिरुपति

16-7-79
तिरुपति

|| श्रीः ||

INTRODUCTION TO NYĀYAKUSUMĀÑJALI

It is hardly possible to trace the origin of the idea of God as far as the Indian religion is concerned. Speculations have been there to trace this to the presence of worldly sufferings from which man has been seeking the means to escape. The systems of Jainism, Buddhism, Vaiśeṣika, Nyāya and Sāṃkhya have been laying stress on the worldly sufferings and also suggested the means to get rid off them. All these however prescribed the knowledge of reality (*tattvajñāna*) as the most effective weapon to undermine the influence of worldly sufferings and finally extirpate them. It seems however that this explanation does not deserve acceptance, since the first two systems of thought mentioned above came into being very late when compared to the other three, which too are of late origin.

The *Vedas*, which are the fountain source of knowledge as such, have been looked upon as the basis of all thoughts including those of the three schools mentioned above. They are of highly remote antiquity. Modern researches have only touched the outer fringes of the Vedic literature and as such have not been able to determine the exact nature of their contents with any fair degree of certainty acceptable to one and all yet, the *Vedas* alone have to be looked upon as providing us with the necessary materials to arrive at the nature of God.

With the limited knowledge we have of what the *Vedas* convey, it is not possible to declare that the idea of God arose out of man's realisation that God alone would relieve him of his sufferings. The only conclusion that could be drawn is that the *Vedas* contain irrefutable references to the appearance of deity before the seers (*Ṛṣi*) who extolled it, conveying their joy, and appealing for a safe and healthy life for themselves and their progeny. There are also unmistakable references to show that they prayed for remedies from diseases, and dangers of all kinds. It is also evident that the deity was propitiated by them through the performances of rituals in which they offered what they had to it. Performance of sacrifices, repeating *Mantras* in honour of the deities and meditating upon them marked the way of life not only of those seers but also of the eminent persons who succeeded them inheriting their rich traditions. This could be taken to have been meant by the name *Sanātanadharma* which was zealously pursued by people for generations.

Along with such people, there came into being also a group of people, who could not have had their aspirations fulfilled. They little realised that what was prescribed and practised by the ancient men was flawless and was bound to yield the intended result and that, if at one stage or other, the result was not forthcoming, the cause for it should be traced to the short comings, lapses and defects both in the mental set up of men who adopted those means and in the materials and methods of employing them to gain their ends. Frustration became then the result which such disappointed persons experienced. They tried to shift the blame for the failure in their undertakings from their own selves and means and methods of performing the rituals to the *Vedas*, principles of ceremonials and the idea of God. Denouncing for these the authority which they enjoyed from the most ancient times, these persons began to question the authority of the *Vedas*, condemn the ritualistic practices as fruitless exercises and advance arguments to prove that God does not exist at all.

There arose thus two sides taking the issues for maintaining them with all the logical methods that could be adopted. It can rather be said that there were not the two sides but many sides, most of which were seeking to establish each one of the three problems, that is, *Vedas*, rituals and God both on the offensive and defensive aspects. There were several thinkers, as individuals and also in groups who got involved in solving these problems. It is only in the later periods that the prima facie view, and conclusions were set forth in the form of sūtras which formed the basis for the rise and development of darśanas, which are called systems of thought.

Regarding the *Vedas*, it must be said that several problems were raised by the thinkers. The *Vedas* are eternal and infallible. They are valid in themselves. They are not of human origin. As opposed to this, the *Vedas* were treated as non-eternal and as valid only through some extraneous factor. They are the compositions of God. In holding quite a contradictory view, it was held that the *Vedas* are not valid at all and are unfit to be treated as authoritative.

On rituals, it is held that they are to be performed, as they derive the authority for performance from the self-valid *Vedas*. In order to get the results by performing them, care should be taken to follow the precepts and procedures as laid down in the Kalpasūtras for performing them. Failure in getting the results must be accounted for by the shortcomings, lapses and mistakes committed by the person performing them and by the ways and means of doing them which also should be perfect to yield the intended result. Authority of the Kalpasūtras, of the *Vedas* and of the practices of eminent pious men should not be questioned. On the

other side, it is held that the persons who undertake the performance of the rituals are learned, diligent, perfect in mind and body and have faith in theory and skilled in the practice of these. The performance also proceeds with thoroughness and exactitude. Yet, the results expected of are not forthcoming and it is not prudent to throw the blame on the performer. It is to be decided that energy, time and materials are wasted by men in performing these.

On the idea of God, it is contended that God is an embodiment of sympathy and is ever ready to meet man and grant his wishes. He has no friend or foe. By faith and devotion, He is accessible to man. His power and wisdom are all pervading and man is only a tiny particle in the vast, boundless and deep sea of the universe; ever under His control and guidance. He is the dispenser of justice and grants to man the fruits of his labours. Man is the architect of his fate and God who is won by man through devotion, sets the results of man's destiny in good order allowing them bear for him the fruits which He directs for him. On the other side, God's very existence is questioned. If God were there, if He were sympathetic to mankind and is the rewarder of the fruits to him who prays to Him, the cosmos would not be chaotic as we find it. Why did He create the world of utter disorder and confusion? If He is sympathetic, He should have created an orderly world and meet man knowing his sufferings. He should not remain still and unresponsive when man prays to Him for protection. The disappointments, failures and continued sufferings are enough proofs to realise His non-existence.

Several scholars had offered, in the early days, expositions of these theories, pre-supposing the prima facie view and offering their refutation of it leading to their conclusions. Not only does each problem gets treated as such but are shown to have several aspects. All these could be safely grouped under six heads, three of them directed against the *Vedas*, the rituals and the idea of God, and the other three in defence of and maintaining them.

Many of these doctrines became systematised and grouped under the common name Darśana which again had two broad divisions. One was called Nāstika which did not subscribe to Vedic authority. The materialistic school, Buddhism and Jainism came under this head. The other was called Āstika comprising six different schools under the names Sāṃkhya, Yoga, Vaiśeṣika, Nyāya, Mīmāṃsā and Vedānta; all admitting the authority of the *Vedas*.

The Mīmāṃsā and Vedānta systems have implicit faith in the *Vedas* which are valid in themselves and are not of human origin. The other four have faith in Vedic authority, grew and developed more as independent systems without serious allegiance to the *Vedas*. Similarly, the rituals were not of much value to these

four schools while they are of utmost importance to the Mīmāṃsa and Vedānta schools. Curiously enough, God, called by several names such as Brahman, Iśvara, Paramātmā and others, does not get any real treatment in the Sāṃkhya, Vaiśeṣika and Mīmāṃsā schools. He is given importance in the Yoga, Nyāya and Vedānta schools.

While taking the idea of God as it was developed from very early periods, it must be admitted that this idea got treated in the works of writers mainly to countenance the anti-God theories raised by the Buddhists and Sāṃkhyas and Mīmāṃsakas.

It may therefore be held that as far as the idea of God is concerned, it is necessary to study the anti-God theories so as to refute them and establish that idea on stable grounds. The chief opponents are the Buddhists, Sāṃkhyas, Carvākas and Mīmāṃsakas.

The Buddhists take the world as of momentary existence in the first instance and gradually maintain it to be void. Things go on in the world without the need for anybody to direct, guide and control it. Hence even human control is unnecessary and there is no need to admit God as the Supreme Reality.

The Sāṃkhyas believe in the evolution of matter. The evolutes become the world without any control by or direction of any being, including God. The Cārvākas, who are materialists. do not believe in the existence of anything sentient or insentient beyond the range of sensory perception. There cannot be the other world, even the self and so also God.

The Mīmāṃsakas, the real inheritors of the Vedic tradition, have much faith in the performances of the sacred rites enjoined by the *Vedas*. The *Mantras*, which are to be recited then, have much power in themselves that they could be looked upon as having the power to grant the fruits. There is thus no need to believe in the existence of God apart from *Mantras*.

The Yoga system of Patañjali, the Nyaya system and the Vedānta system have been advocating the idea of God, each in its own way. The system of Patañjali maintains God, as omniscient, the first and foremost preceptor and having the power, to remove the obstacles that lie in the path of meditation which an aspirant is expected to practise to achieve complete control over the activities of the mind and acquire, after death, isolation which consists in complete freedom from the effects of the worldly ills. The system however does not argue for the existence of God on grounds of reason or revelation nor is there any indication to suggest the prevalence of anti-God theories.

The Nyāya system adopts inference as the primary means of establishing God's existence. Ordinarily, it is held that the world, which undergoes change and have many things produced and destroyed, should have an agent. An agent is one who has direct contact with the atoms, the material cause of the world, has the desire or will to create the world out of them and the volition to do it. Ordinary selves cannot have this agency. Since there must be an agent, prudence requires us to admit that God alone could be that agent.

The Vedānta system has some schools, all of which admit the supreme being and self-valid Vedas. God's existence is to be proved only thorough the Vedas.

Treatment of God has not received any prominent place in treatises exclusively devoted for this purpose except the Īśvarasiddhi of Utpaladeva (950 A.D.) and Īśvarasiddhi of Yāmuna (916—1041 A.D.).

Turning to the treatment of God in the Nyāya system, many allied topics have relevance to the question of the idea of God. Such topics get treatment in the schools of Buddhism, Sāṃkhya, Mīmāṃsā, Nyāya and Vedānta. The important theories are those of momentariness, casual relation, existence of soul distinct from matter, Sāṃkhya theory of matter, Vedic authority, validity of pramāṇa, atomic theory and others.

In the Nyāya system, Gautama states that God is the cause, as human undertakings do not bear fruit. This does not mean that in such a case, no deed need be undertaken by man, for God alone bestows his favour on the man who does the work and grants the fruits to him.[1] This idea is developed in the Nyāyabhāṣya, Nyāyavārttika and Tātparyaṭīkā.

He is a trustworthy person for beings like father to son. He is free from defects like *adharma* and has a wealth of qualities like *dharma*. He is another self, superior to ordinary selves. He arouses activity in matter for the sake of man. He is beyond perception, inference and Āgama. So knowledge and other marks of the soul cannot prove Him. The Āgamas speak of Him as seer, knower and omniscient. If He does not bestow His favour, upon man who undertakes work, then such undertakings will not bear the result.[2]

Uddyotakara and Vācaspatimiśra developed the same idea further. It is the author of the Vārttika that started the argument in favour of God's existence on

1. *Nyāyasūtra*: 4.1,19–21.
2. Nyāyabhāṣya on *ibid.*

the basis of the Cosmological theory. Uddyotakara had to advance such arguments to refute the contention of the Buddhists who objected to God's agency for the world. He and Vācaspati following him did not attach significance to the need for bringing in the Vedic authority, as the opponents were only Buddhists.

Jayantabhaṭṭa also relies upon inference in admitting God's existence.[3] Bhāsarvajña states that God is to be known through inference and Āgama.[4] All the aspects regarding anti-God theories and protheistic theories are clearly and briefly treated by the author of the Nyāyabhūṣaṇa, the commentary on the Nyāyasāra.[5]

In the Vaiśeṣika system, there is no reference to God in the sūtras of Kaṇāda. Praśastapāda, the author of the Padārthadharmasaṃgraha, begins his work with obeisance to God who is referred to as 'hetu' in the sense of cause. Evidently by cause is meant that God is the cause of the world. The commentators on this work, Vyomaśiva, Śridhara and Udayana develop the sense of this word as a proof for the existence of God. This proof takes the form of inference.

In the field of Nyāya-Vaiśeṣika, Udayana was the earliest writer to write two important classical texts, for proving the existence of the individual self and of God in the Ātmatattvaviveka and Nyāyakusumāñjali respectively. He fully availed of the contributions made by his predecessors, advanced, in the most singular fashion, incisive logical arguments weighty and formidable for the antitheists: He was amply recompensed for his contribution by being hailed as Ācārya and rarely as Nyāyācārya.

The arguments for the existence of God take note of the objections against God which are advanced by the materialists, Buddhists, Sāṃkhyas and Mīmāṃsakas. He based all his arguments on the concepts and traditions of the Nyāya-Vaiśeṣika system. He did not violate any concept of this system, such that scholars of later periods, who assailed the Nyāya proof for God's existence, simply reproduced verbatim what Udayana wrote for their prima facie position, whether they were Mīmāṃsakas or Vedāntins.

The 'Nyāyakusumāñjali' seems to be the second work of Udayana to follow the Ātmatattvaviveka. The next work was the Tātparyapariśuddhi, a commentary on Vācaspatimiśra's Tātparyaṭīkā. Next came the Nyāyapariśiṣṭa. The

3. Nyāyamañjarī (Chowkhamba edn.) pp. 175–188.
4. Nyāyasāra with Nyāyabhūṣaṇa-Ṣaḍdarśanaprakāśana Pratiṣṭhānam, Vārāṇasi pp. 447-460.
5. *Ibid.*

Lakṣaṇamālā and Lakṣaṇāvalī followed then and the last work was the Kiraṇā-valī, the commentary on the Padārthadharmasaṃgraha.

The Nyāyakusumāñjali, as its name indicates, is in the form of reasonings put forward to prove the existence of God. The reasonings, are treated as palmful of flowers offered at the feet of God. This title of the work suggests that God's existence is already an admitted fact. Reasonings are then offered to strength this concept. In the sequel, the theories of those who refuse to admit God's existence on one ground or other are refuted. The use of the words 'kusuma' and 'añjali' suggest that the Nyāya theorists did not find contentment merely by advancing arguments for God but were in favour of worshipping Him.

The work contains five chapters each called stabaka, which means bunch (of flowers). It is possible to have the work divided into seven sections or chapters the first and last be treated as introduction and conclusion respectively, the middle five remaining the same like the five chapters.

The introductory portion begins with a benedictory stanza in which the author wishes for a faithful and accurate presentation of arguments. In the next stanza, he speaks of the act of worship of the supreme self as leading to heaven and final release. Here is a theistic tinge. There is no room for the act of worship in the Nyāya Vaiśeṣika systems but the writers in these were of religious persuasions and hence there is reference to the act of worship.

Next is made a unique statement to the effect that God is worshipped by all people, though they might form part of certain schools. Even the materialist has the concept of God in his own way and so there is no need for undertaking an inquiry into His existence. When there is no doubt of any kind, the work is undertaken under the pretext of having deliberation 'manana', that is, deep consideration of what was listened to from the preceptor (śravaṇa) together with the employment of reasonings. This is not to test how far śravaṇa holds good but how far the reasonings have applicability to get into the real spirit of śravaṇa. This is certainly in accordance with the Upaniṣadic statement "O! The Supreme self is to be listened to, deliberated upon and meditated upon" (Bṛhadāraṇyaka Upaniṣad 2. 4. 5).

The author states that concept of God is already ascertained from the *Vedas*, Smṛtis, Itihāsas and Purāṇas. Then he cites a passage from the Smṛti which takes sravaṇa, manana and nididhyāsana as represented by the Āgama, inference and meditation.

When deliberation is to be conducted, and when reasonings are to be employed, it is not possible to ignore those views whioh have a meaning on the issue as representing the position that is opposed to the view of the Siddhāntin. Reasoning cannot proceed simply to confirm what has been listened to: Strengthening what has been heard is to be done by removing from and throwing aside all those factors which have grown all around affecting the orderly and healthy development of the Siddhāntin's position. Hence the author enumerates the different, or rather, contradictory views. Such views are too many without much difference between each other but overlap each other on some ground or other. The author has therefore grouped all of them under five heads.

The first objection against the admission of God's existence means this. Each act committed by man produces an impression in his self. During the period of his life, man commits several acts of varying kinds. The impressions thus produced during his life are numerous and varied. At the time of his birth, he had already an accumulated stock of impressions produced in his previous lives. It is this stock that has determined the present life for him both physical and mental, along with dispositions. After the expiry of this life, he has to take another birth, which also will be having a further increase in the impressions already accumulated. As believers in the laws of Karma and transmigrations, the Indians are guided, by the traditional authorities, to view that these impressions give a shape for the life to come hereafter. These impressions are not of the oridinary kind, like causing a coloured stain in a cloth, wall or floor, or causing a twist ,or elongation or contraction in a piece of wood or metal. They are beyond human understanding and thus are looked upon as superworldly (alaukika). Such impressions determine the region or regions where man should take his birth and live. It may be another world or heaven, a place superior to (para) the earth. These impressions are inert and so could not by themselves do anything in the self's taking up a kind of body, at a particular household, place and time so that the experiences on account of the impressions be carried out for the self which too is not awase of the nature and presence of these impressions and so has neither the power nor freedom to have a choice in the selection of what all is necessary for it after its getting down on this earth.

Besides, the world is created, according to the Indian tradition for the sake of living beings. It is further agreed that the world is produced out of matter which in its most subtle form is held to be known as atom. At any rate, this is the view maintained by the Nyāya Vaiśeṣika systems. The first creation and further creations and graded growth and developments are all of extreme complex nature.

To account for the selves' taking up particular physical bodies and to explain how the complex world could have come into being, the understanding in a general way is that neither the inert impressions nor inert matter could have played a role that is quite individualistic and completely independent. The admission of sentient agency is absolutely required to explain these happenings. When the individual self is itself in a disadvantageous position of requiring a physical body to enter into and become a fullfledged living being, it is necessary to ignore the suggestion that a superman could have taken up this role. Hence God is admitted to have taken note of the latent impressions in several selves and created the world out of the subtle parts of matter in a manner that the living beings could make ample and wise use of them consistent with their capacities, mental and physical, endowed upon them by God according to individual stock of impressions.

A primary objection is raised to this concept by the materialists, who deny the existence of anything that does not come within the range of sense perception. The materialist attempts to refute the practices of the ritualistic kind which according to tradition leads the doer to heaven after the expiry of life here To the materialist, the heaven or world beyond this does not exist and so practices performed with the intention of getting it are absurd and baseless. The author's intention is not to argue with the materialist on this issue. The argument advanced by the materialist is aimed at denying the availability of the superworldly means which would bring for the doer the scope for getting to the other world or heaven. This is the first objection noted by Udayana.

If it is proved beyond doubt that such superworldly means exist, a question arises as to how man can understand what he should do actually to achieve a particular objective? The impressions may work on their way but who will guide men to undertake particular deeds to achieve the intended ends? To this, the Nyāya tradition finds and offers an explanation. God creates the world and instructs people through the *Vedas* which he had composed. The eminent persons, who receive His instructions then, give guidance to their pupils and they too do the same by their practice.

The Mīmāṃsā system brings in a strong objection to this position. They admit that the *Vedas* alone contain the source of information and guide lines for undertaking the sacred performances. This does not mean that God is to be brought in to explain how the impressions play their role. The world was, is and will be the same. Never was the world created nor will it ever get dissolved. Hence there is no question for the admission of a Creator. The *Vedas* are eternal, self valid and are not of human authorship. Therefore they are ever available for

man to get information and guidance as to what man should do and how. This objection is given next and takes the form, "Even otherwise, there is the possibility of taking to practise the means for obtaining the other world." Here 'even otherwise' means even though God is not admitted.

At this stage, an objection is raised on the ground that God's non-existence could be proved. The Buddhists, who take this stand, argue that non-apprehension (anupalabdhi) of God is itself a proof to show that He does not exist. This is the third objection which means that the Nyāya stand of seeking to prove God's existence through inference based upon His agency for creation is to be rejected.

Even if God is proved to exist by some means, he cannot be a pramāṇa to us. A pramāṇa should give rise to a knowledge that is not known before. God's knowledge is eternal and so cannot be a pramāṇa. This means that God's knowledge cannot be a pramāna. When His knowledge could not be admitted as valid, there is no meaning in admitting Him as such, as He could neither be the author of the *Vedas* nor the creator of the *Vedas*. This is the fourth objection which is expressed as 'even if He is, He is not a pramāṇa'. This objection is raised by the Mīmāṃsakas whose definition of pramāṇa, as given above, does not apply to the knowledge of God.

It is at this stage held that there is no pramāṇa which can prove Him (His existence). That is, there is no evidence to admit God as the creator of the world and as the author of the *Vedas*.

The author then takes up the discussion of each one of these objections and answers them one in each chapter. Many other issues, which are allied to each objection, get treated. Then begins the main part of the work.

The first chapter begins with a discussion on the need to admit causal relation. The world is filled with misery and has only occasional existence. No effect can take place without dependence upon a cause. What we conceive of as a cause is also an effect of some other cause. The cause cannot be only one, for the divergent nature of the effect cannot be accounted for by that. Variety of the effects should be traced to variety of causes. When sacred rites are performed they produce an impression in the soul of the doer. This impression is invisible. Hence the impressions should be treated as supernormal causes and inhere in the self. Normal causes cannot account for this. The first chapter thus demonstrates that supernormal impressions will have to be admitted to serve as the means for the self to get at the other world.

Incidentally, valuable discussion is available on the need to admit the relation between cause and effect, the denial of patency in causes, Sāṃkhya theory of matter, doctrine of momentariness and the materialists' denial of the self as distinct from the body.

The second chapter refuteds the Mīmāṃsaka view that the *Vedas* are eternal and that there was no change in the world which has no creation and destruction. The author's exposition of these, along with their refutation is superb and forceful. The *Vedas* are at first proved to be extrinsically valid and this validity is dependent upon the merit of the speaker. Since sound is not eternal, group of sounds which form into words and sentences should also be non-eternal. The *Vedas*, or any composition, which contain several such groups could not but be non-eternal. That means the *Vedas* should have been produced by some superior person and get destroyed at the time of deluge. Deluge or destruction of objects should be admitted, since degeneration is found to have set gradually in every aspect of life like longevity, health, stamina and others which is a proof to show that the world should come to an end at a particular time, though at the remotest period. The deluge should follow it. During that period, the selves remain inactive with the impressions being latent. The impressions formed in the selves should determine the nature of birth of the beings. An agent is necessary to explain how the inanimate world has come into being. Such an agent is necessary to be admitted. That agent is God and no reliance could be made in anyself like Kapila, however great he may be. So God alone is to be admitted.

The third objection gets detailed refutation in the third chapter. When it is said that pramāṇas are available to make God's non-existence known, what is meant is that the five pramāṇas, which operate upon positive objects, do not prove any object like God. Since no such positive object is available, it is prudent to declare its non-existence. Non-apprehension as a pramāṇa can operate only upon an object which is fit to be normally apprehended through the other pramāṇas and is not then apprehended for some reason. Non-apprehension can prove only God's non-existence, since God does not have fitness for becoming a knowable through any pramāṇa.

In this context, the author offers a splendid treatment of the nature of all the pramāṇas. Forceful reasonings are adduced to admit comparison and verbal authority and to reject acceptance of presumption and negation. Inference, adventitious condition (upādhi), and reasoning (anukūlatarkā) get a very useful treatment.

The fourth chapter, which is devoted to treat the nature of pramāṇa, begins with a discussion of the Mīmāṃsa definition of pramāṇa and establishes the Nyāya

concept after the refutation of the Mīmāṃsaka definition. God's knowledge cannot therefore be condemned as invalid. The Mīmāṃsaka concept of manifestedness (jñātatā) is proved to be baseless. Another aspect of valid knowledge is also treated and that is an agent is one who is the seat or possessor of valid knowledge. In such a case, God is the seat of valid knowledge and so is a pramāṇa.

The fifth objection is treated in the fifth chapter. At the outset, the author offers his arguments, while disproving the contention that there is proof for proving God's non-existence. God's existence is proved through (1) His agency for the world, (2) concretive activity aroused by Him among the atoms at the time of creation, (3) sustenance of the worlds, (4) initiating worldly transactions, and (5) composing the *Vedas*. After offering terse arguments for proving God's agency, the author gives a different explanation for the same couplet which was stated by him at the outset. This interpretation is fully based on the purport of the Vedic passages. The *Vedas* should be admitted to convey the sense intended by the speaker who could only be God. God alone should have offered the methods of interpreting the *Vedas* and set a model for others by practising Himself what He expects from others. Words like *īśvara* could not be meaningless. Injunctions in the *Vedas*, are expressive of their author's intention. The personal endings of the finite verbs should be taken to refer only to God and the sages whose names are associated with the recensions. Thus God is proved to exist in the cosmological and semantic sense.

The concluding portion of the work has three ślokas. In the first śloka, the author refers to those who fail to get conviction in God's existence inspite of all the arguments. They are having stony hearts. He prays to God to forgive them of their attitudes and protect them. In the next śloka, it is said that God is naturally charming providing scope for the experience of bliss. He is prayed for saving devotees from falling into hell. The last śloka records the dedication of the work at the feet of God.

A work of this kind should have become popular soon after it was written and won the title Nyāyacārya for its author. The author worked within the bounds of Nyāya tradition. In no context, did he question the worth of the statements of his predecessors or entertain doubts about them.

However, the Vedāntins, who came after this period, took strong objection to the author's adoption of the inferential mode of proving God's existence. It is not Udayana that became the target of attack but the Nyāya school as such.

Bhāsarvajña, made an explicit statement that God's existence could be made out through Āgama, in addition to inference. Udayana's predecessors had offered

mainly the inferential mode of proving God's existence. It is contended by those who swear by the Vedic authority that inference should be made subordinate to the *Vedas* and shall not be made use of as the only means. It is generally forgotten then by many of these scholars that Udayana had to fight, following his predecessors, with the Buddhists for establishing reality and stablity of the World, eternality of the selves and god. The Buddhists had been the formidable opponents of Vedic authority. No amout of citations from the Vedic texts and interpretation of those passages would carry conviction to them. Reason and reason alone had to be advanced while arguing with them. This is what Udayana's predecessors did.

Udayana's approach tells clearly that according to him, God is an established fact. There is no one group of people which did not admit God. Hence doubt was not entertained. Yet, following the Upaniṣadic statement, deliberation is to be undertaken and it is this that formed the subject for the Nyāyakusumāñjali. Hence the charge made by the non-Naīyayikas of the Āstika fold of philosophers cannot be sustained against the Nyāya system and does not apply to Udayana in particular.

Again, Udayana had to maintain following the Nyāya tradition, that God is only the instrumental cause (nimittakāraṇa) for the world. This goes against the spirit of the Vedānta system which advocates Brahman being both the material and instrumental cause. The charge could be upheld but it is forgotten that Udayana did not write his work for the Vedānta school or from its point of view. He wrote it in accordance with the Nyāya tradition and in this task, be achieved unique distinction. It will be of great interest to note here that within about fifty years since his period, Praṇatārtihara, one of the foremost disciples of Sri Rāmānuja (1017–1137 A.D.) was awarded the title Vedānta Udayana by Sri Rāmānuja himself for his spirited defence and vindication of the validity of the Viśiṣṭādvaita system in his successful discussion and debate in North India with the opponents of Śrī Rāmānuja's system there. Vedāntadeśika himself had recognized the title Nyāyācārya as applicable to Udayana.

Soon after the Nyāyakusumāñjali was written, attempts were made by several writers to comment upon this text. Some writers chose to comment upon the Kārikās which are about eighty in number. Notable among such writers are Haridāsa Bhaṭṭācārya, Rāmabhadrasārvabhauma, Jayasāmanyāyālaṃkāra, Rudranyāyavācaspati and others.

Many commentaries were written on the entire text of the Nyāyakusumañjali, both Kārikas and the Vṛtti on them. The earliest commentator was Varadarāja (C. 1100) of Kashmir who wrote also the Tārkikarakṣā. He refers to others' views.

It is not clear whether there were earlier expositions offered orally and maintained in the line of teachers and pupils. The commentary of Varadarāja is called Brdhanī, which offers a faithful exposition and interpretation of the text. The next commentator whose commentary is now not extant but known from citations is Dīvakāra Upādhyāya (1270 A.D), who flourished before Gaṅgeśopādhyāya. His commentary was called Parimala. He commented also on the Tātparyapariśuddhi and Ātmatattvaviveka of Upayana, both of which are now lost. The third commentator, whose works on the Nyāyakusumāñjali and other works of Udayana are lost was Prabhākara-Upādhyāya (1250 A.D). The same fate overtook the commentary on the Nyāyakusumāñjali of the fourth commentator Jagadguru who belonged to this period and preceded Gaṅgeśa.

The fifth commentator was Vardhemāna Upādhyāya (C. 1350 A.D.), son of Gaṅgeśa. His commentary is called Prakāśa. It is more than a commentary. It may be called a gloss on more important passages of the text of the Nyāyakusumāñjali. The major portion of the commentary is taken up by the author's critical analysis of the topics in the various contents. This portion is highly valuable and contains frequent references to the views of his father Gaṅgeśa.

The sixth commentator was Tvanta Upādhyāya (1375 A.D.), whose commentary Makaranda is lost. The seventh and eighth commentaries are aiso not extant and were written by Pakṣadharamiśra (1450) and Bhavanātha (1450) respectively. The name of the former's work was known as Nyāyakusumāñjaliviveka and that of the latter's is not known.

The pupils Bhagīratha and Rucidatta of Pakṣadharamiśra (1475) commented on the Nyāyakusumāñjali in the Jalade or Upāya and on Vardhamāna's Nyāyakusumāñjaliprakāśa in the Makaranda respectively. Both the works are available.

Viveka is the name of the commentary written by Śamkaramiśra, son of Bhavanātha (C. 1450 A.D.), which is available in print. The same is the case with the Viveka of Guṇānanda Vidyāvāgīśa (C. 1550 A.D.) which is also available in print. Gokulanātha (C. 1650) wrote a Ṭippaṇa on the Nyāyakusumāñjali which is yet to be published.

Among the scholars of the present century, Kolluru Somaśekhara wrote the Āmoda, a brief and running commentary on the text. This was published at Tirupati in 1939. The scholarly and informative commentary is written by Sriman Panditarāja Uttamur T. Vīraraghavacharya and this is also available in print. The third is Nyāyavāsanā by the reputed Navalpakkam Caturveda Śātakratu Devanātha Tātacārya Svāmin.

The commentary Nyāyavāsanā, published here, is unique for two reasons. The first is that commentators generally seek to be more and more elaborate in interpreting the original text. Sometimes they attempt to give what all they know on the topic in the context which they try to interpret. Some of them digress also. The result of this method of commenting is that the thread of continuity in understanding the text through the commentary is snapped. The reader is then at a loss to grasp the sense of the passages as intended by the original writer. On the other hand, the author of the Nyāyavāsanā, whose writings are completely free from these shortcomings, is at once readable and contains a faithful interpretation of the text without much ado. Though every word is not taken up for interpretation, all words that are difficult for comprehension and those which require a comment in the context are offered explanations. Continuity is not affected anywhere. Herein lies the truth which commends a commentary to people. A commentary shall not be an encyclopaedia. It must give what is actually needed for the understanding of the text. Anything else shall be shunned.

The purpose of writing a commentary is to make clear not only the words and expressions contained in the original text taken up for interpretation but also to indicate here and there the author's intention to use certain expressions. A commentator should be deemed to have failed in his job, if he does not fulfil this purpose and at the same time, goes beyond the text and brings in matters which are irrelevant to the context.

The author of the Nyāyavāsana has achieved unique distinction by offering interpretation to the text of the Nyāyakusumāñjali. Conciseness is the chief feature of this commentary. It will be therefore foolish if one seeks to find here a critical exposition of any topic, which should form an essential part of an independent work. Restraining himself from displaying his encyclopaedic knowledge and realising that he should be faithful to the author of the text, the commentator offers an interpretation of the text of the Nyāyakusumāñjali in the pure tradition of the Nyāya system. There is no digression in any part of the commentary. So while reading the commentary, one feels that he is reading the text of the Nyāyakusumāñjali in the words of an author no other than Udayana.

The difficult words that are of the technical kind are interpreted in the most appropriate manner. No sentence in the original is left unexplained.

The second point about this commentary is the total avoidance of the use of Navyanyaya terminology which baffles those who are not well trained in modern logical constructions and which when employed distract, quite often, the attention of the

readers from the spirit of the text and direct it to know why such technical words have been used. The author deserves all credit for using the easy flowing language.

In a commentary of this kind which is uniformly simple and attractive, it is hardly possible to point to definite portions as exquisitely valuable; yet, to leave the commentary only with this remark would amount to offering a vague opinion.

The following portions may be referred to here:—

1. The passage 'nityasvabhāvanīyamavadetat' (p. 6) has not been offered a better and more clear interpretation in any other commentary.
2. Non-apprehension (p. 4) is stated to be of sixteen kinds as Varadarāja does. However Dharmakīrti mentions only eleven kinds.
3. While interpreting the passage from Manu which the text contains under V. 3, the commentator explains the word vedaśāstra as the śāstra called veda. This interpretation is correct, since it must not go against the *Vedas*. If the word śāstra should mean śāstra independently, then there may rise a problem whether the interpretation could be in unison with śāstra and so not dependent upon the Veda.
4. Udayana prays that like the palmful of flowers (Kusumāñjali) imparting fragrance to the right and left palms, the work Nyāyakusumāñjali shall add strength to the right and left making them appealing (V. 20). The author remarks that the right and left mean the arguments that are advanced for and against God's existence. Alternatively the right shall refer to those who believe in Gods existence and the left to those who do not believe in it.
5. The words amareśagurorguru is rightly interpreted (V. 20) as meaning Viṣṇu; amareśa means Indra, his guru is Brahmā and his guru is Viṣṇu.

There are some original notes such as taking the opening maṅgala śloka as conveying benediction (asih), obeisance (namaskriyā) and noting the subject matter (vastunirdeśa) (p. 2). Like the flowers offered to God not losing their fragrance even when hard pressed, the reasonings offered here do not lose their strength even when there is attack from the opponents. The nature of attack lies in pointing out the fallacies of sublation (bādha) and counter-reason (satpratipakṣa) (p. 2). Other fallacies are not mainly intended, as they have to be pointed out in the arguments that are offered by the author, but these two do not form part of the others' reasonings and could not be traced to them. The word anagha occurring here has reference, as the author observes, to the defects such as vulnerable points (p. 2).

The author could have used the expression hetvābhāsādi but then the vulnerable points could not have been meant. On the otherhand, the fallacies are also vulnerable points but have distinct status. By using the word ādi along with nigrahasthāna, the author has justly interpreted the word anagha.

Udayana refers to Mīmāṁsaka's concept of God as one who is enjoined for worship (or attendence). The commentator remarks that God here, according to the system, is Mantra and the word chodita is the sense of deśita (p. 2). Even the artisans worship God giving Him the name Viśvakarma. The author takes the word *api* as conveying the sense that they do so, even though they do not undertake the task of determining the nature of ultimate Reality (p. 3).

As one conversant with the ritualistic procedure and as engaged in ritualistic practice, the author interprets the word prokṣaṇa as sprinkling with the palm taking the shape of the ear of the cow (p. 25).

The Sāṃkhyas admit ego (ahaṃkāra) to justify the stage of dream. The author cites the authority from the Sarvārthasiddhi, of Vedāntadeśika. Mind does not also function then: The passage from the Naiṣadha (p. 34) is quoted to justify this: It is also noted that Mallinātha's interpretation is not in accordance with this concept (p. 34).

The gist of the first chapter is admirably offered in the form of a śloka at the end of ch. I (p. 52).

People who seek to enter into the Buddhist faith do so for many reasons which are peculiar and stated with abundant humour. A liking for non-differentiation (advaita) between the eatables and drinks is one such reason. The author observes that advaitarāga must mean a desire for observing non-restriction (p. 95).

Variant readings are also noted, vide pp. 37, 76.

The scholarly world should be indebted to Srimadubhayavedantācārya Svāmin, the author of this commentary. The writing of this commentary is a true reflection of the author's mind. Clarity and simplicity, straight forwardness and force, sincerity and absence of predilection mark out this commentary as one of the best written upon the most difficult Nyāyakusumāñjali.

Tirupati,
16—7—1979.

V. VARADACHARI.

विषयसूची

तृतीयस्तबके—

विषयः	पृष्ठसंख्या

शोधनिका

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
पक्षविशिष्टो	पक्षताविशिष्टो	1	19
विश्ववृत्तिःकार्यवैचित्र्य	कार्यवैचित्र्य	4	19
यागादौ	विश्ववृत्तिः यागादौ	4	20
द्वारतयालौकिकसिद्धिः	द्वारतयालौकिकसिद्धेरिति भावः	4	20
इत्याह	इत्यत्राह	6	13
एतद्दर्शनस्य दुरपह्नवत्वेन	एतत् दर्शनस्य दुरपह्नवत्वम्	7	11
अनादिरिति	अनादिमानिति	7	14
न दर्शनादिति	नदर्शनादिति	10	13
लिङ्भङ्गेन भवतीति	लिङ्गभङ्गे न भवतीति	11	13
अनपेक्षादनेकत्वम्	अनपेक्षादनेकम्	12	9
व्याघतो	व्याघातो	12	23
इयक्तमिह	इत्युक्तमिह	13	19
घूर्तैः	धूर्तैः	15	6
न त्वनुष्ठानगोचरेण	न त्वनुष्ठानागोचरेण	16	4
यस्मिन्नेव काले	यस्मिन्नविकले	18	2
प्रतिबन्धकाः	प्रतिबन्धारः	21	7
मन्त्रदि	मन्त्रादि	21	18
अप्रमाणिक	अप्रामाणिक	22	23
चेतुस्य	चेतुस्यम्	23	19
ताम्रपत्रे	ताम्रपात्रे	28	10
द्व्यणुकाद्यरंभक	द्व्यणुकाद्यारम्भक	28	11
मिमन्त्रित	भिमन्त्रित	29	17
सम तोलयित्वा	समं तोलयित्वा	29	21

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
जयेतर इति	जयेतरेति	30	16
तत आवहयेत्	तत आवाहयेत	30	20
नेत्यतरे	नेत्यपरे	32	6
तर्कानुग्रहीतं	तर्कानुगृहीतं	32	23
कराणभावेति	कारणभावेति	33	18
सहयः	सह यः	35	6
अचेतनाकार्यत्वं	अचेतनकार्यत्वं	36	4
नियायकाः	नियामकाः	36	17
ससारस्येत्यादिः	संसारस्येत्यादिः	37	16
कारणभावसिद्धि	कारणभावासिद्धि	40	25
जन्माभ्याम्	जन्मभ्याम्	41	3
सिध्द्या	सिद्ध्या	42	22
सङ्गहः	सङ्ग्रहः	52	5
गुणमनपेक्ष्यव	गुणमनपेक्ष्यैव	54	17
विस्स्वभावत्व	निस्स्वभावत्व	55	22
मिरूपक इति	निरूपकमिति	56	23
करत्वेत	करत्वेन	57	24
तदुभलम्भ	तदुपलम्भ	60	13
अभयथा	उभयथा	62	11
नोपाधिर्व्यापकः	नोपाधिस्समव्यापकः	62	12
एत्याशयेन	इत्याशयेन	62	19
विशेषणतय	विशेषणतया	62	25
ग्रहण	ग्रहणं	63	3
तदुपश्लिस्वष्टभाव	तदुपश्लिष्टस्वभाव	63	3
प्रत्युक्षा	प्रत्यक्षा	64	18

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
येनस्ति	येनास्ति	65	3
शब्दानुभवादिति	शब्दस्यानुभवादिति	66	24
नभसस्त प्रति	नभसस्तं प्रति	67	3
कश्चित्पृष्ट	कश्चित्पृष्टः	70	18
प्रध्वसो	प्रध्वंसो	71	8
प्रत्यक्षयोरैक्ये	प्रतीतयोरैक्ये	72	16
गत्वदि	गत्वादि	74	25
रासदि	रसादि	77	12
प्रकषश्च	प्रकर्षश्च	81	19
कर्माणीति तदानीं	कर्माणीति न तदानीं	85	8
वर्षादिना	वर्षादिदिना	85	12
कौमारादि	कौमारादिः	86	16
सन्तानत्वव्याप्यत्व	सन्तानव्याप्यत्व	88	16
भोगः। एवमेव	भोग एवमेव	88	24
मूलत्वाभ्युग-	मूलत्वाभ्युप-	91	7
वेदजनकत्व	वेदनजनकत्व	91	14
कथामिति	कथमिति	93	6
भारतवर्ष	भारतवर्षे	93	11
विच्छन्न	विच्छिन्न-	93	13
पूर्वक तद्विच्छेदात्	पूर्वकतद्विच्छेदात्	93	28
शक्तिसमपन्नानां	शक्तिसम्पन्नानां	94	2
शाखागतेति	शाखावगतेति	94	5
परिग्रहस्योवप्लव	परिग्रहस्योपप्लव	94	7
प्रमाण	प्रमाणं	94	7
सन्मूल	तन्मूल	94	13

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
एवमिति	एतमिति	94	17
कालविशेषात्	कालविशेषात्	96	11
पुद्स्सर्गा	पुनस्सर्गा	96	17
कालावच्छेदैप्रयोजनस्य	कालावच्छेदैकप्रयोजनस्य	97	5
ब्रह्म.ण्डन्तर	ब्रह्माण्डान्तर	97	7
उपलब्धा ए।	उपलब्धा एव	98	9
निरोध भावना	निरोधः। भावना	98	17
इत्युक्तम् ॥	नात्र पङ्क्तिसमाप्तिः। इत्युक्तं मनसोऽणुत्व एवेति पठनीयम्	102	19
बुध्यादयः	बुद्ध्य दयः	106	14
अपहृतविषय	अपह्नविषय	107	8
साधनदूषणादिति	साधनादूषणादिति	107	14
अन्यतमसङ्गावेपि	अन्यतमासङ्ग वेपि	108	12
तद्विशेषगनिवृत्ति	तद्विशेषनिवृत्ति	108	17
व्यावर्त्त्यं	व्यावर्त्यं	109	21
समवायिजातित्वात्	समवायि जातित्वात्	103	9
अनुपलम्भेनदृश्य	अनुपलम्भेनादृश्य	114	2
सामान्यप्रयोजक	सामान्याप्रयोजक	115	3
अनुमाने न स्यादिति	अनुमानेन स्यादिति	116	15
अ। कलने	अनाकलने	117	3
फलत्वत्	फलत्वात्	120	2
शङ्कते पुनरिति	शङ्कते क्व पुनरिति	120	14
विलापेति	विलोपेति	120	19
दूषणमेवा,	दूषणमेव	121	3
प्रत्ययेनोपमानं	प्रत्यये नोपमानं	123	24

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
सम्भवात् उपमानमेव	सम्भवात् तत्रोपमानमेव	124	16
पर्यवसितुं	पर्यवसातुं	127	19
व्यतिरेकविशेष	व्यतिरेकिविशेष	129	17
तस्या निमित्तत्वात्	तस्यानिमित्तत्वात्	129	24
न त्वतिरेकादिति	न त्वनतिरेकादिति	130	9
उपदर्शितुमशक्य	उपदर्शयितुमशक्य	130	15
वृत्तिनिमित्तत्वेन	प्रवृत्तिनिमित्तत्वेन	130	16
संज्ञेयेत्यर्थः	संज्ञेत्यर्थः	130	19
निराकाङ्क्षितपद-	निराकाङ्क्षपद-	130	24
स्वातन्त्र्यो	स्वातन्त्र्ये	131	1
स्मारितत्वात्	स्मारितत्वात्	131	3
तत्स्मारकत्व	तस्य स्मारकत्व	131	19
अनाप्त	अनेकान्त इति । अनाप्त	131	23
प्रागसिद्धावित्येव	प्रागसिद्धौ । इत्येव	132	25
इत्युश्रुत्वैव	इत्यश्रुत्वैव	134	11
श्रुतं ;	श्रुतं,	135	5
फलप्रमाण्य	फलप्रामाण्य	137	9
पठ्यमानेष्वपौरुषेय	पठ्यमानेषु मन्वादिवाक्येष्वपौरुषेय	137	11
पौरुषेयत्स्यत्व	पौरुषेयत्व	137	12
तत्प्रतीत्यनुगुणकं	तत्प्रतीत्यनुगुणत्वं	140	12
जनकत्वमित्यर्थः	जनकत्वादित्यर्थः	140	14
पदोस्थितेरित्यर्थः	पदोपस्थितेरित्यर्थः	140	18
शक्युपगमे	शक्त्युपगमे	140	21
भट्टमतेऽति	भट्टमतेऽपि	142	17
कतरि	कर्तरि	148	9

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
व्यधिकरणेनाविभाव	व्यधिकरणेनाविनाभाव	148	4
पक्षाधर्मतायाः	पक्षधर्मतायाः	148	15
सत्यगृह्त्वमसत्यगृह	सत्त्वग्रहत्वमसत्त्वग्रह	149	15
तदितर	यदितर	152	10
ज्ञानाभाव	ज्ञानभाव	153	9
वेदहेतोः	वेदनहेतोः	154	18
कारणत्वनिर्वाहे	कारणत्वानिर्वाहे	157	23
सबाधकतया	सः बाधकतया	161	22
एवम्	एकम्	162	10
न्यायवासनाभिधा	न्यायवासनाभिधायां	162	12
मानं	मान	163	9
उक्तेष्वनन्तर्भावात्	उक्तेष्वन्तर्भावात्	166	7
प्रमाण	प्रमाणं	167	17
नुपपत्त्य	नुपपत्त्या	167	19
च तदभ्युप-	चैतदभ्युप-	169	6
नियमानभ्युपगमः	नियमाभ्युपगमः	169	16
ज्ञाततासामान्यं	ज्ञातता सामान्यं	171	15
साक्षात्कृततताविशेषः	साक्षात्कृतता विशेषः	171	15
स्मरणजननादिति भावः	स्मरणजननादिति वक्तुं शक्यत्वा-दनुभवासिद्धेरिति भावः	173	14
ग्रहिष्यति	ग्रहीष्यति	175	13
तद्विषय	तदविषय	175	17
मन प्रत्यासत्तेः	मनःप्रत्यासत्तेः	176	14
भानुमुपेयते	भानमुपेयते	178	16
प्रत्यक्षाभावस्येव	प्रत्यक्षाभावस्यैव	179	14

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
षष्ठोऽपीति	षष्ठेऽपीति	185	6
न व्याप्ति	न व्याप्तिः	185	8
जन्यत्वाभावात्	विशेषणवैयर्थ्यादित्यर्थः जन्यत्वाभावात्	185	16
शरीर	सशरीर	186	23
स्वचेष्टयाम्	स्वचेष्टायाम्	189	3
तदवच्छिन्न	तदवच्छिन्नप्रयत्नोत्पत्तौ तदवच्छिन्न	190	7
महतीत्युक्त्वा	महतीत्युक्त्वा	190	19
....दाहृत	उदाहृत	195	8
सापेक्षस्य	निरपेक्षस्य	196	19
निरपेक्षस्य	सापेक्षस्य	196	20
व्यपदेशाः	व्यपदेश्याः	197	8
वेदविरोध	वेदाविरोध	197	14
चेष्टापत्ति	चेष्टात्वापत्ति	199	14
तल्लक्षणात्	तल्लक्षणात् ।	199	16
भावाभावादित्यर्थः	भावाभावावित्यर्थः	200	15
दर्शयति	दर्शयिष्यति	200	22
पाटक्त्	पटक्त्	201	13
ममिकां	मामिकां	202	3
कल्पादावदर्शा	कल्पादावादर्शा	203	5
संसारानदि	संसारानादि	203	14
प्रामाण्यभ्रान्त्या	प्रामाण्यभ्रान्त्या	204	13
कथमीश्वर	कथमीश्वर	204	14
असिद्धिरिति	असिद्धेरिति	204	21
कलिदासा	कालिदासां	205	10
स्वस्यान्य	स्वस्यान्यं	207	15

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
ईश्वरादि	ईश्वरादि	209	9
स्वीकारणीयं	स्वीकरणीयं	212	3
ज्ञानाधीन	ज्ञानानधीन	212	17
अव्यवस्थानदिति	अव्यवस्थानादिति	214	14
प्रवृच्यन्यथा	प्रवृत्त्यन्यथा	215	5
शूकरशूकर	शूरुसूकर	215	12
वाराहं	वराहं	215	13
वसंत्ते	वसन्ते	215	13
वक्तु	वक्तुं	215	18
कथलक्षणकः	कथंलक्षणकः	217	5
तदथकैः	तदर्थकैः	217	15
तत्प्रयायनार्थं	तत्प्रत्यायनार्थं	218	4
प्रवृत्ते सत्त्वात्	प्रवृत्तेः सत्त्वात्	218	14
इच्छरूपात्	इच्छारूपात्	218	18
अभिधाभावनाधर्मः	अभिधा भावनाधर्मः	218	23
लिङ्श्रवण	लिङ्श्रवण	219	14
कार्यत्व	कार्यत्वे	220	2
इत्यादिदशनात्	इत्यादिदर्शनात्	220	4
प्रत्यये तु	प्रत्ययेन तु	220	17
एव	एवं	222	4
कतृव्यापार	कर्तृव्यापार	222	7
आक्षेपानुपपत्तिः	आक्षेपानुपपत्तितः	223	8
पूर्वचादनात्	पूर्वचोदनात्	226	3
नाभिधनस्य	नाभिधानस्य	226	21
भावननुगामिनीति	भावनानुगामिनीति	226	23

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
न गौरा	न गौरो	227	3
अवच्छेदकत्व	अवच्छेदक	227	9
विशेष	विशेष्य	227	20
पदोपस्थप्यस्य	पदोपस्थाप्यस्य	228	13
नैराकाङ्क्ष्यदित्याह	नैराकाङ्क्ष्यादित्याह	228	14
अनः	अमः	228	24
सुख प्रति	सुखं प्रति	232	20
ज्ञानादेवसंकल्प	ज्ञानादेव संकल्प	232	22
संकल्पस्यप्रवर्तका	संकल्पस्य प्रवर्तका	232	23
कार्यत्वोनो	कार्यत्वेनो	233	22
स्वगसाध समर्थः	स्वर्गसाधनसमर्थः	234	5
नियोक्तुं	नियोक्तुं	234	6
हस्तिपक	हस्तिपकं	234	9
अज्ञानभेदाग्रहस्य	अज्ञातभेदाग्रहस्य	235	12
अनुमानिकमिति	आनुमानिकमिति	236	13
यथाऽधिकारे विशेषणं	यथाऽधिकारिविशेषणं	237	13
श्रुतानुराधेन	श्रुतानुरोधेन	238	3
कर्तव्यतौस्तु	कर्तव्यतैवास्तु	241	9
व्यभिचाात्	व्यभिचारात्	241	10
लिङभिधीयते	लिङाभिधीयते	241	15
कारणताया	करणताया	242	12
विशेषत्	विशेषात्	243	1
सम्पादतो	संपादितो	244	11
मिष्टसधनत्वं	मिष्टसाधनत्वं	244	14
विभिन्नकल्पष्वि	विभिन्नकल्पेष्वि	244	14

अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः
न विधौं पश्शब्दा	न विधौ परश्शब्दा	246	1
बोधनकत्वं	बोधजनकत्वं	246	21
य एवलौकिकः त एव	य एव लौकिकाः त एव	247	10
आसेनेप्य	आप्तेनेष्य	247	15
अभ्यासामिवाय	अभ्यासाभिप्राय	247	23
स्वार्थेपरित्यागेन	स्वार्थापरित्यागेन	248	12
श्रोत्रयादिस्वरू	श्रोत्रियादिस्वरूप	248	13
प्रकर्पाभावात्	प्रकर्षाभावात्	250	5
वक्त्तुः	वक्तुः	250	6
तावद्धाहि	तावद्धि	251	6

—: * :—

श्रीमते श्रीनिवासपरब्रह्मणे नमः

न्यायाचार्योदयनकृतन्यायकुसुमाञ्जलिः

सत्पक्षप्रसरस्सतां परिमलप्रोद्बोधवद्धोत्सवो
विम्लानो न विमर्दनेऽमृतरसप्रस्यन्दमाध्वीकभूः ।
ईशस्यैष निवेशितः पदयुगे भृङ्गायमाणं भ्रमत्
चेतो मे रमयत्वविघ्नमनघो न्यायप्रसूनाञ्जलिः ॥ १ ॥

न्यायवासनाभिधाना न्यायकुसुमाञ्जलिटीका

जयति जगदेकहेतुः भजतां भवजलधिसन्तरणसेतुः ।
पुरि शतमखप्रणेतुः जम्बूधामनि पतत्रिपतिकेतुः ॥

जितसुरगुरोः प्रज्ञाभूम्ना प्रभाकररोचिषः
श्रितसुरतरोः श्रेयस्सिन्धोः नृसिंहगुरोः करः ।
प्रवचनविधौ व्याख्यामुद्रान्वितः कमलोपमः
स्फुरतु हृदि मे तत्त्वस्फूर्त्यै तमश्शमयन् रुचा ॥

यथा हयाननन्देवं तथाचार्यं नमस्यता ।
न्यायवासनया सम्यग्योज्यते कुसुमाञ्जलिः ॥

न्यायाचार्यास्तावत् प्रारिप्सितस्य परमात्मनिरूपणपरस्य न्यायनिबन्धनस्य निर्विघ्नसमाप्त्यर्थमादावाचरितं मङ्गलं शिष्यशिक्षायै निबध्नन्ति—सत्पक्षेति । ईश्वरपदयुगसमर्पणार्थमिह कुसुमाञ्जलित्वारोपो न्यायनिबन्धनस्य नाम्नाभिव्यज्यते । तेन नमस्क्रिया, रमयत्वित्यनेन आशीः, ईशस्येत्यनेन न्यायेत्यनेन वा वस्तुनिर्देश इति त्र्यात्मकमिदं मङ्गलम् । इह पक्षपदेन पक्षविशिष्टो धर्मी दलानि चोच्यन्ते । प्रसरः प्रकृष्टं ज्ञानं विकासश्च । परिमलेति । 'मल' धारणे इति धातोः परितः

स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।
यदुपास्तिमसावत्र परमात्मा निरूप्यते ॥ २ ॥

परमात्मनिरूपणं व्यर्थमित्याक्षेपपरिहारौ

इह यद्यपि यं कमपि पुरुषार्थमर्थयमानाः—शुद्धबुद्धस्वभाव इत्यौपनिषदाः, आदिविद्वान् सिद्ध इति कापिलाः, क्लेशकर्मविपाकाऽऽशयैरपरामृष्टो निर्माणकायमधिष्ठाय संप्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः, लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः, शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, यज्ञपुरुष

सम्बन्धः अन्वयेन व्यतिरेकेण च व्याप्तिः सौगन्ध्यं च विवक्षितम् । विमर्दने बाधसत्प्रतिपक्षयोरुद्भावने निष्पीडने च । न विम्लानः न कार्याक्षमः । एवं आद्यविशेषणेन पक्षसत्त्वं सूचितम् । द्वितीयेन व्याप्त्यौपयिकसपक्षसत्त्वविपक्षासत्त्वे । तृतीयेन चाबाधितत्वासत्प्रतिपक्षितत्वे चेति समस्तरूपप्रतिपादकत्वं न्यायस्य दर्शितम् । प्रयोजनं व्यञ्जयति—अमृत इति । अमृतं मोक्षः । तत्र रसः इच्छा तत्प्रस्यन्द एव माध्वीकं, तस्य भूः उत्पत्तिस्थानम् । पदयुगे—अङ्घ्रियुगे । पद्यते ज्ञायते अनेनेति व्युत्पत्त्या ईशप्रत्यायकप्रमाणतर्कयुगे अन्वयव्यतिरेकव्याप्तियुगे वा । पुष्पाञ्जलिना रमणाय भृङ्गायमाणमिति चेतोविशेषणम् । भ्रमदित्यनेन सन्दिहानत्वं न्यायपरिशीलनशीलत्वं च विवक्षितम् । अविघ्नमिति क्रियाविशेषणम् । अनघ इति निग्रहस्थानादिदोषराहित्यं कीटकण्टकादिराहित्यं च । रमयत्विति—वक्तव्यविषये अज्ञानसंशयादिदुःखापनोदनेन सन्तोषयत्वित्यर्थः ।

विषयादिकं दर्शयन् विवक्षितं प्रतिजानीते—स्वर्गापवर्गयोरिति ॥

संप्रतिपन्ने किं निरूपणेनेति शङ्कते—इहेति । शुद्धः हेयसंबन्धानर्हः । बुद्धः स्वप्रकाशः । आदिविद्वान् सर्गादौ सर्वज्ञः । सिद्धः—अणिमादियुक्तः । क्लेशाः अविद्यास्मितारागद्वेषाभिनिवेशाः । अस्मिता अहंत्वम् अनात्मन्यात्मबुद्धिः । कर्म—पुण्यापुण्यात्मकम् । विपाकः जात्यायुर्भोगाः । आशयः वासना । निर्माणकायः वेदादिनिर्माणाय गृहीतं शरीरम् । संप्रदीयते गुरुणा शिष्यायेति व्युत्पत्त्या संप्रदायो वेदः । लोकवेदविरुद्धैरिति—शवभस्मसुराकुम्भादिसम्बन्धैरित्यर्थः । निरावरण इति । कर्मकृतशरीररहित इत्यर्थः । देशितः चोदितः कश्चिन्मन्त्रादिः । यावदुक्त

इति याज्ञिकाः, सर्वज्ञ इति सौगताः, निरावरण इति दिगम्बराः, उपास्यत्वेन देशित इति मीमांसकाः, लोकव्यवहारसिद्ध इति चार्वाकाः, यावदुक्तोपपन्न इति नैयायिकाः, किं बहुना—कारवोऽपि यं विश्वकर्मेति उपासते, तस्मिन्नेवं जातिगोत्रप्रवरचरणकुलधर्मादिवदा-संसारं प्रसिद्धानुभावे भगवति भवे सन्देह एव कुतः ? किं निरूपणीयम्—

तथापि—

न्यायचर्चेयमीशस्य मननव्यपदेशभाक् ।
उपासनैव क्रियते श्रवणानन्तरागता ॥ ३ ॥

श्रुतो हि भगवान् बहुशः श्रुतिस्मृतीतिहासपुराणेष्विदानीं मन्तव्यो भवति । 'श्रोतव्यो मन्तव्य' इति श्रुतेः,

'आगमेनानुमानेन ध्यानाभ्यासरसेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् ॥'

इति स्मृतेश्च ।

इति । उक्तेषु यावद्युक्तियुक्तं तावद्युक इत्यर्थः । यद्वा धर्मिग्राहकप्रमाणेन यावदुक्तं तावद्युक्त इत्यर्थः । लोकव्यवहारसिद्ध इति । नरपतिप्रतिमादिरूप इत्यर्थः । कारवः—शिल्पिनः । तत्त्वनिर्णये अप्रवृत्ता अपीति भावः । जातिः ब्राह्मणत्वादिः । गोत्रं शठमर्षणादि । प्रवरः त्र्यार्षेयादिः । चरणम् तैत्तिरीययजुश्शाखादिः । कुलं नाथयामुनादिविख्यातसन्तानः । धर्मादि—यज्ञाध्ययनादि । भवे भवति सर्वदा अस्तीति भवः, नित्यसत्तायोगिनि तस्मिन्निति भावः ॥

सिद्ध एव धर्मी मननेन दृढीक्रियते इति समाधत्ते—तथापीति । श्रवणानन्तरागतेत्युक्तमुप-पादयति—श्रुतो हीति । न च सिद्धसाधनं दोषः । अनुमित्सायां तस्यादोषत्वात् । योगमुत्तमम्—दर्शनसमाकारं ज्ञानम् । निरूपणस्य परमतनिरसनपूर्वकस्वमतव्यवस्थापनरूपतया प्रथमतः निरसनाय पराभिमतकोटयः प्रदर्श्यन्ते—तदिहेति । विप्रतिपत्तिः—विरुद्धकोटिबोधकवाक्यम् । तेन प्रागसन्दे-होक्त्या न विरोधः । संक्षेपत इत्यनेन शब्दतोऽर्थतो वा प्रदर्शयिष्यमाणा अवान्तरविप्रतिपत्तयः बह्वयः सन्तीति सूचितम् । अत्र व्युत्पत्तिवैचित्र्यात् विप्रतिपत्तिघटकविरुद्धकोट्यन्वयिनि पञ्चतयीति पूर्वोक्त-

पञ्चविप्रतिपत्तिप्रदर्शनम्

तदिह संक्षेपतः पञ्चतयी विप्रतिपत्तिः—

अलौकिकस्य परलोकसाधनस्याभावात्; अन्यथाऽपि परलोकसाधनानुष्ठानसम्भवात्; तदभावाऽऽवेदकप्रमाणसद्भावात्; सत्त्वेऽपि तस्याप्रमाणत्वात्; तत्साधकप्रमाणाभावाच्चेति।

प्रथमविप्रतिपत्तिनिरासः

तत्र न प्रथमः कल्पः – यतः—

सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः।
प्रत्यात्मनियमाद्भुक्तेरस्ति हेतुरलौकिकः॥ ४॥

पञ्चसंख्याकावयवान्वयिनि वाऽभेदे पञ्चम्यः। विप्रतिपत्तिरित्यनेन नास्तीश्वर इति विरुद्धप्रतिपत्तिविवक्षया तत्प्रयोजकत्वविवक्षया हेतौ वा। अलौकिकस्य—अदृष्टस्य। अन्यथाऽपि—ईश्वरं विनापि। तदभावेति—ईश्वराभावेत्यर्थः। तस्य—ईश्वरस्य, अप्रमाणत्वात्—अनाप्तत्वात्। तत्साधकेति—ईश्वरसाधकेत्यर्थः।

आद्या विप्रतिपत्तिः चार्वाकस्य। अदृष्टासिद्धौ तदधिष्ठातृतया नेश्वरः साधयितुं शक्य इति तदाशयः। कार्यस्य निरपेक्षत्वात्, क्वचित् सापेक्षत्वेऽपि सर्वत्र तदनियमात्, नियमेऽपि एकसापेक्षत्वात्, अनेकापेक्षत्वेऽपि दृष्टैरेवोपपत्तेः, अलौकिकफलेऽपि यागादिभिरन्यथासिद्धेः अदृष्टासिद्धेरित्यवान्तरविप्रतिपत्तयः क्रमात् निरस्यन्ते —सापेक्षत्वादित्यादिना। कादाचित्कत्वेन सापेक्षत्वं सहेतुकत्वम्। अनादित्वात् कारणप्रवाहस्येति शेषः। ततः अनवस्थाभावात् सापेक्षत्वनियमेऽपि न क्षतिरिति भावः। वैचित्र्यादिति —विश्ववृत्तितः कार्यवैचित्र्यदर्शनेन कारणवैचित्र्यसिद्धेरिति भावः। यागादौ महाजनप्रवृत्तिसाफल्यात् पारलौकिकफलद्वारतयालौकिकसिद्धिः। प्रत्यात्मेति। यागादेः क्षणिकत्वात् फलभोगस्य च कालदेशात्मनियतत्वात् तत्समानाधिकरणतत्पर्यन्तस्थास्यदृष्टव्यापारसिद्धिरिति भावः। गगनादिवन्निरपेक्ष इत्याशङ्कते—अकस्मादिति।

अकस्मादेव भवतीत्यनेन किं न कस्माच्चित् भवतीति हेतुनिषेधः? उत कस्माच्चित् न भवतीत्युत्पत्तिनिषेधः? 'अमानोनाः प्रतिषेधे' इति प्रतिषेधार्थकस्याशब्दस्यैव समासं विना प्रयोगात्।

संसारस्याकस्मिकत्ववादनिरासः

न ह्ययं संसारः अनेकविधदुःखमयो निरपेक्षो भवितुमर्हति । तदा हि — स्यादेव, न स्यादेव वा, न तु कदाचित् स्यात् । अकस्मादेव भवतीति चेत् — न—

हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च ।
स्वभाववर्णना नैवमवधेर्नियतत्वतः ॥ ५ ॥

हेतुनिषेधे भवनस्यानपेक्षत्वेन सर्वदा भवनं अविशेषात् । भवनप्रतिषेधे, प्रागिव पश्चादप्यभवनम्, अविशेषात् । उत्पत्तेः पूर्वं स्वयमसतः स्वोत्पत्तावप्रभुत्वेन स्वस्मादिति पक्षानुपपत्तेः । पौर्वापर्यनियमश्च कार्यकारणभावः । न चैकं पूर्वमपरं च, तत्त्वस्य भेदाधिष्ठानत्वात् । अनुपाख्यस्य हेतुत्वे प्रागपि सत्त्वप्रसक्तौ पुनः सदातनत्वापत्तेः ।

कार्यस्य सावधित्वस्थापनम्

स्यादेतत्—न अकस्मादिति कारणनिषेधमात्रं वा भवनप्रतिषेधो वा स्वात्महेतुकत्वं वा निरुपाख्यहेतुकत्वं वाऽभिधित्सितम् । अपि त्वनपेक्ष एव कश्चिन्नियतदेशस्वभाववन्नियतकालस्वभाव इति ब्रूमः—न निरवधित्वेऽनियतावधिकत्वे वा कादाचित्कत्वव्या-

---

अथाकस्मात् स्वेतरयत्किञ्चिद्भिन्नात् स्वस्मात् भवतीति स्वजन्यत्वविधिः, यद्वा अकस्मात् कस्मिन्नप्यनन्तर्भूतादवस्तुनः भवतीत्यवस्तुजन्यत्वविधिः, आहोस्वित् अश्वकर्णादिशब्दवत् रूढिमङ्गीकृत्य स्वभावाद्भवतीति स्वाभाविकत्वविधिरिति विकल्प्य निरस्यते—हेतुभूतीत्यादिना । भूतिः—उत्पत्तिः । स्वेति—स्वस्मादनुपाख्यादसतश्चोत्पत्तिविधिरित्यर्थः । नियतत्वत इति । अन्यथा कादाचित्कत्वव्याघातादिति भावः ।

भेदाधिष्ठानत्वादिति । स्वप्रतियोगिवृत्तित्वविशिष्टस्वानुयोगिवृत्तित्वसंबन्धेन भेदविशिष्टत्वादित्यर्थः । प्रागपि सत्त्वप्रसक्ताविति । असतः अनुपाख्यस्य सर्वदा असत्त्वाविशेषादिति भावः ।

दृष्टान्तमुखेन स्वभावं वर्णयति—स्यादेतदिति । नियतदेशवदिति । दण्डादीनां हेतुत्वाविशेषेऽपि घटादेः कपालादिदेशनियमवत् निरपेक्षत्वेऽपि कस्मिंश्चिदेव काले भवतीति कालनियमः स्वभावादिति भावः । सापेक्षत्वे दण्डादेः कपालादिनियतदेशकार्यजननसामर्थ्यम् इति शक्यते वक्तुम् । निरपेक्षत्वे तु न देशस्य, न वा कालस्यापि नियमः शक्यते उपपादयितुमिति दूषयति—नेति । यत्किञ्चि-

घातात्। न ह्युत्तरकालसिद्धित्वमात्रं कादाचित्कत्वम्, किंतु प्रागसत्त्वे सति। सावधित्वे तु स एव प्राच्यो हेतुरित्युच्यते।

अस्तु प्रागभाव एवावधिरिति चेत्—न, अन्येषामपि तत्काले सत्त्वात्। अन्यथा तस्यैव निरूपणानुपपत्तेः। तथा च न तदेकावधित्वमविशेषात्। इतरनिरपेक्षस्य प्रागभावस्यावधित्वे प्रागपि तदवधेः कार्यस्य सत्त्वप्रसङ्गात्।

सन्तु ये केचिदवधयः, न तु तेऽपेक्ष्यन्ते इति स्वभावार्थ इति चेत्—'नापेक्ष्यन्त' इति कोऽर्थः? किं न नियताः, आहोस्विन्नियता अप्यनुपकारकाः? प्रथमे धूमो दहनवत् गर्दभमप्यवधीकुर्यात्, नियामकाभावात्। द्वितीये तु किमुपकारान्तरेण, नियमस्यैवापेक्षार्थत्वात्, तस्यैव च कारणात्मत्वात्, ईदृशस्य च स्वभाववादस्येष्टत्वात्।

कार्यस्य नियतावधित्वस्थापनम्

नित्यस्वभावनियमवदेतत्। न ह्याकाशस्य तत्त्वमाकस्मिकमिति सर्वस्य किं न स्यादिति वक्तुमुचितम् इति चेत्—न। सर्वस्य भवतः स्वभावत्वानुपपत्तेः। न ह्येकमने-

---

कालवृत्तित्वरूपं कादाचित्कत्वं न निरवधेरनुपपन्नमित्याह—न हीति। प्रागभाव एव अवधिरस्त्विति शङ्कते—अस्त्विति।

अन्येषामिति। दण्डचक्रादीनामित्यर्थः। निरूपणानुपपत्तेरिति। दण्डचक्रादिसामग्रीकाले जायमाना 'घटो भविष्यती'ति प्रतीतिरेव हि प्रागभावे प्रमाणमिति भावः। प्रागभावनिरूपकत्वेप्यन्येषां तन्निरूपकचक्षुरादिवन्नावधित्वमुपेयते इत्यत्राप्याह—इतरेति। अवधित्वेऽपि न हेतुत्वमिति शङ्कते—सन्त्विति।

नित्यस्वभावनियमवदिति। आकाशस्याकाशत्वस्वभावनियमवदित्यर्थः। यथा निरपेक्षस्याप्याकाशत्वस्य आकाश एव वृत्तिः, नात्मनीति देशनियमः, तथा घटादेरपि कस्मिंश्चिदेव काले वृत्तिरिति कादाचित्कत्वनियम इति भावः। दृष्टान्तवैषम्यं दर्शयन् परिहरति—नेति। स्वभावत्वानुपपत्तेरिति। स्वासाधारणधर्मस्यैव स्वभावत्वादिति भावः। न तुल्य इति। आकाशत्वस्य निरवधित्वेऽपि आकाशस्वभावत्वमविरुद्धम्, घटादेस्तु निरवधित्वे सदातनत्वापत्त्या कादाचित्कत्वं विरुद्धमिति वैषम्यमिति भावः।

कस्वभावं नाम, व्याघातात् । नन्वेवमिहापि सर्वदा भवतः कादाचित्कत्वस्वभावव्याघात इति तुल्यः परिहारः — न तुल्यः । निरवधित्वे अनियतावधित्वे वा कादचित्कत्वव्याघातात् नियतावधित्वे हेतुवादाभ्युपगमात् ।

कार्यकारणप्रवाहस्यानादित्वस्थापनम्

स्यादेतत् । उत्तरस्य पूर्वः पूर्वस्योत्तरो मध्यमस्योभयमवधिरस्तु; दर्शनस्य दुरपह्नवत्वात् । त्वयाऽप्येतदभ्युपगन्तव्यम् । न हि भाववदभावेऽप्युभयावधित्वमस्ति । तद्वद्भावेष्वप्यनुपलभ्यमानैकैककोटिषु स्यात्—न स्यात्, अनादित्वात्—

प्रवाहो नादिमानेष न विजात्येकशक्तिमान् ।
तत्त्वे यत्नवता भाव्यमन्वयव्यतिरेकयोः ॥ ६ ॥

अथ कार्यसामान्ये पूर्वावधिनियमो नास्तीति शङ्कते—स्यादेतदिति । त्वयापीति । कादाचित्कत्वदर्शनानुरोधेन सापेक्षत्ववादिनेति भावः । एतद्दर्शनस्य दुरपह्नवत्वेन अवधिमत्त्वं उभयावधिमत्त्वव्याप्यमिति शङ्कां निराकरोति—न हीति । प्रागभावादौ व्यभिचारादिति भावः । अनुपलभ्यमानेति । उपलब्ध्यभावेऽप्यवधिकल्पने अनवस्थितिरिति भावः । परिहरति—न स्यादिति ।

प्रवाहः—कार्यकारणप्रवाहः । अनादिरिति । बीजाङ्कुरवत् प्रवाहानादित्वेन नानवस्थादोष इति भावः । अस्त्ववधिनियमः, सजातीयनियमस्तु माभूत्, शक्त्यनुगमात् न व्यभिचार इत्यत आह—न विजातीति । विभिन्नजातीयनिष्ठ एकशक्तिमान् तदधीन इति भावः । तथासति सर्वस्य सर्वजातीयत्वप्रसङ्गादिति भावः । कथं तर्हि तृणारणिमणीनां एकजातीयदहनान्वयव्यतिरेकावित्यत आह—तत्त्व इति । तत्त्वावगम इत्यर्थः । यत्नवता भाव्यमिति । दहनवैजात्यं कल्पयितव्यमिति भावः ।

अभाववद्भावेष्वपि एकावधिकत्वे न दोष इत्याशङ्कते—प्रागभावो हीति । परिहरति—नेति । तावन्मात्रावधीति—उत्तरावधिमात्रेत्यर्थः । तदुत्तरस्य—घटाद्युत्तरस्य जलाहरणादेः । घटादेर्निरवधित्वेऽपि जलाहरणादेः तदहर्भवनस्वभावात् नानादित्वमिति शङ्कते—तदहरेवेति । अहरित्यत्यन्तसंयोगे द्वितीया । निरस्यति—नेति । पूर्वन्यायेनेति—अनुपलभ्यमानप्राक्कोटिक-

प्रागभावो ह्युत्तरकालावधिरनादिः, एवं भावोऽपि घटादिः स्यात्। अनुपलभ्यमान-प्राक्कोटिकघटादिविषयं नेदमनिष्टमिति चेत् न। तावन्मात्रावधिस्वभावत्वे तदहर्वत् पूर्वेद्युरपि तमवधीकृत्य तदुत्तरस्य सत्त्वप्रसङ्गात्; अपेक्षणीयान्तराभावात्। एवं पूर्वपूर्वमपि। भावे तदेव सनातनत्वम्। तदहरेवानेन भवितव्यमित्यस्य स्वभाव इति चेत्—न। तस्याप्यह्नः पूर्वन्यायेन पूर्वमपि सत्त्वप्रसङ्गात्। तस्मात्तस्यापि तत्पूर्वकत्वं, एवं तत्पूर्वस्यापीत्यनादित्वमेव न्यायः। न त्वपूर्वानुत्पादे कस्यचिदपूर्वस्य सम्भव इति।

तथापि व्यक्त्यपेक्षया नियमोऽस्तु, न जात्यपेक्षयेति चेत् न, नियतजातीय-स्वभावताव्याघातात्। यदि हि यतः कुतश्चिद्भवन्नेव तज्जातीयस्वभावः स्यात्, सर्वस्य सर्व-जातीयत्वमेकजातीयत्वं वा स्यात्। एवं तज्जातीयेन यतः कुतश्चिद्भवितव्यमित्यस्य स्वभावः, तदापि सर्वस्मात्सर्वजातीयं एकजातीयं वा स्यात्।

घटादिन्यायेनेत्यर्थः। तस्मादिति—पूर्वावध्यभावे तस्याह्नः पूर्वमपि सत्त्वापातात् तस्मिन्नहनीव पूर्व-स्मिन्नप्यहनि घटतत्कार्यादेः तदहःपूर्वकत्वसंभवात् अनादित्वं दुर्वारमिति भावः। अपूर्वानुत्पादे—अपूर्वस्य प्रागसतः घटादेः पश्चात् उत्पत्त्यनुपगमे अपूर्वस्य जलाहरणादेः संभवः उपपद्यत इति शेषः।

'न विजाती'त्यादिना निरसनीयमनुवदति—तथापीति। तत्र तत्र कार्योत्पत्तेः पूर्वं दृश्यमानायाः यस्याः कस्याश्चिदेव व्यक्तेः तत्तत्कार्यहेतुत्वसम्भवात् न तज्जातीयकारणकल्पनावश्यकतेति भावः। कार्यस्य नियतजातीयत्वानुपपत्त्या निरस्यति—नेति। व्याघातादिति—यस्मात्कस्माच्चिज्जन्यस्य नियत-जातीयत्वं व्याहतमिति भावः। कार्यस्वभावाधीनो जातिनियम इति चेत्तत्राह—यदि हीति। सर्वजातीयत्वमिति। घटादिजातीयस्य पटादिजातीयकारणादप्युत्पत्तिसंभवादिति भावः। जातिभेदे बाधकं तुल्यत्वमभिसन्धायाह—एकजातीयत्वं वेति। कारणस्वभावाधीनः कार्यजातिनियम इति शङ्कते—एवमिति। प्रागुक्तेनैव दोषेण प्रत्याचष्टे—तदापीति। अथवा किं यस्मात्कस्माच्चिज्जायमानस्य नियतजातीयत्वं स्वभावः उत नियतजातीयस्य यस्मात्कस्माच्चिज्जायमानत्वं स्वभाव इति विकल्प्य आद्यं प्रत्याह—यदि हीति। द्वितीयं प्रत्याह—एवमिति। अस्य स्वभाव इति—कार्यस्य स्वभाव इत्यर्थः।

पूर्वपक्षी प्रतिबन्द्या शङ्कते—कथं तर्हीति। तज्जातीयं प्रति विजातीयानां कारणत्वानुपगमे इत्यर्थः। तटस्थः प्रत्याह—एकशक्तीति। कार्यादिना कारणविशेषाद्यनुमानानुपपत्त्या दूषयति—

विजातीयेभ्य एकजातीयोत्पत्तिविवेचनम् 6

कथं तर्हि तृणारणिमणिभ्यो भवन्नाशुशुक्षणिरेकजातीयः ? एकशक्तिमत्त्वादिति चेत् न ; यदि हि विजातीयेष्वप्येकजातीयकार्यकारणशक्तिः समवेयात्, न कार्यात्कारणविशेषः क्वाप्यनुमीयेत, कारणव्यावृत्त्या च न तज्जातीयस्यैव कार्यस्य व्यावृत्तिरवसीयेत । तदभावेऽपि तज्जातीयशक्तिमतोऽन्यस्मादपि तदुत्पत्तिसंभवात् । यावद्दर्शनं व्यवस्था भविष्यतीति चेत् न, निमित्तस्यादर्शनात्, दृष्टस्य चानिमित्तत्वात् । एतेन सूक्ष्मजातीयादिति निरस्तम् । अवह्नेरपि तत्सौक्ष्म्यात् धूमोत्पत्त्यापत्तेः ।

कार्यजातीयभेदाभेदयोः समवायिभेदाभेदावेव तन्त्रम् । न निमित्तासमवायिनी इति चेत् न, तयोरकारणत्वप्रसङ्गात् । न हि सति भावमात्रं तत्, किंतु सत्येव भावः । न च जातिनियमे समवायिकारणमात्रं निबन्धनम्, अपि तु सामग्री । अन्यथा द्रव्यगुणकर्मणामेकोपादानकत्वे विजातीयत्वं न स्यात् । न च कार्यद्रव्यस्यैषा रीतिरिति युक्तम्; आरब्धदुग्धैरेवावयवैर्दध्यारम्भदर्शनात् ।

नेति । तदभावेऽपि—कारणविशेषाभावेऽपि । तज्जातीयशक्तिमतः—तज्जातीयकार्यानुकूलशक्तिमतः । शक्तेरतीन्द्रियत्वाभ्युपगमेन अत्रैवास्ति न तत्रेति नियन्तुमशक्यत्वादिति भावः । निमित्तस्य—कारणतावच्छेदकस्य । अदर्शनादिति । अतस्तदवच्छिन्ने कस्मिंश्चित् सत्येव कार्यमिति व्यवस्थापयितुं न दर्शनं प्रभवतीति भावः । दृष्टस्येति—तृणादित्वस्येत्यर्थः । सूक्ष्मजातीयादिति —अतीन्द्रियकारणतावच्छेदकजातिमत इत्यर्थः । अत्र पूर्वपक्षात् ध्वंसप्रागभावाद्यकल्पनलाघवमेव विशेषः, दोषस्तु सम इत्याशयेनाह - अवह्नेरपीति । तृणादीनां अग्निं प्रति निमित्तकारणतया न तद्भेदेन अग्निजातिभेदापत्तिरिति शङ्कते—कार्यजातीति ।

अकारणत्वप्रसङ्गादिति—तज्जातीयकार्यं प्रतीति शेषः । स्वाभावेऽप्यन्यतस्तज्जातीयकार्योत्पत्तौ व्यभिचारादिति भावः । उपपादयति नहीति । सत्येव भाव इति—यस्मिन् सत्येव कार्यस्य भावः तत्त्वमेव कारणत्वमित्यर्थः । इष्टापत्तौ दोषान्तरमाह—न चेति । आरब्धदुग्धैरिति । पृथिवीत्वव्याप्यजातेः परमाणुष्वनङ्गीकारादिति भावः ॥

अपोहवादे कारणनियमस्यानुपपत्तिः

एतेनापोहवादे नियमो निरस्तः, कार्यकारणभावाद्वा इत्यादिविप्लवप्रसङ्गात् । तस्मान्नियतजातीयतास्वभावभङ्गेन व्यक्त्यपेक्षयैव नियम इति—

न, फूत्कारेण तृणादेरेव निर्मन्थनेनारणेरेव प्रतिफलिततरणिकिरणैः मणेरेवेति प्रकारनियमवत् तेनैव व्यज्यमानस्य कार्यजातिभेदस्य भावात् । दृश्यते च पावकत्वाविशेषेऽपि प्रदीपः प्रासादोदरव्यापकमालोकमारभते, न तथा ज्वालाजालजटिलोऽपि दारुदहनः, न तरां च कारीषः । यस्तु तं नाकलयेत्, स कार्यसामान्येन कारणमात्रमनुमिनुयादिति किमनुपपन्नम् ।

तृणादीनामग्निं प्रति तृणाद्यन्यान्यत्वेन कारणत्वात् न व्यभिचार इति वादिनां मतेऽपि दोषमाह—एतेनेति । अपोहो ह्यतद्व्यावृत्तिः, तदन्यान्यत्वं तेन रूपेण हेतुत्वं सर्वेषामपि स्यादिति कारणनियमः तन्मतेऽपि न भवतीति भावः । ततः किमित्यत आह—कार्येति । 'स्वभावाद्वा नियामकात् । अविनाभावनियमो दर्शनात् न न दर्शनात्' इति कारिकाशेषः । स्वभावात्—तादात्म्यात् । दर्शनात् सपक्षे हेतोरिति शेषः । न दर्शनादिति । नशब्देन समासः । विपक्षे हेतोरिति शेषः । हेतोर्विपक्षे दर्शनाभावादित्यर्थः । नान्वयाद्व्यतिरेकाच्चाविनाभावनियम इति भावः । कार्यकारणभावासिद्धौ कार्यानुपलब्धिप्रसङ्गरूपविपक्षबाधकतर्कसाध्यः स्वभावनियमोऽपि दुर्ग्रह इति भावः ।

तृणादीनां कार्यतावच्छेदकजातिभेदात् नोक्तदोष इति सिद्धान्ती समाधत्ते—नेति । प्रकारनियमः—सहकारिनियमः । सहकारिवैलक्षण्यात् कार्यजातिवैलक्षण्यसिद्धिरिति भावः । उक्तार्थे निदर्शनतया वह्नित्वव्याप्यजातिभेदान् कारणभेदेन कार्यभेदेन च विवेचयति—दृश्यते चेति । विशेषदर्शनाभावे सामान्यमेवानुमीयते इत्याह—यस्त्विति । वह्न्यादिषु वैजात्योपगमे तदवच्छिन्ननिरूपितजन्यतावच्छेदकतया धूमादावपि किञ्चिद्वैजात्यं स्यादिति शङ्कते—एवं तर्हीति । ततः किमित्यत आह—न धूमादीति । सामान्यरूपेण नियमानुपगमादिति भावः । व्यतिरेक इति । कार्यानुपलब्धिलिङ्गकः सामग्र्यव्यतिरेकः कारणानुपलब्धिलिङ्गकः कार्यादिव्यतिरेकश्च न सिध्यतीति व्याख्यात इति भावः । कार्यानुपलब्धिलिङ्गभङ्ग इति । उक्तरीत्या कार्यलिङ्गस्यानुपलब्धिलिङ्गस्य च भङ्ग इत्यर्थः । स्वभावस्याप्यसिद्धेरिति । अयं वृक्षः शिंशपाया इति स्वभावानुमाने अप्रयोजकत्वेन शङ्किते यदि शिंशपा स्याचर्हि तया तत्सामग्रीघटकवृक्षसामग्र्यवश्यम्भावात् वृक्षेणापि भाव्यम्, अन्यथा कार्यकारण-

एवं तर्हि धूमादावपि कश्चिदनुपलक्षणीयो विशेषः स्यात्, यस्य दहनापेक्षेति, न धूमादिसामान्याद्वह्निसामान्यादिसिद्धिः। एतेन व्यतिरेको व्याख्यातः। तथा च कार्यानुपलब्धिलिङ्गभङ्गे स्वभावस्याप्यसिद्धेर्गतमनुमानेनेति चेत्—न। प्रत्यक्षानुपलम्भगोचरो जातिभेदो न कार्यप्रयोजक इति वदतो बौद्धस्य शिरस्येष प्रहारः। अस्माकं तु यत्सामान्याक्रान्तयोः ययोरन्वयव्यतिरेकवत्ता, तयोस्तथैव हेतुहेतुमद्भावनिश्चयः। तथा चावान्तरविशेषसद्भावेऽपि न नो विरोधः।

किं पुनस्तार्णादौ दहनसामान्यस्य प्रयोजकम्, तृणादीनां विशेष एव नियतत्वादिति चेत्—न। तेजोमात्रोत्पत्तौ पवनो निमित्तम्, अवयवसंयोगोऽसमवायी, तेजोऽवयवास्समवायिनः। इयमेव सामग्री गुरुत्ववद्द्रव्यसहिता पिण्डितस्य। इयमेव तेजोगतमुद्भूतस्पर्श-

---

भावभङ्गप्रसङ्गात्। यदि शिंशपा वृक्षमतिपत्य भवेत् तर्हि स्वसामग्रीमप्यतिपतेत। वृक्षत्वानुपगमे वृक्षरूपकार्यानुपलब्धिलिङ्गेन वृक्षसामग्र्यभावसिद्धौ तत्सामग्रीघटितशिंशपासामग्र्या अप्यभावप्रसक्त्या शिंशपाभावप्रसङ्गात्। न च कार्यं कारणमतिपतितुमीष्टे तद्व्याप्यत्वादिति वा विपक्षे बाधकस्तर्को वक्तव्यः। स कार्यानुपलब्धिलिङ्गभङ्गेन भवतीति स्वभावानुमानस्याप्यसिद्धिरिति भावः। प्रत्यक्षानुपलम्भेति। अन्वयव्यतिरेकग्रहो विवक्षितः इन्द्रियग्रहणयोग्यत्वं वा। अतीन्द्रियकुर्वद्रूपत्वादेरेव प्रयोजकत्वमिच्छत इति भावः। बौद्धस्येति। तेनैव कार्यलिङ्गकमनुपलब्धिलिङ्गकं स्वभावलिङ्गकं चेति अनुमानत्रैविध्योपगमादिति भावः। न नो विरोध इति। एकत्र सामान्यविशेषरूपाभ्यां अन्वयव्यतिरेकसत्त्वे सामान्यरूपेणापि नियमं कार्यानुपलब्धिस्वभावातिरिक्तलिङ्गकानुमानं चाभ्युपगच्छतां नानुमानोच्छेद इति भावः।

स्यादेतदेवम्, यदि दहनत्वसामान्यं स्यात् तदेव न। तदवच्छिन्नं प्रति सामग्र्यभावादिति शङ्कते—किं पुनरिति। किंशब्दः क्षेपे। परिहरति—नेति। पिण्डितस्य—सुवर्णादेः। पार्थिवं—काष्ठादि।

कारणोपगमेऽपि सर्वत्र तदेकमेकजातीयं वा स्यादिति शङ्कते—तथापीति। एकस्माद्भिन्नजातीयकार्याणि निदर्शयति—दृश्यते हीति। कृतं विचित्रेणेति। दृष्टजातीयाभ्युपगमेऽपि अदृष्टं नोपगन्तव्यमिति भावः। कार्यवैचित्र्यात् कारणवैचित्र्यमित्याह—वैचित्र्यादिति। कारणैक्ये दोष-

मपेक्ष्य दहनम्, तत्रापि जलं प्राप्य दिव्यम्, पार्थिवं प्राप्य भौमं, उभयं प्राप्योदर्यमारभत इति स्वयमूहनीयम् ।

अदृष्टस्य कारणत्वस्थापनारम्भः

तथाप्येकमेकजातीयमेव वा किंचित्कारणमस्तु कृतं वैचित्र्येण । दृश्यते ह्यविलक्षणमपि विलक्षणानेककार्यकारि । यथा प्रदीप एक एव तिमिरापहारी वर्तिविकारकारी, रूपान्तरव्यवहारकारीति चेत्—न, वैचित्र्यात् कार्यस्य ।

एकस्य न क्रमः क्वापि वैचित्र्यं च समस्य न ।
शक्तिभेदो न चाभिन्नः स्वभावो दुरतिक्रमः ॥ ७ ॥

न तावदेकस्मादनपेक्षादनेकत्वम्, अक्रमात् क्रमवत्कार्यानुपपत्तेः । क्रमवत्तावत्कार्यकारणस्वभावत्वात् तस्य, तत् तथा, यौगपद्यवदिति चेत्—अयमपि च क्षणभङ्गे परिहारो न तु सहकारिवादे । पूर्वपूर्वानपेक्षायां क्रमस्यैव व्याहतेः । क्रमनियमे त्वनपेक्षानुपपत्तेः ।

माह—एकस्येति । न क्रम इति । एककारणसंबन्धिकार्यक्रमो नोपपद्येतेति भावः । कारणानेकत्वोपगमेन उक्तदोषवारणेऽपि तेषामेकजातीयत्वोपगमे दोषमाह—वैचित्र्यमिति । प्रतिनियतवैजात्यवत्कार्यकरत्वमित्यर्थः । समस्य—एकजातीयस्य । कारणानामेकजातीयत्वेऽपि शक्तिभेदात्कार्यवैचित्र्यमित्यत आह—शक्तीति । न चाभिन्न इति । कारणादिति शेषः । अभेदे पूर्वोक्तदोषस्य, भेदे कारणवैचित्र्यसिद्धेश्च दुरपह्नवत्वादिति भावः । प्रतिनियतजातिमत्कार्यजनकत्वं स्वभाव इत्येतद्दूषयति—स्वभाव इति । दुरतिक्रम इति । कादाचित्कस्य स्वभावत्वाभावात् एकजातीयकार्यजननकाले अन्यजातीयकार्यजननस्वभावस्याप्यनतिलङ्घनीयत्वेन सर्वजातिसाङ्कर्यादिकं दुर्वारमिति भावः ।

अक्रमादिति । क्रमनियामकसहकारिविधुरादित्यर्थः । यौगपद्यवदिति । प्रदीपस्य पूर्वोक्तकार्ययौगपद्यवदित्यर्थः । क्षणभङ्ग इति । तत्रैव तत्तत्कार्यैकरणस्वभावतत्तत्पूर्वक्षणानां भिन्नत्वेन क्रमिकत्वात् तत्तत्कार्यक्रमो युक्तस्स्यादिति भावः । सहकारिवाद इति । सहकारिवादपर्यवसायिनि स्थैर्यवाद इत्यर्थः । तत्रापरिहारं विशदयति—पूर्वेति । धर्मिणः स्थैर्ये तत्स्वभावमात्रापगमायोगादसत्यामितरापेक्षायां कार्यक्रमस्य सति च क्रमेऽन्यानपेक्षावचनस्य वा व्याघतो दुष्परिहर इत्यर्थः । दृष्टान्ततयोक्तेषु तिमिरापहारादिविचित्रकार्येष्वपि अविचित्रकारणकत्वमसिद्धमिति भावः ।

नाप्यनेकमविचित्रम्। यदि ह्यन्यूनमनतिरिक्तं वा दहनकारणमदहनस्यापि हेतुः, नासावदहनो दहनो वा स्यात्, उभयात्मको वा स्यात्। न चैवम्। शक्तिभेदादयमदोष इति चेत्—न। धर्मिभेदाभेदाभ्यां तस्यानुपपत्तेः। असङ्कीर्णोभयजननस्वभावत्वादयमदोष इति चेत्—न। न हि स्वाधीनमस्यादहनत्वम्; अपि तु तज्जनकस्वभावाधीनम्। तथा च तदायत्तत्वाद्दहनस्यापि तत्त्वं केन वारणीयम्। न हि तस्मिन् जनयितव्ये नासौ तत्स्वभावः। तस्माद्विचित्रत्वात् कार्यस्य कारणेनापि विचित्रेण भवितव्यम्। न च तत् स्वभावतः तथा। ततः सहकारिवैचित्र्यानुप्रवेशः। न तु क्षणोऽपि तदनपेक्षः तथा भवितुमर्हतीति।

नासावदहन इति। दहनकारणजन्यत्वादिति भावः। कस्तर्हि स्यादित्यत्राह—दहनो वेति। दहन एवेत्यर्थः। अथवा नासाविति। दहनत्वमदहनत्वं वा न स्यात्। विरुद्धसामग्र्याः प्रतिबन्धकत्वादिति भावः। विरोधानुपगमे त्वाह—उभयात्मको वेति। तस्यानुपपत्तेरिति। धर्मिभेदे कारणवैचित्र्यस्याभेदे पूर्वोक्तदोषस्य चावर्जनीयत्वादिति भावः। तत्त्वं अदहनत्वम्। तत्—कारणं, स्वभावतः—सहकारिणमनन्तर्भाव्य। तथा—विचित्रम्। क्षणभङ्गेऽप्ययमावश्यक इत्याह—न त्विति। युगपदुत्पन्नादेककुसूलस्थापितादपि बीजपुञ्जात् पृथक्कृत्य कतिपयबीजावापे यावता कालेन क्षेत्रे अङ्कुरा उत्पद्यन्ते, तावता ततोऽधिकेन वा कालेन कुसूलस्थावशिष्टबीजात् नोत्पद्यन्त इति नियमस्य सहकार्यनुप्रवेशमन्तरा दुर्निर्वहत्वादिति भावः।

दृष्टकारणवैचित्र्योपगमेऽपि पूर्वोक्तदोषवारणसंभवाददृष्टं माभूदिति शङ्कते—अस्तु दृष्टमेवेति।

न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः।
नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः॥

इत्युक्तमिहानुसन्धेयम्। परिहरति—नेति। विश्ववृत्तित इति। विश्वेषां लोकानाम्। वृत्तेः-प्रवृत्तेः। बहुवित्तव्ययायाससाध्ययागादौ विश्वजनप्रवृत्तिसद्भावात्। कालान्तरभाविपारलौकिकफलविशेषमन्तरा तदनुपपत्तेः। अदृष्टव्यापारसिद्धिरिति भावः। परोक्तान् वैफल्यादिकल्पान् दूषयति—विफलेति। नेदृश इति। स्वानुष्ठानपूर्वकोपदेशः न विप्रलंभः स्यात्। अन्यथा आत्मनोऽपि विप्रलम्भापत्तेरिति भावः। पूर्वपूर्वेति। व्रीह्यादेः सस्यादि, तस्य अङ्कुरादि, तस्य बीजादीत्येवंरूपेण तत्र तत्र दृष्टमेव निबन्धनं अवधेयमिति भावः।

६ परलोकार्थिप्रवृत्त्यन्यथानुपपत्त्या अदृष्टस्थापनम्

अस्तु दृष्टमेव सहकारिचक्रम्, किमपूर्वकल्पनयेति चेत्—न। विश्ववृत्तितः।

विफला विश्ववृत्तिर्नो न दुःखैकफलाऽपि वा।
दृष्टलाभफला नापि विप्रलम्भोऽपि नेदृशः ॥ ८ ॥

यदि हि पूर्वपूर्वभूतपरिणतिपरम्परामात्रमेवोत्तरोत्तरनिबन्धनम्, न परलोकार्थी कश्चिदिष्टापूर्तयोः प्रवर्तेत। न हि निष्फले दुःखैकफले वा कश्चिदेकोऽपि प्रेक्षापूर्वकारी घटते, प्रागेव जगत्।

लाभपूजाख्यात्यर्थमिति चेत्—लाभादयः एव किंनिबन्धनाः? न हीयं प्रवृत्तिः स्वरूपत एव तद्धेतुः। यतो वाऽनेन लब्धव्यं यो वैनं पूजयिष्यति, स किमर्थम्? ख्यात्यर्थमनुरागार्थं च। जनो दातरि मानयितरि च रज्यते। 'जनानुरागप्रभवा हि सम्पदः' इति चेत्—न। नीतिनर्मसचिवेष्वेव तदर्थं दानादिव्यवस्थापनात्। त्रैविद्यतपस्विनो धूर्तवकाः एवेति चेत्—न, तेषां दृष्टसंपदं प्रत्यनुपयोगात्।

अथवा

'अत्र चत्वारि भूतानि भूमिवार्यनलानिलाः।
चतुर्भ्यः खलु भूतेभ्यः चैतन्यमुपजायते ॥'

इत्यादिना चैतन्यभोगादीनामपि भौतिकत्वोक्त्या पृथिव्यादिभूतपरिणतिपरम्परामात्रविश्रान्तत्वात् कार्यकारणभावस्य, न तदतिरिक्तचेतनगतमदृष्टं नाम किंचित् कस्यचिन्निबन्धनमिति चेदित्यर्थः। न हीति। बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनताज्ञानजन्यत्वात् प्रवृत्तेः इति भावः।

स्वरूपतः—कमप्यद्वारीकृत्य। पुरुषान्तरं द्वारमित्यत आह—यतो वेति। लाभाद्युद्देशेन यागादिकृते धनदातुरदृष्टमेव हि फलं कल्प्यमिति तत्सिद्धिरवर्जनीयेति भावः। नीतिनर्मसचिवाः—अमात्यविदूषकादयः। तदर्थमिति—ख्यात्यनुरागार्थमित्यर्थः। व्यवस्थापनादिति। अन्येभ्यः वनस्थतपस्विभ्यः प्रदानस्य दृष्टप्रयोजनासंभवादिति भावः। त्रैविद्येति। त्रिवेदीविदोऽपि परप्रतारणार्थं स्वकायक्लेशमप्यनुमन्यमानाः दृष्टार्थमेव प्रयतन्त इति भावः। धूर्तवका एवेति। वञ्चका एवेत्यर्थः। तेषामिति। दृष्टे निस्पृहाणामित्यर्थः। दृष्टसंपदं प्रत्यनुपयोगादिति। यागादिकर्मणि च सर्वव्ययादिति भावः।

सुखार्थं तथा करोतीति चेत्—न, नास्तिकैरपि तथा करणप्रसङ्गात्, सम्भोगवत्। लोकव्यवहारसिद्धत्वादफलमपि क्रियते, वेदव्यवहारसिद्धत्वात्सान्ध्योपासनवदिति चेत्—गुरुमतमेतत्, न गुरोर्मतम्। ततो नेदमनवसर एव वक्तुमुचितम्।

वृद्धैर्विप्रलब्धत्वाद्बालानामिति चेत्—न, वृद्धानामपि प्रवृत्तेः। न च विप्रलंभकाः स्वात्मानमपि विप्रलभन्ते। तेऽपि वृद्धतरैरित्येवमनादिरिति चेत्—न तर्हि विप्रलिप्सुः कश्चिदत्र, यतः प्रतारणशङ्का स्यात्। इदंप्रथम एव कश्चिदनुष्ठायापि धूर्तैः परानुष्ठापयतीति चेत्—किमसौ सर्वलोकोत्तर एव, यः सर्वस्वदक्षिणया सर्वबन्धुपरित्यागेन सर्वसुखविमुखो ब्रह्मचर्येण तपसा श्रद्धया वा केवलपरवञ्चनकुतूहली यावज्जीवमात्मानमवसादयति। कथञ्चैन-

---

सुखार्थमिति। तत्तदेकानुभाव्यतात्कालिकसुखार्थमित्यर्थः। परिहसति—गुरुमतमिति। गुरुमतमिदमिति त्वयोच्यमानं कर्मधारय एव समञ्जसम्, न तत्पुरुष इति भावः। यद्वा अननुगतप्रवृत्तिहेतुकल्पनाद्यधीनगौरवदोषकबलितं प्राभाकरस्य वा मतम्, न त्वस्मद्गुरोर्मतमित्यर्थः। प्रवर्तकज्ञानविषयप्रयोजनमन्तरा कार्यत्वस्यायोग्यतया वेदबोध्यत्वासंभवात् तज्ज्ञानवतः निष्फलवैदिके प्रवृत्त्यनुपपत्तेरिति भावः। अनवसर इति। 'विफला विश्ववृत्तिरि' त्याद्यविकल्पनिरसनसमय एवास्यावसरः, वैफल्यमभ्युपगम्य पर्यनुयोगात्, न तु दृष्टमात्रेण साफल्यकल्पनिरसनसमय इति भावः। यद्वा नास्तिकमतनिरसनावसरे न तस्य अवसर इति भावः।

वृद्धाः किं स्वयमन्यथा ज्ञातमन्यथा बोधयन्तः विप्रलम्भकाः इत्युच्यन्ते, उतान्यैः पूर्वपूर्ववृद्धैः स्वयमपि विप्रलब्धाः इति विकल्प्याद्यं प्रत्याह—वृद्धानामपीति। अन्त्यं प्रत्याह—न तर्हीति। ज्ञातविपरीतबोधनस्यैव विप्रलम्भत्वादिति भावः। कश्चित् परविप्रलम्भे उत्कटरागेण स्वात्मानमपि विप्रलभेतेति शङ्कते—इदंप्रथम इति। कथं चैनमिति। तदनुविधायिनस्सर्वेऽपि तद्विप्रलम्भं न जानन्तीति कल्पनानुपपत्तेरिति भावः। बौद्धादिप्रतारकसाम्यात् शङ्क्यत इत्याह—यत इति। एवं दृश्यत इति। अर्थव्ययशरीरायाससाध्यकर्तव्योपदेशानुष्ठानादि दृश्यत इत्यर्थः। वैषम्यमाह—हेत्विति। अप्रामाण्यहेतुः प्रायशः कर्मलाघवेन सुखासिका सुखलोभः श्रुत्यादिप्रमाणविरोधो वेह विवक्षितः। वैदिकयज्ञाद्याचारप्रवाहस्य प्रामाणिकत्वसंप्रतिपत्तावेव बौद्धादिभिः प्रतारणं कर्तुं शक्यमित्याह—अनादाविति। आधुनिकेन केनचिदकल्पित इत्यर्थः। प्रतारणानधीन इति भावः। प्रकारान्तरं सादित्वं विगीतत्वं च।

मेकं प्रेक्षापूर्वकारिणोऽप्यनुविदध्युः ? केन वा चिह्नेनायमीदृशः त्वया लोकोत्तरप्रज्ञेन प्रतारक इति निर्णीतः ? न ह्येतावतो दुःखराशेः प्रतारणसुखं गरीयः। यतः पाखण्डाभिमतेष्वप्येवं दृश्यत इति चेत्—न, हेतुदर्शनादर्शनाभ्यां विशेषात्। अनादौ चैवंभूतेऽनुष्ठाने प्रतार्यमाणे प्रकारान्तरमाश्रित्यापि बहुवित्तव्ययायासोपदेशमात्रेण प्रतारणा स्यात्, न त्वनुष्ठानगोचरेण कर्मणा। अन्यथा प्रमाणविरोधमन्तरेण पाखण्डित्वप्रसिद्धिरपि न स्यात्।

दानाध्ययनादिदृष्टक्रियैव जगद्वैचित्र्यहेतुरस्त्विति शङ्कापरिहारः

अस्तु दानाध्ययनादिरेव विचित्रो हेतुः जगद्वैचित्र्यस्येति चेत्—न। क्षणिकत्वात्। अपेक्षितस्य कालान्तरभावित्वात्।

चिरध्वस्तं फलायाऽलं न कर्मातिशयं विना।
सम्भोगो निर्विशेषाणां न भूतैस्संस्कृतैरपि॥ ९॥

न त्विति। कल्पनस्य सजातीयदर्शनाधीनत्वादिति भावः। न च प्रतारणान्तरदर्शनात् प्रतारणं स्यादिति वाच्यम्। अनवस्थानादसंभवाच्च। न हि प्रतारणसजातीयत्वबुद्धौ सत्यां प्रतारणं भवति। किन्तु सम्प्रतिपन्नफलकामनाधीनानाद्यनुष्ठानपरम्पराधिगतकर्मसाजात्यप्रदर्शनेनैव खलु शक्यं प्रतारणम्। अतो वैदिककर्मानुष्ठानं प्रतारणानात्मकमुपगन्तव्यमिति भावः।

अथवा पाखण्डाभिमतमानविरोधात् वैदिकोपदेश एव प्रतारणमस्तु। न च तस्य मानत्वमसिद्धम्। वेदेऽपि तथा वक्तुं शक्यत्वादित्यत्राह—अनादाविति। सजातीयं किञ्चिदनुष्ठितं दृष्ट्वैव तथा प्रतारयितुं शक्यमित्यनाद्यनुष्ठानविषयवैदिककर्मोपदेशस्य पूर्वभाविसजातीयाभावात् न प्रतारणत्वम्। किंतु तद्दर्शनाधीनतत्साजात्यावलम्बिपाश्चात्यपाखण्ड्युपदेशस्यैवेति भावः। अन्यथेति। वेदस्यामानत्व इत्यर्थः। प्रमाणखण्डितत्वमेव हि पाखण्डित्वमिति भावः। दानाध्ययनादिरेवेत्येवकारेण अदृष्टव्यवच्छेदः। तन्निराकरोति—नेति। कर्मातिशयम्—कर्माधीनफलपर्यन्तस्थायिव्यापारम्। संभोगः—प्रतिनियतभोगः। निर्विशेषाणां—निरतिशयानामात्मनाम्। संस्कृतैरपीति। उपायशरीरस्य फलपर्यन्तमनवस्थानात् फलशरीरस्य तदानीमभावात् परमाणूनां भोगानवच्छेदकत्वात् संक्रमासंभवस्य वक्ष्यमाणत्वाच्च न भूतसंस्कारस्संभवतीत्यपिना सूच्यते। संभवेऽपि वैयधिकरण्येन भोगनियामकत्वं न संभवतीति भावः। स्वजनकयागादिकर्तृत्वसंबन्धेन सामानाधिकरण्यमभिप्रेत्याह—ईदृशानीति।

तस्मादस्त्यतिशयः कश्चित् । ईदृशान्येवैतानि स्वहेतुबलाऽऽयातानि, येन नियतभोगसाधनानीति चेत् तदिदममीषामतीन्द्रियं रूपं सहकारिभेदो वा ? न तावदैन्द्रियकस्यातीन्द्रियं रूपं, व्याघातात् । द्वितीये त्वपूर्वसिद्धिः ।

अदृष्टं भूतधर्म एव न त्वात्मधर्म इत्याक्षेपः

सिद्ध्यतु भूतधर्म एव गुरुत्वादिवदतीन्द्रियः । अवश्यं त्वयाप्येतदङ्गीकरणीयम् । कथमन्यथा मन्त्रादिभिः प्रतिबन्धः । तथा हि—करतलानलसंयोगात् यादृशादेव दाहो दृष्टः, तादृशादेव मन्त्रादिप्रतिबन्धे सति दाहो न जायते, असति तु जायते । तत्र न दृष्टवैगुण्यमुपलभामहे । नापि दृष्टसाद्गुण्येऽदृष्टवैगुण्यं संभावनीयम् । तस्यैतावन्मात्रार्थत्वात् । अन्यथा कर्मण्यपि विभागः कदाचित् न जायेत । न च प्रतिबन्धकाभावविशिष्टा सामग्री कारणम् ; अभावस्याकारणत्वात् । तुच्छो ह्यसौ । प्रतिबन्धकोत्तम्भकप्रयोगकाले च तेन विनाऽपि कार्योत्पत्तेः । प्राक्प्रध्वंसादिविकल्पेन चानियतहेतुकत्वापातात् । अकिञ्चित्करस्य प्रतिबन्धकत्वायोगात्, किंचित्करत्वे चातीन्द्रियशक्तेः स्वीकारात् । मन्त्रादिप्रयोगे चेत-

---

अतिशयवन्तीत्यर्थः । एतानि—भूतानि । विकल्प्य दूषयति—तदिदमिति । अतिशय इत्यर्थः - रूपमिति विधेयप्राधान्यात् क्लीबता । अमीषां—भूतानाम् । रूपं स्वरूपम् । जातिरूपो धर्मो वा । व्याघातादिति । ऐन्द्रियकस्वरूपस्य तद्धर्मजातेः वा अतीन्द्रियत्वविरोधादिति भावः ॥

जातिभिन्नो भूतधर्म इति शङ्कते—सिद्ध्यतु इति । ऐन्द्रियकभूतधर्मत्वातीन्द्रियत्वकार्यानुकूलत्वयावदाश्रयभावित्वादिभिः अनुरूपतमं दृष्टान्तान्तरं दर्शयितुमुपक्रमते—अवश्यमिति । एतत्—ऐन्द्रियकभूतस्यातीन्द्रियधर्मवत्त्वम् । एतावन्मात्रार्थत्वात्—दृष्टसाद्गुण्यमात्रार्थत्वात् । अन्यथा—कार्यं प्रत्येव जनकत्वे । न जायेतेति । अदृष्टविलम्बादिति भावः । उत्तम्भकम्—उत्तेजकम् । कार्योत्पत्तेरिति । व्यभिचार इति भावः । स एव पुनः प्रकारान्तरेणोच्यते—प्रागिति । अकिंचित्करस्येति । प्रतिबन्धकपदेन प्रतिबन्धकरत्वप्रतीतेरिति भावः । अतीन्द्रियशक्तेरिति । तदानीं दृष्टकारणकलापस्याविकलत्वादतीन्द्रियकार्यानुकूलधर्मनाशस्यैव तज्जन्यत्वेनोपगन्तव्यतया तत्प्रतियोगिशक्तिस्वीकार इति भावः । अभावत्वेन सामान्यरूपेण हेतुत्वे व्यतिरेकव्यभिचारवारणेऽपि अन्वयव्यभिचारः स्यादित्याह—मन्त्रादीति । शक्त्युपगमेऽपि तदनेकत्वाद्व्यभिचार इत्यत आह—यस्यैकजातीयत्वादिति । अथवा

रेतराभावस्य सत्त्वेऽपि कार्यानुदयात् । अतोऽतीन्द्रियं किंचिद्बाह्यानुगुणमनुग्राहकमभ्युपगन्तव्यमिति यस्यापकुर्वतां प्रतिबन्धकत्वमुपपद्यते, यस्मिन्नेव काले कार्यं जायते यस्यैकजातीयत्वादनियतहेतुकत्वं निरस्यत इति ॥

अभावकारणत्वस्थापनम्

अतोच्यते—

भावो यथा तथाऽभावः कारणं कार्यवन्मतः ।
प्रतिबन्धो विसामग्री तद्धेतुः प्रतिबन्धकः ॥

न ह्यभावस्याकारणत्वे प्रमाणमस्ति । न हि विधिरूपेणासौ तुच्छ इति स्वरूपेणापि तथा, निषेधरूपाभावे विधेरपि तुच्छत्वप्रसङ्गात् । कारणत्वस्य भावत्वेन व्याप्तत्वात् तन्निवृत्तौ तदपि निवर्तत इति चेत्—न, परिवर्तप्रसङ्गात् । अन्वयव्यतिरेकानुविधानस्य च कारणत्वनिश्चयहेतोः भाववदभावेऽपि तुल्यत्वात् । अभावस्यावर्जनीयतया सन्निधिः, न तु हेतुत्वेनेति चेत्—तुल्यम् । प्रतियोगिनमुत्सारयतस्तस्यान्यप्रयुक्तस्सन्निधिरिति चेत्—

एतद्वाक्यं एकजातीयशक्तिमत्त्वेन तृणादीनां वह्निकारणत्व एव न व्यभिचारप्रसक्तिरिति शक्त्युपगमस्योपयोगान्तरप्रदर्शनपरम् ॥

भावो यथेति । यथा—येन प्रकारेणान्वयव्यतिरेकानुविधानेन । भावत्वव्याप्यं कारणत्वमिति चेत्—कार्यत्वमपि तथा स्यात् । न स्याद्वा तथोभयमित्यभिप्रेत्याह—कार्यवदिति । यथा ध्वंसः अभावोऽपि कार्यं भवति, तथा मन्त्राद्यभावः कारणं मत इत्यर्थः । प्रतिबन्धकत्वान्यथानुपपत्त्या शक्तिसिद्धिं प्रतिवक्ति—प्रतिबन्ध इति । विसामग्री—सामग्रीवैकल्यं कारणाभावः । मन्त्रादेः स्वाभावात्मककारणस्याभावरूपत्वात् प्रतिबन्धत्वमिति भावः । तद्धेतुः—तत्प्रयोक्ता पुरुषः । विधिरूपेण—भावरूपेण । तुच्छः—असन् । स्वरूपेण—अभावरूपेण । निषेधरूपाभावे—निषेधरूपेणासत्त्वे । परिवर्तप्रसङ्गादिति । कारणत्वस्याभावत्वेन व्याप्तत्वात् तन्निवृत्तौ निवृत्तिरित्यपि वक्तुं शक्यत्वादिति भावः । अवर्जनीयतयेति । दण्डरूपादिवदिति भावः । तुल्यमिति । भावस्याप्यवर्जनीयतया सन्निधिः न तु हेतुत्वेनेति किं न स्यादिति भावः । तुल्यमिति । भावसन्निधेरप्यभावोत्सारणार्थत्वादन्यथासिद्धिः कुतो न स्यादिति भावः । स्वरूपमेवेति । भावस्याभावोत्सारणेनान्यथासिद्ध्युक्तावपि अभावोत्सारणस्य

तुल्यम् । भावस्याभावोत्सारणं स्वरूपमेवेति चेत्—अभावस्यापि भावोत्सारणं स्वरूपान्नातिरिच्यते । तस्मात् यथा 'भावस्यैव भावो जनक' इति नियमोऽनुपपन्नः । तथा 'भाव एव जनक' इत्यपि । को ह्यनयोर्विशेषः ।

उत्तेजकाभावविशिष्टप्रतिबन्धकाभावस्य कारणत्वम्

प्रतिबन्धकोत्तम्भकप्रयोगकाले तु व्यभिचारः तदा स्यात् । यदि यादृशे सति कार्यानुदयः, तादृश एव सत्युत्पादः स्यात् । न त्वेवम्, तदाऽपि प्रतिपक्षस्याभावात् । असत्प्रतिपक्षो हि प्रतिबन्धकाभिमतो मन्त्रः प्रतिपक्षः । स च तादृशो नास्त्येव । यस्त्वस्ति, नासौ प्रतिपक्षः । तथापि विशेष्ये सत्येव विशेषणमात्राभावः तत्र, स चोत्तम्भकमन्त्र एवेत्यन्यैव सामग्रीति चेत्—न, विशिष्टस्याप्यभावात् । न हि दण्डिनि सति अदण्डानामन्येषां नाभावः । किन्तु दण्डाभावस्यैव केवलस्येत्युक्तम् । यथा हि केवलदण्डसद्भावे, उभयसद्भावे, द्वयाभावे वा केवलपुरुषाभावः सर्वत्राविशिष्टः, तथा केवलोत्तम्भकसद्भावे, प्रतिबन्ध-

---

भावस्वरूपत्वेन भावकारणत्वसिद्धिरिति भावः । तदिदमभावस्यापि तुल्यमित्याह—अभावस्यापीति । अनयोरिति । कार्यकारणत्वयोरित्यर्थः । इदमुपलक्षणम् अनुपलब्धेरभावज्ञाने विहिताकरणादेः प्रत्यवायादौ हेतुत्वस्य मीमांसकैरप्युपगमात् । अभावस्य हेतुत्वानुपगमे अपसिद्धान्तात् । उत्तेजकाभावविशिष्टमन्त्राद्यभावत्वेन हेतुत्वात् न व्यभिचार इत्याह-प्रतिबन्धकोत्तम्भकेति । तदापि-उत्तेजकसमवधानकालेऽपि । प्रतिपक्षस्य उत्तेजकाभावविशिष्टमन्त्रादेः । असत्प्रतिपक्षः-उत्तेजकरहितः । प्रतिबन्धकेति । स्वार्थे कः । एवं पूर्वापरयोरपि । विशेष्यवति विशिष्टाभावः विशेषणाभाव एवेति शङ्कते-तथापीति । ततः किमित्यत आह-अन्यैवेति । विशिष्टस्यापीति । विशिष्टप्रतियोगिकत्वमभ्युपगन्तव्यमिति भावः । उपपादयति-न हीति । अदण्डानाम्—दण्डरहितानाम् । दण्डिमति देशे अदण्डी नास्तीति प्रतीयमानस्याभावस्य दण्डरहितपुरुषान्तरप्रतियोगिकत्वं नास्तीति न हि वक्तुं युक्तमिति भावः । द्वयाभावे—दण्डाभावपुरुषाभावोभयसत्त्वे । एषा रीतिरग्रेऽपि । केवलपुरुषाभाव इति । कैवल्यमत्र दण्डराहित्यम् । केवलप्रतिबन्धकाभाव इत्यत्र तूत्तेजकराहित्यमिति बोध्यम् । अविशिष्ट इति । विशिष्टप्रतियोगिकाभावत्वरूपानुगतधर्मावच्छिन्न इत्यर्थः । सामग्रीत्रयमिति । केवलोत्तंभकं प्रतिबन्धकोत्तंभके एकैकाभावद्वयं चेति त्रयमित्यर्थः । क्वचिद्विशेषणविशेष्ययोरप्यभावः कारणं क्वचिद्विशेषणमात्रस्य क्वचिद्विशेष्यमात्रस्येति सामग्रीत्रयमिति यावत् । कार्यतावच्छेदकजाति-

कोत्तम्भकसद्भावे, द्वयाभावे वा केवलप्रतिबन्धकाभावोऽविशिष्ट इत्यवधार्यताम्। अथैवंभूतसामग्रीत्वमेव किं नेष्यते? कार्यस्य तद्व्यभिचारात्। जातिभेदकल्पनायां च प्रमाणाभावात्, यथोक्तेनैवोपपत्तेः। भावे वा काममसावस्तु, का नो हानिः।

प्राक्प्रध्वंसादिविकल्पोऽपि नानियतहेतुकत्वापादकः, यस्मिन् सति कार्यं न जायते तस्मिन्नसत्येव जायत इति, अत्र संसर्गाभावस्यैव प्रयोजकत्वात्। यस्तु संसर्गाभावतादात्म्यनिषेधयोः विशेषमनाकलयन्नितरेतराभावेन प्रत्यवतिष्ठते, स प्रतिबोधनीयः। तथाप्यभावेषु जातेरभावात् कथं त्रयाणामुपग्रहः स्यात्; अनुपगृहीतानां च कथं कारणत्वावधारणमिति चेत्—मा भूज्जातिः। न हि तदुपगृहीतानामेव व्यवहाराङ्गत्वम्। सर्वत्रोपाधिमद्व्यवहारविलोपप्रसङ्गात्।

एतेन प्रतिबन्धके सत्यपि तज्जातीयान्यस्याभावसंभवात् कार्योत्पादप्रसङ्गः, अनुत्पादे वा ततोऽप्यधिकं किंचिदपेक्षणीयमस्तीति निरस्तम्। यथा हि—'तज्जातीये सति कार्यं

भेदकल्पनान्न व्यभिचार इत्यत आह—जातिभेदकल्पनायामिति। का नो हानिरिति। शक्तिसिद्ध्यप्रसक्तेरिति भावः।

सति–संबन्धविशेषेण वृत्तिमति। असति–सबन्धविशेषेणाविद्यमाने। अन्योन्याभावस्यापि तादात्म्यावच्छिन्नप्रतियोगिताकत्वेन संसर्गाभावत्वसंभवात् पूर्वोक्तदोषमाशङ्क्याह—यस्त्वित्यादिना। प्रतिबोधनीय इति। अन्योन्यात्यन्ताभावयोरविशेषे प्रतिबन्धके सत्यपि तदन्योन्याभावमादाय भवन्मते शक्तिः स्यादिति प्रतिबन्द्या बोधनीय इत्यर्थः। यद्वा तादात्म्यातिरिक्तसंबन्धावच्छिन्नप्रतियोगिताकत्वस्य तादात्म्यानवच्छिन्नप्रतियोगिताकत्वस्यैव वा नास्तीति व्यवहारप्रयोजकसंसर्गाभावत्वरूपतया नोक्तशङ्कावकाश इति प्रतिवक्तव्य इति भावः। संसर्गाभावत्वस्य जातिभिन्नत्वेन पुनरननुगमं शङ्कते-तथापीति। अखण्डोपाधिनापि अनुगतव्यवहारस्स्यादिति समाधत्ते—मा भूदिति।

एतेनेति। अनुगतेन प्रतिबन्धकसामान्यसंसर्गाभावत्वेन रूपेण कारणत्वोपगमेनेत्यर्थः। निरस्तमिति। यत्किञ्चित्प्रतियोगिमति प्रतियोगिविशेषाभावसंभवेऽपि सामान्यधर्मावच्छिन्नाभावासंभवादिति भावः। एतेन दण्डत्वादिरूपकारणतावच्छेदकजात्याश्रयतया यस्य कस्यचित् दण्डादेरिव यत्किञ्चिद्विशेषाभावस्य कारणतावच्छेदकसामान्याभावत्वानाश्रयत्वात् न कार्योत्पादप्रयोजकत्वमित्युक्तं

जायते, अर्थात् असति न जायते' इति स्थिते तद्भावेऽपि तज्जातीयान्तराभावात् न भवितव्यं कार्येणेति न, तथैतदपि, अनुकूलवत् प्रतिकूलेऽपि सति तज्जातीयान्तराभावानामकिञ्चित्करत्वादिति ।

उदयनमतेन प्रतिबन्धकपदार्थशोधनम्

यत्तु—'अकिञ्चित्करस्य' इति । तदप्यसत् । सामग्रीवैकल्ये प्रतिबन्धपदार्थो मुख्यः । स चात्र मन्त्रादिरेव । न त्वसौ प्रतिबन्धकः । ततः किं तस्याकिञ्चित्करत्वेन ? तत्प्रयोक्तारस्तु प्रतिबन्धकाः, ते च किञ्चित्करा एवेति किमसमञ्जसम् । ये तु व्युत्पादयन्ति 'कार्यानुत्पाद एव प्रतिबन्ध' इति तैः 'प्रतिबन्धमकुर्वन्त एव प्रतिबन्धकाः' इत्युक्तं भवति । तथा हि कार्यस्यानुत्पादः प्रागभावो वा स्यात्, तस्य कालान्तरप्राप्तिर्वा । न पूर्वः, तस्यानुत्पाद्यत्वात् । न द्वितीयः, कालस्य स्वरूपतोऽभेदात् । तदुपाधेस्तु मन्त्रमन्तरेणापि स्वकारणा

भवति । अत्रानुरूपं दृष्टान्तमाह—यथा हीति । स्थित इति । कारणाभावस्य कार्याभावप्रयोजकत्वे सिद्ध इत्यर्थः । तज्जातीयान्तराभावात् —देशान्तरस्थदण्डादिजातीयान्तराभावात् । अकिंचित्करत्वादिति । प्रतिबन्धककारणसामान्याभावत्वरूपकारणतावच्छेदकानाश्रयत्वेन कार्यतदभावयोरकारणत्वादित्यर्थः ।

अकिञ्चित्करस्य प्रतिबन्धकत्वायोगादित्युक्तं प्रतिवक्तुमनुवदति —यत्त्विति । दूषयति—तदसदिति । प्रतिबन्धो विसामग्रीत्युक्तमेव विवृणोति—सामग्रीवैकल्यमित्यादिना । सामग्रीवैकल्यं—कारणाभावः । मन्त्रादिरेवेति । मन्त्राद्यभावो हि कारणमिति भावः । प्रतिबन्धारः—प्रतिबन्धकाः । ते च–मन्त्रदिप्रयोक्तारश्च । किमसमञ्जसमिति । मन्त्रादिप्रयोगकर्तृत्वेन प्रतिबन्धकर्तृपरप्रतिबन्धकपदवाच्यत्वं नानुपपन्नमिति भावः । कार्यानुत्पादप्रयोजकत्वं प्रतिबन्धकत्वं तच्च मण्यादेरेवेति मतं दूषयितुमनुवदति—ये त्विति । दूषयति–तैरिति । तस्य—प्रागभावस्य । कालस्य–महाकालस्य । स्वरूपतोऽभेदात्–स्वरूपैक्यात् कालान्तरमप्रसिद्धमिति भावः । अथवा कालप्राप्तेः स्वरूपसंबन्धरूपतया कालाभिन्नत्वादनुत्पाद्यत्वं तदवस्थमिति भावः । तदुपाधेः—कालोपाधेः सूर्यपरिस्पन्दादेः । मन्त्रमन्तरेणेति । सततजायमानजातीयस्य कादाचित्कहेतुकत्वं न भवतीति भावः । अथ प्रागभावावच्छेदककालोपाधौ वैजात्यमुपगम्य तत्र मन्त्रापेक्षां शङ्कते—प्रागभावेति । तत्रापि व्यभिचारमाह–पूर्वमपीति । प्रागभावस्यानादित्वादिति भावः । कथं तर्हि प्रतिबन्धकात्

धीनत्वात् । प्रागभावस्वच्छेदककालोपाधिस्तदपेक्ष इति चेद्—न । मन्त्रात्पूर्वमपि तस्य भावात् । तस्मात् सामग्रीतत्कार्ययोः पौर्वापर्यनियमात् तदभावयोरपि पूर्वापरभाव उपचर्यते, वस्तुतस्तु तत्कालत्वमेवेति नायं पन्थाः ।

सहजशक्तिनिरासः

न चेदेवम्—शक्तिस्वीकारेऽपि कः प्रतीकारः ? तथा हि प्रतिबन्धकेन शक्तिर्वा विनाश्यते, तद्धर्मो वा, धर्मान्तरं वा जन्यते, न जन्यते वा किमपीति पक्षाः । तत्राकिंचित्करस्य प्रतिबन्धकत्वानुपपत्तेः, विपरीतधर्मान्तरजनने, तदभावे सत्येव कार्यमित्यभावस्य कारणत्वस्वीकारः, प्रागभावादिविकल्पावकाशश्च । तद्विनाशे तद्धर्मविनाशे पुनरुत्तम्भकेन तज्जननेऽनियतहेतुकत्वम् ; पूर्वं स्वरूपोत्पादकात् इदानीमुत्तम्भकादुत्पत्तेः । न च समानशक्तिकतया तुल्यजातीयत्वात् नैवमिति सांप्रतम् । विजातीयेषु समानशक्तिनिषेधात् । न च

कार्यानुत्पाद इति व्यवहार इत्यत्राह—तस्मादिति । नायं पन्था इति । कार्यानुत्पादतदनुवृत्त्योः प्रागपि सत्योः मन्त्रादेरप्रयोजकत्वेन न प्रतिबन्धकत्वं प्रतिबन्धकत्वमिति न त्वदुक्तमार्गस्साधीयानिति भावः ।

एतावता मन्त्राद्यभावकारणतावादिभिरुक्तः शङ्कापरिहारक्रमः शक्तिवादिनामप्यवर्जनीय इत्याह—न चेदेवमिति । विकल्पितेष्वन्त्यं दूषयति—तत्रेति । तृतीयं दूषयति—विपरीतेति । धर्मान्तरमित्यस्य कार्यप्रतिकूलधर्म इति ह्याशयः । पूर्वोक्तदोषं प्रसञ्जयति—तदभावे इति । आद्यं द्वितीयं च दूषयति—तद्विनाश इत्यादिना । तद्धर्मविनाश इति । कार्यानुकूल्यरूपधर्मविनाश इत्यर्थः । स्वरूपोत्पादकात्-आश्रयवह्न्याद्युत्पादकात् । तुल्यजातीयत्वात्—तुल्यजातीयसदृशत्वात् । नैवमिति । न व्यभिचार इत्यर्थः । समानशक्तिनिषेधादिति । तृणारणिमणिकारणताविचार इति भावः । प्रतिबन्धकशक्तिं कार्यानुकूलधर्मविघटिकाम्, भावशक्तिं-कार्यानुकूलाम् । तदनुत्पादेति । कार्यानुकूलशक्त्यनुत्पादेत्यर्थः । कालविशेषादिति । उत्तेजकसमवधानकालादित्यर्थः । अनियतहेतुकत्वमिति । तथा चाद्ययोः व्यभिचारस्य दुर्वारत्वात्, अन्त्ये प्रतिबन्धकत्वानुपपत्तेः, तृतीयकल्पाश्रयणे, अभावकारणताश्रयणस्यावर्जनीयत्वात् अप्रमाणिकानन्तशक्तितत्प्रागभावादिकल्पनागौरवं परमतिरिच्यते भवन्मते न तु किञ्चिदपि लाघवमिति भावः ।

प्रतिबन्धकशक्तिमेवोत्तम्भको विरुणद्धि, न तु भावशक्तिमुत्पादयतीति सांप्रतम्; तदनुत्पादप्रसङ्गात्। कालविशेषात् तदुत्पादे तदेवानियतहेतुकत्वमिति।

आधेयशक्तिवादोपक्षेपः

स्यादेतत्। माभूत् सहजशक्तिः, आधेयशक्तिस्तु स्यात्। दृश्यते हि प्रोक्षणादिना व्रीह्यादेरभिसंस्कारः। कथमन्यथा कालान्तरे तादृशानामेव कार्यविशेषोपयोगः। न च मन्त्रादीनेव सहकारिणः प्राप्य ते कार्यकारिण इति सांप्रतम्। तेषु चिरध्वस्तेष्वपि कार्योत्पादात्। नापि प्रध्वंससहायास्ते तथा; एवं हि यागादिप्रध्वंसा एव स्वर्गादीनुत्पादयन्तु। कृतमपूर्वकल्पनया। तेषामनन्तत्वादनन्तफलप्रवाहः प्रसज्यत इति चेत्—अपूर्वेऽपि कल्पिते तावानेव फलप्रवाह इति कुतः? अपूर्वस्वाभाव्यादिति चेत्—तुल्यमिदमिहापि। तावताऽपि तत्प्रध्वंसो न विनश्यतीति विशेषः।

आधेयशक्तिः। प्रागेव सिद्धे धर्मिणि पश्चात्प्रोक्षणादिना आहितः अतीन्द्रियः अतिशयः। कार्यविशेषोपयोगः अवघातयागाद्युपयोगः। आधेयशक्त्यभावेऽपि सहकारिसंपत्तिरूपविशेषात् कार्यविशेषोपयोग इति शङ्कते—न चेति। मन्त्रादीनिति। अभिमन्त्रणप्रोक्षणादीनित्यर्थः। कालान्तरेसहकारिविरहेऽपि तद्ध्वंसरूपो व्यापारोऽस्तीति शङ्कते नापीति। तत्र प्रतिबन्दीमाह—एवं हीति। प्रध्वंसानामविनाशित्वादविनश्वराणि कर्मफलानि स्युरिति शङ्कते—तेषामिति। प्रध्वंसानामित्यर्थः। फलप्रवाह इति। द्विक्षणावस्थायिसुखानुभवानां भिन्नभिन्नत्वात् प्रवाह इत्युक्तम्। कुत इति। अपूर्वस्यापि हि चरमफलं यावदनुवृत्तिस्वीकारात् इति भावः। तुल्यमिदं—व्यापारस्वभावानुगुणफलव्यवस्थापनं ध्वंसेऽपि तुल्यम्। सन्नप्यविनाशित्वरूपो विशेषोऽकिञ्चित्कर इत्याह—तावतापीति। अथ प्रतियोगिध्वंसयोरेकत्र न हेतुत्वमिति चेत्तुल्यं, प्रोक्षणतद्ध्वंसयोरपीति बोध्यम्।

संस्कारकर्माणि प्रोक्षणादीन्यतीतान्यप्याधेयातिशयाभावेऽप्युपलक्षणत्वेन व्रीह्यादिविशेषाणां व्यावर्तकानि स्युरिति शङ्कते—स्यादेतदिति। गुरुणेति। अतीतेनापि प्राभाकरेण कर्त्रोपलक्षिता टीका गुरुटीकेत्युच्यते इति भावः। दृष्टान्ते कारणत्वाभावेन वैषम्यमुपदर्शयन् दूषयति—तदसदिति। अतिप्रसङ्गादिति। व्रीह्यादिनाशेऽपि यागाद्यापत्तेरित्यर्थः। गुरुटीकेत्यादिव्यवहारे व्यवहर्तव्यस्य गुरोरतीतस्य हेतुत्वं न स्यादित्यत्राह—व्यवहारमात्रं त्विति। तज्ज्ञानसाध्यमित्यादौ तच्छब्दो

स्यादेतत् । उपलक्षणं प्रोक्षणादयः; न तु विशेषणम् । तथा चाविद्यमानैरपि तैरुपलक्षिता व्रीह्यादयस्तत्र तत्रोपयोक्ष्यन्ते, यथा गुरुणा टीका; कुरुणा क्षेत्रम्—इति चेत्—तदसत् । न हि स्वरूपव्यापारयोरभावेऽप्युपलक्षणस्य कारणत्वं कश्चिदिच्छति; अतिप्रसङ्गात् । व्यवहारमात्रं तु तज्ज्ञानसाध्यम्; न तु तत्साध्यम् । तज्ज्ञानमपि स्वकारणाधीनम् । न तु तेन निरन्वयध्वस्तेन जन्यते । अस्तु वा तत्राप्यतिशयकल्पना; किन्नश्छिन्नम्? यद्वा यागादेरप्युपलक्षणत्वमस्तु । तदुपलक्षितः कालो यज्वा वा स्वर्गादि साधयिष्यति कृतमपूर्वेण ॥

नैयायिकोक्तापूर्वसाधकानुमानस्य दूषणम्

न च देवदत्तस्य स्वगुणाकृष्टाः शरीरादयो भोगाय, तद्भोगसाधनत्वात् स्रगादिवदित्यन्वयिबलादपूर्वसिद्धेर्नाविशेष इति साम्प्रतम्; इच्छाप्रयत्नज्ञानैः यथायोगं सिद्धसाधनात् । न च तद्रहितानामपि भोग इति युक्तिमत्; येन ततोऽप्यधिकं सिध्येत् । नापि स्वगुणोत्पादित इति साध्यार्थः, मनसाऽनैकान्तिकत्वात् । नापि कार्यत्वे सतीति विशेषणीयो

व्यवहर्तव्यपरः । न त्विति । व्यवहारे व्यवहर्तव्यज्ञानस्यैव हि हेतुत्वमिति भावः । न तु तेनेति । प्रत्यक्ष एव हि विद्यमानस्यैव विषयस्य हेतुत्वमुपगतमिति भावः । किं नश्छिन्नमिति । तवैव निरतिशयदृष्टान्तासिद्ध्या हानिरिति भावः । उपलक्षणत्वे प्रतीबन्दीमाह—यद्वेति ।

अपूर्वसत्त्वे अनुमानमाशङ्क्य निराकुरुते—न चेति । स्वगुणाकृष्टत्वं किं स्वगुणसहकृतत्वं स्वगुणोत्पादितत्वं वेति विकल्प्याद्ये दोषमाह—इच्छेति । परसंपादितभोगे ज्ञानसत्त्वेऽपि यत्नाद्यभावादाह—यथायोगमिति । एकैकेन समुदितैर्वेत्यर्थः । तद्रहितानां—ज्ञानादिरहितानाम् । द्वितीये दोषमाह—नापीति । मनसेति । हेतुमतस्तस्य नित्यत्वेन न साध्यवत्त्वमिति भावः । उपलक्षणैरिति । अतीतैः यागादिभिरित्यर्थः ।

प्रमाणतः—व्रीहीन् प्रोक्षतीत्यादितः । बीजादीनामिति । आदिना ओषध्यादिपरिग्रहः । तत्रापि पेषणादिना परमाण्वन्तभङ्गः । नियतजातीयेति । कलमाद्यङ्कुरौषधविशेषजातीयेत्यर्थः । अतः कृष्यादिभिः बीजादिष्विव प्रोक्षणादिभिः व्रीह्यादिष्वप्यतिशयः स्वीकरणीय इति भावः । सिद्धान्त्याह—अत्रोच्यत इति ।

हेतुः; तथाप्युपलक्षणैरेव सिद्धसाधनात्। असतां तेषां कथमुत्पादकत्वमिति चेत्—तदेतदभिमन्त्रणादिष्वपि तुल्यम्॥

तस्माद्भावभूतमतिशयं जनयन्त एव प्रोक्षणादयः कालान्तरभाविने फलाय कल्पन्ते। प्रमाणतस्तदर्थमुपादीयमानत्वात् यागकृषिचिकित्सावदिति। अन्यथा कृष्यादयो दुर्घटाः प्रसज्येरन्; बीजादीनामापरमाण्वन्तभङ्गात् तेषु चावान्तरजातेरभावान्नियतजातीयकार्यारम्भानुपपत्तेः। अत्रोच्यते—

आधेयशक्तिवादनिरासपूर्वकमदृष्टस्यात्मधर्मत्वसाधनम्

संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः।
स्वगुणाः परमाणूनां विशेषाः पाकजादयः॥ ११॥

यथा हि देवताविशेषोद्देशेन हुताशने हविराहुतयः समन्त्राः प्रयुक्ताः पुरुषमभिसंस्कुर्वते, न वह्निं, नापि देवताः; तथा व्रीह्याद्युद्देशेन प्रयुज्यमानः प्रोक्षणादिः पुरुषमेव संस्कुरुते, न तम्। यथा च कारीरीजनितसंस्काराधारपुरुषसंयोगाज्जलमुचां सञ्चरणजलक्ष-

---

संस्कारः—प्रोक्षणादिजन्यातिशयः। प्रोक्षणं—गोकर्णाकृतिहस्तेन कर्तव्यम्। अभ्युक्षणं—अवाङ्मुष्टीकृतेन हस्तेन कर्तव्यम्। कृष्यादावपि कर्षकादावदृष्टं स्यादित्यत्राह—स्वगुणा इति। न ह्यदृष्टं तत्रोपगम्यते। किन्तु पाकजैरेव स्वगुणैः व्यावृत्ताः परमाणवः नियतजातीयं कार्यमारभन्त इति भावः। विशेषाः—व्यावर्तकाः।

व्रीह्यादीनां प्रोक्षणाद्युद्देश्यत्वे तदधीनातिशयवत्त्वमभ्युपगन्तव्यमित्यत्राह—यथा हीति। न वह्निमिति। प्रक्षेपांशे उद्देश्यत्वे सत्यपीति भावः। निर्विशेषाणां व्रीह्यादीनां उत्तरयागादिक्रियोपयोगो नावकल्पत इत्यत आह—यथा चेति। स्वाश्रयसंयोगेन सविशेषत्वमेवोत्तरक्रियोपयोगनियामकमिति भावः। कारीर्या फलानियमात् न तन्निदर्शनमित्यत्राह—यथा चैकत्रेति। परत्रापि-प्रोक्षणादावपि। विधिचोदितत्वेन इष्टसाधनत्वावधारणन्तु उभयत्र तुल्यमित्याह—आगमिकत्वस्येति। कर्तुः पातकादिदोषे तत्रातिशयासंभववत् व्रीह्यादिद्रव्यदोषे तत्रापि तदसंभवस्तुल्य इत्येवं वा यथा चेत्यादि योज्यम्।

अथ बर्हिषः स्तरणादिसंस्कारोपगमात् हविरासादनाद्युपयोगेऽपि व्रीह्यादेस्सक्तूनामिव संस्कारानभ्युपगमादुत्तरोपयोगो न स्यादिति शङ्कते—न तर्हीति। वस्तुतस्तु बर्हिरत्र वह्निः यथाहीति पूर्व

रणरूपक्रिया, तथा व्रीह्यादीनां तत्तदुत्तरक्रियाविशेषाः। यथा चैकत्र कर्तृकर्मसाधनवैगुण्या-त्फलाभावस्तथा परत्रापि; आगमिकत्वस्योभयत्रापि तुल्यत्वात् ॥

न तर्हि बर्हिष इव व्रीह्यादेः पुनरुपयोगान्तरं स्यात्। उपयोगे वा तज्जातीयान्तर-मप्युपादीयेत; अविशेषात्, न। विचित्रा ह्यभिसंस्काराः। केचिद्व्याप्रियमाणोद्देश्यसहकारिण एव कार्ये उपयुज्यन्ते। किमत्र क्रियताम्? विधेर्दुर्लङ्घत्वात्। यथा चाभिचारसंस्कारो यं देहमुद्दिश्य प्रयुक्तस्तदपेक्ष एव तत्सम्बद्धस्यैव दुःखमुपजनयति नान्यस्य; न वा तदनपेक्षः। एवमभिमन्त्रणादिसंस्कारा अपि भवन्तो न मनागपि नोपयुज्यन्ते। कथं तर्हि व्रीह्यादीनां संस्कार्यकर्मतेति चेत् प्रोक्षणादिफलसंबन्धादेव।

अदृष्टस्य व्रीह्यादिधर्मत्वसाधकानुमानस्य दूषणम्

ननु यदुद्देशेन यत्क्रियते तत्तत्र किञ्चित्करम्, यथा पुत्रेष्टिपितृयज्ञौ। तथा चाभि-मन्त्रणादयो व्रीह्याद्युद्देशेन प्रवृत्ताः इत्यनुमानमिति चेत्—तन्न—हविस्त्यागादिभिरनैकान्ति-

---

वाक्ये न वह्निमिति वह्नेः आहुतिभिः असंस्कार्यत्वस्य दृष्टान्ततया कथनात्। ततश्च तत्र हुतानां हविषां तत्संस्कारकत्वाभावात् यथा न होमानन्तरमुपयोगान्तरं तद्वत् प्रोक्षणाद्यसंस्कृतानां व्रीह्यादीनां न तदनन्तरमुपयोगः स्यादिति शङ्कते—न तर्हीति। व्रीहिभिर्यजेतेत्यादिवचनादुपयोग इत्यत्राह—उपयोगे वेति। अविशेषादिति। संस्काराधारपुरुषसंयोगस्य तुल्यत्वादिति भावः। व्याप्रिय-माणेति। प्रोक्षणादिव्यापारविषयव्रीह्याद्युद्देश्यव्यक्तिविशेषसहकृता इत्यर्थः। कार्ये—यागादौ। विधेरिति। प्रोक्षणादिविधेरित्यर्थः। अनुवादस्य सन्निहितगामित्वेन व्रीहिभिर्यजेतेत्यत्रोक्तानेव व्रीह्या-दिव्यक्तिविशेषाननूद्य प्रोक्षणादिविधेः प्रोक्षणाद्यनुद्देश्यव्रीह्यादिभिर्यजने विध्यतिलङ्घनं स्यादिति भावः। क्रियाजन्यफलाभावे कर्मत्वानुपपत्तिं शङ्कते—कथं तर्हीति। प्रोक्षणादिफलं—जलसंयोगादि।

किञ्चित्करमिति। कालान्तरभाविफलानुगुणकिञ्चित्करमित्यर्थः। तेन न जलसंयोगादिक-मादाय सिद्धसाधनम्। त्यागादिभिरित्यादिना प्रक्षेपादिग्रहः। हुताशनादावित्यादिना तु देवतायाः। देवताचैतन्यवादिनां प्रीत्यादिकरत्वसंभवात् व्यभिचारपरिहारेऽप्याह—किं वेति। न प्रमेय इति। प्राकट्यमप्रामाणिकमेवेति भावः।

कृष्यादावप्यात्मन्यतिशयस्स्यादिति शङ्कते—कृषीति। अदृष्टं प्रत्यात्मत्वेन कारणत्वस्य क्लृप्तत्वेन तत्रैव तदात्मनि कल्प्यते यत्र दृष्टेन नोपपत्तिः। अन्यत्र तु यथादर्शनं दृष्टमेवेत्याशयेन

त्वात्। न हि ते कालान्तरभाविफलानुगुणं किञ्चित् हुताशनादौ जनयन्ति। किं वा न दृष्टमिन्द्रियलिङ्गशब्दव्यापाराः प्रमेयोद्देशेन प्रवृत्ताः प्रमातर्येव किञ्चिज्जनयन्ति, न प्रमेये इति।

कृषिचिकित्सादीनामदृष्टं विनैव कार्यकरत्वम्

कृषिचिकित्से अप्येवमेव स्यातामिति चेत्—न—दृष्टेनैव पाकजरूपादिपरिणतिभेदेनोपपत्तावदृष्टकल्पनायां प्रमाणाभावात्। तथा च लाक्षारसावसेकादयो व्याख्याताः। अत एव बीजविशेषस्य आपरमाण्वन्तभङ्गेऽपि, परमाणूनामवान्तरजात्यभावेऽपि, प्राचीनपाकविशेषैरेव विशिष्टाः परमाणवस्तं तं कार्यविशेषमारभन्ते। यथा हि कलमबीजं यवादेः, नखीजं वानरादेः, गोक्षीरं महिषादेः जात्या व्यावर्तते; तथा तत्परमाणवोऽपि मूलभूताः पाकजैरेव व्यावर्तन्ते। न ह्यस्ति सम्भवो गोक्षीरं सुरभि मधुरं शीतम्; तत्परमाणवश्च विपरीताः। तस्मात्तथाभूतपाकजा एव परमाणवः; यथाभूतैरेवाद्यातिशयोऽन्त्यातिशयोऽङ्कुरादिर्वेति किमत्र शक्तिकल्पनया।

समाधत्ते—नेति। स्वगुणा इत्यादिनोक्तं विवृणोति—दृष्टेनैवेति। लाक्षारसावसेकादय इति। कार्पासबीजादिगताः ते परमाणुषु पाकजरक्तिमादिकमुत्पाद्य पुनस्तदुत्पन्नबीजादिपरम्परया पुष्पादिषु रक्तिमानमादधतीति भावः। प्राचीनेति प्राचीनजातीयस्याप्युपलक्षणम्। आद्यातिशयः—द्व्यणुकम्। अन्त्यातिशयः—बीजम्। अङ्कुरादिः—अङ्कुरस्यादिः कारणम्।

कल्पादौ कृष्याद्यभावात् कथमङ्कुरादीत्यत आह—कल्पादाविति। एवमेवेति। पाकजगुणव्यावृत्तैः परमाणुभिः द्व्यणुकादिपरम्परया अङ्कुरादीत्येतावत्तुल्यमेवेति भावः। विशेषन्त्वाह—इदानीमिति। सहकारिसमवधानोत्पादनमुपसंपादनम्। अन्यत्रस्थेति। कृष्यादिविरहे परिश्रमाद्यनुगुणफलभोगव्यवस्था न स्यादिति भावः। अदृष्टानि कर्माणीति। अदृष्टात्मकानि कर्माणीत्यर्थः। अदृष्टस्य सामग्रीसम्पादन एवोपयोग इत्यत्र हि वाक्यतात्पर्यम्। सन्ति च 'क्षीयन्ते चास्य कर्माणि' त्यादावदृष्टेषु कर्मशब्दप्रयोगाः। दृष्टकर्मव्यवस्थया जलावसेककर्षणकर्मादिरूपदृष्टकारणमेलनव्यवस्थामुखेनैव भोगसाधनानीत्यर्थः। भोगसाधनदृष्टकारणमेलन एव साधनानि न तु भोगसाधनानीति भावः। तदुक्तम्—"अन्यथा कर्मण्यपि विभागः कदाचिन्न जायेतेति"। एतावता केवलमदृष्टमपि भोगव्यवस्थापकं न भवतीत्युक्तं भवति।

कल्पादौ बीजाद्यभावात्कथमङ्कुरादीत्याक्षेपपरिहारः

कल्पादावप्येवमेव। इदानीं बीजादिसन्निविष्टानामस्मदादिभिरुपसम्पादनम्। तदानीं तु विभक्तानामदृष्टादेव केवलान्मिथः संसर्ग इति विशेषः। न च वाच्यमिदानीमपि तथैव किं न स्यात्; यतः कृष्यादिकर्मोच्छेदे तत्साध्यानां भोगानामुच्छेदप्रसङ्गादव्यवस्थाभयाच्चादृष्टानि कर्माणि दृष्टकर्मव्यवस्थयैव भोगसाधनानीत्युन्नीयते॥

तस्मात्पाकजविशेषैः संस्थानविशेषैश्च विशिष्टाः परमाणवः कार्यविशेषमारभन्ते। ते च तेजोऽनिलतोयसंसर्गविशेषैः; ते च क्रियया; सा च नोदनाभिघातगुरुत्ववेगद्रवत्वादृष्टवदात्मसंयोगेभ्यो यथायथमिति न किञ्चिदनुपपन्नम्। निमित्तभेदाश्च पाके भवन्ति। तद्यथा हारीतमांसं हरिद्राजलावसिक्तं हरिद्राग्निप्लुष्टं उपभोगात् सद्यो व्यापादयति। 'दशरात्रोषितं कांस्ये घृतं चापि विषायते।' ताम्रपत्रे पर्युषितं क्षीरमपि तिक्तायत इत्यादि।

संस्थानविशेषैरिति। प्राचीनजातीयैरेव द्व्यणुकाद्यारम्भकसंयोगविशेषैरित्यर्थः। अतः रूपादिगुणसाजात्येऽपि यवबीजात् कलमाङ्कुरप्रसङ्गस्य नावकाशः। पाकजाद्युत्पत्तावपि नातिशयापेक्षेत्याह—ते चेति। पाकजाश्चेत्यर्थः। तेजःप्रभृतिभूतसंसर्गात्मकपाकस्य एकजातीयत्वात् पाकजेषु विशेषो न स्यादित्यत आह—निमित्तभेदा इति। सहकारिभेदात् पाकजेषु विशेष इति भावः। इन्धनविशेषादिसंसृष्टाग्नेः सहकारित्वमुक्त्वा सौरालोकस्य क्वचित्सहकारित्वमाह—दशरात्रोषितमित्यादिना।

जलादौ पाकजाभावात् स्वभावविशेषनियमो न स्यादिति शङ्कते—यत्रेति। चक्षुरूष्मादावनुद्भूतत्वं, अन्यत्रोद्भूतत्वं, करकादौ कठिनत्वादि, जलान्तरे द्रवत्वं, एवं क्वचित्पार्थिवेऽपि शङ्कते—कथं वेति। विशेषाभावादिति। संस्कृतासंस्कृतयोः पाकजसत्त्वेऽपि तद्भेदाभावादित्यर्थः। यजमानधर्मेण प्रतिष्ठादिजन्ययजमानगतादृष्टेन। साधारण्यप्रसङ्गादिति। अदृष्टवदात्मसंयोगस्यासंस्कृतेऽपि सत्त्वात्पूजातदभावाधीनधर्माधर्मयोः तत्साधारण्यापत्तेरित्यर्थः। इदमुपलक्षणम्। यजमानगतधर्मस्य भोगादिना नाशे प्रतिष्ठितप्रतिमाया अपि अपूजनीयत्वापत्तिः। एवं यजमानधर्मसत्त्वेऽपि चण्डालादिस्पृष्टप्रतिमायाः पूज्यत्वापत्तिरित्यादयो दोषा विभावनीयाः। निमित्तभेदेति। अदृष्टादिरूपसहकारिविशेषसंबन्धात् उद्भवादयः व्यवस्थिताः इत्यर्थः। देवता इति। देवताप्रतिमादय इत्यर्थः। प्रतिमासु लोके देवताशब्दप्रयोगदर्शनात्। सन्निधानेन—प्रतिष्ठाद्यधीनाभिमानिदेवतासन्निधानेन

जलतेजोवायुषु प्रतिमादौ चातिशयाभावस्थापनम्

यत्र तर्हि तोये तेजसि वायौ वा न पाकजो विशेषः, तत्र कथमुद्भवानुद्भवद्रवत्व-कठिनत्वादयो विशेषाः ? कथं वा पार्थिवे प्रतिमादौ प्रतिष्ठादिना संस्कृतेऽपि विशेषाभावात् पूजादितो धर्मो व्यतिक्रमे त्वधर्मः अप्रतिष्ठिते तु न किञ्चित् । न च तत्र यजमानधर्मेणान्यस्य साहायकमाचरणीयम्; अन्यधर्मस्यान्यं प्रत्यनुपयोगात् । उपयोगे वा साधारण्य-प्रसङ्गात् । अत्रोच्यते—

निमित्तभेदसंसर्गादुद्भवानुद्भवादयः ।
देवताः सन्निधानेन प्रत्यभिज्ञानतोऽपि वा ॥ १२ ॥

उपनायकादृष्टविशेषसहाया हि परमाणवो द्रव्यविशेषमारभन्ते । तेषां विशेषादुद्भूतानुद्भूतभेदाः प्रादुर्भवन्ति । तथा स्वभावद्रवा अप्यापो निमित्तभेदप्रतिबद्धद्रवत्वाः कठिनं करकाद्यारभन्ते इत्यादि स्वयमूहनीयम् । प्रतिमादयस्तु तेन तेन विधिना सन्निधापितरुद्रो-

---

देवताचैतन्यानङ्गीकर्तृमीमांसकमतानुसारेणाह—**प्रत्यभिज्ञानत इति** । प्रतिष्ठितत्वादिप्रत्यभिज्ञानादित्यर्थः । आद्यपूजायां प्रतिष्ठितत्वप्रत्यभिज्ञानस्य कालान्तरीयपूजायां पूर्वपूर्वपूजितत्वप्रत्यभिज्ञानस्य च विषयत्वं प्रयोजकमिति भावः । **आराधनीयतामासादयन्तीति** शेषः पूरणीय इत्युपरितनविवरणवाक्यादवगम्यते । आराधनस्य आराधनतदभावयोः धर्माधर्मोत्पादनस्य च योग्या भवन्तीति भावः ।

उपनायकादृष्टं—परस्परसंसर्गजनकादृष्टम् । अन्येषां त्विति । देवताचैतन्यानभ्युपगन्तॄणां मीमांसकानां त्वित्यर्थः । **व्याख्याता इति** । मन्त्रोक्तदेवतासन्निधानेनाभिमन्त्रितत्वप्रत्यभिज्ञानेन वा अभिमन्त्रिते पयसि पल्लवे च कार्यविशेषकरत्वमिति स्फुटीकृतमिति भावः ॥

अथ पातकादिनिरूपणेन दण्डप्रसक्तौ तन्निवृत्तये "तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये" इत्यादिना विहितेन तुलारोहणविधिना आधेयशक्त्यनुपगमे जयादिफलं नोपपद्यते । तत्र हि तुलायामेकस्मिन् शिक्ये प्रमाणकारिणं पुरुषमन्यस्मिन् मृदादिभारं च सम तोलयित्वा पुरुषमवरोप्य तत्तत्कल्पोक्तमन्त्रावाहननियमादिपुरस्सरं पुनरारोपिते पुरुषे यदि तच्छिक्यमुन्नमेत ततो जयः, न त्वन्यथा इति खलु व्यवस्थितिः । पूर्वं समतया तुलितस्यासति विशेषे कथं पुनरुन्नतिः स्यादिति शङ्कते—**धटादिष्विति** । **धटः** — तुला । **सामग्री**—तुलारोहणसामग्री । **दृष्टमिति** । साम्याव-

पेन्द्रमहेन्द्राद्यभिमानिदेवताभेदास्तत्र तत्राराधनीयतामासादयन्ति; दष्टमूर्च्छितं राजशरीरमिव विषापनयनविधिनाऽऽपादितचैतन्यम्। सन्निधानं च तत्र तेषां अहङ्कारममकारौ, चित्रादाविव स्वसादृश्यदर्शिनो राज्ञ इति नो दर्शनम्। अन्येषां तु पूर्वपूर्वपूजितप्रत्यभिज्ञानविषयस्य प्रतिष्ठितप्रत्यभिज्ञानविषयस्य च तथात्वमवसेयम्। एतेनाभिमन्त्रितपयःपल्लवादयो व्याख्याताः॥

तुलादिष्वतिशयाभावस्थापनम्

घटादिषु का वार्ता? कुशलैवेति चेत्—न—न हि सामग्री दृष्टं विघटयति; नाप्यदृष्टम् ज्ञापकत्वात्। नाप्यदृष्टमुत्पादयति; धर्मजनने सर्वदा विजयप्रसङ्गात्; विपर्यये सर्वदा भङ्गप्रसङ्गात्। अत्रोच्यते—

जयेतरनिमित्तस्य वृत्तिलाभाय केवलम्।
परीक्ष्यसमवेतस्य परीक्षाविधयो मताः॥ १३॥

स्थितिसामग्रीघटकं दृष्टमदृष्टं वा न विघटयतीति भावः। ज्ञापकत्वादिति। दोषादिज्ञापकत्वेनैव हि तुलारोहणं विधीयते; न तु यत्किञ्चिद्विघटकत्वेनेति भावः। यद्वा पूर्वं तुलारोहणस्य साम्यावस्थितिकार्यदर्शनेन तद्धेतुदृष्टादृष्टसद्भावज्ञापकत्वात् तद्विघटकत्वं कालान्तरेऽपि न युज्यत इति भावः। सर्वदा—दोषे सत्यसत्यपि। विपर्यये—अधर्मजनने। क्वचिद्धर्म एव क्वचिदन्य एवेत्यत्र न नियामकं सुवचमिति भावः। जयेतर इति। इतरः—पराजयः। निमित्तस्य—ज्ञापकस्य परीक्ष्यसमवेतस्य कर्मणः आरोहणादेः। वृत्तीति। अभिव्यक्तिलाभायेत्यर्थः। सहकारिलाभायेति यावत्। आधेयशक्त्यभावेऽपि क्रमेण निष्पापोऽहं पापकृद्वेति प्रत्यभिज्ञासहकृतं तुलारोहणमेव जयपराजयावगमयतीति तुलादिपरीक्षाविधयः प्रवर्तन्त इति भावः।

देवतासन्निधिरिति। आद्यारोहणप्रतिमानसमीकरणावरोहणानन्तरं 'तत आवाहयेद्देवान् विधिनाऽनेन मन्त्रवित्', इत्यादिना देवतावाहनादेः पुनरारोहणात्पूर्वमुक्तेरिति भावः। अभिव्यञ्जन्तीति। स्वकरेण तुलाशिक्यमूर्ध्वमधो वा नयन्तीति भावः। तदेव—तुलारोहणादिकमेव। स्वश्चैवेति। अन्यं प्रत्यन्यथा कथनेऽपि स्वयं स्वकृतं यथावत्प्रत्यभिजानीयादेवेति भावः। कदाचिद्विस्मरणमपि संभावयन्नाह—अथ वेति। प्रतिज्ञेति। शुद्धश्चेदहमूर्ध्वं नीयेय अन्यथा पुनरध इत्यादिप्रतिज्ञेत्यर्थः। विशुद्धिमपेक्ष्येति। 'यद्यसि पापकृन्मातस्ततो मां त्वमधो नय। शुद्धश्चेद्गमयोर्ध्वं मां तुलमि-

यद्यपि 'धर्माद्यभिमानिदेवतासन्निधिरत्तापि क्रियते ; ताश्च कर्मविभवानुरूपं लिङ्गमभिव्यञ्जन्ती'त्यस्माकं सिद्धान्तः — तथापि परविप्रतिपत्तेरन्यथोच्यते । तेनापि हि विधिना तदेव जयस्य पराजयस्य वा निमित्तमभिव्यक्तं तद्विभावकं कार्यमुन्मीलयति । कर्मणश्चाभिव्यक्तिः सहकारिलाभ एव । तच्च सहकारि 'सोऽहमनेन विधिना तुलामधिरूढः योऽहं पापकारी निष्पापो वे'ति प्रत्यभिज्ञानम् । यदाहुः—'तांस्तु देवाः प्रपश्यन्ति स्वश्चैवान्तरपूरुषः ।' अथ वा प्रतिज्ञानुरूपां विशुद्धिमपेक्ष्य तेन धर्मो जन्यते, निमित्ततो विधानात् विजयफलश्रुतेश्च । अविशुद्धिं चापेक्ष्याधर्मः । पराजयलक्षणानपेक्षितफलोपदर्शनेन फलतो निषेधात् ॥

नैयायिकमतेन शक्तिपदार्थकथनम्

अथ शक्तिनिषेधे किं प्रमाणम् ? न किञ्चित् । तत्किमस्त्येव ? बाढम् । न हि नो दर्शने शक्तिपदार्थ एव नास्ति । कोऽसौ तर्हि ? कारणत्वम् । किं तत् ? पूर्वकालनियत-

---

त्यभिमन्त्रयेत्' इति मन्त्रलिङ्गेन शुद्ध्यादेर्हेतुत्वावगमादिति भावः । धर्मजनने किं मानमित्यत आह— **निमित्ततो विधानादिति** । महाभियोगेष्वेतानीति महापातकापवादादिनिमित्ते विधेरित्यर्थः । निमित्तस्य यावज्जीवाधिकरणन्यायेन इष्टफलाक्षेपकत्वात् विधिनापि सामान्यतः इष्टसाधनताबोधनाच्च तद्द्वारतया धर्मसिद्धिरिति भावः । **विजयेति** ।

'तुलितो यदि वर्धेत स शुद्धस्यात् न संशयः ।
समो वा हीयमानो वा न विशुद्धो भवेत् नरः ॥'

इत्यादौ जयपराजयलक्षणशुद्ध्यशुद्धिश्रवणादिति भावः । अधर्मजनने मानमुपदर्शयति—**पराजयेति** । **फलतः**—अर्थात् इष्टफलकत्वेन विहितत्वेन च धर्मजनकत्वं अनिष्टफलकत्वेन निषिद्धत्वेन चाधर्मजनकत्वमनुमीयत इति भावः । अत्र जयपराजयनिमित्तपरीक्ष्यसमवेतधर्माधर्मनिष्पत्तिलाभायेति कारिका योजनीया ।

कारणत्वमिति । स्वरूपयोग्यत्वमित्यर्थः । तत्रैव हि लोके शक्तिव्यवहारः । **पूर्वकालेति** । नियतपूर्ववृत्तितावच्छेदकधर्मवत्त्वमित्यर्थः । फलोपधायकव्यावृत्त्यर्थमाह—**सहकारीति** । वाशब्दसमुच्चये । एतन्मात्रस्य रासभादिसाधारण्यात् सहकारित्वं वा स्वेतरत्वे सति स्वोत्तरनियतकार्यपूर्व-

जातीयत्वं, सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वं वेति। ततोऽधिकनिषेधे का वार्ता? न काचित्। तत् किं विधिरेव? सोऽपि नास्ति; प्रमाणाभावात्। सन्देहस्तर्हि? कथमेवं भविष्यति; अनुपलब्धचरत्वात्। विवादस्तर्हि कुत्र? अनुग्राहकत्वसाम्यात्सहकारिष्वपि शक्तिपदप्रयोगात् सहकारिभेदे। तत्रापि दहनादेरनुग्राहकोऽस्त्येव, यः प्रतिबन्धकैरपनीयत इति यदि, तदा न विवदामहे। अस्मदभिप्रेतस्य चाभावादेरनुग्राहकत्वमङ्गीकृत्य निस्साधना मीमांसका अपि न विप्रतिपत्तुमर्हन्ति। ततः—अभावादिरनुग्राहक इत्येके, नेत्यपरे, इति विवादकाष्ठायां व्युत्पादितं चैतस्यानुग्राहकत्वम्। किमपरमवशिष्यते, यत्र प्रमाणमभिधानीयमित्यलमतिविस्तरेण॥

अदृष्टस्य भूतधर्मत्वाभावे चेतनधर्मत्वे च साधकोपन्यासः

तथापि चेतन एवायं संस्क्रियते, न भूतानीति कुतो निर्णय इति चेत्—उच्यते। भोक्तॄणां नित्यविभूनां सर्वदेहप्राप्तावविशिष्टायां विशिष्टैरपि भूतैर्नियामकाभावात्प्रतिनियत-

---

नियतजातीयत्वरूपं वाच्यम्। यद्वा मणिसत्त्वे दाहाभावादाह सहकारीति. न काचिदिति। सिद्ध्यसिद्धिभ्यां व्याघातात् इति भावः। अनुपलब्धेति। न हि धर्मिण्यज्ञाते सन्देह इति भावः। तर्हि कथं विवाद इति पृच्छति—विवाद इति। विषयान्तरे विवाद इत्याह—अनुग्राहकत्वेत्यादिना। निस्साधना इति। अङ्गीकृते त्वभावादेरनुग्राहकत्वे शक्तिसाधनान्निवृत्ताः स्युरिति भावः। नपुंसका इत्युपालम्भो वा विवक्षितः। विवादपर्यवसानं दर्शयति—तत इति। व्युत्पादितमिति। भावो यथा तथाभाव इत्यत्रेति भावः।

अथ सहजाधेयशक्तिरूपदृष्टान्तासिद्धावपि प्रकृते विनिगमनाविरहात् अतिशयो भूतेष्वपि स्यादिति शङ्कते—तथापीति। प्रतिनियतभोगसिद्धिरेव साक्षात्समानाधिकरणकारणमन्तरानुपपद्यमाना भोक्तृष्वतिशयं नियमयतीत्याह—उच्यत इति। नियामकाभावादिति। संस्काराश्रयभूतसंयोगस्याविशिष्टत्वादिति भावः। तर्हि संस्काराश्रयभूतस्वामित्वमस्तु विशेष इत्यत्राह—न हीति। तत्रापि पूर्वकर्माधीनातिशयस्यैव हेतुतया तस्यापि भूतगतत्वे विशेषाभावात् शरीरादिभूतानामपि सर्वसाधारण्यप्रसङ्गो दुर्वार इति भावः। तथा चोक्ततर्कानुगृहीतं नियतभोगसाधनत्वलिङ्गमेव तत्तच्छरीरादेस्तत्तच्चेतनगुणाकृष्टत्वमनुमापयत् चेतनगतातिशये मानमिति भावः। विपर्ययदर्शनादिति। न हि नीलादि कश्चित्प्रत्यनीलं दृश्यत इति भावः। पक्षत्वादिति। देवदत्तस्य स्वगुणाकृष्टाश्शरीरादय इत्यत्रादिना

भोगासिद्धेः। न हि तच्छरीरं तन्मनस्तानीन्द्रियाणि विशिष्टान्यपि तस्यैवेति नियमः; नियामकाभावात्। तथा च साधारणविग्रहवत्त्वप्रसङ्गः। न च भूतधर्म एव कश्चिच्चेतनं प्रत्यसाधारणः; विपर्ययदर्शनात्। द्वित्वादिवदिति चेत्—न। तस्यापि शरीरादितुल्यतया पक्षत्वात्। नियतचेतनगुणोपग्रहेणैव तस्यापि नियमः; न तु तज्जन्यतामात्रेण स्वयं अविशेषात्॥

तथाऽपि तज्जन्यतयैव नियमोपपत्तौ विपक्षे बाधकं किमिति चेत्—कार्यकारणभावभङ्गप्रसङ्गः; शरीरादीनां चेतनधर्मोपग्रहेणैव तद्धर्मजननोपलब्धेः। तद्यथा—इच्छोपग्रहेण प्रयत्नः, ज्ञानोपग्रहेण इच्छादयः, तदुपग्रहेण सुखादय इत्यादि। प्रकृतेऽपि चेतनगता एव बुद्ध्यादयो नियामकाःस्युरिति चेत्—न—शरीरादेः प्राक् तेषामसत्त्वात्। तथा च निरतिशयाश्चेतनाः साधारणानि भूतानीति न भुक्तिनियम उपपद्यते॥

द्वित्वादेरपि ग्रहणात् पूर्वोक्तस्साधारण्यप्रसङ्गस्तुल्य इति भावः। नियतचेतनगुणोपग्रहेणेति। अपेक्षाबुद्धिसहकारेण इत्यर्थः। तस्यापि—द्वित्वस्यापि। अविशेषादिति। भूतजन्यत्वस्य चेतनगुणयत्नादिजन्यतामात्रस्य वा सर्वानुभाव्यघटादिसाधारण्यात् न नियामकत्वमिति भावः। अथ वा स्वयमविशेषादिति। एकपुरुषीयापेक्षाबुद्धिजद्वित्वात् पुरुषान्तरीयापेक्षाबुद्धिजसमानाधिकरणद्वित्वे वैजात्याभावेन सहकार्यपेक्षां विना प्रतिनियतानुभवो निर्वोढुं न शक्य इति भावः। भूतधर्मत्वेऽप्यपूर्वस्य विजातीयत्वोपगमेन वैषम्यात् शङ्कते—तथापीति। तज्जन्यतयैवेति। प्रतिनियतचेतनगुणजन्यतयेत्यर्थः। एवकारेण सहकारिविशेषापेक्षा प्रतिक्षिप्यते। यत्र स्वजनकगुणवत्त्वसंबन्धेन भूतगतोऽतिशयः तत्रैव भोग इति नियमस्सुवच इति भावः। कार्यकराणभावेति। चेतनगुणसहकारानादरे आत्मविशेषगुणं प्रति समवायेन विशेषगुणस्य कारणत्वाद्भङ्ग इति भावः। शरीरादीत्यादिना तद्धर्मसंग्रहः। तेषां—बुद्ध्यादीनाम्। असत्त्वादिति। शरीरादिसापेक्षत्वेन ततः प्रागविद्यमानत्वादित्यर्थः। शरीराद्यव्यवहितानन्तरभाविबुद्धिसुखानुभवादावदृष्टादन्यत् कारणं न शक्यते वक्तुमिति भावः॥

एतेनेति। भोगादृष्टयोस्सामानाधिकरण्यावश्यंभावेनेत्यर्थः। तन्मते तयोरसामानाधिकरण्यं दर्शयति—एवं हि तदित्यादिना। कूटस्थो निर्विकारः। महदादीति। आदिना अहंकारमनइन्द्रियतन्मात्रभूतानां ग्रहणम्। ननु प्रत्यक्षादिना भूतानां तत्कारणतया तन्मात्राणां सर्वकारणतया प्रकृतेः बन्धमोक्षभागितया पुरुषस्य चोपगमेऽपि मध्ये महदादिकं किमर्थमिति शङ्कायां तत्साधयितुं

सांख्यमतोपन्यासः

एतेन सांख्यमतमपास्तम्। एवं हि तत्। अकारणमकार्यः कूटस्थचैतन्यस्वरूपः पुरुषः। आदिकारणं प्रकृतिरचेतना परिणामिनी। ततो महदादिसर्गः। न हि चितिरेव विषयबन्धनस्वभावा, अनिर्मोक्षप्रसङ्गात्। नापि प्रकृतिरेव तदीयस्वभावा, तथाऽपि नित्यत्वेनानिर्मोक्षप्रसङ्गात्। नापि घटादिरेवाहत्य तदीयः, दृष्टादृष्टत्वानुपपत्तेः। नापीन्द्रियमात्रप्रणाडिकया, व्यासङ्गायोगात्। नापीन्द्रियमनोद्वारा, स्वप्नदशायां वराहव्याघ्राद्यभिमानिनो नरस्यापि नरत्वेनात्मोपधानायोगात्। नाप्यहङ्कारपर्यन्तव्यापारेण; सुषुप्त्यवस्थायां तद्व्यापारविरमेऽपि श्वासप्रयत्नसन्तानावस्थानात्। तद् यदेतास्ववस्थासु सव्यापारमेकमनुवर्तते, यदाश्रया चानुभववासना, तदन्तःकरणमुपारूढोऽर्थः पुरुषस्योपधानी भवति। भेदाग्रहाच्च निष्क्रियेऽपि तस्मिन् पुरुषे कर्तृत्वाभिमानः, तस्मिन्नचेतनेऽपि चेतनाभिमानः तत्रैव कर्मवासना। पुरुषस्तु पुष्करपलाशवत्सर्वथा निर्लेपः।

तदनभ्युपगमेऽनिष्टं प्रसञ्जयति—न हीति। विषयबन्धनस्वभावेति। इष्टानिष्टोपलब्धिरूपविषयसंबन्धापादनस्वभावेत्यर्थः। अनिर्मोक्षेति। चितेः प्रकृतेश्च नित्यत्वेन तत्स्वभावाधीनत्वे विषयसंबन्धस्य नित्यत्वं खलु स्यादिति भावः। तदीयेति। विषयचितिसंबन्धीत्यर्थः। पुरुषोपरागगतोपलब्धिसंपादकत्वं तदीयत्वम्। आहत्य साक्षात्—इन्द्रियद्वारमन्तरा। दृष्टादृष्टत्वानुपपत्तेरिति। यावत्सत्त्वं सर्वस्यावभासप्रसङ्गेन सन्निकृष्टस्यातिरोहितस्यैव दृष्टत्वं न त्वन्यस्येति व्यवस्था न स्यादिति भावः। तर्हीन्द्रियाणि सन्तु न तु मन इत्यत्राह—नापीति। व्यासङ्गेति। विषयान्तरव्यासक्तमनसा यत्सन्निकृष्टमपि नानुभूयते तन्नोपपद्यत इति भावः। किमहङ्कारेण तत्राह—स्वप्नदशायामिति। वराहेति। अहं वराह इत्याद्यभिमानवतः इत्यर्थः। नरत्वेनात्मोपधानायोगादिति। नरत्वेनात्माभिमानस्यायुक्तत्वादभावादित्यर्थः। अनियतविषयाभिमानमहङ्कारमुपगम्य तदानीं नरत्वे अहङ्कारव्यापाराभावादेव नरोऽहमित्यभिमानाभाव उपपाद्य इति भावः। सांख्यमते स्वप्नावस्थानिर्वाहार्थमहङ्काराङ्गीकारः इति 'स्वच्छन्देनागमेने'ति श्लोके सर्वार्थसिद्धौ "नापि मनोमात्रविश्रमः। तत्प्रशान्तावपि स्वप्ने मनुष्यस्य स्वात्मनि व्याघ्राद्यभिमानादि"ति सूचितः। नैषधीयेऽपि "निमीलितादक्षियुगाच्च निद्रया हृदोऽपि बाह्येन्द्रियमौनमुद्रिता" इति स्वप्नावस्थायां मनसोऽप्युपरतिः सांख्यमतानुसारेण सूचिता। मल्लिनाथस्तु अन्यथा व्याख्यातीत्यास्तामेतत्। महतोऽप्यावश्य-

आलोचनं व्यापार इन्द्रियाणाम्; विकल्पस्तु मनसः, अभिमानोऽहङ्कारस्य, कृत्यध्यवसायो बुद्धेः। सा हि बुद्धिरंशत्रयवती, पुरुषोपरागो विषयोपरागो व्यापारावेशश्चेत्यंशाः। भवति हि मयेदं कर्तव्यमिति। तत्र मयेति चेतनोपरागो दर्पणस्येव मुखोपरागो भेदाग्रहादतात्त्विकः। इदमिति विषयोपराग इन्द्रियप्रणाडिकया परिणतिभेदो दर्पणस्येव निश्वासाभिहतस्य मलिनिमा पारमार्थिकः। एतदुभयायत्तो व्यापारावेशोऽपि। तत्रैवंरूपव्यापारलक्षणाया बुद्धेर्विषयोपरागलक्षणं ज्ञानम्। तेन सहयः पुरुषोपरागस्यातात्त्विकस्य सम्बन्धो दर्पणप्रतिबिम्बितस्य मुखस्येव मलिनिम्ना सोपलब्धिरिति। तदेवमष्टावपि धर्मादयो भावा बुद्धेरेव; तत्सामानाधिकरण्येनाध्यवसीयमानत्वात्। न च बुद्धिरेव स्वभावतश्चेतनेति युक्तम्—परिणामित्वात्; पुरुषस्य तु कूटस्थनित्यत्वादिति॥

सांख्यमतनिरासः

तदेतदपि प्रागेव निरस्तम्। तथा हि—

कर्तृधर्मा नियन्तारः चेतिता च स एव नः।
अन्यथाऽनपवर्गः स्यादसंसारोऽथवा ध्रुवः॥ १४॥

कतामाह—सुषुप्त्यवस्थायामिति। तदानीं प्रयत्नाश्रयतया महदप्यभ्युपेत्यमिति भावः। तस्य सर्वावस्थास्वनुवृत्तिमाह—तदिति। अनुभववासना—संस्कारः। अन्तः करणमिति। महान् अन्तःकरणं बुद्धिरिति पर्यायशब्दाः। उपारूढः ज्ञानरूपतत्परिणामविषयतया संबद्धः। उपधानीभवति—विशेषणीभवति। संबद्धो भवति। स्वरूपतिरोधायको भवतीति यावत्। भेदाग्रहात्—पुंसो महतश्च मिथोभेदग्रहाभावात्, तस्मिन्—महति। कर्मवासना—अदृष्टम्।

अथोक्तानामेव पुनः प्रपञ्चः। आलोचनमिति। निर्विकल्प इत्यर्थः। विकल्पः—सविकल्पः। ननु जडाया बुद्धेः कथं कृत्यध्यवसाय इत्यत्राह—सा हीति। चेतनोपरागः—चेतनप्रतिफलनादभेदाग्रहादेकत्वाभिमानः। परिणतिभेद इति। कुल्याद्वारेण निर्गतस्य जलस्य केदाराकारेणेवेति भावः। अयमेव तन्मते ज्ञानमित्युच्यते। अनेन सह यश्चेतनप्रतिबिम्बस्य संबन्धः सोपलब्धिरित्याह—तत्रेति। एतावता पूर्वोक्तं अर्थानामन्तःकरणोपारोहणं अन्तःकरणपरिणामभेदे स्वाकारसमर्पणम्। पुरुषोपधानं तु पुरुषप्रतिबिम्बे अर्थाकारान्तःकरणपरिणतिभेदसम्बन्ध इति विवृत्तं भवति। बुद्धिज्ञानोपलब्धिशब्दानामपर्यायत्वं च स्फुटीकृतम्। जडाया अपि पुरुषोपरागेण चेतनैक्याभिमानात्

कृतिसामानाधिकरण्यव्यवस्थितास्तावद्धर्मादयो नियामका इति व्यवस्थितम्। चेतनोऽपि कर्तैव; कृतिचैतन्ययोः सामानाधिकरण्येनानुभवात्। न चायं भ्रमः, बाधकाभावात्। परिणामित्वाद्घटवदिति बाधकमिति चेत्—न—कर्तृत्वेऽपि समानत्वात्। तथा च कृतिरपि भाविकी महतो न स्यात्। दृष्टत्वादयमदोष इति चेत्—तुल्यम्। अचेतनाकार्यत्वं बाधकं, कार्यकारणयोस्तादात्म्यादिति चेत्—न। असिद्धेः। न हि कर्तुः कार्यत्वे प्रमाणमस्ति। प्रत्युत 'वीतरागजन्मादर्शनात्' (न्या. सू. ३.१.२५) इति न्यायादनादितैव सिध्यति। यद्यच्च कार्ये रूपं दृश्यते तस्य तस्य कारणात्मकत्वे रागादयोऽपि प्रकृतौ स्वीकर्तव्याः स्युः। तथा च सैव बुद्धिः, न प्रकृतिः, भावाष्टकसम्पन्नत्वात्। स्थूलतामपहाय सूक्ष्मतया ते तत्र सन्तीति चेत् चैतन्यमपि तथा भविष्यति। तथाऽप्यसिद्धो हेतुः। तथा सति घटादीनामपि चैतन्यप्रसङ्गः, तादात्म्यादिति चेत्—रागादिमत्त्वप्रसङ्गोऽपि दुर्वारः। सौक्ष्म्यं च समानमिति। तस्माद्यज्जातीयात् कारणाद्यज्जातीयं कार्यं दृश्यते, तथाभूतात्तथाभूतमात्रमनुमातव्यम्; न तु यावद्धर्मकं कारणं तावद्धर्मकं कार्यम्, व्यभिचारादिति किमनेनाप्रस्तुतेन ॥

विषयोपरागेण विषयसंबन्धाच्च करोमीति कृत्यध्यवसायः युक्त इति चोक्तं भवति। संबन्ध इति। इदं जानामीति व्यवहारसिद्ध इति भावः। धर्मादय इति। धर्माधर्मसुखदुःखेच्छाद्वेषज्ञानप्रयत्ना इत्यर्थः। तत्सामानाधिकरण्येनेति। बुद्धिसामानाधिकरण्येनेत्यर्थः। बुद्धिविशेषणत्वेनेति यावत् ॥

प्रागेव—संभोगो निर्विशेषाणामित्यत्रैव। कर्तृधर्माः—कृतिसमानाधिकरणा धर्मादयः। नियन्तारः—भोगनियायकाः। चेतिता—चेतनः। स एव कर्तैव। अन्यथा—कर्तृव्यतिरिक्तचेतनोपगमे बुद्धेः नित्यत्वेऽनपवर्गः। अनित्यत्वे असंसार एव वा स्यात्। न तु क्रमादुभयमपीति भावः। अनुभवादिति। चेतनोऽहं करोमीत्याकारात् इत्यर्थः। बाधकमनुमानं शङ्कते—परिणामित्वादिति। कर्ता न चेतनः इत्यादिः। समानत्वादिति। महतः कर्तृत्वेऽपि समानत्वादित्यर्थः। महान्न कर्ता परिणामित्वादिति बाधकस्य सत्त्वादिति यावत्। भाविकी—स्वाभाविकी। तुल्यमिति—चैतन्यस्यापि दर्शनादिति भावः। अथ कर्ता न चेतनः अचेतनकार्यत्वात् घटवत् इत्यनुमानं बाधकं, न चाप्रयोजकम्। कार्यकारणयोस्तादात्म्यनियमादिति शङ्कते—अचेतनेति। असिद्धेः—स्वरूपासिद्धेः। न केवलं साधकाभावः; बाधकमप्यस्तीत्याह—प्रत्युतेति। वीतेति। रागशून्यस्य जन्मादर्शनात्। स्तन्यपानादौ रागवत एव जन्मदर्शनादित्यर्थः। तद्धेतिष्टसाधनतानुभवापेक्षया जन्मान्तरमिति रीत्या

यदि च बुद्धिर्नित्या ; अनिर्मोक्षप्रसङ्गः। पुंसः सर्वदा सोपाधित्वे स्वरूपेणानवस्थानात्। अथ विलीयते, ततो नाऽनादेर्विलय इत्यादिमत्त्वे तदनुत्पत्तिदशायां को नियन्ता? प्रकृतेः साधारण्यात्। पूर्वपूर्वबुद्धिवासनानुवृत्तेः साधारण्येऽप्यसाधारणीति चेत्—बुद्धिनिवृत्तावपि तद्धर्मवासनानुवृत्तिः इति अपदर्शनम्। सौक्ष्म्यान्न दोष इति चेत्—मुक्तावपि पुनःप्रवृत्तिप्रसङ्गः। निरधिकारत्वान्नैवमिति चेत्—तर्हि साधिकारा प्रसुप्तस्वभावा बुद्धिरेव प्रकृतिरस्तु, कृतमन्तरा प्रकृत्यहङ्कारमनःशब्दानामर्थान्तरकल्पनया। सैव हि तत्तद्व्यापारयोगात्तेन तेन शब्देन व्यपदिश्यते शारीरवायुवदिति आगमोऽपि संगच्छते इत्यतोऽपि हेतुरसिद्धः। अधिकारनिवृत्त्या बुद्धेरप्रवृत्तिरपवर्गः। वासनायोगश्चाधिकारः। ततः संसारः॥

धर्मधर्मिणोरत्यन्तभेदे च कौटस्थ्याविरोधः। भेदश्च विरुद्धधर्माध्यासलक्षणो घटपटादिवत् प्रत्यक्षसिद्धः। न च सामानाधिकरण्यादभेदोऽपि। तद्धि समानशब्दवाच्यत्वं, एक-

---

अनादित्वसिद्धिरिति भावः। बुद्धित्वेन पक्षत्वे नासिद्धिरत आह—यद्यचेति। कारणात्मकत्वे—कारणाश्रयकत्वे। सूक्ष्मतयेति—अदृश्यतयेत्यर्थः। तथाऽप्यसिद्ध इति। प्रकृतेरपि सूक्ष्मचैतन्योपगमे तत्कार्यबुद्धेरचेतनकार्यत्वहेतुरसिद्ध इत्यर्थः। समानमिति। चैतन्येऽपि तुल्यमित्यर्थः॥

'अन्यथाऽनपवर्ग' इति कारिकार्थं विवरीतुमारभते—यदि चेति। सोपाधित्व इति। बुद्धिरूपोपाधिमत्त्व इत्यर्थः। निरुपाध्यवस्थानस्यैव मुक्तित्वादिति भावः। नाऽनादेरिति। अनादिभावस्य नाशायोगादिति भावः। को नियन्तेति। संसारस्येत्यादिः। प्रकृतिरस्तीत्यत आह—प्रकृतेरिति। साधारण्यादिति। बुद्ध्यादिपरिणतिरहितायास्तस्या मुक्तिकालसाधारणत्वेनाबन्धकत्वमिति भावः। अथापि संसारदशायां विनष्टाया अपि बुद्धेः वासनानुवृत्त्यभ्युपगमात् पूर्वपूर्वबुद्धिवासनानुवृत्तिविशिष्टप्रकृतेरसाधारण्यमिति शङ्कते—पूर्वेति। अपदर्शनमिति। धर्मधर्मिणोरभेदवादिनस्तव बुद्धिनाशेऽपि तद्वासनानुवृत्तिरित्युक्तावपसिद्धान्त इत्यर्थः। वासना—धर्माधर्मौ। सौक्ष्म्यादिति। बुद्धेरित्यादिः। सर्वदा सूक्ष्मरूपेण बुद्धेरनुवृत्त्युपगमे मुक्तस्यापि पुनस्संसारापत्त्या दूषयति—मुक्तावपीति। निरधिकारत्वादिति। अधिकारः—वासनानुवृत्तिः वासनानिवृत्तेस्तदानीं न प्रवृत्तिरिति भावः। तर्हीति। वासनानुवृत्तितदभावरूपावस्थाभेदोपगम इत्यर्थः। प्रसुप्तेति। परिणामौन्मुख्यरहितेत्यर्थः। प्रबुद्धस्वभावा बुद्धिरस्त्विति भावः। तत्तद्व्यापारयोगादिति। अध्यवसायाभिमानविकल्पादिव्यापारभेदादित्यर्थः। तत्तद्व्यवहारगोचरेति पाठे अध्यवसायादिव्यापारव्यवहारगोचरेत्यर्थः।

ज्ञानगोचरत्वं, एकाधिकरणत्वं, आधाराधेयभावः विशेष्यत्वं संबन्धमात्रं वा भेदे एव भेदेऽपि चोपपद्यमानं, नाभेदं स्पृशतीति सर्वमवदातम् ॥

भूतचैतन्यवादनिरासः

स्यादेतत् । नित्यविभुभोक्तृसद्भावे सर्वमेतदेवं स्यात् । स एव कुतः ? भूतानामेव चेतनत्वात् । कायाकारपरिणतानि भूतानि तथा ; अन्वयव्यतिरेकाभ्यां तथोपलब्धेः । कर्मज्ञानवासने तु सर्वत्र प्रतिभूतनियते अनुवर्तिष्येते, यतो भोगप्रतिसन्धाननियम इति चेत्—उच्यते—

नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपक्रमात् ।
वासनासंक्रमो नास्ति न च गत्यन्तरं स्थिरे ॥ १५ ॥

शरीरवायुः प्राणः । आगमः—पञ्चविंशतितत्त्वप्रतिपादकः सांख्यागमः । हेतुरसिद्ध इति । तत्त्वभेदाभावादचेतनकार्यत्वमसिद्धमित्यर्थः । तथा च बाधकमानस्य दुष्टत्वेनाबाधिते कर्तुश्चेतनत्वे, तत्राहष्टरूपवासनायोगे संसारः, तन्निवृत्तावपवर्ग इति सर्वं समञ्जसमित्याह-अधिकारनिवृत्त्येति ।

कर्तुश्चेतनत्वे कौटस्थ्यविरोध इत्यत आह—धर्मधर्मिणोरिति । शाब्दसामानाधिकरण्यादार्थसामानाधिकरण्यस्यान्यादृशत्वेन तद्विकल्प्य भेदविरोधं परिहरति—तद्धीति । भेदेऽपीति । संबन्धमात्रमिति कल्पे तादात्म्यमादायाभेद इव संयोगमादाय भेदेऽप्युपपत्तेः नाभेदसिद्धिरिति भावः । एवमात्मतचैतन्ययोरभेदे साधकाभावादहमज्ञासिषमहं जानामीति नित्यत्वानित्यत्वविरुद्धधर्माध्यासेन भेदसिद्धेश्चानित्यचैतन्यधर्माश्रयत्वं नित्यत्वरूपकूटस्थत्वं च न विरुद्धमित्याह—सर्वमवदातमिति ॥

अथ चार्वाकः निगूढं स्वाभिसन्धिं उद्घाटयति—स्यादेतदिति । एवं स्यादिति—भूतादृष्टस्य सर्वात्मसाधारण्यं स्यादित्यर्थः । भूतानामेव चैतन्ये घटादीनामपि स्यादत आह—कायाकारेति । तथोपलब्धेरिति । चैतन्योपादानतयोपलब्धेरित्यर्थः । उपादानान्तरानुपलब्धिसहकृताव-न्वयव्यतिरेकावुपादानत्वमपि कल्पयत इति भावः । गौरोऽहं जानामीत्युपलब्धेरप्युपलक्षणमिदम् । कर्मज्ञानवासने । क्रमेण कर्मज्ञानजन्यौ अदृष्टसंस्कारौ । भोगप्रतिसन्धाननियम इति । यत्र कर्मवासना तत्र भोगः । यत्र ज्ञानवासना तत्र प्रतिसन्धानमिति वासनासामानाधिकरण्यात् नियमोपपत्तिरिति भावः । अवयवसमुदायगतं चैतन्यमित्येतद्दूषयति-नान्यदृष्टमिति । एकैकोपचयापचयाभ्यां प्रतिदिनं समुदायभेदात् पूर्वेद्युर्दृष्टस्य परेद्युः स्मरणं न स्यादिति भावः । एकैकावयवस्य तत्त्वं दूषयति-

न हि भूतानां समुदायपर्यवसितं—चैतन्यम् । प्रतिदिनं तस्यान्यत्वे पूर्वपूर्वदिवसानुभूतस्यास्मरणप्रसङ्गात् । नापि प्रत्येकपर्यवसितम् । करचरणाद्यवयवापाये तदनुभूतस्य स्मरणायोगात् । नापि मृगमदवासनेव वस्त्रादिषु, संसर्गादन्यवासनाऽन्यत्र संक्रामति ; मात्रानुभूतस्य गर्भस्थेन भ्रूणेन स्मरणप्रसङ्गात् । न चोपादानोपादेयभावनियमो गतिः, स्थिरपक्षे परमाणूनां तदभावात् । खण्डावयविनं प्रति च विच्छिन्नानामनुपादानत्वात् । पूर्वसिद्धस्य चावयविनो विनाशात् ॥

क्षणभङ्गवादनिरासः

अस्तु तर्हि क्षणभङ्गः । न चातिशयोऽप्यतिरिच्यते, किं तु सादृश्यतिरस्कृतत्वात् द्रागेव न विकल्प्यते । कार्यदर्शनादध्यवसीयते अन्त्यातिशयवत् । तथा च भूतान्येव तथा तथोत्पद्यन्ते, यथा यथा प्रतिसन्धाननियमादयोऽप्युपपद्यन्ते । क्षणिकत्वसिद्धावेवमेतत् । तदेव त्वन्यत्र विस्तरेण प्रतिपिद्धम् ॥

नैकमिति । एकावयवस्यापक्रमान्नाशात् परं तदनुभूतस्यान्येन स्मरणायोगात् विकलाङ्गस्य पूर्वानुभूतस्मरणं नोपपद्यत इति भावः । अन्यत्र संस्कारसंक्रमादुपपत्तिरत आह—वासनासंक्रम इति । मात्रानुभूतस्य गर्भस्थेन स्मरणापत्तेरिति भावः । उपादानोपादेयभावो नियामक इत्यत्राह—न च गत्यन्तरमिति । स्थिर इति । वस्तुस्थैर्यवाद इत्यर्थः । न हि सौगता इव पूर्वक्षणस्योत्तरक्षणं प्रत्युपादनत्वमिच्छन्ति लोकायतिकाः । स्थिरपरमाणुपुञ्ज एवावयवीत्युपगमात् । ये च स्थैर्यवादिनोऽप्यतिरिक्तमवयविनमुपयन्ति, तन्मतेऽपि खण्डावयविनं प्रति विच्छिन्नानामनुपादानत्वादुपादानोपादेयभावो न संस्कारसंक्रमे गतिस्स्यादिति भावः ।

वासनासंक्रममुपपादयितुं सौगतमतमवलम्बते—अस्तु तर्हीति । क्षणभङ्गः—क्षणानां क्षणमात्रस्थायित्वेन क्षणव्यपदेशभाजां पदार्थानां भङ्गः - नाशः । तत्र पूर्वक्षणानामुत्तरक्षणोपादनत्वात् संक्रमसंभव इति भावः । कपालादितो घटादेरिव क्षणानामुत्तरभाविनां पूर्वापेक्षया, व्यावर्तकातिशयाभावान्नैवमित्यत आह—न चेति । अतिरिच्यत इति-नास्तीत्यर्थः । न च नास्ति अस्त्येवेति भावः । न विकल्प्यते—न गृह्यते । कार्यदर्शनादिति । अङ्कुरादिकार्यदर्शनानुरोधेन तत्पूर्वभाविनि अन्तिमबीजक्षणे कुर्वद्रूपत्वातिशयवत् तादृशान्तिमक्षणस्य पूर्वमनुत्पन्नस्य तदानीमुत्पत्तये तत्पूर्वक्षणे कश्चिदतिशय इत्येवंक्रमेण सर्वक्षणेष्वप्यतिशयस्सिध्यतीति भावः । एवं भोगप्रतिसन्धानादितत्तत्कार्यदर्शनानुरोधेन तत्तत्पूर्वक्षणा-

अपि च—

न वैजात्यं विना तत्स्यान्न तस्मिन्ननुमा भवेत् ।
विना तेन न तत्सिद्धिः नाध्यक्षं निश्चयं विना ॥ १६ ॥

न हि 'करणाकरणयोस्तज्जातीयस्य सतः सहकारिलाभालाभौ तन्त्रमि'त्यभ्युपगमे क्षणिकत्वसिद्धिः । तथैकव्यक्तावप्यविरोधात् । तद्वा तादृग्वेति न कश्चिद्विशेष इति न्यायात् । ततस्तावनादृत्य वैजात्यमप्रामाणिकमेवाभ्युपेयम् ॥

अनुमानेन कुर्वद्रूपत्वादिवैजात्यसिद्धिर्न भवतीति निरूपणम्

एवं च 'कारणवत् कार्येऽपि किञ्चिद्वैजात्यं स्यात् यस्य कारणापेक्षा, न तु दृष्टजातीयस्य' इति शङ्कया न तदुत्पत्तिसिद्धिः । दृष्टजातीयमाकस्मिकं स्यादिति चेत्—न । तत्रापि किञ्चिदन्यदेव प्रयोजकं भविष्यतीत्यविरोधात् । 'न कार्यस्य विशेषस्तत्प्रयुक्ततयोप-

---

नामेव तदनुकूलातिशयवतामुत्पत्तिरिष्यत इत्याह—तथा चेति । अत्र 'यत् सत्तत्क्षणिकं, यथा जलधरः, सन्तश्च भावा अमी सत्ताशक्तिरिहार्थकर्मणि' इति ज्ञानाश्रियोक्तमनुसन्धेयम् । अन्यत्र—आत्मतत्त्वविवेके ॥

अत्र प्रकारान्तरेण तत्प्रतिषेधति—अपि चेति । वैजात्यं—कुर्वद्रूपत्वादि । तत्-क्षणिकत्वम् । तस्मिन्—वैजात्ये सति । नानुमा दृष्टजातीययोः कार्यकारणभावाभावादिति भावः । तेन—अनुमानेन । तत्सिद्धिः—वैजात्यसिद्धिः क्षणिकत्वसिद्धिः । प्रत्यक्षतोऽपि न सेत्स्यतीत्याह—नाध्यक्षमिति । अध्यक्षं—निर्विकल्पम् । निश्चयं—सविकल्पम् । निर्विकल्पस्य सविकल्पोन्नेयत्वेन क्षणिकस्य निर्विकल्पोऽपि सविकल्पाभावात् न सिध्यतीति न तद्वैजात्यस्य ततस्सिद्धिसंभव इति भावः ।

कारिकां विवृणोति—न हीति । क्षेत्रकुसूलस्थबीजानां सजातीयत्वेऽपि पङ्कोदकादिसहकारिलाभालाभप्रयुक्तकार्यकरणाकरणयोः विरोधाभावेन संभवात् वैजात्यानुपगमे क्षणिकत्वासिद्धिरिति भावः । तथापि सजातीयानेकबीजोपगमात् क्षणिकत्वमत आह—तथेति । करणाकरणयोस्सहकारितद्विरहनिबन्धनत्वात् न विरोध इति नानेकत्वकल्पने प्रमाणमस्तीति भावः । तौ—सहकारिलाभालाभौ ॥

एवञ्चेति । अप्रामाणिकस्यापि वैजात्यस्योपगमे चेत्यर्थः । दृष्टजातीयस्येति । अङ्कुरत्वावच्छिन्नस्येत्यर्थः । विजातीयाङ्कुरादिकं प्रत्येव विजातीयबीजादेः कारणत्वसिद्ध्या सामान्यधर्मावच्छिन्नकार्यकारणभावसिद्धिरित्याह—न तदुत्पत्तीति । अत्रापि दृष्टजातीयस्येति संबध्यते । अतः कार्यलिङ्ग-

लभ्यते, नापि कार्यसामान्यस्यान्यत्प्रयोजकं दृश्यते' इति चेत्—तत्, किं कारणस्य विशेषः स्वगतस्तत्प्रयोजकतयोपलब्धः कारणसामान्यस्य वाऽन्यत्प्रयोज्यान्तरं दृश्यते; यतो विवक्षितसिद्धिः स्यात्। शङ्का तूभयत्रापि सुलभेति। कार्यजन्माजन्मभ्यामुन्नीयत इति चेत्—न। सहकारिलाभालाभाभ्यामेवोपपत्तेः। उन्नीयतां वा; कार्येषु शङ्किष्यते; निषेधकाभावात्। न हि धूमस्य विशेषं दहनप्रयोज्यं प्रतिषेद्धुं स्वभावानुपलब्धिः प्रभवति। कार्यकनिश्चयस्य तदनुपलब्धेरेवानिश्चयोपपत्तेः। कार्यस्य चातीन्द्रियस्यापि सम्भवात्, अत एवानुपलब्ध्यन्तरमपि निरवकाशमिति॥

कानुमानोच्छेद इति भावः। कार्यतावच्छेदकवैजात्ये मानाभावं तदुपगमे सामान्यधर्मावच्छिन्नस्याकस्मिकतापत्तिं च शङ्कते—न कार्यस्येति। अदर्शनस्य कारणवैजात्यादेरपि तुल्यत्वान्नेष्टसिद्धिरित्याह—तत्किमिति। कारणसामान्यस्येति। कार्याभावेऽर्थक्रियाकारित्वरूपं सत्त्वं न स्यादिति भावः। कारणवैजात्येऽनुमानमस्तीत्याह—कार्यजन्मेति। सहकारीति। विपक्षे बाधकं नेत्याशयः। शङ्किष्यत इति। तत्कार्यविशेषदर्शनाभावात् न निश्चय इति भावः। अनुपलब्ध्या प्रतिषेधस्स्यादित्यत आह—न हीति। स्वभावानुपलब्धिः—प्रकृते कार्यवैजात्यानुपलब्धिः योग्यानुपलब्धिरेव प्रतिषेधसाधिकेत्याशयं विशदयति—कार्यैकेति। वैजात्यातीन्द्रियत्वेन कारणवैजात्यस्य कार्येणेव कार्यवैजात्यस्य कार्यकार्येणैवोन्नेयत्वमिति भावः। तदनुपलब्धेरिति। कार्यजन्यकार्यानुपलब्धेरित्यर्थः। कार्यकार्यस्य सत्त्वे कुतो वा नोपलब्धिरत आह—कार्यस्य चेति। कार्यकार्यस्य चेत्यर्थः। अनुपलब्ध्यन्तरमपीति। व्यापकानुपलब्धिरित्यर्थः। तदुत्पत्त्यसिद्धौ व्याप्त्यसिद्धेरिति भावः। बौद्धमते स्वभावानुपलब्धिः कार्यानुपलब्धिः, कारणानुपलब्धिः, व्यापकानुपलब्धिरिति चतस्रोऽनुपलब्धयः। प्रत्येकं स्वस्वप्रतियोग्युपलब्धिविषयीभूतस्वभावादीनां विरुद्धतत्कार्यतद्व्याप्तविषयकोपलब्धिभिस्तिसृभिः मिलिताः षोडशसंख्याताः। उपलब्धीनामप्यभावसाधकत्वादनुपलब्ध्यन्तर्भावः। उक्तं च—सर्वार्थसिद्धौ "तदभिमतमिह व्यापकादर्शनादी"त्यत्रादिशब्देन बौद्धोक्तषोडशविधानुपलब्ध्यन्तर्गता व्यापकविरुद्धोपलब्धिरुच्यते इति। सर्वासामपि तासां अतीन्द्रियविषयेऽकिञ्चित्करतैवेति भावः। एवं कार्यलिङ्गकानुमानोच्छेद उक्तः॥

अथ कुसूलबीजे कार्यान्तरप्राक्क्षणवर्तिन्यबीजे च परस्परपरिहारेण वर्तमानतया विरुद्धयोः बीजत्वकुर्वद्रूपत्वयोरङ्कुरप्राक्क्षणवर्तिबीजे समावेशोपगमे क्वचिदपि विरोधासिद्ध्याऽनुपलब्धिलिङ्गकानुमान-

एवं विधिरूपयोर्व्यावृत्तिरूपयोर्वा जात्योर्विरोधे सति न समावेशः। समाविष्टयोश्च परापरभावनियमः; अन्यूनानतिरिक्तवृत्तिजातिद्वयकल्पनायां प्रमाणाभावात्। व्यावर्त्यभेदाभावेन विरोधानवकाशे भेदानुपपत्तेः। परस्परपरिहारवत्योश्च समावेशे गोत्वाश्वत्वयोरपि तथाभावप्रसङ्गात्। सामग्रीविरोधान्नैवमिति चेत्—कुत एतत्? परस्परपरिहारेण सर्वदा व्यवस्थितेरिति चेत्—नेदमप्यध्यक्षम्। एकदेशसमावेशेन तु सामग्रीसमावेशोऽप्युन्नीयते, यावत् तत्कार्ययोः परस्परपरिहृतिस्वभावत्वादिति चेत्तर्हि कम्पशिंशपयोः परस्परपरिहारवत्योः न समावेशः स्यात्। दृश्यते तावदिदमिति चेत्—गोत्वाश्वत्वयोरपि न द्रक्ष्यत इति का प्रत्याशा? तथा च गतमनुपलब्धिलिङ्गेनापि, क्वचिदपि विरोधासिद्धेः॥

स्याप्युच्छेद इत्याह—एवमिति। विधिरूपयोरिति। स्वमतेनेदम्। परमतेनाह—व्यावृत्तिरूपयोरिति। न समावेश इति। साङ्कर्यापत्तेः गोत्वाश्वत्वयोरिवेति भावः। परापरेति। पृथिवीत्वघटत्वयोरिव न परस्पराभावसामानाधिकरण्यमिति भावः। विरोधानवकाश इति। ततो न विरुद्धधर्माध्यास इति भावः। भेदानुपपत्तेरिति। घटत्वकलशत्वयोरिवेति भावः। सामग्रीति। जातिव्यञ्जकव्यक्तिसामग्रीविरोधादित्यर्थः। एतत्—विरोधित्वम्। परस्परेति। परस्परव्यभिचारित्वमेव विरोध इति भावः। नेदमप्यध्यक्षमिति। अतीन्द्रियघटिता सर्वकालं विरोधेन व्यवस्थितिश्च वर्तमानग्राहिणा प्रत्यक्षेण न ग्रहीतुं शक्येति भावः। न केवलं साधकाभावः, बाधकमानमप्यस्तीत्याह—एकदेशेति। कोमलाङ्कुरकालदिगादिकारणसमावेशेनेत्यर्थः। यावदिति। पक्षान्तरे। कार्ययोः—गवाश्वयोः। परस्परपरिहृतीति। परस्परभेदेत्यर्थः। प्रत्यक्षासंभवेऽपि कार्यविरोधात् सामग्रीविरोधः कल्प्यत इति भावः। कम्पशिंशपयोरिति। कम्पत्वशिंशपात्वयोरित्यर्थः। सौगतैराश्रयातिरिक्तकर्मानुपगमात् कम्पत्वस्याश्रय एव समावेशः वक्तव्यः। स न स्यादिति भावः। परस्परपरिहारवत्योरिति। चलवृक्षान्तरे तस्मिंश्च निश्चले चेति भावः। का प्रत्याशेति। निरवधावागामिनि काले केनचिद् द्रक्ष्यते इति कुतो न संभाव्यत इति भावः। तथा च गतमिति। तद्वत्तया तदनुपलब्ध्यादेरपि विरोधासिध्या तदनुपलब्ध्यादिना तदभावानुमानमपि न स्यादिति भावः।

अथ स्वभावानुमानमपि न संभवतीत्याह—तत इति। विरोधासिद्धेरित्यर्थः। बाधकाभावादिति। यदि शिंशपा वृक्षत्वमतिपतेत् आत्मानमेव जह्यादिति बाधकं वक्तव्यम्। तदवृक्षत्वशिंशपात्वयोः

स्वभावानुमाननिरासः

ततो विपक्षे बाधकाभावात् स्वभावहेतुरप्यपास्तः। ननु अस्ति तत्। तथा हि—वृक्षजनकपत्रकाण्डाद्यन्तर्भूता शिंशपासामग्री। सा वृक्षमतिपत्य भवन्ती स्वकारणमेवातिपतेत्। एवं शाखादिमन्मात्रानुबन्धी वृक्षव्यवहारः; तद्विशेषानुबन्धी च शिंशपाव्यवहारः। स कथं तमतिपत्यात्मानमासादयेदिति चेत्—एवं तर्हि शिंशपासामग्रयन्तर्भूता चलनसामग्री। ततस्तामतिपत्य चलनादिरूपता भवन्ती स्वकारणमेवातिपतेत्। तथा शाखादिमद्विशेषानुबन्धी शिंशपाव्यवहारः तद्विशेषानुबन्धी च चलनव्यवहारः। स कथं तमतिपत्यात्मानमासादयेदिति तुल्यम्॥

विरोधे सति स्यादिति भावः। अथ वृक्षः वृक्ष इति व्यवहर्तव्यो वा शिंशपायाः तद्व्यवहारवत्त्वाद्वेति स्वभावानुमाने प्रकारान्तरेण बाधकमस्तीति शङ्कते – नन्विति। अन्तर्भूतेति। अन्तर्णीतणिजन्तम्। पत्रकाण्डादिघटितेत्यर्थः। सा—शिंशपा। स्वकारणमेवेति। वृक्षाभावे तत्सामग्र्यभावेन तद्घटित-शिंशपासामग्र्या अप्यभावापातादिति भावः। द्वितीयेऽप्याह—एवमिति। वृक्षत्वाभावे शाखादि-मत्त्वरूपवृक्षव्यवहारयोग्यत्वाभावेन तद्विशेषरूपशिंशपाव्यवहारयोग्यतायाः सुतरामसम्भवः इति भावः। ननु तदुत्पत्त्यसिद्धौ कथमीदृशप्रसङ्ग इति चेत्-न। विशेषकार्यकरणभावस्यैव भङ्गप्रसङ्गे तात्पर्यात्। प्रतिबन्द्या निरस्यति—एवं तर्हीति। क्षणभङ्गे सहकार्यनभ्युपगमात् चलशिंशपां प्रति पूर्वक्षणस्यैव सामग्रीत्वात् चलसामग्र्याः शिंशपासामग्रीविशेषरूपतेति पूर्वोक्तदिशा विपक्षे बाधकसंभवेन, इयं शिंशपा चलस्वभावादित्यप्यनुमानं स्यादिति भावः।

सामग्रीभेदं शङ्कते—नोदनादीति। आदिना अभिघातादिपरिग्रहः। स्वभावभूता इति। चलशिंशपाकारणपूर्वक्षणस्येति शेषः। तद्विशेषाः—शिंशपासामग्रीविशेषाः। तान्—सहकारिणः। निर्विशेषैव—वैजात्यरहितैव। सदृशरूपैवेति भावः। कुतः क्षणिकत्वसिद्धिरिति। "न वैजात्यं विना तस्या"दिति ह्युक्तमिति भावः। यद्यपि नोदनादयः कारणक्षणस्वभावाः, तथापि ते वाय्वादिसहकार्य-धीनाः इति तत्रैवान्यत्रापि भवेयुरिति नोक्ततर्कावकाश इत्याशयेन शङ्कते—स्वभावभूता एवेति। सहकार्यनुप्रवेशादिति। चलशिंशपाकारणक्षणपूर्वक्षणे इति भावः। साक्षात्कारणक्षणे सहकार्यनु-पगमात् न पूर्वोक्तदोष इत्यभिमानः। कश्चित् सहकारिस्वीकारेऽपि तन्मतभङ्गेन प्रकृतेऽपि तदभ्यु-

नोदनाद्यागन्तुकनिबन्धनं चलनत्वम्, न तु तद्विशेषमात्राधीनमिति चेत्—यदि नोदनादयः स्वभावभूताः ततस्तद्विशेषा एव। अथास्वभावभूताः; ततः सहकारिण एव। ततः तानासाद्य निर्विशेषैव शिंशपा चलनस्वभावमारभते इति। तथा च कुतः क्षणिकत्वसिद्धिः?

स्वभावभूता एवागन्तुकसहकार्यनुप्रवेशाद्भवन्तीति चेत्—एवं तर्हि वृक्षसामग्र्यामागन्तुकसहकार्यनुप्रवेशादेव शिंशपाऽपि जायत इति न कश्चिद्विशेषः।

एवमेतत्। किं तु शिंशपाजनकास्तरुसामग्रीमुपादायैव चलनजनकास्तु न तामेव; किं तु मूर्तमात्रं, तथा दर्शनादिति चेत्—मैवम्; कम्पजनकाः शिंशपाजनकविशेषा अपि सन्तस्तानतिपतन्ति; न तु वृक्षजनकविशेषाः शिंशपाजनकास्तानिति नियामकाभावात्।

पगमस्यावर्जनीयत्वेऽपि तदुक्त्यैव साक्षात्प्रकृतविषये सहकार्यभ्युपगमं स्फुटीकर्तुं तदाशयमजानान इव तदुक्तप्रकारस्य शिंशपासामग्र्यामप्यविशेषमाह—एवं तर्हीति। अनुप्रवेशादिति। जातैः स्वभावविशेषैरिति शेषः।

उक्तरीत्या साम्यमुपगम्य विशेषमप्याह—एवमेतदिति। शिंशपाजनका इति। सहकार्यधीनाः स्वभावा इत्यर्थः। तरुसामग्रीमुपादायेति। तरुसामग्र्यामेव जायन्त इति भावः। तामेवेति। शिंशपासामग्रीमेवेत्यर्थः। अयं विशेषः कम्पजनकानां शिंशपाजनकविशेषत्वोपगमे न नियन्तुं शक्य इति दूषयति—मैवमिति। कम्पकारिणां शिंशपाजनकविशेषत्वं नोपगम्यत इति स्वाशयमुद्घाटयति—शिंशपाजनका इत्यादिना। तर्हि पूर्वोक्त एव दोष इत्याह—एवं तर्हीति।

उपसंहरति—तस्मादिति। सहकारिवादाभ्युपगमेन वैजात्यानावश्यकत्वादित्यर्थः। विरुद्धयोरिति। कुर्वद्रूपत्वबीजत्वायोरित्यर्थः। असमावेश इति। साङ्कर्यापत्तेरिति भावः। समाविष्टयोरिति। पृथिवीत्वघटत्वयोरित्यर्थः। अनेवंभूतानामिति। परापरभावमनापन्नानां कार्यत्वभूतत्वमूर्तत्वादीनामित्यर्थः। द्रव्यगुणकर्मेति। कार्यत्वस्योत्तरकालसंबन्धात्मकस्य कालद्रव्यरूपत्वं भूतत्वस्य बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वात्मकस्य गुणरूपत्वं मूर्तत्वस्य क्रियावत्त्वात्मकस्य कर्मरूपत्वमिति भावः। उपाधीनामपि सतां कथं विरुद्धानां समावेश इत्यत्राह—तेषां त्विति। व्यक्तिभेदादिति। द्रव्यगुणक्रियादिरूपाणामुपाधीनां प्रत्याश्रयं भिन्नभिन्नत्वादिति भावः। भिन्नाश्रयत्वादिति। अनेकानुगत-

शिंशपाजनकास्तद्विशेषा एव। कम्पकारिणस्तु न तथा; किन्त्वागन्तवः सहकारिण इति चेत्—एवं तर्हि तानासाद्य सदृशरूपा अपि केचित् कम्पकारिणः, अनासादितसहकारिणस्तु न तथा। तथा च तद्वा तादृग्वेति न कश्चिद्विशेष इति स्यात्॥

तस्माद्विरुद्धयोरसमावेश एव। समाविष्टयोश्च परापरभाव एव। अनेवम्भूतानां द्रव्यगुणकर्मादिभावेनोपाधित्वमात्रम्। तेषां तु विरुद्धानां न समावेशो व्यक्तिभेदात्। जातीनां च भिन्नाश्रयत्वात्। तथा च कुतः क्षणिकत्वम्? वैजात्याभ्युपगमे च कुतोऽनुमानवार्ता।

क्षणिकत्वे प्रत्यक्षं प्रमाणं न भवतीति निरूपणम्

मा भूदनुमानमिति चेत्—न—तेन हि विना न तत् सिध्येत्। न हि क्षणिकत्वे प्रत्यक्षमस्ति, तथा निश्चयाभावात्। गृहीतनिश्चित एवार्थे तस्य प्रामाण्यात्। अन्यथाऽतिप्रसङ्गात्।

त्वादित्यर्थः। तथा चेति। वैजात्याभावे इत्यर्थः। कुतोऽनुमानवार्तेति। तदभिमतानां कार्यानुपलब्धिस्वभावलिङ्गकानां त्रिविधानामप्यनुमानानां उच्छेदापत्तेः पूर्वमुक्तेरिति भावः॥

विना तेन न तत्सिद्धिरित्यर्थं व्याख्याति—तेन हीत्यादिना। तेन—अनुमानेन। तत्—वैजात्यम्। तथा निश्चयाभावादिति। क्षणिकोऽयमिति सविकल्पाभावादित्यर्थः। गृहीतनिश्चित इति। निर्विकल्परूपग्रहसविकल्पात्मकनिश्चयाभ्यां विषयीकृत इत्यर्थः। अतिप्रसङ्गादिति। निर्विकल्पमात्रं प्रमाणीकृत्य सर्वाभिमतसाधनमपि हि प्रसज्येतेति भावः॥

अथायं घट इति सविकल्पेनैव क्षणिकत्वं घटादेरवगम्यते। अयमिति वर्तमानत्वावगाहनात् तन्निश्चये क्षणिकत्वनिश्चयादिति तदुन्नीतं निर्विकल्पकमेव तत्र मानमिति शङ्कते—नन्विति। वर्तमानोऽध्यक्षगोचर इत्यन्वयः। क्षणः—क्षणमात्रस्थायित्वेनाभिमतो घटादिः। वर्तमानस्य क्षणिकत्वमुपपादयति—न चेति। असौ—वर्तमानः। भेदनिश्चय इति। पूर्वापरवर्तमानक्षणप्रतियोगिको भेदो विवक्षितः। वर्तमानत्वं धर्मी धर्मो वेति विकल्प्य दूषयति—किमत्रेति। तत्—वर्तमानत्वम्। न किञ्चिदिति। घटादिधर्म्यपेक्षयाधिकस्यानवगाहनादिति भावः। वर्तमानस्य पूर्वत्वादिभिन्नतया धर्मिणः क्षणिकत्वमुत तद्विरुद्धतयेति विकल्प्याद्ये आह—तद्भेदनिश्चयेऽपीति। वर्तमानत्वावर्तमानत्वयोर्भेद-

ननु वर्तमानः क्षणोऽध्यक्षगोचरः। न चासौ पूर्वापरवर्तमानक्षणात्मा। ततो वर्तमानत्वनिश्चय एव भेदनिश्चय इति चेत्- किमत्र तदभिमतमायुष्मतः? यदि धर्म्येव नीलादिः, न किञ्चिदनुपपन्नम्। तस्य स्थैर्यास्थैर्यसाधारण्यात्। अथ धर्मः तद्भेदनिश्चयेऽपि धर्मिणः किमायातम्? तस्य ततोऽन्यत्वात्। वर्तमानावर्तमानत्वमेकस्य विरुद्धमिति चेत्—यदि सदसत्त्वं तत्, तन्न; अनभ्युपगमात्। ताद्रूप्येणैव प्रत्यभिज्ञानात्। सदसत्सम्बन्धश्चेत्—किमसङ्गतम्? ज्ञानवत्तदुपपत्तेः। क्रमेणानेकसम्बन्ध एकस्यानुपपन्न इति चेत्—न। उपसर्पणप्रत्ययक्रमेणैव तस्याप्युपपत्तेः। प्रत्यभिज्ञानमप्रमाणमिति चेत्—अस्ति तावत्तो निरूपणीयम्। क्षणप्रत्ययस्तु भ्रान्तोऽपि नास्तीति विशेषः॥

क्षणिकत्वे संदेहाभावस्योपपादनम्

स्यादेतत्। मा भूदध्यक्षमनुमानं वा क्षणिकत्वे; तथापि सन्देहोऽस्तु। एतावतापि सिद्धं समीहीतं चार्वाकस्येति चेत्—उच्यते—

निश्चयेऽपीत्यर्थः। ताद्रूप्येणैवेति। पूर्वभाविनोऽपि सोऽयमस्तीति सत्त्वेनैव प्रत्यभिज्ञानेन नासत्त्वमभ्युपगन्तुं युक्तमिति भावः। सदसत्संबन्ध इति। सदसत्कालसंबन्ध इत्यर्थः। ज्ञानवदिति। प्रत्यभिज्ञात्मकज्ञानस्य सदसद्विषयीकारवदित्यर्थः। उपसर्पणेति। उपसर्पणं—कालादिसंबन्धः प्रत्ययः कारणमित्यर्थः। कारणयौगपद्ये संबन्धयौगपद्यवत् कारणक्रमे संबन्धक्रमोऽपि नानुपपन्न इति भावः। अस्ति तावदिति। स्थैर्यगोचरं प्रत्यभिज्ञानमस्त्येवेत्यर्थः। अतो निरूपणीयमिति। प्रमाणमप्रमाणं वेत्येतावदेव निरूपणीयमित्यर्थः। तदपि पूर्वापरकालसंबन्धाविरोधोपपादनेन पूर्वं निरूपितमेवेति भावः।

सन्देहोऽस्त्विति। प्रत्यभिज्ञानप्रामाण्यानिश्चयादिति भावः। सिद्धं समीहितमिति। नित्यचेतनासिद्धेरिति भावः॥

स्थैर्यदृष्ट्योरिति। स्थैर्ये तत्प्रत्यभिज्ञाने चेत्यर्थः। प्रामाण्य इति सार्वत्रिक इति भावः। विरोधत इति। क्वचिदपि प्रामाण्यप्रसिद्धिमनङ्गीकुर्वतस्तत्कोटिकसंशयोक्तेः व्याघातादिति भावः। प्रकृतप्रत्यभिज्ञानप्रामाण्यमात्रे सन्देहं प्रत्याह—एकतेति। येन—विरुद्धधर्माध्यासविरहेण। क्षणे—क्षणिकत्वेनाभिमते घटादौ भवन्मते एकतानिश्चयः, तेनैवास्मन्मते स्थिरेऽपि पूर्वभाविना सह एकतानिश्चयः—स्थिरत्वनिश्चयः। मतः—तथा च प्रामाण्यसंशयो न भवतीति भावः।

स्थैर्यदृष्ट्योर्न सन्देहो न प्रामाण्ये विरोधतः ।
एकतानिश्चयो येन क्षणे तेन स्थिरे मतः ॥ १७ ॥

न हि स्थिरे तद्दर्शने वा स्वरसवाही सन्देहः; प्रत्यभिज्ञानस्य दुरपह्नवत्वात् । नापि तत्प्रामाण्ये; स हि न तावत्सार्वत्रिकः; व्याघातात् । तथा हि—प्रामाण्यासिद्धौ सन्देहोऽपि न सिद्ध्येत्; तत्सिद्धौ वा तदपि सिद्ध्येत् । निश्चयस्य तदधीनत्वात् कोटिद्वयस्य चादृष्टस्यानुपस्थाने कः सन्देहार्थः ? तद्दर्शने च कथं सर्वथा तदसिद्धिः । एतेनाप्रामाणिकस्तद्व्यवहार इति निरस्तम् । सर्वथा प्रामाण्यासिद्धौ तस्याप्यसिद्धेः ।

प्रकृते प्रामाण्यसन्देहः, लूनपुनर्जातकेशादौ व्यभिचारदर्शनादिति चेत्—न । एकत्वनिश्चयस्य त्वयाऽपीष्टत्वात् । अनिष्टौ वा न किञ्चित्सिध्येत् । सिद्ध्यतु, यत्र विरुद्धधर्मविरह इति चेत्—तेनैव स्थिरत्वमपि निश्चीयते । स इह सन्दिह्यत इति चेत्—तुल्यमेतत् । क्वचिन्निश्चयोऽपि कथञ्चिदिति चेत्—समः समाधिः ॥

कारिकां विवृणोति—न हीति । प्रामाण्यसामान्यमसिद्धमित्युपगमे सन्देहसत्त्वे यत्प्रमाणं सन्देह्मि इत्यनुव्यवसायरूपं तत्प्रामाण्यस्याप्यसिद्ध्या सन्देहासिद्धिरिति प्रथमं व्याघातमुपपादयति—प्रामाण्यासिद्धाविति । तत्सिद्धौ—सन्देहसिद्धौ । तदपि—प्रामाण्यमपि । निश्चयस्य सन्देहसिद्धिरूपनिश्चयस्य । तदधीनत्वादिति । प्रामाण्यनिश्चयाधीनत्वादित्यर्थः । प्रामाण्यसंशये विषयसंशयादिति भावः । अथ प्रामाण्यरूपकोट्यप्रसिद्धौ तत्संशयोक्तेः व्याघातमाह—कोटिद्वयस्य चेति । तस्याप्यसिद्धेरिति । अप्रामाणिकत्वस्याप्यसिद्धेरित्यर्थः । अप्रामाणिक इति व्यवहारस्यापि प्रामाण्यासिद्धेः प्रतियोग्यप्रसिद्धेश्चेति भावः ।

अन्यत्र तत्सिद्धावपि एकत्वनिश्चयेऽसिद्धमित्याह—प्रकृत इति । इष्टत्वादिति । क्षणिकत्वेनाभिमते घटादावित्यर्थः । न किंचिदिति । सत्त्वादिकमपि न सिध्येदित्यर्थः । भवन्मते सहकारिरहितस्य एकाकिन एव हि अर्थक्रियाकारित्वमुपगम्यत इति भावः । सः - विरुद्धधर्मविरहः । सन्दिह्यत इति । वर्तमानावर्तमानकालसंबन्धादिति भावः । तुल्यमिति । तत्क्षणवृत्तित्वक्षणान्तरावृत्तित्वाभ्यां क्षेत्रादिभेदेन करणाकरणाभ्यां भवदभिमतक्षणेऽपि तस्य सन्देहप्रसक्तेरिति भावः । कथंचिदिति । उक्तधर्मयोरविरोधनिरूपणेनेत्यर्थः । सम इति । अस्मन्मतेऽपि पूर्वमविरोधस्य निरूपितत्वादिति भावः ॥

स्थिरस्य पारमार्थिकं कारणत्वमनुपपन्नमित्याशङ्का

नन्वेतत् कारणत्वं यदि स्वभावो भावस्य, नीलादिवत्, तदा सर्वसाधारणं स्यात्। न हि नीलं कञ्चित्प्रत्यनीलम्। अथौपाधिकं, तदोपाधेरपि स्वाभाविकत्वे तथात्वप्रसङ्गः। औपाधिकत्वे त्वनवस्था। अथासाधारणत्वमप्यस्य स्वभाव एव, तत उत्पत्तेरारभ्य कुर्यात्, स्थिरस्यैकस्वभावत्वादिति चेत्—

तत्परिहारः

उच्यते—

हेतुशक्तिमनादृत्य नीलाद्यपि न वस्तुसत्।
तद्युक्तं तत्र तत् शक्तमिति साधारणं न किम्॥ १८॥

सर्वसाधारणनीलादिवैधर्म्येण काल्पनिकत्वं कार्यकारणभावस्य व्युत्पादयता नीलादि पारमार्थिकमेवाभ्युपगन्तव्यम्, अन्यथा तद्वैधर्म्येण हेतुफलभावस्यापारमार्थिकत्वानुपपत्तेः। न च कार्यकारणभावस्यापारमार्थिकत्वे नीलादि पारमार्थिकं भवितुमर्हति, नित्यत्वप्रसङ्गात्। तस्मादस्य पारमार्थिकत्वेऽपरमपि तथा, न वोभयमिति॥

'कथमेकमनेकं परस्परविरुद्धं कार्यं कुर्यात्। तत्स्वभावत्वादिति यदि तदोत्पत्तेरारभ्य कुर्यादविशेषात्' इत्यपि न युक्तम्; तत्तत्सहकारिसाचिव्ये तत्तत्कार्यं करोतीति स्वभावव्यवस्थापनात्। इदञ्च साधारणमेव, सर्वैरपि तथोपलम्भात्। न हि नीलादेरप्यन्यत् साधारण्यमिति॥

अथ स्थिरस्य पारमार्थिकं कारणत्वमनुपपन्नमिति शङ्कते—नन्विति। नीलादिवदिति। नीलादिरूपव्यतिरेकदृष्टान्तेन सर्वसाधारण्याभावात् कारणत्वस्य स्वाभाविकत्वे वक्ष्यमाणदूषणादौपाधिकत्वे च निरस्ते काल्पनिकत्वमेव स्यादिति भावः। सर्वसाधारणमिति—सर्वनिरूपितकारणतावत्स्यादिति भावः। तथात्वप्रसङ्गः—सर्वसाधारण्यप्रसङ्गः। अनवस्थेति। उपाधेरौपाधिकत्वं तस्याप्युपाधेः पूर्वोक्तदोषभिया औपाधिकत्वमिति रीत्याऽनवस्था स्यादिति भावः। उत्पत्तेरारभ्येति। न सहकारिलाभं प्रतीक्षेतेति भावः।

अत्र प्रतिविधीयते—उच्यत इत्यादिना। हेतुशक्तिमिति। कारणतां पारमार्थिकीमनभ्युपगम्यानित्यं नीलादिकं न पारमार्थिकमभ्युपगन्तुं शक्यमिति भावः। अनेन कारणतायाः काल्पनिकत्वं

नित्यविभोर्व्यतिरेकासम्भवात्कारणत्वासम्भव इत्याशङ्का

स्यादेतत् । अस्तु स्थिरम्, तथाऽपि नित्यविभोर्न कारणत्वमुपपद्यते । तथा हि अन्वयव्यतिरेकाभ्यां कारणत्वमवधार्यते, नान्वयमात्रेण, अतिप्रसङ्गात् । न च नित्यविभूनां व्यतिरेकसंभवः । न च सोपाधेरसावस्त्येवेति सांप्रतम् । तथाभूतस्योपाधिसम्बन्धेऽप्यनधिकारात् । जनितो हि तेन स तस्य स्यात्, नित्यो वा । न प्रथमः, पूर्ववत् । नापि द्वितीयः, पूर्ववदेव । तथाऽपि चोपाधेरेव व्यतिरेकः; न तस्य; अविशेषात् । तद्वत इति चेत्—न; स चोपाधिश्चेत्यतोऽन्यस्य तद्वत्पदार्थस्याभावात् । भावे वा स एव कारणं स्यात् ॥

प्रत्युक्तम् । तद्युक्तमिति । सहकारियुक्तं तत्कारणं तत्र शक्तं कार्यजननसमर्थमित्युपगमात् उत्पत्तेरारभ्य कुर्यादित्युक्तमपास्तमिति भावः । साधारणं न किमिति । नीलादेः यत् सर्वपुरुषज्ञेयत्वरूपं साधारण्यं तत्कारणताया अप्यस्त्येव । प्रतिसंबन्धिसाधारण्यं तु न नीलादेरपि । न हि वायसवत् हंसोऽपि नील इति भावः । कारिकां विशदयति—सर्वसाधारणेत्यादिना ॥

उत्तरार्धमवतारयति—कथमेकमिति ॥

नन्वेवं स्थिरस्य कारणत्वसंभवेऽपि नित्यविभोः न संभवतीति शङ्कते—स्यादेतदिति । अतिप्रसङ्गादिति । आकाशादेरपि सर्वकारणत्वप्रसङ्गादित्यर्थः । न च नित्यविभूनामिति । नित्यत्वेन कालिकव्यतिरेकस्य विभुत्वेन दैशिकव्यतिरेकस्य वा न संभवः इति भावः । शरीरस्य परिच्छिन्नतया तद्विशिष्टस्यात्मनः व्यतिरेकसंभवाशङ्कां निरस्यति—न चेति । सोपाधेरिति । शरीरादिविशिष्टस्येत्यर्थः । तथाभूतस्य—नित्यविभोः । पूर्ववदिति । उपाधिसंबन्धं प्रत्यपि व्यतिरेकासंभवेन कारणत्वानुपपत्तेरिति भावः । उपाधिसंबन्धस्य नित्यत्वे दोषमाह—पूर्ववदेवेति । उपाधिसंबन्धस्योपाधिमतश्च नित्यत्वे सोपाधेरपि कालिकव्यतिरेकासंभवश्च तदवस्थ इति भावः । अथापि दैशिकव्यतिरेकसंभवेनानतिप्रसङ्गात् कारणत्वमुपपद्यत इत्यत्राह—तथापीति । उपाधेरेवेति । विशेष्यवति विशेषणाभावस्यैवोपगमादिति भावः ॥

ननु प्रतिबन्धकोत्तम्भकप्रयोगकाले विशिष्टस्याप्यभावादिति पूर्वमुक्तम्, तत्कथमिहोपाधेरेव व्यतिरेको न तस्येति विशेष्यवति विशेषणस्यैवाभावः; न तु विशिष्टस्येत्युच्यत इति चेत्—अत्र ब्रूमः । इह विभोरेव विशेष्यत्वान्न तस्य व्यतिरेकसंभवः । प्रतिबन्धस्य तु मण्यादेरविभोरतद्वृत्तेः व्यतिरेकोऽपि संभवतीति विशेषादुभयोरविरोध इति । स एव—अन्य एव—न नित्यविभुरिति भावः ॥

तत्परिहारः

अत्रोच्यते—

पूर्वभावो हि हेतुत्वं मीयते येन केनचित् ।
व्यापकस्यापि नित्यस्य धर्मिधीरन्यथा न हि ॥ १९ ॥

भवेदेवं, यद्यन्वयव्यतिरेकावेव कारणत्वम्; किं तु कार्यान्नियतः पूर्वभावः । स च क्वचिदन्वयव्यतिरेकाभ्यामवसीयते, क्वचिद्धर्मिग्राहकात् प्रमाणात् । अन्यथा कार्यात्कारणानुमानं क्वापि न स्यात्, तेन तस्यानुविधानानुपलम्भात् उपलम्भे वा कार्यलिङ्गानवकाशात् । प्रत्यक्षत एव तत्सिद्धेः । तज्जातीयानुविधानदर्शनात्सिद्धिरन्यत्रापि न वार्यते ।

तथाऽपि कोष्ठगत्यानुविहितान्वयव्यतिरेकमेव कार्यात् कारणं सिद्ध्येत्; अन्यत्र तथा दर्शनादिति चेत्—न । बाधेन संकोचात्; विपक्षे बाधकाभावेन चाव्याप्तेः । दर्शन-

---

नित्यविभोरपि कारणत्वं साधयति—अत्रोच्यत इति । पूर्वभाव इति । कार्यनियतपूर्वभाव इत्यर्थः । येन केनचिदन्वयव्यतिरेकधर्मिग्राहकमानादिना । व्यापकस्यापि -विभोरपि । अन्यथा—अन्वयव्यतिरेकाभ्यामेव हेतुत्वधीरिति नियमोपगमे । धर्मी—हेतुत्वस्य प्रकृतत्वाद्धेतुः । तद्धीः—कार्यव्यक्तिविशेषात् कारणव्यक्तिविशेषानुमितिः । न स्यात्—विशिष्यान्वयव्यतिरेकानुपलम्भादिति भावः । अन्यत्रापि न वार्यत इति । नित्यविभावपि कारणत्वसिद्धिर्न वार्यत इत्यर्थः । कार्यत्वेन समवायिकारणत्वेन घटादावन्वयव्यतिरेकदर्शनादिति भावः ॥

ननु कार्यात्कारणानुमाने विशिष्यान्वयव्यतिरेकदर्शनाभावेऽपि वस्तुतः अन्वयव्यतिरेकविशिष्टमेव कारणमनुमीयते, वह्न्यादेस्तथात्वादिति न विभुकारणसिद्धिरिति शङ्कते—तथापीति । कोष्ठगत्या—विशिष्य तद्व्यक्तित्वेनेति भावः । कारणस्य विशिष्यान्वयव्यतिरेकानुविधानभानं किं बाधाभावात्, उत व्याप्तिबलात्, आहोस्विद्दर्शनमात्रेणेति विकल्पयन्नाद्यं प्रत्याह—बाधेनेति । विभुत्वग्राहकप्रमाणेन व्यतिरेकस्य बाधनिश्चये सति न भानमिति भावः । द्वितीयं प्रत्याह—विपक्ष इति । अन्वयव्यतिरेकविशिष्टकारणवत्त्वाभाव इत्यर्थः । तथा च विशिष्टकारणत्वेन कार्यत्वेन न व्याप्तिरिति भावः । तृतीयं प्रत्याह – दर्शनमात्रेणेति । ईश्वरे—ईश्वरानुमाने । विपक्षे बाधकं शङ्कते—सर्वव्यापकानामिति । अन्वयव्यतिरेकवज्जातीयतयेति । जातिरिहानुगतो धर्मः । समवायिकारणत्वमिह

मात्रेण चोत्कर्षसमत्वात्। अस्य चेश्वरे विस्तरो वक्ष्यते। सर्वव्यापकालां सर्वान् प्रत्यन्वयमात्राविशेषे कारणत्वप्रसङ्गो बाधकमिति चेत्—न। अन्वयव्यतिरेकवज्जातीयतया विपक्षे बाधकेन च विशेषेऽनतिप्रसङ्गात्। तथा हि-कार्यं समवायिकारणवत् दृष्टमित्यदृष्टाश्रयमपि तज्जातीयकारणकम्—आश्रयाभावे किम्प्रत्यासन्नं असमवायिकारणं स्यात्। तदभावे निमित्तमपि किमुपकुर्यात्। तथा चानुत्पत्तिः सततोत्पत्तिर्वा सर्वत्रोत्पत्तिर्वा स्यात्। एवमपि निमित्तस्य सामर्थ्यादेव नियतदेशोत्पादे स एव देशोऽवश्यापेक्षणीयः स्यात्। तथा च सामान्यतो देशसिद्धौ इतरपृथिव्यादिबाधे तदतिरिक्तसिद्धिं को वारयेत्। एवमसमवायिनिमित्ते चोहनीये॥

इत्येषा सहकारिशक्तिरसमा माया दुरुन्नीतितः
मूलत्वात्प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता।

विवक्षितं, भावकार्येण ज्ञानादिनानुमीयमानं नित्यविभुसमवायिकारणमप्यन्वयव्यतिरेकवज्जातीयमेवेति भावः। विपक्षे बाधकेन चेति। आश्रयाभावे किं प्रत्यासन्नमित्यादिना अनुपदं वक्ष्यमाणेनेत्यर्थः। विशेष इति। विशेषे सतीत्यर्थः। नित्यविभुचेतनरूपकारणविशेषे सिद्ध इति वा। अदृष्टाश्रयमिति। अदृष्टः आश्रयः यस्य ज्ञानादेः तदित्यर्थः। इतरपृथिव्यादिबाधे इति। चैतन्यस्य भूतधर्मत्वानुपपत्तेः उक्तत्वादिति भावः॥

एवं नित्यविभुचेतनस्य कारणत्वे सिद्धे, तत्र पूर्वोक्तयुक्त्या प्रतिनियतपरलोकफलभोगसाधनस्यादृष्टस्य सिद्ध्या प्रथमविप्रतिपत्तेः निश्शेषं निरस्तत्वादन्ते सिद्धेनादृष्टेन परमेश्वरसिद्धिमाशासानः स्तबकं समापयति—इत्येषेति। एतावता साधितमदृष्टमित्यर्थः। शक्तिरिति। विधेयप्राधान्यात् स्त्रीलिङ्गनिर्देशः। यस्य—विचित्रप्रपञ्चस्रष्टिकर्तुः देवस्य सहकारिशक्तिरुदिता। 'अविद्या कर्मसंज्ञान्या तृतीया शक्ति'रित्यादिकमिह भाव्यम्। 'अस्मान्मायी सृजते', 'मयाध्यक्षेण प्रकृतिस्सूयते' इत्यादावप्येतदेवोच्यते न तत्त्वान्तरमित्यभिप्रेत्याह—मायेति। दुरुन्नीतित इति। अस्मादृशां कारणतः स्वरूपतः फलतश्च निरूपयितुमशक्यत्वान्मायेत्युच्यत इति भावः। प्रबोधेति। "ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुत" इत्यादिकमिहानुसन्धेयम्। विरतेति—सृष्टेः प्रागवस्थानुसन्धीयते। साक्षादिति। साक्षात्कर्तृत-

देवोऽसौ विरतप्रपञ्चरचनाकल्लोलकोलाहलः
साक्षात्साक्षितया मनस्यभिरतिं बध्नातु शान्तो मम ॥

इति न्यायकुसुमाञ्जलौ प्रथमस्तबकः समाप्तः

येत्यर्थः । विचित्रसृष्ट्यनुकूलतत्तददृष्टद्रष्टृतारूपया तदधिष्ठातृतया ईश्वरसिद्धिरस्त्वति भावः । अयमत्र सङ्ग्रहः—

कादाचित्कतया सहेतु निखिलं कार्यं नचाकस्मिकम्
वैचित्र्यात्क्रमतोप्यनेकजमिहानादिः प्रवाहस्तथा ।
इष्टापूर्तमुखाददृष्टमपि तद्भोगव्यवस्थाकृते
पुंसीष्टं न मतान्तरं सदिह तद्द्रष्टुं य ईष्टे स ईट् ॥

इति न्यायवासनायां प्रथमस्तबकः समाप्तः

—:*:—

न्यायकुसुमाञ्जलौ द्वितीयस्तबकः

प्रामाण्यस्योत्पत्तौ परतस्त्वसाधनम्

तदेवं सामान्यतः सिद्धे अलौकिके हेतौ—तत्साधनेनावश्यं भवितव्यम्। न च तच्छक्यमस्मदादिभिर्द्रष्टुम्। न चादृष्टेन व्यवहारः - ततो लोकोत्तरः सर्वानुभावी सम्भाव्यते ॥

ननु नित्यनिर्दोषवेदद्वारको योगकर्मसिद्धसर्वज्ञद्वारको वा धर्मसंप्रदायः स्यात्। किं परमेश्वरकल्पनया इति चेत्—

अत्रोच्यते—

प्रमायाः परतन्त्रत्वात् सर्गप्रलयसंभवात्।
तदन्यस्मिन्ननाश्वासान्न विधान्तरसंभवः ॥ १ ॥

न्यायवासनायां द्वितीयस्तबकः

अथ पूर्वस्तबकसाधितादृष्टस्य जन्यत्वात् तत्त्वतस्तत्साधनयागादिदर्शी तत्प्रवर्तकश्च दोषप्रत्य-
नीकः सर्वविदेव कश्चित् सर्वजनविश्वसनीयस्स्यादितीश्वरसिद्धिरित्याशयेन तत्र च. मीमांसकाद्यभिमता-
न्यथासिद्धितत्परां द्वितीयविप्रतिपत्तिं निराकर्तुमारभते—तदेवमिति। अलौकिके हेतौ अदृष्टे।
तत्साधनेनेति। तदुत्पादकेन यागादिनेत्यर्थः। तदिति। साधनमित्यर्थः। न शक्यमिति।
साधनत्वस्यातीन्द्रियत्वादिति भावः। व्यवहार इति। तदनुष्ठानप्रवचनादिरूप इत्यर्थः। सम्भाव्यत
इति। अस्माकमन्यनिरपेक्षं अलौकिकहेतोर्यागादेः विशिष्य फलादृष्टसाधनतया ज्ञातुमशक्यत्वेन तदनु-
ष्ठानस्य तदुपदेशस्य चासंभवात् तदुपदेष्टा सर्वद्रष्टा कश्चित् अस्माद्विलक्षण ईश्वर उन्नीयत इति भावः ॥

अपौरुषेयत्वेन निर्दोषाद्वेदात् पौरुषेयत्वेऽप्याप्तकपिलाद्युपदेशाद्वा तदवगन्तुं शक्यमिति शङ्कते—
नन्विति। अत्र ज्ञानानां स्वतःप्रामाण्यात् क्वचित्परतः प्रामाण्येऽपि स्वरूपतः प्रवाहतो वा नित्यस्य
वेदस्य परतः प्रामाण्यायोगेन स्वतः प्रामाण्यसंभवात्, वेदस्य पौरुषेयत्वोपगमे तत्प्रामाण्यस्याप्तवक्तृ-
सापेक्षत्वेऽपि कपिलादियोगिनामन्यनिरपेक्षं धर्मसंप्रदायप्रवचनसंभवेन परमेश्वरस्यानपेक्षितत्वादित्याद्य-
वान्तरविप्रतिपत्तयो विवक्षिताः। ताः क्रमेण निराकरोति—उच्यत इति ॥

तथा हि—प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना कार्यत्वे सति तद्विशेषत्वादप्रमावत् । यदि च तावन्मात्राधीना भवेत्, अप्रमाऽपि प्रमैव भवेत् । अस्ति हि तत्र ज्ञानहेतुः । अन्यथा ज्ञानमपि सा न स्यात् ॥

ज्ञानत्वेऽप्यतिरिक्तदोषानुप्रवेशादप्रमेति चेत्—एवं तर्हि दोषाभावमधिकमासाद्य प्रमाऽपि जायेत, नियमेन तदपेक्षणात् । अस्तु दोषाभावोऽधिकः, भावस्तु नेष्यत इति चेत्—भवेदप्येवम्, यदि नियमेन दोषैर्भावरूपैरेव भवितव्यम् । न त्वेवम्; विशेषादर्शनादेरभावस्यापि दोषत्वात् । कथमन्यथा ततः संशयविपर्ययौ ? ततस्तदभावो भाव एवेति कथं स नेष्यते ?

परतन्त्रत्वादिति । ज्ञानसामान्यहेत्वतिरिक्तहेत्वधीनत्वादित्यर्थः । संगति । प्रवाहतो नित्यत्वमपि दुर्वचमिति भावः । तदन्यस्मिन्निति । ईश्वरातिरिक्तकपिलादावित्यर्थः । अनाश्वासादिति । तत्त्वोपदेशोचितयथार्थज्ञानवत्तायामविस्रम्भादित्यर्थः ।

प्रमायाः प्रथमतः उत्पत्तौ परतस्त्वं निरूपयति—तथा हीति । तद्विशेषत्वात्-ज्ञानविशेषत्वात् । अत्र ज्ञानसामान्यहेत्वतिरिक्तहेत्वधीनत्वं साध्यम् । अतो न बाधशङ्कावकाशः । अप्रमापीति । प्रमात्वस्य ज्ञानसामान्यसामग्रीमात्रप्रयोज्यवृत्तित्वे अप्रमावृत्तित्वमपि स्यादिति प्रसङ्गे तात्पर्यम् । अन्यथा—ज्ञानसामान्यहेतोरप्यनुपगमे ॥

विशेषादर्शनादेरिति । पुरुषत्वादिव्याप्यकरादिदर्शनाद्यभावादेरित्यर्थः । प्रत्यक्षप्रामाण्ये भावापेक्षोपगमेऽपि परोक्षप्रामाण्ये न सोपगम्यत इति शङ्कते—स्यादिति । स्वत एव-गुणमनपेक्ष्यैव । विप्रलिप्सा—वञ्चनेच्छा । आदिना भ्रमादिपरिग्रहः । दोषाभावमात्रस्य परोक्षप्रमासामान्यकारणत्वं व्यभिचारेण निरस्यति—नेति । लिङ्गविपर्यासादीनामिति । भ्रमात्मकलिङ्गपरामर्शादीनामित्यर्थः । तदभावमात्रेणेति । मात्रशब्देन सल्लिङ्गपरामर्शरूपगुणः व्यवच्छिद्यते । अत एव प्रमानुत्पत्तेरित्युक्तम् । अथ परोक्षप्रमाविशेषे दोषाभावमात्रमपेक्षितमस्त्विति शङ्कते-अन्यत्रेति । वक्तृगुणापेक्षा—वक्तुः यथार्थज्ञानरूपगुणापेक्षा । प्रामाण्यस्य गुणसापेक्षत्वोपगमात् तदभावमात्रापेक्षमप्रामाण्यं न दोषसापेक्षमिति त्वदुक्तविपरीतमपि वक्तुं शक्यमित्याह—गुणाभाव इति ।

स्यादेतत्—शब्दे तावत् विप्रलिप्सादयो भावा एव दोषाः। ततस्तदभावे स्वत एव शाब्दी प्रमेति चेत्—न। अनुमानादौ लिङ्गविपर्यासादीनां भावानामपि दोषत्वे तदभावमात्रेण प्रमानुत्पत्तेः। 'अन्यत्र यथातथाऽस्तु। शब्दे तु विप्रलिप्साद्यभावे वक्तृगुणापेक्षा नास्ती'ति चेत्—न। गुणाभावे तदप्रामाण्यस्य वक्तृदोषापेक्षा नास्तीति विपर्ययस्यापि तुल्यत्वात्। अप्रामाण्यं प्रति दोषाणामन्वयव्यतिरेकौ स्त इति चेत्—न। प्रामाण्यं प्रत्यपि गुणानां तयोः सत्त्वात्॥

पौरुषेयविषये इयमस्तु व्यवस्था। अपौरुषेये तु दोषनिवृत्त्यैव प्रामाण्यमिति चेत्—न। गुणनिवृत्त्याऽप्रामाण्यस्यापि संभवात्। तस्या अप्रमाण्यं प्रति सामर्थ्यं नोपलब्धमिति चेत्—दोषनिवृत्तेः प्रामाण्यं प्रति क्व सामर्थ्यमुपलब्धम्? 'लोकवचसी'ति चेत्—तुल्यम्। तदप्रामाण्ये दोषा एव कारणम्; गुणनिवृत्तिस्त्ववर्जनीयसिद्धसन्निधिरिति चेत्—प्रामाण्यं प्रति गुणेष्वपि तुल्यमेतत्। गुणानां दोषोत्सारणप्रयुक्तः सन्निधिरिति चेत्—दोषाणामपि गुणोत्सारणप्रयुक्त इत्यस्तु। निःस्वभावत्वमेवमपौरुषेयस्य वेदस्य स्यादिति चेत्—आत्मानमुपालभस्व। तस्मात् यथा द्वेषरागाभावाविनाभावेऽपि रागद्वेषयोरनुविधाननियमात् प्रवृत्तिनिवृत्तिप्रयत्नयो रागद्वेषकारणकत्वम्, न तु निवृत्तिप्रयत्नो द्वेषहेतुकः; प्रवृत्तिप्रयत्नस्तु सत्यपि रागानुविधाने द्वेषाभावहेतुक इति विभागो युज्यते; विशेषाभावात्—तथा प्रकृतेऽपि॥

तथापि वेदानामपौरुषेयत्वे सिद्धे अपेतवक्तृदोषत्वादेव प्रामाण्यं सेत्स्यति। ततः सिद्धे प्रामाण्ये गुणाभावेऽपि तदिति दोषाभाव एव हेतुः; अकारणं गुणा इति चेत्—न।

शाब्दप्रमाविशेषे दोषाभावमात्रं तन्त्रमिति शङ्कते—पौरुषेयेति। व्यवस्था गुणनिबन्धनं प्रामाण्यमिति नियमः। गुणनिवृत्त्येति। वह्निना सिञ्चतीत्यादाविव आप्तवक्तृकत्वाभावेनेत्यर्थः। अन्यत्र दोषनिबन्धनत्वेऽपि अप्रामाण्यस्य वेदे गुणाभावमात्रनिबन्धनत्वोपगमापत्तेः। मिलितस्य तथात्वोपगमे प्रामाण्येऽपि गुणसहितः दोषाभावः निबन्धनमस्त्विति भावः। तर्हि गुणदोषरहितस्य वेदस्य प्रामाण्यमप्रामाण्यं वा किमपि न स्यादिति शङ्कते—निःस्वभावत्वमिति। आत्मानमुपालभस्वेति। अपौरुषेयत्ववादिन एवायं दोष इति भावः। तथा प्रकृतेऽपीति। अप्रामाण्यं दोषहेतुकं प्रामाण्यं तु गुणानुविधाने सत्यपि दोषाभावहेतुकमिति विभागो न युज्यत इति भावः॥

अपेतवक्तृगुणत्वेन सत्प्रतिपक्षत्वप्रसङ्गात्। स्वत एव प्रामाण्यनिश्चयः। किं तु शङ्कामात्रमनेनापनीयते; दोषनिबन्धनत्वात्तस्य तदभावेऽभावात्। अतो नेदमनुमानवत् सत्प्रतिसाधनीकर्तुमुचितमिति चेत् - न - गुणनिवृत्तिनिबन्धनायाः शङ्कायास्सुलभत्वात्। तस्याः केवलायाः अप्रामाण्यं प्रत्यनङ्गत्वान्न शङ्केति चेत्—दोषनिवृत्तेरपि केवलायाः प्रामाण्यं प्रत्यनङ्गत्वान्न तया शङ्कानिवृत्तिरिति तुल्यमिति ॥

प्रामाण्यस्य ज्ञप्तौ परतस्त्वसाधनम्

एवं प्रामाण्यं परतो ज्ञायते अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवत्। यदि तु स्वतो ज्ञायेत कदाचिदपि प्रामाण्यसंशयो न स्यात् ज्ञानत्वसंशयवत्, निश्चिते तदनवकाशात्। न हि साधकबाधकप्रमाणाभावमवधूय समानधर्मादिदर्शनादेवासौ, तथा सति तदनुच्छेदप्रसङ्गात् ॥

नन्वेवमपि कर्तृस्मरणाभावादिना वेदानामपौरुषेयत्वात् अप्रामाण्यकारणवक्तृदोषाभावेन प्रामाण्ये सिद्धे तत्र गुणाभावाद्दोषाभावमात्रहेतुकत्वसिद्धिरिति शङ्कते—तथापीति। दोषाभाव एवेति। तत्र गुणानुविधानादर्शनादिति भावः। सत्प्रतिपक्षत्वेति। वेदाः प्रमाणं न भवन्ति अपेतवक्तृगुणत्वात् इति प्रत्यनुमानसंभवादिति भावः। स्यादेतदेवम्, यद्यनुमानेन प्रामाण्यं साधयेम, स्वत एव हि तन्निश्चय इति वदामः; तर्ह्यपेतवक्तृदोषत्वादिति किमर्थमुच्यत इति चेत्—अप्रमाणेऽपि सर्वत्र स्वतः प्रामाण्यावगतिसंभवेन विशेषादर्शनादुत्थितां शङ्कामपनेतुमित्याह—स्वत एवेति। स्वाश्रयज्ञानग्राहकादेवेत्यर्थः। शङ्कामात्रमिति। प्रामाण्यनिश्चये सत्यप्यप्रमायां प्रामाण्यनिश्चयवत् अयं प्रमा न वेति संशये अप्रामाण्यशङ्कासंभव इति भावः। दोषनिवृत्त्यवगत्या निवृत्ता शङ्का गुणनिवृत्त्यनुसन्धाने पुनरापतेदिति प्रत्याह—नेति। तस्याः – गुणनिवृत्तेः। केवलायाः – दोषनिरपेक्षायाः। केवलया इत्युत्तरपदं गुणैनिरपेक्ष्यपरम्। एवं प्रामाण्योत्पत्तेः परतस्त्वे सिद्धे वेदप्रामाण्यकारणगुणाश्रयतया ईश्वरसिद्धिरिति भावः ॥

अथ प्रामाण्यस्य ज्ञप्तौ परतस्त्वं साधयति—एवमिति। परतो ज्ञायत इति। अनुमानेन ज्ञायते। न तु स्वाश्रयज्ञानग्रहत्वव्यापकविषयितानिरूपक इति भावः। अनभ्यासदशायामिति। प्राथमिकज्ञानदशायामित्यर्थः। सफलप्रवृत्तिलिङ्गनिश्चितप्रामाण्यकसमानविषयकज्ञानानुत्तरज्ञानदशायामिति

अथ प्रमाणवदप्रमाणेऽपि तत्प्रत्ययदर्शनात् विशेषादर्शनात् भवति शङ्केत्यभिप्रायः— तत् किं प्रमाणज्ञानोपलम्भेऽपि न तत्प्रामाण्यमुपलब्धम्, प्रमाणज्ञानमेव वा नोपलब्धम्? आद्ये कथं स्वतः प्रामाण्यग्रहः, प्रत्ययप्रतीतावपि तदप्रतीतेः। द्वितीये कथं तत्र शङ्का; धर्मिण एवानुपलब्धेरिति ॥

यावत्। प्रामाण्ये निश्चितेऽपि ज्ञानत्वादिरूपसाधारणधर्मदर्शनस्य कारणस्य बलात् संशयसभव इत्यत आह—न हीति। साधकबाधकप्रमाणे सिद्धिबाधौ ॥

प्रमाणमेवेत्यवधारणात्मकनिश्चय एव संशयविरोधीत्याशयेन शङ्कते—अथेति। निश्चयसामान्यस्यापि संशयविरोधित्वमित्याशयेन प्रामाण्यव्याप्यविशेषदर्शन इव प्रामाण्यनिश्चयेऽप्यप्रामाण्यशङ्काया असंभवात् शङ्कामभ्युपगच्छतः पूर्वपक्षिणोऽपि मते प्रामाण्यस्य निश्चयाभावं सिद्धवत्कृत्य धर्म्युपलब्धितदभावविकल्पेन स्वतोग्राह्यतां शङ्कां च विघटयति—तत्किमिति ॥

अन्यत्र परतस्त्वेऽपि क्वचित् जलादिज्ञाने सति निष्कम्पप्रवृत्तेः झटित्युपपत्तये स्वतःप्रामाण्यनिश्चयोऽपि स्वीकर्तव्यः इति शङ्कामनुवदति—यद्पीति। प्रामाण्यस्यानुमेयत्वे लिङ्गपरामर्शापेक्षया विलम्बः स्यादिति भावः। प्रचुरतरेति। प्रचुरतरत्वं—उत्कटत्वं निष्कम्पत्वं विवक्षितम्। समर्थत्वम् सफलत्वम्। प्रवृत्त्यन्यथानुपपत्तेरिति। निष्कम्पप्रवृत्तेः प्रामाण्यनिश्चयाधीनत्वादिति भावः। शङ्कां निराकरोति—तदपीति। उत्कटेच्छादिकारणझाटित्येन निष्कम्पप्रवृत्तिझाटित्योपपत्तेः न प्रामाण्यनिश्चयस्य न वा तत्स्वतस्त्वस्यावश्यकतेति भावः। तज्जातीयत्वेति—इष्टसाधनजातीयत्व इत्यर्थः। अप्रामाण्यज्ञानदशायां प्रवृत्तिवारणाय प्रामाण्यनिश्चयहेतुत्वकल्पनमेव लघ्वित्यभिप्रायेणाह—उपयोगे वेति। प्रामाण्यप्राचुर्यादिति। प्रामाण्यस्य प्राचुर्यं विशेषणाविनाभूतविशेष्यघटितत्वं, तद्ग्रहणस्य प्राचुर्यमप्रामाण्यशङ्कानन्तरितत्वम्, धारावाहित्वं वा। ननु प्रामाण्यग्रहस्य परतस्त्वे व्याप्तिस्मरणादिविलम्बसंभवात् झटिति प्रवृत्तेरनुपपत्तेः स्वतस्त्वमेष्टव्यमित्यत्राह— न हीति। पिपासोः जलप्रत्यक्षे पिपासाशमनशक्तेरनुमेयत्वेऽपि यथा अभ्यासाहितलिङ्गानुसन्धानात् झटिति प्रवृत्तिः तथा प्रकृतेऽपीति भावः ॥

परतस्त्वासंभवात् परिशेषात् स्वतस्त्वं युक्तमिति शङ्कते—स्यादेतदिति। सर्वमेतत्— प्रवृत्त्यादि। अनवस्थेति। अनिश्चितप्रामाण्यकस्य ज्ञानस्याकिञ्चित्करत्वेत परतस्त्वपक्षे प्रामाण्य-

अपेतवक्तृगुणत्वेन सत्प्रतिपक्षत्वप्रसङ्गात् । स्वत एव प्रामाण्यनिश्चयः । किं तु शङ्कामात्रमनेनापनीयते ; दोषनिबन्धनत्वात्तस्य तदभावेऽभावात् । अतो नेदमनुमानवत् सत्प्रतिसाधनीकर्तुमुचितमिति चेत् - न - गुणनिवृत्तिनिबन्धनायाः शङ्कायास्सुलभत्वात् । तस्याः केवलायाः अप्रामाण्यं प्रत्यनङ्गत्वान्न शङ्केति चेत्—दोषनिवृत्तेरपि केवलायाः प्रामाण्यं प्रत्यनङ्गत्वान्न तया शङ्कानिवृत्तिरिति तुल्यमिति ॥

प्रामाण्यस्य ज्ञप्तौ परतस्त्वसाधनम्

एवं प्रामाण्यं परतो ज्ञायते अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवत् । यदि तु स्वतो ज्ञायेत कदाचिदपि प्रामाण्यसंशयो न स्यात् ज्ञानत्वसंशयवत्, निश्चिते तदनवकाशात् । न हि साधकबाधकप्रमाणाभावमवधूय समानधर्मादिदर्शनादेवासौ, तथा सति तदनुच्छेदप्रसङ्गात् ॥

नन्वेवमपि कर्तृस्मरणाभावादिना वेदानामपौरुषेयत्वात् अप्रामाण्यकारणवक्तृदोषाभावेन प्रामाण्ये सिद्धे तत्र गुणाभावाद्दोषाभावमात्रहेतुकत्वसिद्धिरिति शङ्कते—तथापीति । दोषाभाव एवेति । तत्र गुणानुविधानादर्शनादिति भावः । सत्प्रतिपक्षत्वेति । वेदाः प्रमाणं न भवन्ति अपेतवक्तृगुणत्वात् इति प्रत्यनुमानसंभवादिति भावः । स्यादेतदेवम्, यद्यनुमानेन प्रामाण्यं साधयेम, स्वत एव हि तन्निश्चय इति वदामः ; तर्ह्यपेतवक्तृदोषत्वादिति किमर्थमुच्यत इति चेत्—अप्रमाणेऽपि सर्वत्र स्वतः प्रामाण्यावगतिसंभवेन विशेषादर्शनादुत्थितां शङ्कामपनेतुमित्याह—स्वत एवेति । स्वाश्रयज्ञानग्राहकादेवेत्यर्थः । शङ्कामात्रमिति । प्रामाण्यनिश्चये सत्यप्यप्रमायां प्रामाण्यनिश्चयवत् अयं प्रमा न वेति संशये अप्रामाण्यशङ्कासंभव इति भावः । दोषनिवृत्त्यवगत्या निवृत्ता शङ्का गुणनिवृत्त्यनुसन्धाने पुनरापतेदिति प्रत्याह—नेति । तस्याः – गुणनिवृत्तेः । केवलायाः – दोषनिरपेक्षायाः । केवलाया इत्युत्तरपदं गुणनैरपेक्ष्यपरम् । एवं प्रामाण्योत्पत्तेः परतस्त्वे सिद्धे वेदप्रामाण्यकारणगुणाश्रयतया ईश्वरसिद्धिरिति भावः ॥

अथ प्रामाण्यस्य ज्ञप्तौ परतस्त्वं साधयति—एवमिति । परतो ज्ञायत इति । अनुमानेन ज्ञायते । न तु स्वाश्रयज्ञानग्रहत्वव्यापकविषयितानिरूपक इति भावः । अनभ्यासदशायामिति । प्राथमिकज्ञानदशायामित्यर्थः । सफलप्रवृत्तिलिङ्गनिश्चितप्रामाण्यकसमानविषयकज्ञानानुत्तरज्ञानदशायामिति

अथ प्रमाणवदप्रमाणेऽपि तत्प्रत्ययदर्शनात् विशेषादर्शनात् भवति शङ्केत्यभिप्रायः—तत् किं प्रमाणज्ञानोपलम्भेऽपि न तत्प्रामाण्यमुपलब्धम्, प्रमाणज्ञानमेव वा नोपलब्धम्? आद्ये कथं स्वतः प्रामाण्यग्रहः, प्रत्ययप्रतीतावपि तदप्रतीतेः। द्वितीये कथं तत्र शङ्का; धर्मिण एवानुपलब्धेरिति ॥

यावत्। प्रामाण्ये निश्चितेऽपि ज्ञानत्वादिरूपसाधारणधर्मदर्शनस्य कारणस्य बलात् संशयसंभव इत्यत आह—न हीति। साधकबाधकप्रमाणे सिद्धिबाधौ ॥

प्रमाणमेवेत्यवधारणात्मकनिश्चय एव संशयविरोधीत्याशयेन शङ्कते—अथेति। निश्चयसामान्यस्यापि संशयविरोधित्वमित्याशयेन प्रामाण्यव्याप्यविशेषदर्शन इव प्रामाण्यनिश्चयेऽप्यप्रामाण्यशङ्काया असंभवात् शङ्कामभ्युपगच्छतः पूर्वपक्षिणोऽपि मते प्रामाण्यस्य निश्चयाभावं सिद्धवत्कृत्य धर्म्युपलब्धितदभावविकल्पेन स्वतोग्राह्यतां शङ्कां च विघटयति—तत्किमिति ॥

अन्यत्र परतस्त्वेऽपि क्वचित् जलादिज्ञाने सति निष्कम्पप्रवृत्तेः झटित्युपपत्तये स्वतःप्रामाण्यनिश्चयोऽपि स्वीकर्तव्यः इति शङ्कामनुवदति—यद्पीति। प्रामाण्यस्यानुमेयत्वे लिङ्गपरामर्शापेक्षया विलम्बः स्यादिति भावः। प्रचुरतरेति। प्रचुरतरत्वं—उत्कटत्वं निष्कम्पत्वं विवक्षितम्। समर्थत्वम् सफलत्वम्। प्रवृत्त्यन्यथानुपपत्तेरिति। निष्कम्पप्रवृत्तेः प्रामाण्यनिश्चयाधीनत्वादिति भावः। शङ्कां निराकरोति—तदपीति। उत्कटेच्छादिकारणझाटित्येन निष्कम्पप्रवृत्तिझाटित्योपपत्तेः न प्रामाण्यनिश्चयस्य न वा तत्स्वतस्त्वस्यावश्यकतेति भावः। तज्जातीयत्वेति—इष्टसाधानजातीयत्व इत्यर्थः। अप्रामाण्यज्ञानदशायां प्रवृत्तिवारणाय प्रामाण्यनिश्चयहेतुत्वकल्पनमेव लघ्वित्यभिप्रायेणाह—उपयोगे वेति। प्रामाण्यप्राचुर्यादिति। प्रामाण्यस्य प्राचुर्यं विशेषणाविनाभूतविशेष्यघटितत्वं, तद्ग्रहणस्य प्राचुर्यमप्रामाण्यशङ्कानन्तरितत्वम्, धारावाहित्वं वा। ननु प्रामाण्यग्रहस्य परतस्त्वे व्याप्तिस्मरणादिविलम्बसंभवात् झटिति प्रवृत्तेरनुपपत्तेः स्वतस्त्वमेष्टव्यमित्यत्राह— न हीति। पिपासोः जलप्रत्यक्षे पिपासाशमनशक्तेरनुमेयत्वेऽपि यथा अभ्यासाहितलिङ्गानुसन्धानात् झटिति प्रवृत्तिः तथा प्रकृतेऽपीति भावः ॥

परतस्त्वासंभवात् परिशेषात् स्वतस्त्वं युक्तमिति शङ्कते—स्यादेतदिति। सर्वमेतत्—प्रवृत्त्यादि। अनवस्थेति। अनिश्चितप्रामाण्यकस्य ज्ञानस्याकिञ्चित्करत्वेन परतस्त्वपक्षे प्रामाण्य-

यदपि झटिति प्रचुरतरसमर्थप्रवृत्त्यन्यथानुपपत्त्या स्वतः प्रामाण्यमुच्यते—तदपि नास्ति ; अन्यथैवोपपत्तेः । झटिति प्रवृत्तिर्हि झटिति तत्कारणोपनिपातमन्तरेणानुपपद्यमाना तमाक्षिपेत् । प्रचुरप्रवृत्तिरपि स्वकारणप्राचुर्यम् । इच्छा च प्रवृत्तेः कारणम् । तत्कारणमपीष्टाभ्युपायताज्ञानम् । तदपि तज्जातीयत्वलिङ्गानुभवप्रभवम् । सोऽपीन्द्रियसन्निकर्षादिजन्मा । न तु प्रामाण्यग्रहस्य क्वचिदप्युपयोगः । उपयोगे वा स्वत एवेति कुत एतत्? ततः समर्थप्रवृत्तिप्राचुर्यमपि प्रामाण्यप्राचुर्यात्तद्ग्रहणप्राचुर्याद्वा स्वतस्त्वं तु तस्य क्वोपयुज्यते । न हि पिपासूनां झटिति प्रचुरा समर्था च प्रवृत्तिरम्भसीति पिपासोपशमनशक्तिस्तस्य प्रत्यक्षा स्यात् ॥

निश्चायकानुमितेरपि परतः प्रामाण्यनिश्चय इत्येवंरीत्या फल्गुरवी अनवस्थितिरित्यर्थः । अनिश्चितस्वप्रामाण्यकानुमितेरपि परप्रामाण्यनिश्चायकत्वे अनिश्चितप्रामाण्यकव्यवसायादपि तद्विषयार्थनिश्चयसंभवात् किं प्रामाण्यनिश्चयेनेति भावः । तदग्रह इति । प्रामाण्याग्रह इत्यर्थः । तद्ग्रहस्य न हेतुत्वमिति भावः । कथं तर्ह्यर्थनिश्चय इत्यत्राह—अर्थसन्देहादिति । सर्वस्येति । प्रवृत्त्यादेरित्यर्थः । निश्चयत्वेन कारणत्वोपगमेऽपि अप्रामाण्यशङ्कायामसत्यां प्रामाण्यनिश्चयानपेक्षणात् न दोष इत्याह—न चेति । न च तदा निष्कम्पप्रवृत्तिरपि स्यादिति वाच्यम् । अप्रामाण्यज्ञानाभावविशिष्टार्थज्ञानस्य तत्र हेतुत्वेनाप्रामाण्यशङ्कायामसत्यामिष्टत्वात् । अन्यथा—प्रामाण्यनिश्चयस्यावश्यकत्वे । स्वतः पक्षेऽपीति । तत्र आश्रयज्ञानविषयत्वं स्वतोग्राह्यत्वमिति गुरवः । अनुव्यवसायविषयत्वमिति मिश्राः । ज्ञाततानुपपत्तिकल्पितमिति भाट्टाः । प्राथमिकज्ञानग्रहविषयत्वं स्वतस्त्वमनुगतमेषाम् । मिश्रभट्टमतयोः प्रामाण्यस्य ज्ञानान्तरवेद्यत्वात् ज्ञानान्तरप्रामाण्यमन्येन ज्ञानेनेत्येवं पूर्वोक्तरीत्या गुरुमते अर्थांशे प्रामाण्यं प्रामाण्यांशे प्रामाण्यमित्येवमेकस्मिन्नेव ज्ञाने अप्रामाणिकविषयकल्पनाविश्रान्त्यभावेन चानवस्थितिसाम्यादित्यर्थः ।

अथ कारणमुखीं अनवस्थामाह—लिङ्गमिति । परतस्त्वपक्षे प्रामाण्यस्यानुमितिविषयत्वात् तत्र लिङ्गनिश्चयस्य हेतुत्वात् तस्य तत्प्रामाण्यनिश्चयसापेक्षत्वात् तन्निश्चयार्थमनुमानान्तरमिति रीत्या अनवस्थेत्यर्थः । प्रतिबन्दीमाह-तत्किमिति । अनुपपद्यमानोऽर्थः – ज्ञानमन्तरानुपपद्यमानः ज्ञाततारूपोऽर्थः । स्वोपपादकं—ज्ञानम् । न स्यादिति । तत्राप्यनुपपद्यमानान्तरनिश्चयाधीनस्वप्रामाण्यनिश्चयविषयस्यैव ज्ञातता निश्चयस्याक्षेपकतयानवस्थितिस्तुल्येति भावः । सत्त्वयैवेति । प्रामाण्यनिश्चयान्तरविषयत्वमन्तरेणेत्यर्थः ॥

स्यादेतत्। प्रामाण्यग्रहे सति सर्वमेतदुपपद्यते। स च स्वतो यदि न स्यात्, न स्यादेव, परतःपक्षस्यानवस्थादुःस्थत्वादिति चेत्—न, तदग्रहेऽप्यर्थसन्देहादपि सर्वस्योपपत्तेः। न चानवस्थापि, प्रामाण्यस्यावश्यज्ञेयत्वानभ्युपगमात्। अन्यथा स्वतःपक्षेऽपि सा स्यात्।

ज्ञप्तौ परतस्त्वे अनवस्थायाः परिहारः

लिङ्गं निश्चितमेव निश्चायकम्। ततस्तन्निश्चयार्थमवश्यं लिङ्गान्तरापेक्षायामनवस्थेति चेत्—तत्किमनुपपद्यमानोऽर्थः अनिश्चित एव स्वोपपादकमाक्षिपति; येनानवस्था न स्यात्। प्रत्यक्षेण तस्य निश्चयात्तस्य च सत्तयैव निश्चायकत्वान्नैवमिति चेत्—ममापि प्रत्यक्षेण लिङ्गनिश्चयात् तस्य च सत्तयैव निश्चायकत्वान्नैवमिति तुल्यम्॥

लिङ्गज्ञानस्य प्रामाण्यानिश्चये कथं तन्निश्चयस्स्यादिति चेत्—अनुपपद्यमानार्थज्ञानस्य प्रामाण्यानिश्चये कथं तन्निश्चय इति तुल्यम्। न हि निश्चयेन स्वप्रामाण्यनिश्चयेन वा विषयं निश्चाययति प्रत्यक्षम्; अपि तु स्वसत्तयेत्युक्तमिति चेत्—तुल्यम्॥

कथं तन्निश्चय इति। प्रामाण्यसंशये विषयसंशयादिति भावः। निश्चयेनेति। स्वविषयकेनेत्यर्थः। लिङ्गाभास इति। व्याप्त्यादिरहित इत्यर्थः। तत्र प्रामाण्यनिश्चयापेक्षाप्यावश्यिकीति भावः। अनुपपद्यमान इति। तथाभासमान इत्यर्थः। आभासस्स्यादिति। अन्यथाप्युपपद्यमानस्स्यादित्यर्थः। तत्रापि प्रामाण्यनिश्चयापेक्षणं तुल्यमिति भावः॥

मायालिङ्गिनि परिव्राजकत्वबुद्धिवदाभासेऽप्यनुपपद्यमानेऽर्थेऽनाभासत्वग्रहणात् प्रामाण्याक्षेप इत्याह—सोऽपीति। अनुपपद्यमानार्थोऽपीत्यर्थः। यद्वा सोऽपीति। आभासोऽपीत्यर्थः। सामान्यतः पूर्वमुक्तां फलमुखीमनवस्थां विशेषतः पुनराह—तर्हीति। शङ्केति। लिङ्गाभासत्वशङ्कया अप्रामाण्यशङ्केत्यर्थः। एतदपीति। ज्ञाततानुपपत्त्या प्रामाण्यविशिष्टज्ञानाक्षेपकल्पनमपीत्यर्थः। तादृगेवेति। निष्फलमेवेत्यर्थः। आभासत्वशङ्काधीनाप्रामाण्यशङ्कोदयादिति भावः। नन्वनुपपद्यमानोऽर्थः न जातुचिदप्याभासस्स्यादिति शङ्कते—अनुपपद्यमान इति॥

तथापि यदि, तत् लिङ्गाभासः स्यात् तदा का वार्तेति चेत्—अनुपपद्यमानोऽप्यर्थो यद्याभासः स्यात् तदा का वार्तेति तुल्यम्। सोऽपि प्रामाण्यमाक्षिपतीत्युत्सर्गः। स च क्वचिद्बाधकेनापोद्यत इति चेत्—लिङ्गेऽप्येवमिति तुल्यम्। तर्हि प्रामाण्यानुमानेऽपि शङ्का तदवस्थैवेति निष्फलः प्रयास इति चेत्—एतदपि तादृगेव। अनुपपद्यमानोऽर्थ एवासौ तथाविधः कश्चित् यः स्वप्नेऽपि नाभासः स्यात्। ततो नाऽऽशङ्केति चेत्—लिङ्गेऽप्येवमिति समस्समाधिः।

कः पुनरसावर्थः, यः स्वप्नेऽपि नाभासः स्यात्, यदनुपलम्भे विभ्रमावकाशः, यादृगुपलम्भे च तद्बाधव्यवस्था। अन्यथा हि तथाभूतस्यापि व्यभिचारे सापि न स्यात्। माभूदिति चेत्—न। भवितव्यं हि तत्त्वातत्त्वविभागेन, अन्यथा व्याघातात्। कथं हि नियामकनिःशेषविशेषोपलम्भेऽपि विपरीतारोपः? तथाभावे वा तदतिरिक्तविशेषानुपलम्भे कथं बाधकम्? तदभावे त्वबाधस्य कथं भ्रान्तत्वमिति ॥

अनाभासं निरूपयति—यदनुपलम्भ इति। शुक्तित्वाद्यसाधारणाकारानुपलम्भ इत्यर्थः। विभ्रमावकाश इति। रजतत्वादिभ्रमावकाश इत्यर्थः। यादृगुपलम्भ इति। विशेषरूपेण तदुपलम्भस्यैव भ्रमबाधकत्वं, न तु स्वरूपेणेति दर्शयितुं यदुपलम्भ इत्यनुक्त्वा यादृगुपलम्भ इत्युक्तम्। तद्बाधेति। रजतत्वादिबाधेत्यर्थः। अन्यथा हीत्यस्यैव व्यभिचार इत्यन्तं विवरणम्। तथाभूतस्यासाधारणशुक्तित्वादेः तदुपलम्भस्य वा व्यभिचारे रजतत्वादिबाधकत्वानियतोपलम्भकत्वे बाधकत्वानियमे वा। साऽपि बाधव्यवस्थापि। तत्त्वातत्त्वेति। बाध्यमतत्त्वं अन्यत्तत्त्वमिति हि विभजनीयमिति भावः। व्याघातमुपपादयति—कथं हीति। इतरव्यावर्तकाखिलाकारोपलम्भेऽपि विपरीतारोपः तं प्रति तस्यैवोपलम्भस्य बाधकभावः, अबाधकत्वे त्वबाधितस्य भ्रान्तत्ववादश्च व्याहत इति भावः॥

अस्त्वेवं परतस्त्वं अन्यत्र, वेदे तु नैवमित्याह—स्यादेतदिति। अनपेक्षत्वमिति। वक्तुरभावान्न गुणाधीनं प्रामाण्यमिति भावः। ज्ञप्तावप्याप्तोक्तत्वज्ञाननिरपेक्षत्वमाह—महाजनपरिग्रहादिति। ज्ञायत इति शेषः। उभयस्येति। वेदनित्यत्वस्य महाजनपरिग्रहस्य चेत्यर्थः। असिद्धेरिति। सर्गप्रलयसंभवादिति भावः॥

स्यादेतत्—परतः प्रामाण्येऽपि नित्यत्वाद्वेदानामनपेक्षत्वम्; महाजनपरिग्रहाच्च प्रामाण्यमिति को विरोधः? न, उभयस्याप्यसिद्धेः ॥

वर्णनित्यत्वसाधनम्

न हि वर्णा एव तावन्नित्याः। तथा हि—'इदानीं श्रुतपूर्वो गकारो नास्ति' 'निवृत्तः कोलाहल' इति प्रत्यक्षेणैव शब्दध्वंसः प्रतीयते। न हि शब्द एवान्यत्र गतः, अमूर्तत्वात्। नाप्यावृतः तत एव सम्बन्धविच्छेदानुपपत्तेः। नाप्यनवहितः श्रोता; अवधानेऽप्यनुपलब्धेः। नापीन्द्रियं दुष्टम्; शब्दान्तरोपलब्धेः। नापि सहकार्यन्तराभावः; अन्वयव्यतिरेकवतः तस्यासिद्धेः। नाप्यतीन्द्रियम्, तत्कल्पनायां प्रमाणाभावात्। अन्यथा घटादावपि तत्कल्पनाप्रसङ्गात्। न च शब्दनित्यत्वसिद्धौ तत्कल्पनेति युक्तम्, निराकरिष्यमाणत्वात् ॥

कोलाहलः—अनभिव्यक्तवर्णत्वव्याप्यजातिविशेषः वर्णसमुदायः। अमूर्तत्वादिति। अक्रियत्वादित्यर्थः। भट्टमते विभुत्वाभ्युपगमाच्चेति भावः। आवृत इति। आवरणं—इन्द्रियसम्बन्धविच्छेदः। तत एवेति। अमूर्तत्वादेव। क्रियारहितत्वादेव। विभुत्वादेवेत्यर्थः। आकाशगुणत्वाङ्गीकारे श्रोत्रसमवायस्यापि नित्यत्वेन विच्छेदानुपपत्तिरिति भावः। तत्कल्पनाप्रसङ्गादिति—अतीन्द्रियसहकारिकल्पनाप्रसङ्गादित्यर्थः। उपलम्भव्यवस्थाया अतीन्द्रियसहकारिनिबन्धनत्वमुपगम्य घटादिनित्यत्वकल्पनापत्तेरिति भावः। ननु सिद्धे नित्यत्वे व्यवस्थापकं कल्प्यम्; न त्वसिद्ध इति नातिप्रसङ्ग इति शङ्कते—न चेति। निराकरिष्यमाणत्वादिति। शब्दनित्यत्वस्येत्यादिः। ततश्च शब्दघटयोः नित्यत्वासिद्धौ न कश्चिद्विशेषः। नैवमिच्छन्तीति। वर्णध्वंसः प्रत्यक्ष इति नेच्छन्तीत्यर्थः। उपाध्युद्भावनमिति। इन्द्रियसन्निकृष्टत्वं ऐन्द्रियकाधिकरणत्वं च उपाधिस्स्यादिति भावः। सत्प्रतिपक्षत्वमिति। तद्व्यापकाभावस्य तदभावव्याप्यत्वादिति भावः। इन्द्रियसन्निकर्षस्य उपाधित्वं निराकरोति—न प्रथम इति। स्वरूपयोग्यतां प्रति—इन्द्रियजन्यप्रत्यक्षयोग्यतारूपसाध्यं प्रति। सहकारियोग्यतायाः—सन्निकर्षरूपसहकारियोग्यतायाः। अनुपाधित्वादिति। साध्याव्यापकत्वादिति भावः। तस्याः—स्वरूपयोग्यतायाः। तां—सहकारियोग्यताम्। स्वरूपयोग्यतायाः सर्वदा सत्त्वेऽपि आगन्तुकसहकारियोग्यतासापेक्षत्वेन सहकारियोग्यतायाः न व्यापकत्वं इति भावः। यद्वा, तस्याः—सहकारियोग्यतायाः। तां—स्वरूपयोग्यताम्। अपेक्ष्यैवेति। सन्निकृष्टस्यापि रसादेः

शब्दध्वंसस्य इन्द्रियग्राह्यत्वम्

ये त्वेकदेशिनो नैवमिच्छन्ति तान् प्रत्युच्यते- विवादाध्यासितः शब्दप्रध्वंस इन्द्रियग्राह्यः ऐन्द्रियकाभावत्वात् घटाभाववत्। नैतदेवम्; इन्द्रियासन्निकृष्टत्वादतीन्द्रियाधारत्वाद्वेति चेत्—न। इदं ह्युपाध्युद्भावनं वा स्यात्, व्यापकानुपलब्ध्या सत्प्रतिपक्षत्वं वा। न प्रथमः, स्वरूपयोग्यतां प्रति सहकारियोग्यताया अनुपाधित्वात्। तस्यास्तामपेक्ष्यैव सर्वदा व्यवस्थितेः। नाप्यैन्द्रियकाधारत्वप्रयुक्तमभावस्य प्रत्यक्षत्वम्, धर्माद्यभावस्यापि तथात्वप्रसङ्गात्। अत एव नोभयप्रयुक्तम्॥

शब्दध्वंसस्यैन्द्रियग्राह्यत्वानुमाने सत्प्रतिपक्षनिरासः

नापि द्वितीयः। प्रथमस्यासिद्धेः। अस्ति हि श्रोत्रशब्दाभावयोः स्वाभाविको विशेषणविशेष्यभावः। विशेष्यस्यातीन्द्रियत्वात्कथमैन्द्रियिकविशिष्टज्ञानविषयत्वम्? तथा

चाक्षुषाजननादिति भावः। अभयथापि स्वरूपयोग्यतायाः सहकारियोग्यतां प्रति अनियतत्वावगतेः नोपाधिर्व्यापक इत्युपपादितम्। अथवा वर्णध्वंसस्य ऐन्द्रियकाभावत्वं प्रत्यक्षे स्वरूपयोग्यता। तस्याः इन्द्रियसन्निकर्षरूपसहकारियोग्यतामपेक्ष्यैव सर्वदाऽवस्थितेः सहकारियोग्यतारूपोपाधेः ऐन्द्रियकाभावरूपसाधनं प्रति व्यापकतया साधनाव्यापकत्वं न सम्भवतीति भावः। ऐन्द्रियकाधारत्वस्योपाधित्वं निराकरोति—नापीति। धर्माद्यभावस्यापीति। समव्याप्तस्योपाधित्वमित्याशयेनेदम्। अन्यथा व्यणुकात्मादौ व्यापकत्वभङ्ग उद्भावनीयः। अत एवेति। धर्माद्यभावस्य प्रत्यक्षत्वापत्तेरेवेत्यर्थः। आत्मद्वारा इन्द्रियसन्निकर्षस्यापि सत्त्वादिति भावः॥

सत्प्रतिपक्षत्वं निराकरोति—नापि द्वितीय इति। प्रथमस्येन्द्रियासन्निकृष्टत्वस्य। विशेषणतारूपसन्निकर्षः प्रकारतारूप एवत्याशयेन शङ्कते—विशेष्यस्येति। श्रोत्रात्मकाकाशस्येत्यर्थः। विशेषणतात्मा सन्निकर्षः प्रकारता च मिथो भिन्नैवेति समाधत्ते—नेति। आत्माश्रयमुपपादयति—विशेषणभावेनेति। विशेषणताख्यसन्निकर्षेणेत्यर्थः। ग्रहणं—भानम्, प्रकारतेति यावत्। तत्किं तर्हीत्यत्राह—तस्मादिति। तदुपश्लिष्टस्वभावत्वमिति। स्वरूपसंबन्ध एव विशेषणतेति भावः। मिलितत्वादिति। ध्वंसप्रागभावयोः प्रतियोग्यधिकरणवृत्तित्वादिति भावः॥

ननु तर्हि विशेषणतया घटाभावादिविशिष्टभूतलादेरिव शब्दाभावविशिष्टश्रोत्रस्यापि प्रत्यक्षं स्यादिति चोदयति—तथापीति। तया—विशेषणतया। तथा – विशेष्यविशेषणतया। प्रतीतिः

विशेष्यमव्यवस्थापयतश्च कथं विशेषणत्वमिति चेत्—न ; तथा विशेष्यव्यवस्थापनायाः फलत्वात् । न तु तदेव विशेषणत्वम् । आत्माश्रयप्रसङ्गात् । विशेषणभावेन समवायाभावयोर्ग्रहणं, तथा ग्रहणमेव च विशेषणत्वमिति । तस्मात् संबन्धान्तरमन्तरेण तदुपश्लिस्वष्टभावत्वमेव हि तयोः । सैव च विशिष्टप्रत्ययजननयोग्यता विशेषणतेत्युच्यते । सा चात्र दुर्निवारा । प्रतियोग्यधिकरणेन स्वभावत एवाभावस्य मिलितत्वात् ॥

तथापि तया तथैव प्रतीतिः कर्तव्येति चेत्—न । गृह्यमाणविशेष्यत्वावच्छिन्नत्वात् व्याप्तेः । अन्यथा संयुक्तसमवायेन रूपादौ विशिष्टविकल्पधीजननदर्शनाद्गन्धादावपि तथात्वप्रसङ्गात् ॥

विशेषणविशिष्टविशेष्यविषयिणीति भावः । गृह्यमाणेति । योग्येत्यर्थः । व्याप्तेरिति । योग्यविशेष्यविशेषणताया एव विशेषणविशिष्टविशेष्यप्रत्यक्षहेतुत्वनियम इति भावः । अन्यथा—विषययोग्यताया अतन्त्रत्वे । विशिष्टविकल्पधीरिति । रूपवान् घट इति विशिष्टविषयकसविकल्पचाक्षुषमित्यर्थः । गन्धादावपीति । चक्षुस्संयुक्तसमवायसत्त्वेन गन्धवान् घट इति चाक्षुषप्रसङ्गः अयोग्यत्वादेव हि वारणीय इति भावः । अत्र संयुक्तसमवायाधीनघटादिस्पर्शप्रत्यक्षस्याश्रयविषयकत्वात् वायवीयस्पर्शप्रत्यक्षस्यापि तथात्वप्रसङ्गश्च भाव्यः ॥

अथेन्द्रियविशेषणतायाः सन्निकर्षत्वमाक्षिपति—तथापीति । घटाभावादेः इन्द्रियसंबद्धभूतलादिविशेषणत्वादिति भावः । प्रतिबन्धस्य व्याप्तेः । इन्द्रियसम्बद्धविशेषणतायाः इन्द्रियसन्निकृष्टानुयोगिकाभावप्रत्यक्षं प्रत्येव कारणतानियम इति भावः । अन्यथा-प्रतिसंबन्धिभेदेन सन्निकर्षभेदानुपगमे । दर्शनाभावमात्रेण साक्षात्सम्बन्धस्यानादरे वा । द्वितीयं सत्प्रतिपक्षं निरस्यति-नापीति । शब्दे व्यभिचारवारणायाभावत्वे सतीति । अतीन्द्रियाधारत्वादिति । द्रव्याधिकरणत्वाभावादित्यर्थः । तेन जलत्वाभावादौ न व्यभिचारः । प्रत्यनुमाने उपाधिमाह—योग्यताविरहेति । ततः न समानबलत्वमिति भावः । हेतूपाध्योरैक्यशङ्कां निराकरोति-न चेति । द्वयमपीति । प्रकृते योग्यताविरहस्य निरुक्तोभयाभावात्मकस्य प्रत्येकाभावव्यापकत्वेन द्रव्याधारकत्वाभावरूपसाधनाव्यापकत्वासंभवान्नोपाधित्वमिति भावः । उभयनिरूपणीयत्वेति । उभयोपलम्भाधीनोपलम्भविषयत्वेत्यर्थः ॥

तथाऽपि नेन्द्रियविशेषणतया कस्यचिद्‌ग्रहणं दृष्टम्; अपि त्विन्द्रियसम्बद्धविशेषणतया; सा चातो निवर्तत इति चेत्—न। अस्य प्रतिबन्धस्येन्द्रियसन्निकृष्टार्थप्रतिसंबन्धितया; सा चातो निवर्तत इति चेत्—न। अस्य प्रतिबन्धस्येन्द्रियसन्निकृष्टार्थप्रतिसंबन्धिविषयत्वात्। अन्यथा संयुक्तसमवायेन गन्धाद्युपलब्धिदर्शनात् समवायेनादर्शनाच्छब्दस्याग्रहणप्रसङ्गात्॥

नाप्यभावत्वे सति अतीन्द्रियाधारत्वात्तत्प्रतिपक्षत्वम्; योग्यताविरहप्रयुक्तत्वाद्व्याप्तेः। न चातीन्द्रियाधारत्वमेव तस्य योग्यताविरहः; तद्विपर्ययस्यैव योग्यतात्वापत्तेः। न चैवमेव; धर्मादिप्रध्वंसग्रहणप्रसङ्गात्। दृश्याधारत्वं दृश्यप्रतियोगिता चेति द्वयमप्यस्य योग्यतेति चेत्-न, उभयनिरूपणीयत्वनियमानभ्युपगमात्। प्रतियोगिमात्रनिरूपणीयो ह्यभावः।

अन्यथा 'इह भूतले घटो नास्ती' त्येषाऽपि प्रतीतिः प्रत्यक्षा न स्यात्। संयोगो ह्यत्र निषिध्यते। तदभावश्च भूतलवत् घटेऽपि वर्तते। तत्र यदि प्रत्यक्षतया भूतलस्योपयोगः, घटस्यापि तथैव स्यात्। अविशेषात्। अथ घटस्यान्यथोपयोगः, भूतलस्याप्यन्यथैव स्यात्। अविशेषात्। कथमन्यथेति चेत्—प्रतियोगिनिरूपणार्थमभावसन्निकर्षार्थं च।

अन्यथेति। आधारनिरूप्यत्व इत्यर्थः। भूतलस्य दृश्यत्वात् कथमनुपपत्तिरित्यत्राह—संयोगो हीति। तत्र घटस्य कदाचित्सत्त्वेनात्यन्ताभावस्य प्रतियोगिसमानकालत्वेन प्रागभावध्वंसयोश्चासम्भवात्। संयोगस्य तु तत्र भूतस्य भाविनः कदाप्यभवतश्च ध्वंसप्रागभावात्यन्ताभावानां अन्यतमसंभवादिति भावः। आधारत्वाविशेषे सति निरुक्ताभावोपलम्भं प्रति भूतलस्य प्रत्यक्षतया उपयोगः घटस्य त्वन्यथेति विशेषो दुर्वच इत्याह—तत्र यदीति। घटस्यापि तथैवेति। प्रत्यक्षतयेत्यर्थः। घटानुपलम्भदशायां उक्ताभावप्रत्युक्षानुपपत्तिरिति भावः। प्रतियोगिनिरूपणार्थ-प्रतियोगिज्ञानार्थम्। अभावसन्निकर्षार्थमिति। अभावस्य इन्द्रियेण सन्निकर्षसम्पादनायेत्यर्थः। अनुपलभ्यमानेनापीति। प्रत्यक्षाविषयेणापीत्यर्थः। एतावता अधिकरणप्रत्यक्षस्य साक्षाद्वा प्रतियोगिज्ञानसंपादनद्वारेण वा न प्रकृताभावोपलम्भं प्रति अवश्यापेक्षितत्वं वक्तुं युक्तमित्युक्तम्। सन्निकर्षार्थमप्यनपेक्षा वक्ष्यते। अतः दृश्याधारत्वं न योग्यताघटकमिति लभ्यते। कथं तर्हि जलपरमाणौ पृथिवीत्वाभावस्य न प्रत्यक्षम्? प्रतियोगिसत्त्वविरोधिनः अनुपलब्धिरूपहेतोरभावात्, तत्सत्त्वादेव वायौ रूपाभावस्य प्रत्यक्षं रूपसत्त्वे तदनुपलब्धेः विरोधात्। एवं संयोगशब्दाभावप्रत्यक्षादावप्यूह्यम्।

तत्र प्रतियोगिनिरूपणं स्मरणलक्षणमनुपलभ्यमानेनापीति, न तदर्थमध्यक्षगोचरत्वमपेक्षणीयमन्यतरस्यापि ; कुत उभयस्य । सन्निकर्षस्तु भूतलघटसंयोगाभावस्येन्द्रियेण साक्षान्नास्ति । येनास्ति, तेनापि यदीन्द्रियं न सन्निकृष्येत, कथमिव तं गमयेत् । न चोपलब्धोपलभ्यमानाभ्यामेवेन्द्रियं सन्निकृष्यते ; इतरेतराश्रयप्रसङ्गात् ॥

अभावप्रत्यक्षे प्रतियोगियोग्यतैव तन्त्रम्

तस्मात्सन्निकर्षे सति योग्यत्वाद्भूतलमप्युपलभ्यते ; न तु तस्योपलभ्यमानत्वमभावोपलब्धेरङ्गमिति युक्तमुत्पश्यामः । प्रकृते तु न प्रतियोगिनिरूपणार्थं तदुपयोगः । तस्य संयोगवत् आधारानिरूप्यत्वात् । नापि सन्निकर्षार्थम् । तदभावस्य साक्षादिन्द्रियसन्निकर्षादिति ॥

उभयस्य—घटभूतलात्मकोभयस्य । सन्निकर्षार्थमप्यध्यक्षगोचरत्वं नापेक्षणीयमित्युपपादयितुमाह—सन्निकर्षस्त्विति । येन भूतलेन अस्ति अभावस्य सन्निकर्ष इति भावः । तं—अभावम् । गमयेत्—स्वजन्यप्रत्यक्षगोचरीकुर्यात् । तथा चाभावसन्निकर्षार्थं अधिकरणस्य सन्निकर्ष एव आवश्यकः, न तूपलम्भोऽपीत्याशयः । पूर्वं तदानीं वा उपलब्धिविषयेणैव सन्निकर्ष इति शङ्कां निराकरोति—न चेति । सन्निकर्षे उपलब्धिः उपलब्धे सन्निकर्ष इत्यन्योन्याश्रय इति भावः ॥

कथं तर्हि घटाभावाद्युपलब्धौ भूतलाद्युपलब्धिरित्यत्राह—योग्यत्वादिति । आकाशस्य तु शब्दाभावोपलम्भे गन्धतदभावाद्युपलब्धौ आश्रयस्येव सन्निकर्षसत्त्वेऽपि अयोग्यत्वेन न ग्रहणमिति सन्निकर्षासत्त्वे किमुतेति भावः । प्रकृते त्विति । शब्दाभावोपलम्भविषये त्वित्यर्थः । तदुपयोगः—आश्रयग्रहणोपयोगः संयोगवदिति व्यतिरेकदृष्टान्तः । आधारनिरूप्यविषयेऽप्याधाराध्यक्षमनपेक्षणीयमित्युक्तत्वात् वस्तुगतिमनुरुध्येदम् । वस्तुतस्त्वाधारस्य प्रकृते ग्रहणसामान्यमप्यनपेक्षितमिति घटादितः विशेषः निरूप्यते । भूतलादितोऽपि विशेषमाह—नापीति । तथा चाकाशादेः अयोग्यता न शब्दाद्यभावयोग्यतापरिपन्थिनीति भावः । साक्षादिति । अधिकरणान्तराघटिताया इन्द्रियविशेषणताया एव तत्र सन्निकर्षत्वादित्यर्थः । साक्षात्सन्निकर्षाभाव एव हि परम्पराश्रयणमिति भावः । तथाप्ययोग्यत्वेनोपलम्भ इति प्रागुक्तम् ।

शब्दध्वंसस्यानुमेयत्वनिरासः

न चेदेवम् । कुत एषा प्रतीतिः, इदानीं श्रुतपूर्वः शब्दो नास्तीति ? 'अनुमानादि'ति चेत्—न, शब्दस्यैव पक्षीकरणे हेतोरनाश्रयत्वात् । अनित्यत्वमात्रसाधनेऽभावस्य नियतकालत्वासिद्धेः । आकाशस्य पक्षत्वे तद्वृत्तयाऽनुपलभ्यमानत्वस्य हेतोरनैकान्तिकत्वात् । शब्दसद्भावकालेऽपि तस्य सत्त्वात् । एवं कालपक्षेऽपि दोषात् ॥

अहमिदानीं निःशब्दश्रोत्रवान् शब्दोपलब्धिरहितत्वात् बधिरवदिति चेत्—न । दृष्टान्तस्य साध्यविकलत्वात्, व्याहतत्वाच्च । बधिरश्च श्रोत्रवांश्चेति व्याहतम् । तस्यापि च श्रवसो निश्शब्दत्वे प्रमाणं नास्ति । अनुपभोग्यस्योत्पादवैयर्थ्यं प्रमाणमिति चेत्—न । आद्यादिशब्दवदुपपत्तेः । तेषां शब्दान्तरारम्भं प्रत्युपयोगः, अन्त्यस्य न तथेति चेत्—न । अन्त्यत्वासिद्धेः । सर्वेषां चोत्पादवतां प्रयोजनतदभावयोरस्मादृशैरनाकलनात्, सुषुप्त्यवस्थायां

न चेदेवमिति । प्रतियोगियोग्यतामात्रस्याभावयोग्यतानियामकत्वाभाव इत्यर्थः । शब्दस्यैवेति । शब्दः वर्तमानस्वध्वंसवान् अनुपलभ्यमानत्वादिति प्रयोगो भाव्यः । हेतोरनाश्रयत्वादिति । अनुपलभ्यमानत्वहेतोः शब्दसत्ताकाले अनाश्रयत्वात् आश्रयासंबन्धित्वात् स्वरूपासिद्धिः । शब्दाभावकाले पक्षस्यैवाभावेनाश्रयासिद्धिः । शब्दस्य कदाचिदपि स्वध्वंसवत्त्वाभावेन बाधश्चेति भावः । अनित्यत्वेति । नाशप्रतियोगित्वेत्यर्थः । साधन इति । जन्यत्वादिनेति भावः । नियतेति । इदानीन्तनत्वासिद्धेरर्थान्तरं स्यादिति भावः । अनैकान्तिकत्वादिति । शब्दसत्तादशायामपि आकाशस्यानुपलब्धेरिति भावः । तदुपपादयति—शब्देति । तस्य—हेतोः । दोषादिति—पूर्वोक्तरीत्यानैकान्त्यादित्यर्थः ॥

आत्मपक्षकानुमानमाह—अहमिति । व्याहतिं निरूपयति—बधिरश्चेति । शब्दोपलम्भकशक्तिविशिष्टकर्णशष्कुल्यवच्छिन्नाकाश एव श्रोत्रमिति भावः । शक्तिविशेषः शब्दोपलम्भे सहकारी, न तु तद्घटितं श्रोत्रमिति वादिनां मते साध्यवैकल्यं निरूपयति—तस्यापीति । तस्य पश्चात् (पृष्ठतः) अवस्थितस्यापि श्रुतिमतः शब्दोपलम्भदर्शनादिति भावः । साक्षादनुपभोग्यत्वस्य हेतुत्वे अनैकान्तिकत्वमाह—आद्यादीति । वीचीतरङ्गन्यायेन कर्णदेशे उत्पन्नस्यैव उपभोगादिति भावः । अन्त्यत्वासिद्धेरिति । बधिरकर्णोत्पन्नशब्दस्येत्यादिः । तद्व्यवहितदेशस्थितस्यापि शब्दानुभवादिति भावः । तथा च परम्परयापि उपभोगोपयोगित्वाभावरूपहेतोरसिद्धिरिति भावः । उत्पत्तिमत्त्वस्य प्रयोजनवत्त्वनियतत्वेनोत्पत्तिमत्त्वे सामान्यतः प्रयोजनवत्त्वावगमसंभवात् प्रयोजनविशेषानवधारणमात्रात् उत्पत्तिमत्त्वं

श्वासप्रश्वासप्रयोजनवच्च तदुपपत्तेः । आरम्भे सति प्रयोजनमवश्यमिति व्याप्तेः । न त्वापाततः प्रयोजनानुपलम्भमात्रेणारम्भनिवृत्तिः, तथा सति कर्णशष्कुल्यवच्छेदोत्पाद एव नभसस्त प्रति निवर्तेत; बधिरस्य तेनानुपयोगात् । विवादकाले बधिरकर्णः शब्दवान् योग्यदेशस्थानावृतकर्णशष्कुलीसुषिरत्वात् तदितरकर्णशष्कुलीसुषिरवदिति ॥

निश्शब्दाः पणववीणावेणवः तदेकज्ञानसंसर्गयोग्यत्वे सति तदनुपलम्भेऽप्युपलभ्यमानत्वात् । यत् यदेकज्ञानसंसर्गयोग्यं तस्यानुपलम्भेऽप्युपलभ्यते तत् तदभाववत् । यथाऽघटं भूतलमिति चेत्—न । एकज्ञानसंसर्गयोग्यत्वाभावात्, शब्दस्य श्रौत्रत्वात्, वीणादीनां चाक्षुषत्वात् । अभिमानमात्रादिति चेत्—न, तथाऽपि शब्दप्रध्वंसस्यातद्देशत्वात्, अत्यन्ताभावस्य च कालानियमात् ।

स्यादेतत्—शब्दवदाकाशोपाधयो हि भेर्यादयः । तेन तेषु विधीयमानः शब्दः आकाश एव विहितो भवति, प्रतिषिध्यमानश्च तत्रैव प्रतिषिद्धो भवति, शरीरे सुखादिवत्

नापह्नोतुं युक्तमित्याह —सर्वेषां चेत्यादिना । अन्यथा दृष्टमपि नोपपद्येतेत्याह—तथा सतीति । बधिरकर्णे शब्दसत्त्वे अनुमानमप्यस्तीत्याह—विवादकाल इति । तद्देशस्थितस्यान्यस्य शब्दोपलम्भकाल इत्यर्थः । योग्यदेशस्थेति । शब्दोत्पत्तियोग्यदेशस्थेत्यर्थः ॥

अथ शब्दाभावानुमानं धर्म्यन्तरपक्षकं आशङ्कते—निश्शब्दा इति । तदेकेति । तदेकज्ञानविषयत्वयोग्यत्वे सतीत्यर्थकम् । रसवत्फले व्यभिचारवारणाय विशेषणम् । हेतुरसिद्ध इति दूषयति—नेति । शब्दग्रहणे पणवादेरप्युपनीतभानसंभवान्न हेत्वसिद्धिरित्याह —अभिमानेति । लौकिकमिवालौकिकमपि भानमुक्तार्थसाधनौपयिकमित्यभिमान इति भावः । ध्वंसः अत्यन्ताभावो वा साध्यत इति विकल्प्य दूषयति—तथापीति । अतद्देशत्वादिति । प्रतियोग्यधिकरणवृत्तित्वादिति भावः । कालानियमादिति । शब्दसद्भावकालेऽप्याकाशभिन्ने सत्त्वादिति भावः । तथा चाद्ये बाधः, अन्त्ये सिद्धसाधनमित्युक्तं भवति ।

ननु नायं दोषः अवच्छेदके विधिनिषेधधियः अवच्छिन्ने विधिनिषेधगोचरत्वनियमादिति शङ्कते—स्यादेतदिति । किमवच्छिन्नं पक्षीक्रियते, अवच्छेदकं वा इति विकल्प्य दूषयति—नेति ।

इति चेत्—न, तत्र सोपाधावात्मनि प्रत्यक्षसिद्धे सुखादिनिषेधस्यापि प्रत्यक्षसिद्धत्वात्। न चैवमिहापि, तदुपहितस्य नभसोऽप्रत्यक्षत्वात्। उपाधयस्तावत् प्रत्यक्षा इति चेत्—न। तैरभावानिरूपणात्। निरूपणे वा प्रत्यक्षेणापि ग्रहणप्रसङ्गात्। न चैवं सति पारमार्थिकाधिकरणनिरूपणीयत्वमभावस्य। न च तेऽपि प्रत्यक्षसिद्धाः सर्वत्र; शब्दकारणव्यवधानेऽप्युपलब्धस्य शब्दस्य नास्तिताप्रतीतेः। आनुमानिकैस्तैस्तथा व्यवहार इति चेत्—न। हेतोस्तद्वत्तयानुपलभ्यमानत्वस्यानैकान्तिकत्वात्; अभावप्रतीतिकाले सन्दिग्धाश्रयत्वाच्च। उपलभ्यमानविशेष्यत्वपक्षे चासिद्धेः, इन्द्रियव्यवधानात्, शब्दलिङ्गस्य चानुपलम्भात्॥

अपि च नष्टाश्रयाणां द्रव्यगुणकर्मणां नाशोपलम्भः कथम्? न कथञ्चिदिति चेत्—आश्रयनाशात्कार्यनाश इति कुत एतत्? अनुमानतस्तथोपलम्भादिति चेत्—न। तुल्यन्याये-

---

आद्ये दृष्टान्तवैषम्यमाह—सोपाधाविति। दृश्याधारत्वं तत्रास्तीति भावः। न तत्प्रकृत इत्याह—न चैवमिति। तथा च प्रत्यक्षयोग्यस्थल एव पूर्वोक्तनियम इति भावः। अप्रत्यक्षत्वादिति। नभसः पक्षत्वे उपलभ्यमानत्वरूपप्रकृतहेतोरसिद्धिरिति च भावः। द्वितीयमनूद्य निरस्यति—उपाधय इत्यादिना। अभावानिरूपणादिति। भवता आधारनिरूप्यत्वस्यैवोपगमादिति भावः। तेषामप्यवच्छेदकतासंबन्धेनाधारत्वात् तैर्निरूपणं स्यादित्यत आह—निरूपणे वेति। प्रत्यक्षेणापीति। दृश्याधारत्वस्यापि सत्त्वात् प्रत्यक्षत्वविवादस्याप्युपरमः स्यादिति भावः। दूषणान्तरमप्याह—न चैवमिति। पारमार्थिकाधिकरणं मुख्याधिकरणं स्वरूपसंबन्धेनाधिकरणमिति यावत्। मुख्यामुख्यसाधारणाधिकरणनिरूप्यत्वमेवेष्यत इत्यत आह—न चेति। सर्वत्रेति। भित्त्यादिना व्यवधाने इति भावः। शब्दकारणं वाय्वादि। नास्तिताप्रतीतेरिति। शब्दोपरम इति भावः। अनैकान्तिकत्वादिति। शब्दसत्ताकालेऽपि व्यवहितभेर्यादेरप्रत्यक्षत्वादिति भावः। शब्दाभावकालावच्छिन्नत्वस्य हेतुविशेषणत्वादुक्तदोषवारणे दोषान्तरमाह—सन्दिग्धेति। शब्दाभावकाले व्यवहितभेर्यादिनाशसन्देहेन तत्र शब्दाभावानुमितिः न संभवतीति भावः। तद्वत्तयानुपलभ्यमानत्वे सत्युपलभ्यमानत्वादिति हेतुपूरणे दोषमाह—असिद्धेरिति। तामुपपादयति—इन्द्रियेति। शब्दरूपं लिङ्गं शब्दलिङ्गं एवमभावमात्रस्यानुमानसंभवादप्रत्यक्षत्वापत्तिरित्यपि दूषणं बोध्यम्॥

प्रतियोग्यधिकरणेनैव ध्वंसादिनिरूपणनियमोपगमेऽनुपपत्तिमाह—अपि चेति। नष्टाश्रयाणामिति। तन्त्वादिनाशात्पटादिनाशे तदुपलम्भो न स्यात्। आश्रयस्यापि नाशादिति भावः। तुल्य-

नोक्तोत्तरत्वात् । तन्तुषु नष्टेष्वपि यदि पटो, न नश्येत् तद्वदेवोपलभ्येतेति चेत्—एतस्य तर्कस्यानुग्राह्यमभिधीयताम् ॥

यदत्रोपलभ्यते न तत् कार्यपरम्परावत्, योग्यस्य तथानुपलभ्यमानत्वे सत्युपलभ्यमानत्वादिति चेत्—न । तन्त्ववयवानां पटानाधारत्वे साध्ये सिद्धसाधनात् । पटप्रध्वंसवत्त्वे साध्ये बाधितत्वात् तस्य स्वप्रतियोगिकारणमात्रदेशत्वात् ॥

ये पटध्वंसवन्तस्तन्तवः; तदभाववन्त एते अंशवः इति साध्यमिति चेत् - न । तन्तुनाशोत्तरकालं पटनाशात्तद्वृत्तानुपपत्तेः योग्यतामात्रसाधने च पटप्रध्वंसासिद्धेः; तस्य नाशानाशयोः समानत्वात् ॥

अनन्यगतिकतया विशिष्टनिषेधे कृते विशेषणानामप्यभावः प्रतीतो भवति; गुणक्रियावत्पटाधारास्तन्तवो न सन्ति स्वावयवेष्विति हि प्रत्यय इति चेत्—तथाऽपि गुणकर्मणां पटस्य च प्रध्वंसः किमधिकरणः प्रतीयत इति वक्तव्यम् । अंश्वधिकरण एवेति चेत्—भ्रान्तिस्तर्हीयम्; तस्यातद्देशत्वात् । आश्रयावच्छेदकतया तेषामप्यदूरविप्रकर्षेण तद्देशत्वं

न्यायेनेति । शब्दादिपक्षकानुमानोक्तरीत्या पटतदवयवादिपक्षीकरणे बाधाश्रयासिद्ध्यादेः तदवस्थत्वादिति भावः । अनुग्राह्यमिति । तर्कस्य प्रमाणानुग्राहकत्वात् अनुपलब्धेः प्रमाणान्तरत्वानुपगमाच्चेति भावः । अनुग्राह्यमनुमानमाह—यदत्रेति । तन्त्ववयवादिर्यत्पदार्थः । कार्यपरम्परा—तन्तुपटादिरूपा । सिद्धसाधनादिना दूषयति—नेति । उक्तबाधपरिहारायानुमानान्तरमाह—य इति । अंशवः—तन्त्ववयवाः । प्रकारान्तरेण बाधमाह—तन्तुनाशेति । तस्य—योग्यतामात्रस्य । समानत्वादिति । पटसत्त्वेऽपि पटध्वंसाधिकरणत्वयोग्यतायास्तन्तुषु सत्त्वादिति भावः । विशेषणानामपीति । प्रमाणान्तरेण विशेषणसद्भावनिश्चये सत्येव विशेष्याभावमात्रप्रतीतिरिति भावः । उक्तविशिष्टाभावप्रतीत्या विशेषणपटाद्यभावसिद्ध्युपगमेऽपि न भवदभिमतं प्रतियोग्यधिकरणेनाभावनिरूपणं सुवचमिति दूषयति—तथाऽपीति ।

अयं भावः । सर्वत्रैकरूप्येण संप्रतिपन्नाधिकरणनिरूप्यत्वस्य वक्तुमशक्यत्वात् संसर्गाभावसामान्यग्रहणे नाधिकरणयोग्यत्वं तन्त्रम्, किन्तु प्रतियोगियोग्यतामात्रमपेक्षितमित्येव युक्तमिति । अन्योन्याभावग्रहणे तु प्रतियोगियोग्यतां विना अधिकरणयोग्यतैवापेक्षिता । अत एव स्तम्भः पिशाचो नेति प्रत्यक्षम् । प्रतियोगिसत्त्वविरोधिन्या अनुपलब्धेरेव तद्धेतुत्वात् । यदि हि स्तम्भः पिशाचः

एवम्भूतेनापि देशेन, तन्निरूपणम्। योग्यताया अव्यभिचारादिति चेत्—न तर्हि प्रतियोगिसमवायिदेशेनैव प्रध्वंसनिरूपणमिति नियमः, प्रकारान्तरेणापि निरूपणात् ॥

तस्मात् यस्य यावती ग्रहणसामग्री, तं विहाय तस्यां सत्यां तदभावो यत्र क्वचिन्निरूप्यो देशे काले वा। इयांस्तु विशेषः—सा सती चेत् प्रत्यक्षेण। असत्येव ज्ञाता चेत् अनुमानादिनेति स्थितिः ॥

सङ्ख्यामभावो निरूप्यत इति वचनस्य तात्पर्यम्

एतेन 'सङ्ख्यामभावो निरूप्यते' इत्यादिशास्त्रविरोधः परिहृतो वेदितव्यः, उभयनिरूपणीयप्रतियोगिविषयत्वात् अनुमानविषयत्वाच्च। अन्यथा आश्रयासिद्धिप्रसङ्गात्। तत्रापि न ग्रहणे नियमः, ज्ञानमात्रं तु विवक्षितम्; तावन्मात्रस्यैव तदुपयोगात्। क्वचित् ग्रहणस्य सामग्रीसम्पातायातत्वात् ॥

स्यात् तथोपलभ्येतेति न पिशाचानुपलम्भः स्यादिति विशेषोऽवधेय इति। आश्रयावच्छेदकतया-आश्रयाश्रयतया। तद्देशत्वमिति। परम्परासंबन्धेनेति भावः। एवंभूतेनापि—परम्परया आश्रयेणापि। अन्यत्रैवमदर्शनान्नायं नियम इत्यत्राह—योग्यताया इति। परम्पराधिकरणनिरूपणयोग्यताया इत्यर्थः। एवं सति न भवदभिमतसिद्धिरित्याह—न तर्हीति। ध्वंसादेः यत्किञ्चिदधिकरणनिरूप्यत्वनियमेऽपि साक्षात्प्रतियोग्यधिकरणनिरूप्यत्वनियमः नास्तीति त्वदुक्त्यैव सिद्धमिति भावः। प्रतियोगिग्रहणसामग्र्येव प्रतियोग्यघटिता अभावग्रहसामग्री, न तु स्वातन्त्र्येण पार्थक्येन साक्षात् प्रतियोग्यधिकरणोपलम्भोऽपीत्युपसंहरति—तस्मादिति। तं—प्रतियोगिनम्। विहायेति। प्रतियोग्यनुपलब्धिसहकृतेति भावः। असत्येवेति। पूर्वेद्युस्तत्र ग्रामे पर्जन्यः किमवर्षदिति परेद्युः कश्चित्पृष्ट तदानीमसतीं पूर्वेद्युः आत्मनः वृष्टिग्राहकसन्निकर्षादिसामग्रीमनुपलब्धिसहितां विज्ञाय नावर्षदिति यन्निश्चिनोति तदानुमानिकमिति भावः ॥

एतेनेति। अभावस्याधिकरणनिरूप्यत्वनियमाभावेन। सङ्ख्यां—प्रतियोग्यधिकरणाभ्याम्। परिहृत इति। संयोगाद्यभावरूपविशेषविषयत्वात् शास्त्रस्येति भावः। अनुमानेति। व्यापकाभावेन व्याप्याभावानुमानेत्यर्थः। अन्यथा—अनुमानेऽप्यभावस्याश्रयेण निरूपणनियमानुपगमे। न ग्रहणे नियम इति। स्मरणादिनाप्युपपत्तेः प्रत्यक्षाद्यात्मकज्ञाननियमो नास्तीति भावः। अधिकरणविशेष-

यदि चाधिकरणग्रहे शास्त्रस्य निर्भरः स्यात्, 'वह्नेर्दाह्यं विनाश्यानुविनाशवत्तद्विनाशः' इति नोदाहरेत्। असिद्धत्वात्। न हि वह्निविनाशस्तदवयवपरम्परास्वक्षनिरूप्यः तासामनिरूपणात्। नाप्यन्यत्र गमनाभावादिना पारिशेष्यादनुमेयः, हेतोरेव निरूपयितुमशक्यत्वात्; आश्रयानुपलब्धेः। नापि निमित्तविनाशात् सर्वमिदमेकवारेण सेत्स्यतीति युक्तम्; तस्यानैकान्तिकत्वात्। तेजसा विशेषितत्वादयमदोष इति चेत्— न। व्याप्त्यसिद्धेः। न हीन्धनवशात् तेजोद्रव्यमवश्यं विनश्यतीति क्वचित्सिद्धम्; प्रत्यक्षवृत्तेरनभ्युपगमात्॥

तस्माद्यत्त्यागेनान्यत्र गमनं न संभाव्यते, तेन निमित्तादिनापि देशेन प्रध्वंसो निरूप्यते इत्यकामेनापि स्वीकरणीयम्; गत्यन्तराभावात्। अत एव तमसः प्रत्यक्षत्वेऽप्यभावत्वमामनन्त्याचार्याः। एतेन शब्दप्रागभावो व्याख्यातः॥

ग्रहणनियमदर्शनस्य सामग्र्यैक्यनिबन्धनत्वेनान्यथासिद्धिमाह—क्वचिद्ग्रहणस्येति। अघटं भूतलमित्यादाविति भावः।

अत्र सूत्रकारसंमतिं दर्शयति—यदि चेति। सर्वस्यानित्यता यद्यनित्या तर्ह्यनित्यत्वासत्त्वदशायां सर्वं नित्यमित्युक्तं प्रत्याह—'तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत्' (न्या. ४·१-२७) इति सूत्रम्। इन्धनं विनाश्य ततः अग्नेः नाशे यथा इन्धनस्य न पुनरुन्मज्जनं, तथा अनित्यताया अनित्यत्वेऽपि न नित्यत्वोन्मज्जनमिति भावः। असिद्धत्वादिति। वह्निनाश्यस्येत्यादिः। तदुपपादयति—न हीति। अत्र वह्निविनाशः तदवयवपरम्परास्वेव निरूप्य इति पाठः स्यात्। विनाशाधिकरणतया प्रसिद्धासु प्रतियोग्यधिकरणीभूतावयवपरम्परास्वेव प्रत्यक्षो नहि भवति इत्यर्थः। तत्र हेतुमाह—तासामिति। अवयवपरम्पराणां प्रत्यक्षाभावादित्यर्थः। हेतोरेवेति। अनुपलभ्यमानत्वादेरभावरूपस्येत्यर्थः। अनिरूप्यत्वे हेतुमाह—आश्रयेति। निमित्तविनाशादिति। इन्धननाशादित्यर्थः। सर्वमिदमन्यत्र गमनाभावप्रध्वंसादिकम्। अनैकान्तिकत्वादिति। दण्डादिनिमित्तनाशेऽपि घटादिनाशादर्शनादिति भावः। व्यभिचारवारणाय हेतुं विशेषयति—तेजसेति। व्याप्त्यसिद्धिमुपपादयति। न हीति। प्रत्यक्षवृत्तेः—प्रत्यक्षप्रवृत्तेः। अनभ्युपगमादिति। अधिकरणानुपलम्भादिति भावः॥

अतः अभावस्याधिकरणनिरूप्यत्वनियमो नोपगन्तव्य इत्युपसंहरति—तस्मादिति। अत एवेति। प्रतियोगिसमवायिनैव ध्वंसनिरूपणमिति नियमाभावादेवेत्यर्थः। अन्यथा आलोकावयवानाम-

शब्दानित्यत्वस्यानुमानेन साधनम्

एवं स्थिते अनुमानमप्युच्यते—शब्दोऽनित्यः उत्पत्तिधर्मकत्वात् घटवत् । न चेदं प्रत्यभिज्ञानबाधितम् ; तस्य ज्वालादिप्रत्यभिज्ञानेनाविशेषात् ॥

नैवम्, अबाधितस्य तस्य स्वतःप्रमाणत्वादिति चेन्–तुल्यम् । 'ज्वालायां तन्नास्ति; विरुद्धधर्माध्यासेन बाधितत्वात् । अन्यथा भेदव्यवहारविलोपप्रसङ्गः । निमित्ताभावात् । आकस्मिकत्वे वाऽतिप्रसङ्ग' इति चेत्—तुल्यम्, शब्देऽपि तीव्रतीव्रतरत्वमन्दमन्दतरत्वादेर्भावात् ॥

तदिह न स्वाभाविकमिति चेत्—न । स्वाभाविकत्वावधारणन्यायस्य तत्र तत्र सिद्धस्यात्रापि तुल्यत्वात् । न ह्यपां शैत्यद्रवत्वे स्वाभाविके, तेजसो वा औष्ण्यभास्वरत्वे इत्यत्रान्यत्प्रमाणमस्ति प्रत्यक्षादिना । 'तत्तथैव युज्यते ; अन्यस्योपाधेरनुपलम्भात्, नियमेन तद्गतत्वेन चोपलम्भादि'ति चेत्—तुल्यमेतत् ॥

निरूपणात् तन्नाशात्मकं तमः न प्रत्यक्षं स्यादिति भावः । व्याख्यात इति । अधिकरणानिरूपणेऽपि प्रतियोगिमात्रनिरूपणात् प्रत्यक्ष इति भावः ॥

एवं स्थिते—प्रत्यक्षेणानित्य इति सिद्धे । अनित्यः नाशप्रतियोगी, उत्पत्तिधर्मकत्वादिति । भावत्वे सतीत्यादिः । तेन ध्वंसे न व्यभिचारः । प्रत्यभिज्ञानेति । सोऽयं गकार इति प्रत्यभिज्ञेत्यर्थः । तथा भिन्नकालप्रत्यक्षयोरैक्ये क्षणिकत्वासिद्ध्या नित्यत्वसिद्धिरिति भावः ॥

विरुद्धधर्माध्यासेनेति । महत्त्वाल्पत्वादिपरिमाणभेदाध्यासेनेत्यर्थः । अन्यथा विरुद्धधर्माध्यासस्य भेदाग्राहकत्वे । अतिप्रसङ्गः–संप्रतिपन्नैक्येऽपि भेदव्यवहारप्रसङ्गः । विरुद्धधर्माध्यासः शब्देऽपि तुल्य इत्याह —तुल्यमिति । तारत्वादिकं शब्दे न स्वाभाविकं इति शङ्कते — तदिहेति । औपाधिकविरुद्धधर्माध्यासः न भेदक इति भावः । जलादेः शैत्यादिवत् शब्दस्यापि तारत्वादिकं तद्गतत्वेन नियमेनोपलम्भात् स्वाभाविकमिति समाधत्ते — नेति । न केवलोपलम्भात् शैत्यादि जलादेः स्वाभाविकमित्यवधार्यते, किन्तूपाध्यनुपलम्भसहकृतादित्याशङ्कते–तदिति । शैत्यादीत्यर्थः । तारत्वादेरपि शब्दे तथाविधोपलम्भः अस्तीत्याह—तुल्यमेतदिति । तारोऽयं गकारः तारतरो वा इत्याद्युपलम्भे न हि शब्दातिरिक्तं धर्मितया संभावयितुमर्हं कमप्युपलभामह इति भावः ॥

तथाऽप्यतीन्द्रियान्यधर्मत्वशङ्का स्यादिति चेत्—एतदपि तादृगेव। तत् किं यद्गतत्वेन यदुपलभ्यते, तस्यैव स धर्मः ? नन्वेवं पीतः शङ्खः, रक्तः स्फटिकः, नीलः पट इत्यपि तथा स्यात्; अविशेषात्। न; पीतत्वादीनामन्यधर्मत्वस्थितौ शङ्खादीनां च तद्विरुद्धधर्मत्वे स्थिते, जपाकुसुमाद्यन्वयव्यतिरेकानुविधानाच्च बाधेन भ्रान्तत्वावधारणात्। न चेह तारतार-तरत्वादेरन्यधर्मत्वस्थितिः नापि शुकसारिकादिगकाराणां तद्विरुद्धधर्मत्वम्, नाप्यन्यस्य तद्धर्मिणोऽन्वयव्यतिरेकावनुविधत्ते। तथाऽपि शङ्का स्यात् इति चेत्—एवमियं सर्वत्र। तथा च न क्वचित् कस्यचित् किञ्चित्कुतश्चित् सिद्ध्येत्। न चैतच्छङ्कितुमपि शक्यते; अप्रतीते संस्काराभावात्; संस्कारानुपनीतस्य चारोपयितुमशक्यत्वात्॥

एतदपीति। शैत्यादिक्रमपीत्यर्थः। तादृगेवेति। अतीन्द्रियस्य कस्यचिज्जलादेरन्यस्य धर्मः सन्नेव जलादौ आरोप्यत इत्यपि शङ्क्यतामिति भावः। तर्हि विशेषाभावात् पीतश्शङ्ख इत्यादौ शङ्खादिगतत्वेनोपलभ्यमानं पीतत्वाद्यपि शङ्खादेरेव धर्मस्स्यादिति शङ्कते—तत् किमिति। वैषम्य-सत्त्वान्नैवमित्याह—नेति। तदधिगतधर्मविरुद्धत्वे सति तदन्यधर्मत्वेनावधृतत्वे सति तदन्यदृश्य-मानोपाध्यन्वयव्यतिरेकानुविधायितद्धर्मिकप्रत्ययविषयतावान् तद्धर्मिण्यारोपित इति विज्ञातुं शक्यते नान्य इति भावः। शुकसारिकेति। तदुच्चरिता गकारादयः तारतारतरा एव भवन्तीति भावः। शङ्का स्यादिति। अतीन्द्रियोपाधिसंभावनाधीना आरोपितत्वशङ्केत्यर्थः। तथा चेति। अनुमान-मेवोच्छिद्येतेति भावः। अपि चातीन्द्रियवृत्तेरनुभवाभावेन संस्कारासंभवादुपनायकस्मरणादिविरहे नारोपशङ्कावकाश इत्याह—न चेति। नन्वतीन्द्रियधर्मास्तारत्वादय इति न ब्रूमः; येन पूर्वोक्तदोषः स्यात्; किन्तु ध्वनिधर्मा इत्याशङ्कां निराकरोति—न चेति। तत्र प्रथमं वायवीया ध्वनयः इति परमतमभ्युपगम्य ग्रहणानुपपत्तिमाह—स्पर्शादीति। वायवीयत्वे त्वगिन्द्रियेण ग्रहणं वक्तव्यम्। तच्च भावं स्पर्शसहितमेव प्रत्याययति ध्वनयश्च भावाः। न स्पर्शसहग्रहविषयाः अतस्तेषामेव ग्रहणं न भवितुमर्हति। का कथा तद्धर्माणामिति भावः। स्पर्शाद्यविषयकप्रतीत्यजनकत्वं वा तदर्थः। आदिना रूपादि गृह्यते। अग्रे त्वगादीत्यादिना चक्षुरादि तत्तदसाधारणगुणं विना विषयं न गृह्णाति बाह्यमिन्द्रियमिति भावः॥

न च ध्वनिधर्मा एव गृह्यन्ते ; स्पर्शाद्यनन्तर्भावेण भावेषु त्वगादीनामव्यापारात् । न च श्रवणेनैव तद्ग्रहणम् ; अवायवीयत्वेन तस्य वायुधर्माग्राहकत्वात् चक्षुर्वत् । तारतारतरत्वादयो वा न वायुधर्माः श्रावणत्वात् कादिवत् । वायुर्वा न श्रवणग्राह्यधर्मा मूर्तत्वात् पृथिवीवत् । यदि च नैवम् ; कादीनामपि वायवीयत्वप्रसङ्गः । ततः किम् ? अवयविगुणत्वेऽनित्यत्वम् ; परमाणुगुणत्वेऽग्रहणम् । द्वयमप्येतदनिष्टं भवतः । अवश्यं च श्रवसा ग्राह्यजातीयगुणवता भवितव्यम् , बहिरिन्द्रियत्वात् , घ्राणादिवत् ॥

सन्तु ध्वनयोऽपि नाभसाः । तथा च तद्धर्मग्रहणं श्रवसोपपत्स्यत इति चेत्—न । तारस्तारतरो वाऽयं गकार इत्यत्र ध्वनीनामस्फुरणात् । न च व्यक्त्या विना सामान्यस्फुरणं कारणाभावात् । व्यक्तिस्फुरणसामग्रीनिविष्टा हि जातिस्फुरणसामग्री । कुत एतत् ।

तर्हि श्रवणेनैव ग्रहणमस्तु इत्याशङ्कां निराकरोति—न चेति । अवायवीयत्वेनेति । बहिरिन्द्रियत्वेन चेति पूरणीयम् । तेन न मनसि व्यभिचारः । वायुधर्मेति । वायुमात्रधर्मेत्यर्थः । तेन न दृष्टान्तस्य सत्तादिग्राहकत्वेन साध्यवैकल्यादि । एवमग्रेऽपि बोध्यम् । विपक्षे बाधकमाह—यदि चेति । एवं श्रवसोऽप्यनिष्टं वायवीयत्वं प्रसञ्जयति—अवश्यं चेति । वायुधर्मग्राहकत्वे श्रवणस्य ग्राह्यवायुधर्मवत्त्वावश्यंभावेन वायवीयत्वापत्त्या नाभसत्वानुपपत्तिरिति भावः । यद्वा कादीनामुक्तयुक्त्या वायवीयत्वासंभवेऽपि श्रवसो वायवीयत्वे बाधकाभावात् तेन स्यात् ध्वनिधर्मग्रहणमित्यत्राह—अवश्य चेति । श्रोत्रस्यापि स्वग्राह्यनाभसकादिमत्त्वावश्यंभावेन नभस्त्वेन तेन ध्वनिधर्मग्रहणं न संभवतीति भावः ।

अथ श्रवणेन ग्रहणोपपत्तये सिद्धान्तिमतमन्वारुह्य नाभसा भवन्तु ध्वनय इति शङ्कते—सन्त्विति । ध्वनीनामस्फुरणादिति । ध्वनिधर्मत्वे तदनुपलम्भे तारत्वादीनामुपलंभो न स्यादिति भावः । कारणाभावादिति । व्यक्त्यविषयकसामान्यगोचरप्रत्यक्षकारणाभावादित्यर्थः । कुत इत्यत्राह—व्यक्तिस्फुरणेति । स्फुरणमिह प्रत्यक्षम् । तेन जातिशब्दादिना सामान्यमात्रबोधेऽपि न क्षतिः । व्यक्तिप्रत्यक्षसामग्रीत्वव्याप्यं जातिप्रत्यक्षसामग्रीत्वमिति भावः । अन्वयव्यतिरेकावुपदर्शयति—ऐन्द्रियकेष्विति । व्यक्तिस्फुरणसामग्रीनैरपेक्ष्ये अतीन्द्रियेऽपि सामान्यग्रहणं स्यादिति भावः । ननु तारत्वादिकं न जातिः, गत्वादिना सांकर्यादिति चेत्—न । गत्वादिव्याप्यतारत्वनानात्वोपगमात्

अन्वयव्यतिरेकाभ्यां तथाऽवगमात्; ऐन्द्रियकेष्वेव घटादिषु सामान्यग्रहणात्; अतीन्द्रियेषु च मनःप्रभृतिष्वग्रहणात्। स्वरूपयोग्यतैव तत्र निमित्तम्; अकारणं व्यक्तियोग्यतेति चेत् एवं तर्हि सत्ताद्रव्यत्वपार्थिवत्वादीनां स्वरूपयोग्यत्वे परमाण्वादिष्वपि ग्रहणप्रसङ्गः, अयोग्यत्वे घटादिष्वपि तदनुपलम्भापत्तिरिति दुरुत्तरं व्यसनम्। तस्माद्व्यक्तिग्रहणयोग्यतान्तर्गतैव जातिग्रहणयोग्यतेति तदनुपलम्भे जातेरनुपलम्भ एव॥

शब्दानित्यत्वानुमाने बाधाभावस्य साधनम्

तथा च न तारत्वादीनामारोपसंभव इति स्वाभाविकत्वस्थितौ विरुद्धधर्माध्यासेन भेदस्य पारमार्थिकत्वात्प्रत्यभिज्ञानमप्रमाणमिति न तेन बाधः।

शब्दानित्यत्वानुमाने सत्प्रतिपक्षोद्धारः

नापि सत्प्रतिपक्षत्वम्; मिथो विरुद्धयोः वास्तवतुल्यबलत्वाभावात्। एकस्यान्यतमाङ्गवैकल्यचिन्तायामस्य वैकल्ये तस्यैव बाच्यत्वात्। अवैकल्ये त्वदीयेनैव विकलेन भवित-

---

सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकत्वस्यानुगतव्यवहारनियामकत्वात् न कोऽपि दोष इति। स्वरूपयोग्यतैव—सामान्यस्वरूपयोग्यतैव। तत्र ग्रहणे परमाणुष्वपि ग्रहणप्रसङ्ग इति।

ननु सत्तादिभेदाभावात् परमाणुवृत्तेरपि सत्तादेर्ग्रहणमिष्यत एव तत्संबन्धितया परमाणूनां तु योग्यताविरहात् न तत्र भानमिति चेत्—न। आश्रयान्तराभानेऽपि परमाणुघटितसन्निकर्षेण सत्तादिमात्रग्रहणप्रसङ्ग इति तात्पर्यात्। न तारत्वादीनामारोपसंभव इति। अनुपलम्भे संस्काराद्युपनायकासिद्धेरिति भावः॥

शब्दानित्यत्वानुमानस्य प्रमाणबाधाभावेऽपि सत्प्रतिपक्षस्स्यादिति शङ्कां निराकरोति—नापीति। किं वस्तुतः तुल्यबलेन उत तथा विज्ञातेन प्रतिहेतुनेति विकल्प्य नाद्य इत्याह—मिथ इति। तुल्यबलत्वाभावादिति। बलमिह व्याप्तिपक्षधर्मते। पक्षसपक्षसत्त्वविपक्षासत्वानि वा। अन्यतरस्य तदङ्गभावश्यक इति भावः। अस्य वैकल्ये प्रकृतहेतोः व्याप्तिपक्षधर्मतावैकल्ये। त्वदीयेनैवेति। प्रतिहेतुनैवेत्यर्थः। तुल्यबलत्वस्थापनभरः सत्प्रतिपक्षोद्भावयितुः शिरस्येव निधीयत इति भावः। ननु मास्तु वस्तुतस्तुल्यबलत्वं, सत्प्रतिपक्षोच्छेदप्रसङ्गेन तत्र तस्यातन्त्रत्वात्; भवदीयहेतोरिवास्मदीय-

व्यमिति हीनस्य न सत्प्रतिपक्षत्वम् । 'तथाऽपि नित्यः शब्दः अद्रव्यद्रव्यत्वादित्यत्रापि साधनदशायां किञ्चिद्वाच्य' मिति चेत्—असिद्धिः ।

द्रव्यं शब्दः साक्षात्संबन्धेन गृह्यमाणत्वात् घटवदिति सिद्ध्यतीति चेत्—न-एतस्याप्यसिद्धेः । न हि श्रोत्रगुणत्वे द्रव्यत्वे वाऽसिद्धे साक्षात्संबन्धे शब्दस्य प्रमाणमस्ति । परिशेषोऽस्ति । तथा हि—सदाद्यभेदेन सामान्यादित्रयव्यावृत्तौ मूर्तद्रव्यसमवायनिषेधेन कर्मत्वनिषेधात् द्रव्यगुणत्वपरिशेषे संयोगसमवाययोरन्यतरः संबन्ध इति चेत् - न - बाधकबलेन परिशेषे द्रव्यत्वस्यापि निषेधाल्लिङ्गग्राहकप्रमाणबाधापत्तेः । बाधके सत्यपि वा द्रव्यत्वाप्रतिषेधे कर्मत्वादीनामप्यप्रतिषेधप्रसक्तौ परिशेषासिद्धेः । तस्मादेकशेषपरिशेषो न प्रमाणम् । सन्देहसङ्कोचमात्रहेतुत्वात् ॥

अथ द्रव्यत्वे किं बाधकम् ? उच्यते—शब्दो न द्रव्यं बहिरिन्द्रियव्यवस्थाहेतुत्वा-

---

हेतोरपि वैकल्योद्भावनस्याशक्यत्वे तुल्यबलत्वज्ञानाद्भवत्येव प्रतिरोध इत्यभिप्रायेण शङ्कते—तथापीति । अद्रव्यद्रव्यत्वादिति । द्रव्यासमवेतत्वे सति द्रव्यत्वादित्यर्थः । अवयविनि व्यभिचारवारणाय विशेषणम् । प्रागभावादौ तद्वारणाय विशेष्यमिति ध्येयम् । साधनदशायामिति । स्वमतस्थापनावस्थायामित्यर्थः । सत्प्रतिपक्षोद्भावनदशायां किञ्चिद्वैकल्यवचनं स्वस्याप्यावश्यकमितीदम् ।

साक्षात्संबन्धेनेति । संयोगसमवायान्यतरेणेत्यर्थः । सदाद्यभेदेन—सत्ताश्रयादभेदेन । सामान्यादीति । सत्तावत्त्वाभावादिति भावः । मूर्तद्रव्यसमवायनिषेधेनेति नैयायिकैः पृथिव्यादिमूर्तेषु शब्दानभ्युपगमादिति भावः । निषेधादिति । शब्दो न द्रव्यमिति वक्ष्यमाणेनेति भावः । लिङ्गग्राहकप्रमाणं—शब्दः द्रव्यमित्यनुमानम् । तस्य बाधः । यद्वा लिङ्गग्राहकमानं परिशेषः तेन बाध इत्यर्थः । सन्देहसंकोचेति । कर्मत्वाप्रतिषेधे कर्मगुणत्वादिकोटिकसन्देहनिरसनासंभवात् सामान्यादिसन्देहमात्रव्युदासेऽपि परिशेषो न निश्चायक इति भावः ॥

तर्हि द्रव्यत्वबाधे किं मानमिति पृच्छति—अथेति । व्यवस्थाहेतुत्वादिति । व्यवस्था इतरव्यावृत्तिः तद्धेतुत्वादित्यर्थः । शब्दादिविशेषगुणैरेव स्वग्राहकत्वेन बाह्येन्द्रियाणां परस्परव्यावृत्तिरिति भावः । समवायिसिद्धाविति । समवायित्वसिद्धावित्यर्थः । समवायसिद्धाविति वा पाठः

द्रूपादिवत् इति परिशेषाद्गुणत्वेन समवायिसिद्धौ लिङ्गग्राहकप्रमाणबाधितत्वान्नाव्यवहित-सम्बन्धग्राह्यत्वेन द्रव्यत्वसिद्धिः। न चासिद्धत्वेन सत्प्रतिपक्षत्वम्, असिद्धस्य हीनबलत्वात्।

ननु शब्दस्तावदश्रोत्रगुणो नैवेति त्वयैव साधितं प्रबन्धेन। न च श्रोत्रगुणः, तेन गृह्यमाणत्वात्। यद् येनेन्द्रियेण गृह्यते, नासौ तस्य गुणः; यथा गृह्यमाणो गन्धादिः। श्रोत्रं वा न स्वगुणग्राहकम् इन्द्रियत्वात् घ्राणवदिति न गुणत्वसिद्धिरिति चेत्, ततः किम्? न चैतदपि; घ्राणादिसमवेतगन्धाद्यग्रहे स्वगुणत्वस्याप्रयोजकत्वात्। अयोग्यत्वं हि तत्रोपाधिः।

द्रव्यत्वसाधकस्य साक्षात्संबन्धेन गृह्यमाणत्वादिति हेतोरसिद्धिपरिहारेऽपीति भावः। लिङ्गग्राहक-प्रमाणबाधितत्वादिति। शब्दो न द्रव्यमिति बाधकानुमानबाधितत्वादित्यर्थः।

ननु बहिरिन्द्रियव्यवस्थाहेतुत्वादित्यनेन तत्तद्बहिरिन्द्रियग्राह्यतया तत्तद्व्यवस्थापकत्वविवक्षणे घटादौ एकैकबहिरिन्द्रियग्राह्यतायास्तथात्त्वे प्रभादौ वा व्यभिचारः अतीन्द्रियशब्दे भागासिद्धिश्चेति चेत्—न। चक्षुरग्राह्यबहिरिन्द्रियग्राह्यजातिमत्त्वस्य तथात्वात् रासदिदृष्टान्तसंभवात् रूपस्य साधन-वैकल्येऽपि न क्षतिः। उक्तानुमानेन द्रव्यत्वासिद्धावपि गुणत्वनिषेधे परिशेषात् तत्सिद्धिःस्यात् इति शङ्कते—नन्विति। श्रोत्रतदितरगुणत्वबाधे गुणासामान्यभेदसिद्धिरिति भावः। गुणत्वनिषेधोपगमेऽपि न द्रव्यत्वसिद्धिप्रत्याशावकाशः। तस्यापि बाधकस्योक्तत्वात्। अन्यथा गुणत्वादेरपि सिद्धिप्रसङ्गादि-त्याशयेन समाधत्ते—ततः किमिति। वस्तुतः गुणत्वनिषेधोऽपि न सिध्यतीत्याह—न चैतदपीति। अयोग्यत्वं हि तत्रोपाधिरिति। तदिन्द्रियजन्यप्रत्यक्षविषयत्वयोग्यत्वाभावः तद्गुणग्रहणजनकत्व-योग्यत्वाभावश्च क्रमेणानुमानयोरुपाधिरित्यर्थः। तत्र प्रथमानुमाने अप्रयोजकत्वशङ्कायां वक्तव्यस्य यदि तद्गुणस्स्यात् तदिन्द्रियग्राह्यो न स्यादिति विपक्षे बाधकतर्कस्याङ्गभूतव्याप्तावुपाधिरिह विवक्षितः। तेनान्वयव्याप्तावुक्तोपाधेरभावात्तद्बलादेव प्रकृतानुमानं निर्वोढुं शक्यमिति शङ्काया नावकाशः। द्विती-यानुमाने तु साध्यगमकतौपयिकव्याप्तावेवेति विशेषः। योग्यताविरहस्य साध्यत्वेऽपि योग्यतावच्छे-दकशून्यत्वस्योपाधित्वं बोध्यम्। तेन न साध्योपाध्योरविशेषः। अयोग्यगुणकत्वरूपं वा अयोग्यत्वं द्वितीयानुमाने उपाधिः।

अन्यथा सुखादिर्नात्मगुणः तेन गृह्यमाणत्वाद्रूपादिवत्। न वा तेन गृह्यते तत्सम-वेतत्वाद्दृष्टवत्। आत्मा वा न तद्ग्राहकः, तदाश्रयत्वात् गन्धाद्याश्रयघटादिवदित्याद्यपि शङ्क्येत। तस्मात् स्वगुणः परगुणो वाऽयोग्यो न गृह्यते; गृह्यते तु योग्यो योग्येन। तत् किमत्रानुपपन्नम् ॥

अवश्यं च श्रोत्रेण विशेषगुणग्राहिणा भवितव्यमिन्द्रियत्वात्। अन्यथा तन्निर्माण-वैयर्थ्यात्। तदन्यस्येन्द्रियान्तरेणैव ग्रहणात्। न च द्रव्यविशेषग्रहणे तदुपयोगः, विशेष-गुणयोग्यतामाश्रित्यैवेन्द्रियस्य द्रव्यग्राहकत्वात्; न द्रव्यस्वरूपयोग्यतामात्रेण। अन्यथा चान्द्रमसं तेजः स्वरूपेण योग्यमिति तदप्युपलभ्येत; आत्मा वा मनोग्राह्य इति सुषुप्त्यव-स्थायामप्युपलभ्येत; अनुद्भूतरूपेऽपि वा चक्षुः प्रवर्तेत। तस्मात् गुणयोग्यतामेव पुर-स्कृत्येन्द्रियाणि द्रव्यमुपाददते; नातोऽन्यथेति स्थितिः। अत एव नाकाशादयश्चाक्षुषाः ॥

अस्तु तर्हि शब्दो नित्यः नित्याकाशैकगुणत्वात् तद्गतपरममहत्परिमाणवदिति प्रत्यनु-मानमिति चेत्-न-अकार्यत्वस्योपाधेर्विद्यमानत्वात्। अन्यथा—आत्मविशेषगुणा नित्याः

उक्तस्यानुपाधित्वे अनिष्टमाह—अन्यथेति। एवं गुणत्वबाधकानुमानमप्रयोजकमिति स्थापि-तम्। अथ द्रव्यत्वबाधकमप्यनुमानमप्रयोजकमित्याशङ्कायां विपक्षे बाधकमाह—अवश्यं चेति। अन्या-भावात् शब्देनैव श्रोत्रग्राह्यविशेषगुणेन भाव्यमिति न तद्द्रव्यत्वे घटत इति भावः। यद्वा श्रोत्रं न स्वगुणग्राहकमित्यस्य प्रत्यनुमानमाह—अवश्यं चेति। विपक्षे बाधकमाह—अन्यथेति। गुणान्तर-ग्रहणान्न वैयर्थ्यमिति शङ्कां निराकरोति-तदन्यस्येति। एतेन इतरबाधबलात् शब्दरूपविशेषगुण-मादायैव साध्यपर्यवसानात्, प्रतिरोधसंभव इति सूचितम्। द्रव्यविशेषग्रहण इति। द्रव्यविशेष-तया स्वाभिमतशब्दग्रहण इत्यर्थः। चान्द्रमसमिति। तत्स्पर्शस्यानुद्भूतत्वेन अयोग्यत्वेऽपि तस्य त्वचा उपलम्भप्रसङ्ग इत्यर्थः। अतः स्वयोग्यविशेषगुणरहितद्रव्यग्रहजनकत्वं इन्द्रियस्य नाभ्युपगम्यत इति भावः।

ननु शब्दस्य द्रव्यत्वेऽपि तारत्वादिगुणपुरस्कारेण श्रोत्रग्राह्यत्वं संभवतीति चेत्— न। तार-त्वादीनां ध्वनिधर्मत्वोपगमात् जातित्वेनागुणत्वाच्च। अथ शब्दगुणत्वमुपगम्यानित्यत्वानुमानस्य प्रत्यनु-मानमाह—अस्तु तर्हीति। नित्याकाशैकगुणत्वादिति। शब्दप्रागभावे व्यभिचारवारणाय गुणेति।

तदेकगुणत्वात्तद्गतपरममहत्त्ववदित्यपि स्यात् । 'अस्य प्रत्यक्षबाधितत्वादहेतुत्वमि'ति चेत् - न - निरुपाधेर्बाधानवकाशात् । स्वभावप्रतिबद्धस्य च तत्परित्यागे स्वभावपरित्यागप्रसङ्गात् । तस्माद्बाधेन वोपाधिरुन्नीयते, अन्यथा वेति न कश्चिद्विशेषः ॥

एतेन श्रावणत्वाच्छब्दत्ववदित्यपि परास्तम् । अत्रापि तस्यैवोपाधित्वात् । अन्यथा गन्धरूपरसस्पर्शा अपि नित्याः प्रसज्येरन् । घ्राणाद्यैकैकेन्द्रियग्राह्यत्वात् गन्धत्वादिवदित्यपि प्रयोगसौकर्यात् ।

शब्दानित्यत्वानुमाने विरोधव्यभिचारासिद्धीनामुद्धारः

विरोधव्यभिचारावसंभावितावेवात्रेत्यसिद्धिरेव शिष्यते । साऽपि नास्ति । तथा हि—शब्दस्तावत् पूर्वन्यायेन स्वाभाविकतीव्रमन्दतरतमादिभावेन प्रकर्षनिकर्षवानुपलभ्यते । इयं

संयोगादौ तद्वारणायैकेति । घटरूपादौ तद्वारणाय नित्याकाशेति । तत्र नित्येत्याश्रयानित्यत्वशङ्कानिबन्धनानित्यत्वशङ्काव्यावर्तनाय । अत्र ध्वंसप्रतियोगित्वानवच्छिन्नसत्तायोगित्वं साध्यम् । अकार्यत्वस्येति । प्रागभावाप्रतियोगित्वस्येत्यर्थः । अन्यथा—अकार्यत्वस्यानुपाधित्वे । प्रत्यक्षेति । ज्ञानाद्यात्मगुणानित्यत्वप्रत्यक्षेत्यर्थः । अहेतुत्वमिति । असद्धेतुत्वमित्यर्थः । निरुपाधेरिति । अकार्यत्वस्योपाधित्वानुपगमादिति भावः । पक्षधर्मस्येति शेषः । व्याप्यस्य पक्षधर्मताविरहे बाधप्रसक्तेः । स्वभावप्रतिबद्धस्येति । स्वभावतः यत्किञ्चिद्व्याप्यस्येत्यर्थः । तत्परित्यागे—व्यापकं विना सत्त्वे । स्वभावपरित्यागेति । व्याप्यत्वभङ्गप्रसङ्गादित्यर्थः । अन्यथा वेति । साध्यव्यापकत्वादिप्रतिसन्धानेन वेति भावः ।

इदमुपलक्षणम् । शब्दनित्यत्वेऽपि उत्पत्तिविनाशगोचरप्रत्यक्षबाधस्य वक्तुं शक्यत्वादुक्तेनैव दूषणेन प्रत्यनुमानान्तरं निरस्यति—एतेनेति । एवं निरस्तौ बाधप्रतिरोधौ । अथ विरोधादेरपि न प्रसक्तिरित्याह—असंभावितावेवात्रेति । अत्रानित्यः उत्पत्तिधर्मकत्वादित्यनुमाने साध्यं विना कुत्रापि हेतोरनुपलम्भादिति भावः । पूर्वन्यायेनेति । उपाध्यन्तरानुपलम्भसहकृततद्धर्मिवृत्तित्वावच्छिन्नोपलम्भनियमस्य स्वाभाविकतागमकतायाः पूर्वोक्तत्वादित्यर्थः । प्रकर्षनिकर्षवानिति । किञ्चिदपेक्षया प्रकर्षे सत्यपि अन्यापेक्षया निकर्षोऽप्युपलभ्यत इति भावः । अस्य प्रकर्षसमानाधिकरणनिकर्षवत्त्वस्य उत्पत्तिमत्त्वव्याप्यत्वमुपपादयति—इयञ्चेति । विपक्षाद्व्यावृत्तिमाह—अकारणका हीति । नित्याः

च प्रकर्षनिकर्षवत्ता कारणभेदानुविधायिनी सर्वत्रोपलब्धा। अकारणका हि नित्याः प्रकर्षवन्त एव भवन्ति, यथा आकाशादयः, निकृष्टा एव वा, यथा परमाण्वादयः। न तु किञ्चिदतिशयानाः कुतश्चिदपकृष्यन्ते। तदियं नित्येभ्यो व्यावर्तमाना कारणवत्सु च भवन्ती जायमानतामादायैव विश्राम्यतीति प्रतिबन्धसिद्धौ प्रयुज्यते शब्दो जायते, प्रकर्षनिकर्षाभ्यामुपेतत्वात् माधुर्यादिवत्। अन्यथा नियामकमन्तरेण भवन्ती नित्येष्वपि सा स्यात्; नियमहेतोरभावात्। शब्दादन्यत्र इयं गतिरिति चेत्—न। साध्यधर्मिणं विहायेति प्रत्यवस्थानस्य सर्वानुमानसुलभत्वात्। न चेह व्यञ्जकतारतम्याद्व्यञ्जनीयतारतम्यम्, अस्वाभाविकत्वप्रसङ्गात्। व्यवस्थितं च स्वाभाविकत्वम्। न च व्यञ्जकोत्पादकाभ्यामन्यस्यानुविधानमस्ति। न च स्वाभाविकत्वौपाधिकत्वाभ्यामन्यः प्रकारः संभवति॥

शब्दानित्यत्वानुमानस्य अप्रयोजकत्वनिरासः

'स्यादेतत्। तथाऽप्युत्पत्तेर्नित्यत्वेन को विरोधः? येन प्रतिबन्धसिद्धिः स्यात्। असिद्धे च तस्मिन्, भवतां व्यापकत्वासिद्धः, अस्माकमप्रयोजकः, सौगतानां सन्दिग्धविपक्षवृत्तिरयमुपक्रान्तो हेतुः' इति चेत्-न। इदं ह्युत्पत्तिमत्त्वं विनाशकारणसन्निधि-

---

केचित् प्रकर्षमात्रवन्तः केचिदपकर्षमात्रवन्तः न तूभयवन्तः केचिदिति भावः। कारणवत्सु च कार्येषु मध्ये प्रतिबन्धसिद्धाविति। उत्पत्तिप्रकर्षनिकर्षवत्त्वयोः व्याप्तिसिद्धावित्यर्थः। विपक्षे बाधकमाह—अन्यथेति। नियामकमन्तरेण—कारणविशेषमन्तरेण। इयं गतिरिति। कारणाधीना प्रकर्षनिकर्षवत्तेत्यर्थः। नित्यत्वेऽपि व्यञ्जकतारतम्यात् तदुपपत्तिरिति शङ्कां निराकरोति—न चेति। अस्वाभाविकत्वप्रसङ्गादिति। मुखस्य मणिकृपाणादिव्यञ्जितह्रस्वदीर्घत्वादिवदिति भावः॥

अथ स्वरूपासिद्धिरहितोऽपि उत्पत्तिमत्त्वहेतुरप्रयोजक इति शङ्कते—स्यादेतदिति। प्रतिबन्धसिद्धिरिति। अनित्यत्वव्याप्तिसिद्धिरित्यर्थः। तदसिद्धौ मतभेदेन व्याप्यत्वासिद्ध्यादिनामा दोष इत्याह—असिद्धे चेति। भवतां नैयायिकानां। व्यापकत्वासिद्ध इति। व्याप्यत्वासिद्धिरिति भावः। अस्माकं—मीमांसकानां। संदिग्धेति। व्याप्त्यसिद्धौ हेतोर्विपक्षवृत्तित्वसंदेहसंभवात् तथाभिधानस्तत्र हेत्वाभासः सौगतैरुपेयत इति भावः। विनाशकारणसन्निधिव्याप्यत्वादनित्यत्वव्याप्यत्वमावश्यकमिति समाधत्ते—इदं हीति। भावत्वसमानाधिकरणमित्यर्थः। स्वव्यापकनिवृत्तौ -विनाशकसंसर्गनिवृत्तौ

विरुद्धेभ्यो नित्येभ्यः स्वव्यापकनिवृत्तौ निवर्तमानं विनाशकसन्निधिमन्ति विनाशिनि विश्रा-म्यतीति । 'विनाशककारणसन्निधानेनावश्यं जायमानस्य भवितव्यमिति कुतो निर्णीत'मिति चेत्—न । तदसन्निधानं हि न तावदाकाशादेरिव स्वभावविरोधात्; उत्पत्तिविनाशयोः संसर्ग-दर्शनात् । अविरुद्धयोरसन्निधिस्तु देशविप्रकर्षात् हिमवद्विन्ध्ययोरिव स्यात् । देशयोरपि विप्रकर्षो विरोधाद्वा हेत्वभावाद्वा । पूर्वोक्तादेव न प्रथमः । द्वितीयस्तु पटकुङ्कुमयोरिव स्यात्, यदि कुङ्कुमसमागमादर्वागिव प्रध्वंसकसंसर्गादर्वागेव पटो विनश्येत् । यथा हि विनाशकारणं विना न विनाशः तथा यदि कुङ्कुमसमागमं विना न विनाशः पटस्येति स्यात्, कस्तयोस्संसर्गं वारयेत् । तस्मादविरुद्धयोरसंसर्गः कालविप्रकर्षनियमेन व्याप्तः । स चातो निवर्तमानः स्वव्याप्यमुपादाय निवर्तत इति प्रतिबन्धसिद्धिः ॥

अस्थिरस्य शब्दस्यार्थेन सम्बन्धोपपादनम्

'स्यादेतत् । यद्येवमस्थिरश्शब्दः, कथमर्थेन संगतिरस्योपलभ्यते' इति चेत्— यथैवार्थस्यास्थिरस्य तेन । जातिरेव पदार्थः न व्यक्तिरिति चेत् - न - शब्दात्तदलाभप्रसङ्गात् । आक्षेपत इति चेत्—कः खल्वयमाक्षेपो नाम ? न तावदनुमानम्; अनन्ताभिस्सह संगति-

---

विनाशकसन्निधिनियम एव किं मानमिति शङ्कते—विनाशकारणेनेति । असति स्वभावतः विरोधे देशकालविप्रकर्षनियमे च विनाशकसंसर्गस्यावर्जनीयत्वात् व्याप्तिसिद्धिरित्याशयेन परिहरति—नेति । पूर्वोक्तादेवेति । उत्पत्तिविनाशयोः संसर्गदर्शनादेवेत्यर्थः । पटकुङ्कुमयोरिवेति । यद्यपि न तयोः विरोधः, तथापि कुङ्कुमसमागमकारणविलम्बेन तत्संसर्गमप्राप्यैव पटस्य नाशे भवत्यसन्निधिः । तद्व-दुत्पत्तिमतः विनाशकमप्राप्य विनाशाभावात् न तयोः असन्निधिः शक्यशङ्क इति भावः । स च— कालविप्रकर्षश्च । अतः—उत्पत्तिमतः । स्वव्याप्यं—विनाशकासन्निधिम् । प्रतिबन्धसिद्धिः— उत्पत्तिविनाशकारणसन्निध्योः व्याप्तिसिद्धिः ॥

नन्वेवं गृहीतसंगतिकस्य घटादिपदस्य नाशे कालान्तरे घटादिपदान्तरात् अर्थप्रत्ययानुपपत्ति-रित्याशयेन शङ्कते—स्यादेतदिति । अर्थानित्यत्वेऽप्येकजातीयत्वेनेव शब्दानित्यत्वेऽप्येकानुपूर्वीक-त्वेन सर्वत्र संगतिग्रहोपपत्तिरित्याशयेन समाधत्ते—यथैवेति । अनित्यव्यक्तेः वाच्यत्वानुपगमात् नायं क्लेश आवश्यक इत्याह—जातिरेवेति । तदलाभेति । व्यक्त्यलाभेत्यर्थः । अनुमानमिति ।

वद्विनाभावस्यापि ग्रहीतुमशक्यत्वात्। शक्यत्वे वा संगतेरपि तथैव सुग्रहत्वात् व्यक्तिमात्ररूपेणाविनाभाव इति चेत् न। व्यक्तित्वस्य सामान्यस्याभावात्। भावे वा, तदाक्षेपेऽपि विशेषानाक्षेपात्। वाच्यत्वमपि वा तथैवास्तु ? किमाक्षेपेण ; संगतेरविशेषादिति ॥

अर्थापत्तिराक्षेप इति चेत्—न। व्यक्त्या विना किमनुपपन्नम् ? जातिरिति चेत्—न। तन्नाशानुत्पाददशायामपि सत्त्वात्। तथाऽपि न व्यक्तिमात्रं विनेति चेत्—न। मात्रार्थाभावात्। व्यक्तिज्ञानमन्तरेण जातिज्ञानमनुपपन्नमिति चेत्—न। तदभावेऽप्युत्पादात्। व्यक्तिविषयतात्वं विना जातिविषयता तस्यानुपपन्नेति चेत्—न। एवं तर्ह्येकज्ञानगोचरतायां किमनुपपन्नं किं प्रतिपादयेदिति। जातीनामन्वयानुपपत्त्या व्यक्तिरवसीयत इति चेत्—न। परस्पराश्रयप्रसङ्गात् ॥

गोत्वं व्यक्त्याश्रितं जातित्वादित्यनुमानमित्यर्थः। वह्न्यादिभिरिवानुगतरूपावच्छेदेन व्यक्तिभिरप्यविनाभावसुग्रह इत्यत्राह—शक्यत्वे वेति। तादृशं रूपं नास्तीति भावः।

ननु व्यक्तित्वं तादृशमस्तीति शङ्कते—व्यक्तीति। व्यक्तिसामान्यरूपेणेत्यर्थः। सामान्यस्याभावादिति। व्यक्तित्वस्य प्रतिव्यक्तिविश्रान्तत्वेनानुगतत्वाभावादित्यर्थः। अनुगतत्वोपगमेऽप्याह—भावे वेति। तदाक्षेपेऽपीति। व्यक्तिसामान्याक्षेपेऽपीत्यर्थः। विशेषेति। गवादिव्यक्तिविशेषानाक्षेपादित्यर्थः। पक्षधर्मताबलाद्विशेषलाभस्स्यादित्यत्राह—वाच्यत्वमपि वेति। व्यक्तिसामान्यरूपेण सर्वत्र संगतिग्रहसंभवादिति भावः।

अर्थापत्तिराक्षेप इत्यपि न वक्तुं शक्यमित्याह—अर्थापत्तिरिति। मात्रार्थाभावादिति। व्यक्तित्वरूपमनुगतं सामान्यं नास्तीति पूर्वमुक्तम्; यावद्व्यक्त्युक्तौ तास्सम्भूय न क्वचिदपि सन्तीति भावः। तदभावेऽपीति। पूर्वं व्यक्तिज्ञानाभावेऽपीत्यर्थः। न च तत्काले व्यक्तिज्ञानमपेक्षितमिति वाच्यम्। ज्ञानयौगपद्यानभ्युपगमात्। नन्वेकज्ञानविषयत्वमपेक्षितमिति शङ्कते—व्यक्तिविषयत्वं विनेति। किमनुपपन्नमिति। अनुपपन्नं सदित्यर्थः। एकज्ञानविषयत्वनियमे कल्प्यकल्पकव्यवस्था नोपपद्येतेति भावः। लक्षणया व्यक्तिलाभ इत्याह—जातीनामिति। अन्वयानुपपत्त्या आनयनादिपदार्थान्तरान्वयानुपपत्त्या। परस्पराश्रयेति। जातिभाने सत्यन्वयानुपपत्त्या व्यक्तिभानं, व्यक्तिभाने सत्येव जातिभानं पूर्वोक्तमित्यन्योन्याश्रय इत्यर्थः।

स्यादेतत्—प्रतिबन्धं विनापि पक्षधर्मताबलात् यथा लिङ्गं विशेषे पर्यवस्यति, तथा संगतिं विनाऽपि शब्दः शक्तिविशेषाद्विशेषे पर्यवस्यति। स एवाऽऽक्षेप इत्युच्यते इति चेत्-न तावत् प्रतीतिः क्रमेण; अपेक्षणीयाभावेन विरम्यव्यापारायोगात्। जातिप्रत्यायनमपेक्षत इति चेत्-कृतं शब्दशक्तिकल्पनया; तावतैव तत्सिद्धेः। ओमिति चेत्-न-व्यक्त्यनालम्बनाया जातिप्रतीतेरसम्भवादित्युक्तत्वात्। प्रमाणान्तरापातप्रसङ्गाच्च। स्मरणं तदित्ययमदोष इति चेत्—न, अननुभूतानन्वयप्रसङ्गात्। अस्त्वेकैव प्रतीतिरिति चेत्—कृतं तर्हि शक्तिकल्पनया॥

शब्दस्य विशिष्टे शक्तिरिति निगमनम्

एवं च यथा सामान्यविषया शक्तिरेकैव तद्वति पर्यवस्यति, तथा सामान्याश्रया

ननु जाताविव व्यक्तावपि पृथक्शक्तिः स्वीक्रियते; जातिशक्तिस्तु ज्ञाता सती उपयुज्यते। व्यक्तिशक्तिस्तु स्वरूपसती। अतः व्यक्त्यानन्त्यात् दुर्ग्रहत्वेऽपि न क्षतिरिति शङ्कते—स्यादेतदिति। प्रतिबन्धं विनापि-विशेषरूपेण व्याप्तिग्रहं विनापि। सामान्यरूपेण व्याप्तिग्रहमात्रादिति भावः। शक्तिविशेषे—पर्वतीयवह्न्यादिरूपे। संगतिं विनापि। ज्ञाततया उपयोगिनीं शक्तिं विनापि। शक्तिविशेषात्। स्वरूपसत्या एव कार्यकारिण्याः शक्तेः। विशेषे गवादौ। अपेक्षणीयाभावेनेति। व्यक्तिशक्तेरपि पूर्वसिद्धत्वादिति भावः। विरम्यव्यापारेति। प्रथमं जातिबोधाय पश्चात् व्यक्तिबोधाय च शब्दव्यापारायोगादिति भावः। तावतैव—अपेक्षणीयेन जातिज्ञानेनैव। तत्सिद्धेः—व्यक्तिसिद्धेः। प्रत्यक्षात्मिकाया एव जातिप्रतीतेः व्यक्त्यालम्बननियमः इत्यत आह—प्रमाणान्तरेति। शब्दातिरिक्तस्य जातिज्ञानस्य व्यक्तिप्रमाजनकत्वादिति भावः। एकज्ञानविषयत्वोपगमे न शक्तिभेद आवश्यक इत्याह—कृतं तर्हीति। जातिशक्तिज्ञानस्य तद्विशिष्टधीहेतुत्वसंभवेन एकशक्त्यैवोभयबोधनसंभवादिति भावः॥

सामान्यविषयेति। गोत्वादिसामान्यविषयेत्यर्थः। तद्वति गवादौ पर्यवस्यतीति। तद्व्यक्तित्वेन अनन्तव्यक्तिविषयकत्वासंभवेऽपि गोत्वादिसामान्यरूपेण निखिलगवादिव्यक्तिविषयिणी भवत्येवेति भावः। सामान्याश्रयेति। शब्दानुपूर्वीविशेषत्वादिसामान्यरूपेण समानानुपूर्वीकसर्वशब्दवृत्तिरवगम्यत इति भावः। वर्णनित्यत्वेऽपि प्रकारान्तरेण वेदानित्यत्वमाह—न चेति। तद्विशिष्टत्वमपीति।

संगतिस्तद्वति पर्यवस्येदिति । न च नित्या अपि वर्णाः स्वरानुपूर्व्यादिहीनाः पदार्थैः संगम्यन्ते । न च तद्विशिष्टत्वमपि तेषां नित्यम् । तस्मात्तत्तज्जातीयक्रोडनिविष्टा एव पदार्थाः पदानि च सम्बध्यन्ते, नातोऽन्यथेति, नैतदनुरोधेनापि शब्दस्य नित्यत्वमाशङ्कनीयमिति ॥

पदानां वाक्यानां वेदस्य चानित्यत्वस्थापनम्

यदा च वर्णा एव न नित्याः, तदा कैव कथा पुरुषविवक्षाधीनानुपूर्व्यादिविशिष्टवर्णसमूहरूपाणां पदानाम् ? कुतस्तरां च तत्समूहरचनाविशेषस्वभावस्य वाक्यस्य ? कुतस्तमां तत्समूहस्य वेदस्य ॥

सृष्टिप्रलयसद्भावनिरूपणम्

परतन्त्रपुरुषपरम्पराधीनतया प्रवाहाविच्छेदमेव नित्यतां ब्रूम इति चेत्—एतदपि नास्ति; सर्गप्रलयसम्भवात् । अहोरात्रस्याहोरात्रपूर्वकत्वनियमात्, कर्मणां विषमविपाकसमयतया युगपद्वृत्तिनिरोधानुपपत्तेः, वर्णादिव्यवस्थानुपपत्तेः, समयानुपलब्धौ शब्दव्यवहारविलोपप्रसंगात्, घटादिसंप्रदायभङ्गप्रसङ्गाच्च कथमेवमिति चेत्—

स्वरादिविशिष्टत्वमपीत्यर्थः । स्वरो ध्वनिः परमतेऽप्यनित्यः, आनुपूर्वी घकाराद्युत्तरत्वं तज्ज्ञानाव्यवहितोत्तरज्ञानविषयत्वं, ज्ञानस्यानित्यतया तदप्यनित्यमेवेति भावः ।

ननु मास्तु स्वरूपतो नित्यत्वम्, प्रवाहतस्तु स्यादिति शङ्कते—परतन्त्रेति । परतन्त्रशब्दोच्चारणे अर्थज्ञानापेक्षाभावात् नेश्वरसिद्धिरिति भावः । प्रलये बाधकमाह—अहोरात्रेति । सर्गाद्यहोरात्रस्याहोरात्रपूर्वकत्वं तस्याप्येवमिति रीत्या अहोरात्रशून्यप्रलयासिद्धिरित्यर्थः । विपाकः—फलप्रदानौन्मुख्यम् । वृत्तिनिरोधः—भोगनिवृत्तिः । वर्णादीति । सर्गादौ ब्राह्मणाद्यभावेन ब्राह्मणादिमातापितृजत्वेन ब्राह्मण्यादिव्यवस्था न भवतीति भावः । समयानुपलब्धाविति । शब्दसंकेतानुपलम्भ इत्यर्थः । सर्गादावीश्वरसत्त्वेऽपि व्युत्पन्नप्रयोज्यवृद्धाभावादिति भावः । घटादिसम्प्रदायभङ्गः—घटादिव्यवहारविच्छेदः । तद्रूपादर्शनात् तत्करणमपि न स्यादिति भावः ॥

उच्यते—वर्षादिवद्भवोपाधिः वृत्तिरोधः सुषुप्तिवत् ।
उद्भिद्वृश्चिकवद्वर्णाः मायावत्समयादयः ॥ २ ॥

तत्पूर्वकत्वमात्रे सिद्धसाधनात्, अनन्तरतत्पूर्वकत्वे अप्रयोजकत्वात्, वर्षादिदिनपूर्वकतदिन-नियमभङ्गवदुपपत्तेः । राश्यादिविशेषसंसर्गरूपकालोपाधिप्रयुक्तं हि तत्; तदभाव एव व्यावृत्तेः । तथेहापि सर्गानुवृत्तिनिमित्तब्रह्माण्डस्थितिरूपकालोपाधिनिबन्धनत्वात्तस्य, तदभाव एव व्यावृत्तौ को दोषः । न च तदनुत्पन्नमनश्वरं वा, अवयवित्वात् ॥

वृत्तिनिरोधस्यापि सुषुप्त्यवस्थावदुपपत्तेः । न हि—'अनियतविपाकसमयानि कर्माणी'ति तदानीं कृत्स्नान्येव भोगविमुखानि । न ह्यचेतयतः कश्चिद्भोगो नाम; विरो-

---

अत्राभिप्रेतानां सर्गादावहोरात्रः अहोरात्रपूर्वकः अहोरात्रत्वात् कालत्वात् इदानीन्तनाहोरात्र-वदित्याद्यनुमानानामप्रयोजकत्वमाह—वर्षादिवदिति । वर्षादिनस्य वर्षादिनपूर्वकत्वनियमे यथा सिंह-कन्यान्यतरराशिस्थरविसंसर्ग उपाधिः, तथा अहोरात्रस्याहोरात्रपूर्वकत्वनियमे भवः ब्रह्माण्डस्थितिकाल-रूपः उपाधिरित्यर्थः । इह वर्षादिनाहोरात्रत्वादिसाधनावच्छिन्नसाध्यव्यापकत्वं बोध्यम् । तेन न शरत्प्रलयाद्यदिने व्यापकत्वभङ्गः । सुषुप्तिवदिति । एकैकपुरुषकर्मणामनन्तानामपि सुषुप्ताविव प्रलये सर्वकर्मणामपि प्रतिबन्धसंभवेन वृत्तिनिरोध इति भावः । उद्भिदिति । बीजादङ्कुरः वृश्चिकाद्वृश्चिक इति स्थितेऽपि यथा कदाचित् गोमयाद्वृश्चिकः कणादङ्कुरः इति दृश्यते, तथा ब्राह्मणादिपूर्वकत्वेऽपि ब्राह्मणादिवर्णानां सर्गादौ कर्मविशेषोपहितात् भूतविशेषादेव उत्पत्तिरुपपद्यत इति भावः । मायावदिति । मायाविनेव ईश्वरेण नानाशरीरपरिग्रहात् व्यवहारस्सुकर इति भावः ॥

सिद्धसाधनादिति । प्रलयपूर्वाहोरात्रपूर्वकत्वसत्त्वादिति भावः । अव्यवहिततत्पूर्वकत्वे साध्ये अप्रयोजकत्वमाह—अनन्तरेति । तदुपपादयति—वर्षादीति । तद्दिनेति—वर्षादिदिनेत्यर्थः । अत्रेदमवधेयम् । दिनत्वमात्रमत्र साधनतया विवक्षितम्, न वर्षादिदिनत्वम् । उक्तोपाधेस्तद्व्यापकत्वम् । तथा अहोरात्रपूर्वकत्वसाध्येऽपि कालत्वमात्रं साधनमित्यभिमतम् । अतः उभयत्रोपाधेः साधनाव्यापकत्वम् । वर्षादिदिनत्वाहोरात्रत्वादिरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वं च संभवतीति ।

भोगविमुखानीति । न भोगविमुखानीति न हीत्यन्वयः । भोगविमुखान्येवेति भावः । तं उपपादयति—न हीति । विरोधादिति । यत्किञ्चिद्विशेषवति सामान्याभावासंभवादिति भावः । तं

घात्। कस्तर्हि तदानीं शरीरस्योपयोगः? तं प्रति न कश्चित्। तर्हि किमर्थमनुवर्तते? उत्तरभोगार्थम्; चक्षुरादिवत्। प्राणिति किमर्थम्? श्वासप्रश्वाससन्तानेनाऽऽयुपोऽवस्थाभेदार्थम्। तेन भोगविशेषसिद्धेः।

एकस्यैव तत्कथञ्चिदुपपद्यते, न तु विश्वस्येति चेत्—अनन्ततया अनियतविपाकसमयतया उपमर्द्योपमर्दकस्वभावतया च कर्मणां, विश्वस्य, एकस्य वा को विशेषः; येन तन्न भवेत्। भवति च सर्वस्यैव सुस्वापः। क्रमेण, न तु युगपदिति चेत्—न। कारणक्रमायत्तत्वात्कार्यक्रमस्य। न च स्वहेतुबलायातैः कारणैः क्रमेणैव भवितव्यम्; अनियतत्वादेव सर्वग्रासवत्। ग्रहाणां ह्यन्यदा समागमानियमेऽपि, तथा कदाचित् स्यात् तथा कालाद्यनियमेऽपि सर्वमण्डलोपरागः स्यात्-त्रिदोषसन्निपातवद्वा। यथा हि वातपित्तश्लेष्मणां चयप्रकोपप्रशमक्रमानियमेऽपि एकदा सन्निपातः स्यात्, तदा देहसंहारः, तथा कालानलपवनमहार्णवानां सन्निपाते ब्रह्माण्डदेहप्रलयावस्थायां युगपदेव भोगरहिताश्चेतनास्स्युरिति को विरोधः?। तथाऽपि विदेहाः कर्मिण इति दुर्घटमिति चेत्—किमत्र दुर्घटम्; भोगनिरोधवत् शरीरेन्द्रियविषयनिमित्तनिरोधादेव तदुपपत्तेः।

वृश्चिकतण्डुलीयकादिवत् वर्णादिव्यवस्थाऽप्युपपद्यते। यथा हि वृश्चिकपूर्वकत्वेऽपि

प्रति सुषुप्तं प्रति तदवस्थायां न कश्चिदुपयोग इति भावः। सन्तानेन—तत्तत्प्रतिनियतसंख्याविशेषोपहितेन समूहेन। अवस्थाभेदः—बाल्यकौमारादि। तेन—अवस्थाभेदेन।

अनन्ततयेति। एकैकस्यापि पुरुषस्य कर्मणामानन्त्यादिति भावः। उपमर्द्योपमर्दकेति। परस्परबाध्यबाधकस्वभावतयेति भावः। सर्वग्रासवत् सर्वमण्डलोपरागवत्। त्रिदोषेति—वातपित्तश्लेष्मरूपेत्यर्थः। चयप्रकोपप्रशमक्रमानियमेऽपीति। साम्याधिक्यक्षयक्रमानियमेऽपीत्यर्थः। सन्निपातः—सर्वेषां प्रकोपः। ब्रह्माण्डदेहेति। ब्रह्माण्डरूपो देहः तदन्तर्वर्तिदेहा इति वार्थः। ननु कर्मरहितस्यैवाशरीरत्वश्रवणात् कर्मिणां तन्नोपपद्यत इति शङ्कते—तथापीति। कर्मणां भोगार्थमेव शरीरारम्भकत्वात् भोगनिरोधकाले शरीरतन्निमित्तादिनिरोधोऽपि नानुपपन्न इति समाधत्ते-किमत्र दुर्घटमिति॥

तण्डुलीयकं—शाकविशेषः। क्षीरदधीति। क्षीरादिद्व्यणुकादेः क्षीरादिपूर्वकत्वेऽपि तद्व्यणुकस्य न तत्पूर्वकत्वं क्षीरत्वादेः परमाणुवृत्तित्वाभावात्। एवं कदलीकाण्डस्य तत्पूर्वकत्वेऽपि कचि-

वृश्चिकस्य, गोमयादाद्यः, तण्डुलीयकपूर्वकत्वेऽपि तण्डुलीयकस्य, तण्डुलकणादाद्यः; वह्निपूर्वकत्वेऽपि वह्नेः, अरणेराद्यः, एवं क्षीरदधिघृततैलकदलीकाण्डादयः तथा मानुषपशुगोब्राह्मणपूर्वकत्वेऽपि तेषां प्राथमिकास्तत्तत्कर्मोपनिबद्धभूतभेदहेतुका एव। स एव हेतुः सर्वत्रानुगत इति सर्वेषां तत्सान्तानिकानां समानजातीयत्वमिति किमसङ्गतम्। गतं तर्हि गोपूर्वकोऽयं गोत्वादित्यादिना। न गतम्। योनिजेष्वेव व्यवस्थापनात्। मानसास्त्वन्यथापीति। गोमयवृश्चिकादिवदिदानीमपि किं न स्यादिति चेत्—न, कालविशेषनियतत्वात्कार्यविशेषाणाम्। न हि वर्षासु गोमयाच्छालूक इति हेमन्तेऽपि स्यात्॥

समयोऽप्येकेनैव, मायाविनेव, व्युत्पाद्यव्युत्पादकभावावस्थितनानाकार्याधिष्ठानात् व्यवहारत एव सुकरः। यथा हि मायावी सूत्रसञ्चाराधिष्ठितं दारुपुत्रकं इदमानयेति प्रयुङ्क्ते। स च दारुपुत्रकः तथा करोति। तदा चेतनव्यवहारादिव तद्दर्शी बालो व्युत्पाद्यते तथा इहापि स्यात्। क्रियाव्युत्पत्तिरपि तत एव कुलालकुविन्दादीनाम्॥

सृष्ट्यादिसाधकानुमानप्रयोगः

सर्गादावेव किं प्रमाणमिति चेत्—विश्वसन्तानोऽयं दृश्यसन्तानशून्यैः समवायिभि-

---

द्वेत्रबीजादिपूर्वकत्वमपि दृश्यत इति भावः। हेतुभेदोपगमे सर्गादावुत्पन्नस्य ब्राह्मणादेरिदानीन्तनस्य च समानजातीयत्वं न स्यादित्यत्राह—स एव इति। कर्मविशेषोपहितभूतभेदस्य ब्राह्मणादिपूर्वकेऽपि हेतुत्वसंभवादिति भावः॥ योनिजेष्वेवेति। योनिजत्वेन हेतुविशेषणात् न व्यभिचारः इति भावः। इदानीमपि किं न स्यादिति। सर्गादाविव इदानीमपि अमानुषादिपूर्वकः मानुषादिः कुतो नोत्पद्यते इति भावः। शालूकः-भेकः।

नानाकार्याधिष्ठानादिति। प्रयोज्यप्रयोजकवृद्धशरीरद्वयाधिष्ठानादित्यर्थः। व्यवहारत एव सुकर इति। न चेश्वरज्ञानस्य नित्यतया वाक्याजन्यत्वात् तदनुमितेः भ्रमतया तन्मूलकव्युत्पत्तिग्रहस्यापि भ्रमत्वं, गोपदं गवि शक्तं इति ज्ञानस्य तद्वति तत्प्रकारकतया प्रमात्वात्॥

प्रलये बाधकाभावेऽपि साधकं किमिति पृच्छति—सर्गादाविति। आदिना प्रलयग्रहणम्। अनुमानमाह—विश्वसन्तान इति। निखिलकार्यसमुदाय इत्यर्थः। दृश्येति। द्व्यणुकाद्यन्त्यावयविपर्यन्तकार्यवर्गशून्यैः परमाणुभिरारब्ध इत्यर्थः। तादृशपरमाणुसद्भावदशैव प्रलय इति भावः। कार्यपक्षक-

रारब्धः सन्तानत्वात् आरणेयसन्तानवत् । वर्तमानब्रह्माण्डपरमाणवः पूर्वमुत्पादितसजातीय-सन्तानान्तराः नित्यत्वे सति तदारम्भकत्वात् प्रदीपपरमाणुवदित्यादि ॥

अवयवानामावापोद्वापादुत्पत्तिविनाशौ च स्याताम्, सन्तानाविच्छेदश्चेति को विरोध इति चेत्-न, एवं हि पटादिसन्तानाविच्छेदोऽपि स्यात् । विपर्ययस्तु दृश्यते । कर्त्रादिभोगविशेषसम्पादनप्रयुक्तोऽसाविति चेत्-न, द्व्यणुकेषु तदभावात् । तथा च तत्रावयवानामपगमाभावेऽनादित्वप्रसङ्गे द्व्यणुकत्वव्याघातः । तस्मात् यत्कार्यं यन्निबन्धनस्थिति, तदपगमे तन्निवृत्तिः । यत् यद्धेतुकं, तदुपगमे तस्योत्पत्तिः । न च कार्यस्य स्थितिनिबन्धनं नित्यमेव ; नित्यस्थितिप्रसङ्गात् । न च नित्य एव हेतुः ; अकादाचित्कत्वप्रसङ्गात् । तत् अतिनिस्तरङ्गमेतत् । ईदृश्यां च वस्तुस्थितौ भोगोऽपि कर्मभिरेवमेव वस्तुस्वभावानति-

---

मुक्त्वा कारणपक्षकमनुमानमाह—वर्तमानेति । अत्र पूर्वोत्तरसन्तानान्तरालकालः प्रलय इति भावः । पूर्वमनारब्धपटैस्तन्तुभिः व्यभिचारवारणाय नित्यत्वे सतीति । व्योम्नि तद्वारणाय तदारम्भकत्वादिति ॥

ननु स्थिरस्थिरतरमहीमहीधरादिसन्तानानामप्यत्यन्तोच्छेदे न मानमस्ति । अवयवित्वेन उत्पत्तिविनाशावश्यंभावेऽपि भिन्नभिन्नसजातीयसन्तानानुवृत्तौ बाधकाभावात् । तथा च न प्रलयसिद्धिरिति शङ्कते—अवयवानामिति । प्रतिबन्दीमाह—एवं हीति । विपर्यय इति । घटादिसन्तानविच्छेद इत्यर्थः । विच्छेदस्य सन्तानत्वव्याप्यत्वमुपगन्तव्यमिति भावः । तत्र भोगविशेषसम्पादकत्वमुपाधिरित्याह—कर्त्रादीति । तर्हि द्व्यणुकनाशो न स्यादित्याह—द्व्यणुकेष्विति । तदभावादिति । भोगसंपादकत्वाभावादित्यर्थः । इष्टापत्तावनिष्टमाह—तथा चेति । अनादित्वेति । अविनाशिभावस्यानुत्पत्तिनियमादिति भावः । द्व्यणुकत्वव्याघात इति । द्वाभ्यां अणुभ्यामारब्धस्यैव तत्त्वादिति भावः । कार्यसन्तानस्थितिहेतोरनित्यत्वात् सन्तानविच्छेदो निष्प्रकम्प्य इत्युपसंहरति—तस्मादिति । यद्धेतुकमिति दृष्टान्तार्थमुपादानम् । पूर्वसन्ताननाशे हेतुविलम्बेनोत्तरसन्तानानुत्पादे सन्तानविच्छेदसंभवप्रदर्शनार्थं वा । एवं द्व्यणुकस्यापि नाशसिद्धौ पूर्वोक्तोपाधिः साध्याव्यापक इति भावः । वस्तुतस्तु साधनव्यापकत्वेनानुपाधित्वाद्व्याप्तिसिद्धिरित्याह—ईदृश्यां चेति । अनित्यहेत्वधीनत्वेनानित्यायां कार्यसामान्यस्थितावित्यर्थः । कर्मभिस्संपादनीयो भोगः । एवमेव वस्तुस्वभावानतिक्रमेण तत्तत्कार्येण

क्रमेण सम्पादनीय इति द्व्यणुकवत् पिपीलिकाण्डादेर्ब्रह्माण्डपर्यन्तस्यापि विश्वस्येयमेव गतिरिति प्रतिबन्धसिद्धिः ॥

तथा च ब्रह्माण्डे परमाणुसाद्भवितरि परमाणुषु च स्वतन्त्रेषु पृथगासीनेषु तदन्तःपातिनः प्राणिगणाः क्व वर्तन्ताम्, कुपितकपिकपोलान्तर्गतोदुम्बरमशकसमूहवत्, दवदहनदह्यमानदारूदरविघूर्णमानघुणसंघातवत्, प्रलयपवनोल्लासनीयौर्वानलनिपातिपोतसांयात्रिकसार्थवद्वेति ॥

वेदसम्प्रदायस्य ह्रासनिरूपणम्

अपि च— जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः ।
ह्रासदर्शनतो ह्रासः संप्रदायस्य मीयताम् ॥ ३ ॥

पूर्वं हि मानस्यः प्रजाः समभवन्; ततोऽपत्यैकप्रयोजनमैथुनसंभवाः, ततः कामावर्जनीयसन्निधिजन्मानः; इदानीं देशकालाद्यव्यवस्थया पशुधर्मादेव भूयिष्ठाः, पूर्वं चरुप्रभृतिषु संस्काराः समाधायिषत; ततः क्षेत्रप्रभृतिषु; ततो गर्भादितः; इदानीं तु जातेषु लौकिकव्यवहारमाश्रित्य । पूर्वं सहस्रशाखो वेदोऽध्यगायि; ततो व्यस्तः; ततः षडङ्ग एकः, इदानीं तु क्वचिदेका शाखेति । पूर्वं ऋतवृत्तयो ब्राह्मणाः प्राद्योतिषत; ततोऽमृतवृत्तयः । ततो

भोगादृष्टाधीनेन साक्षाद्वा परम्परया वा संपाद्यत इति भोगसंपादकत्वं कार्यसामान्यस्याविशिष्टमिति भावः ।

ननु ब्रह्माण्डनाशेऽपि तदन्तर्वर्तिनः प्राणिगणाः पर्वतादिसन्तानाश्च केचिदनुवर्तन्तामित्यत आह तथा चेति । क्व वर्तन्तां विनश्यन्त्येवेति भावः । एवं सर्वनाशे वेदोऽपि नश्यतीत्युपपाद्य ह्रासदर्शनादपि तन्नाशसिद्धिरित्याह - अपि चेति । शक्तेरिति । वेदाध्ययनतदर्थानुष्ठानशक्तेश्च ह्रासदर्शनादिति भावः । संप्रदायस्य इति । इदानीन्तनवेदाध्ययनसंप्रदायस्यापीत्यर्थः । इदानीं श्रूयमाणा अपि वेदाः उच्छेत्स्यन्ति वेदत्वात् उत्सन्नवेदवत् । समाधायिषत सम्यगाहिता अभूवन् । ऋतेति । तेन

'ऋतं उंच्छशिलं ज्ञेयं अमृतं स्यादयाचितम् ।
मृतं तु याचितं भैक्ष्यं प्रमृतं कर्षणं स्मृतम् ॥

मृतवृत्तयः; संप्रति प्रमृतसत्यानृतकुसीदपाशुपाल्यश्ववृत्तयो भूयांसः। पूर्वं दुःखेन ब्राह्मणैरतिथयोऽलभ्यन्त; ततः क्षत्रियातिथयोऽपि संवृत्ताः ततो वैश्याऽऽवेशिनोऽपि संप्रति शूद्रान्नभोजिनोऽपि। पूर्वममृतभुजः; ततो विघसभुजः; ततोऽन्नभुजः; संप्रत्यघभुज एव। पूर्वं चतुष्पाद्धर्म आसीत्; ततस्तनूयमाने तपसि त्रिपात्, ततो म्लायति ज्ञाने द्विपात्; संप्रति जीर्यति यज्ञे दानैकपात्। सोऽपि पादो दुरागतादिविपादिकाशतदुःस्थः अश्रद्धामलकलङ्कितः कामक्रोधादिकण्टकशतजर्जरः प्रत्यहमपचीयमानवीर्यतया इतस्ततः स्खलन्निवोपलभ्यते॥

इदानीमिव सर्वत्र दृष्टान्नाधिकमिष्यते इति चेत्—न, स्मृत्यनुष्ठानानुमितानां शाखानामुच्छेददर्शनात्। स्वातन्त्र्येण स्मृतीनामाचारस्य च प्रामाण्यानभ्युपगमात्। मन्वादीनामतीन्द्रियार्थदर्शने प्रमाणाभावात्। आचारात् स्मृतिः, स्मृतेश्चाचार इत्यनादिताभ्युपगमे अन्धपरम्पराप्रसङ्गात्॥

सत्यानृतं तु वाणिज्यं कुसीदं च कलान्तरम्।
पाशुपाल्यं च गोरक्षा श्ववृत्तिः परसेवनम्॥

इत्याद्यनुसन्धेयम्। वैश्यावेशिनः—वैश्यगृहाभ्यागताः। अमृतभुजः—यज्ञशेषभुजः विघसभुजः—अतिथिशेषभुजः। अन्नभुजः—भृत्यशेषभुजः। अघभुजः—स्वार्थसाधितभुजः। चतुष्पादिति। तपो ज्ञानं यज्ञो दानमिति चत्वारः पादाः इत्यर्थः। तनूयमाने कृशीभूते लुप्तप्राय इति भावः। म्लायति—संकुचिते। संप्रत्येकपादोऽपि अस्खलितो न लक्ष्यत इत्याह—सोऽपीति। दुरागतं—द्यूतादितः दुर्मार्गादागमनम्। विपादिका—पादरोगः॥

वेदह्रासोऽसिद्ध इत्याह—इदानीमिति। सर्वत्र—कालान्तरेऽपि। दृष्टादिति। इदानीमधीयमानादित्यर्थः। अष्टकादिस्मृतिमूलवेदभागानामिदानीमध्ययनादर्शनेन उच्छेदसिद्धिरित्याह—नेति। ननु स्मर्तारस्स्वयमदृष्टं साक्षात्कृत्य तत्साधनमुपदिशन्त्वित्यत्राह—मन्वादीनामिति। ननु पूर्वाचारदर्शनात् स्मृतिप्रणयनं, ततः पुनरिदानीमाचार इति कृतं मूलवेदकल्पनेन इत्यत्राह—आचारादिति। उभयोरपि तयोरन्यमूलकत्वेन अव्यवस्थापकत्वादिति भावः।

आचारेण वेदानुमानस्य निराकरणम्

आसंसारमनाम्नातस्य च वेदत्वव्याघातेनानुमानायोगात् । उत्पत्तितोऽभिव्यक्तितोऽभिप्रायतो वाऽनवच्छिन्नवर्णमात्रस्य निरर्थकत्वात् ॥

यदि च शिष्टाचारत्वादिदं हितसाधनं, कर्तव्यं वेत्यनुमितम्, किं वेदानुमानेन, तदर्थस्यानुमानत एव सिद्धेः । न च धर्मवेदनत्वात् इदमेवानुमानं अनुमेयो वेदः, प्रत्यक्षसिद्धत्वात्, अशब्दत्वाच्च ॥

अथ शिष्टाचारत्वात्प्रमाणमूलोऽयमिति चेत्—ततस्सिद्धसाधनम्, प्रत्यक्षमूलत्वाभ्युगगमात्; तदसम्भवेऽप्यनुमानसम्भवात् । नित्यमज्ञायमानत्वात्तत् अप्रत्यायकं कथमनुमानं कथं च मूलमिति चेत्-वेदः किमज्ञायमानः प्रत्यायकः, अप्रत्यायक एव वा मूलम्, येन जडतम तमाद्रियसे ॥ अनुमितत्वात् ज्ञायमान एवेति चेत् - लिङ्गमप्येवमेवास्तु । अनुमेयप्रतीतेः प्राक्तनी लिङ्गप्रतीतिरपेक्षिता, कारणत्वात्, न तु पश्चात्तनीति चेत्-शब्दप्रतीतिरप्येवमेव ॥

नित्यानुमेयो वेदो मूलमस्त्वित्यत्राह — आसंसारमिति । अभिव्यक्तित इति परमतेन । निरर्थकत्वात् — अर्थप्रमित्यजनकत्वात् । तथा च वेदजनकत्वाभावेन वेदत्वव्याघातात् वेदमूलकत्वव्याप्त्या न नित्यानुमेयवेदसिद्धिरिति भावः ॥

नन्वनुमेयवेदेनार्थप्रतीतेरजननेऽपि अनुमानात् संभवः स्यात् इत्याशङ्कामनूद्य दूषयति—यदि चेत्यादिना । तर्हि तदनुमानमेव नित्यानुमेयो वेदस्स्यादिति शङ्कां निराकरोति—न चेति । सिद्धत्वादिति । प्रत्यक्षत्वादनुमेयत्वं अशब्दत्वाद्वेदत्वं च न भवतीति भावः ।

प्रमाणसामान्यानुमाने पक्षधर्मताबलात् वेदरूपविशेषसिद्धिस्स्यात् इति शङ्कते-अथेति । आचारस्य प्रत्यक्षत्वेऽपि तत्कर्तव्यतायास्तदभावात् प्रमाणबोधितकर्तव्यताकत्वे साध्ये न प्रत्यक्षमादाय सिद्धसाधनमित्यत आह—तदसंभवेऽपीति । कर्तव्यतानुमापकलिङ्गविशेषज्ञानासंभवात् अनुमानमादायापि न सिद्धसाधनमित्याशङ्कते — नित्यमिति । वेदस्यापि विशेषरूपेणानिश्चितस्य तुल्यमिदमिति परिहरति वेद इति । प्रमाणत्वेन सामान्यतः ज्ञानं तुल्यमित्याह — अनुमितत्वादिति । शिष्टाचारत्वात् प्रमाणमूल इत्यनुमितिविषयत्वादिति भावः । अनुमेयप्रतीतेः कर्तव्यताप्रतीतेः लिङ्गप्रतीतिः प्रमाण-

आचारस्वरूपेण शब्दमूलत्वमनुमीयते। तेन तु शब्देन कर्तव्यता प्रतीयत इति चेत्-न, आचारस्वरूपस्य प्रत्यक्षसिद्धत्वेन मूलान्तरानपेक्षणात्। तस्मात् कर्तव्यतायां प्रत्यक्षाभावात्, अप्रमिततया च शब्दानुमानानवकाशात्, प्रत्यक्षश्रुतेरसम्भवात्, शिष्टाचारत्वेनैव कर्तव्यतामनुमाय तया मूलशब्दानुमानम्। तथा च किं तेन; तदर्थस्य प्रागेव सिद्धेः।

तथाऽप्यागममूलत्वमेव तस्य; व्याप्तेरिति चेत्-अत एव तर्हि तस्य प्रत्यक्षानुमानमूलत्वमनुमेयम्। आदिमतस्तत्त्वं स्यात् अयं त्वनादिरिति चेत्-आचारोऽपि तर्हीदम्प्रथमस्तथा स्यात्, अयं त्वनादिर्विनाऽप्यागमं भविष्यति। आचारकर्तव्यतानुमानयोरेवमनादित्वमस्तु, किं नः च्छिन्नमिति चेत् - प्रथमं तावन्नित्यानुमेयो वेद इति, द्वितीयं च देशनैव धर्मे प्रमाणमिति॥

प्रतीतिः। न तु पश्चात्तनीति। नापि समानकालिकीत्यपि बोध्यम्। तेन प्रमाणबोधितकर्तव्यताक इत्यनुमितौ कर्तव्यतया साकमेकज्ञानविषयत्वेऽपि नोपयोग इति भावः। नायं दोषस्तुल्योऽस्माकम् आचारेण प्रथमं शब्दमनुमाय पश्चात् ज्ञातेन तेन कर्तव्यताप्रतीतेरुपगमादिति शङ्कते—आचारेति। आचारकर्तव्यतालिङ्गेन शब्दानुमानशङ्कां निराकरोति—तस्मादिति। कर्तव्यताया अज्ञाने तया शब्दानुमानं न भवति, ज्ञाने च शब्दानुमानं व्यर्थमिति भावः। ननु कर्तव्यतायाः प्रागेव सिद्धिरस्तु, तथापि दर्शाद्याचारकर्तव्यत्वस्य वेदमूलकत्वदर्शनेन व्याप्त्यवगमात् तद्बलात्—प्रकृताचारकर्तव्यत्वस्यापि वेदमूलकत्वं सिध्यतीत्याशङ्कते—तथापीति। क्वचित् सहचारदर्शनमात्रेणान्यत्रापि सिद्ध्युपगमे लौकिकवाक्यस्य प्रत्यक्षादिमूलकत्वदर्शनेन आगमस्यापि तत्सिद्धिस्स्यादिति समाधत्ते अत एवेति। आदिमत्त्वमुपाधिरित्याह—आदिमत इति। तर्ह्युपाधेः तुल्यतया प्रकृताचारेऽपि नागममूलत्वं सिद्ध्येदित्याह—आचारोऽपीति। प्रथमतः—आदिमत्तायां इदंप्रथमः ज्योतिष्टोमाद्याचारः आगमादुपलभ्य क्रियते इति भावः। मास्त्वागममूलोऽयमाचारः अनादिरेवास्तु, तथा तत्कर्तव्यतानुमानमपि तन्मूलत्वात् का तावता मीमांसकानां हानिरिति शङ्कते—आचार इति। च्छिन्नं प्रथममाह—प्रथममिति। अनाद्याचारेण वेदानुमानादिति भावः। द्वितीयमाह—द्वितीयं चेति। कर्तव्यतानुमानस्यापि प्रमाणत्वोपगमादिति भावः॥

अथायमाशयः। वैदिका अप्याचाराः राजसूयाश्वमेधादयः समुच्छिद्यमानाः दृश्यन्ते; यत इदानीं नानुष्ठीयन्ते। न चैते प्रागपि नानुष्ठिता एव, तदर्थस्य वेदराशेरप्रामाण्यप्रसङ्गात् समुद्रतरणोपदेशवत्। न चैवमेवास्तु; दर्शाद्युपदेशेन तुल्ययोगक्षेमत्वात्। एवं पुनः स कश्चित् कालो भविता यत्रैतेऽनुष्ठास्यन्ते। तथाऽन्येप्याचाराः समुच्छेत्स्यन्ते अनुष्ठास्यन्ते च, इति न विच्छेदः। ततस्तद्वदागममूलता इति चेत् - एवं तर्हि प्रवाहादौ लिङ्गाभावे कर्तव्यत्वागमयोरननुमानात्, असत्यां प्रत्यक्षश्रुतौ आचारसङ्कथाऽपि कथमिति सर्वविप्लवः। तस्मात्, प्रत्यक्षश्रुतिरेव मूलमाचारस्य, सा चेदानीं नास्तीति शाखोच्छेदः।

वेदशाखानामुच्छेदस्य समर्थनम्

अधुनाऽप्यस्ति साऽन्यत्रेति चेत् - अत्र कथं नास्ति? किमुपाध्यायवंशानामन्यत्र गमनात्, तेषामेवोच्छेदाद्वा, आहोस्वित् स्वाध्यायविच्छेदात्। न प्रथमद्वितीयौ; सर्वेषामन्यत्र गमने उच्छेदे वा नियमेन भारतवर्षे शिष्टाचारस्याप्युच्छेदप्रसङ्गात्; तस्याध्येतृसमानकर्तृ-

---

अथोक्तमाचारस्य प्रवाहानादित्वमसहमानः ननु राजसूयाश्वमेधाद्याचारवदितराचारसामान्यमप्यधिकारिदौर्लभ्यादिना विच्छन्नप्रवाहतया तद्वदेवागममूलक एवेति साधने नोक्तसिद्धसाधनादिदोष इति शङ्कते—अथेति। अत्र विमतः आचारः विच्छेदान्तरितप्रवाहवान् आचारत्वात् इत्यनुमानं विवक्षितम्। अप्रामाण्यप्रसङ्गादित्यननुष्ठानलक्षणमप्रामाण्यमिह विवक्षितम्। दर्शाद्युपदेशेन—दर्शादियागविधिना। न विच्छेद इति। नात्यन्तविच्छेद इत्यर्थः। तथा च पुनराचरणारंभस्य आचारमूलत्वासम्भवाद् मूलवेदानुमानमिति भावः। प्रलये स्मृत्याचारयोरुच्छेदात् आगमानुमापकहेतुरसिद्ध इत्याह—एवं तर्हीति। प्रवाहादाविति। आचारप्रवाहारंभ इत्यर्थः। सर्गादाविति भावः। न च तदानीमीश्वरेणाचारप्रदर्शनं तत्तदाचारानुगुणतत्तद्वर्णाश्रमपरिग्रहकल्पने गौरवात्, ईश्वरानभ्युपगमाच्च। ननु इदानीमस्माकं स्मृत्याचारमूलशाखानुपलंभमात्रेण न तदुच्छेदमभ्युपगच्छामः येनाधीयमानाप्युच्छेत्स्यत इति संभावयेम, किन्तु साप्यधुना देशान्तरेऽधीयत इति अनुच्छिन्नैवेति शङ्कते अधुनापीति। आध्यात्मिकशक्तीति। ग्रहणधारणानुष्ठानौपयिकशारीरशक्तिरित्यर्थः। तस्य—स्वाध्यायविच्छेदस्य। स्वाध्यायानुष्ठानौपयिकशक्तिप्रदर्शनपूर्वक तद्विच्छेदात स्वाध्यायादिविच्छेद इत्युपसंहरति—तस्मादिति। कुतस्तर्हि न सर्वोच्छेद इत्यत्राह—विश्वेति। क्वचित केनचित्

कत्वात्। अन्यत आगतैराचारप्रवर्तने अध्ययनप्रवर्तनमपि स्यात्। न तृतीयः, आध्यात्मिक-शक्तिसमपन्नानामन्तेवासिनामविच्छेदे तस्यासम्भवात्। तस्मादायुरारोग्यबलवीर्यश्रद्धाशमदम-ग्रहणधारणादिशक्तेरहरहरपचीयमानत्वात् स्वाध्यायानुष्ठाने शीर्यमाणे कथञ्चिदनुवर्तते, विश्वपरिग्रहाच्च न सहसा सर्वोच्छेद इति युक्तमुत्पश्यामः।

गतानुगतिको लोक इत्यप्रामाणिक एवाचारः, न तु शाखोच्छेदः, अनेकशाखागतेति-कर्तव्यतापूरणीयत्वादेकस्मिन्नपि कर्मण्यनाश्वासप्रसङ्गात् इति चेत् न। एवं हि महाजनपरि-ग्रहस्योपप्लवसम्भवे वेदा अपि गतानुगतिकतयैव लोकैः परिगृह्यन्त इति, न वेदाः प्रमाण स्युः। तथा च वृश्चिकभिया पलायमानस्याशीविषमुखे निपातः। एतमेव च कालक्रमभाविशाखो-च्छेदभाविनमनाश्वासमाशङ्कमानैर्महर्षिभिः प्रतिविहितम्। अतो नोक्तदोषोऽपि॥

न चायमुच्छेदो ज्ञानक्रमेण; येन श्लाघ्यः स्यात्। अपि तु प्रमादमदमानाऽऽलस्य-नास्तिक्यपरिपाकक्रमेण। ततश्चोच्छेदानन्तरं पुनः प्रवाहः, तदनन्तरं च पुनरुच्छेद इति

किञ्चिदधीयत इति भावः। कालविशेषे सर्वदेशसाधारण एव स्यादिति शाखोच्छेद आवश्यक एवे-त्याशयः। यद्यस्याचारस्य प्रामाणिकत्वं स्यात् तदा सन्मूलशाखोच्छेदोऽपि संभाव्येत, न त्वेतदस्ति। गतानुगतिकत्वेन लोकप्रवृत्तेरपारमार्थिकत्वात्। अनेकशाखेपगमे तत्तदुक्ताङ्गकलापोपसंहारस्याशक्यतया सर्वत्रानाश्वासप्रसङ्गाच्चेति शङ्कते—गतानुगतिक इति। कतिपयशाखोच्छेदधिया महाजनपरिग्रह-स्यापि प्रामाण्यनियामकत्वानुपगमे वेदप्रामाण्यस्यैव भङ्गः स्यादित्याह—एवमिति। तर्हि कृत्स्नाङ्गो-पसंहारासंभवात् कथमनुष्ठाने समाश्वास इत्यत्राह—एवमिति। प्रतिविहितमिति कल्पसूत्रादिप्रणय-नेनेति भावः॥

ननु मूलशाखायाः प्रमाणत्वे विद्यमानशाखावत् उच्छेदो न स्यात्, विच्छिन्नत्वात्त्वप्रमाणमित्यु-च्यते इत्यत्राह न चायमिति।—ज्ञानक्रमेणेति। विचारानन्तरभाविना विवेकेनेत्यर्थः। अप्रामाणि-कत्वज्ञानेनेति भावः। उच्छेदस्य प्रमादादिहेत्वन्तराधीनत्वादेव पुनः प्रवाहोऽपि भवितेत्याह-ततश्चेति। कृतहान इति। उच्छिन्नशाखैकवेद्यधर्मसाधनदेहारम्भकादृष्टस्य पुनःप्रवाहानुपगमे फलहानिः स्यादिति भावः। एवं विद्यमानप्रवाहोऽपि उच्छेदपूर्वक इति न परतन्त्रपुरुषपूर्वकोऽयमनादिः संप्रदाय इत्युपसंहरति—तथा चेति। अयमिति। वेदप्रामाण्यनियामक इत्यर्थः।

सारस्वतमिव स्रोतः, अन्यथा कृतहानप्रसङ्गात्। तथा च भाविप्रवाहवत् भवन्नप्ययमुच्छेद-पूर्वक इत्यनुमीयते। स्मरति च भगवान् व्यासः गीतासु भगवद्वचनम्—

'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानम् सृजाम्यहम्॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय संभवामि युगे युगे॥ (गी ४, ७, ८,)

इति॥

कः पुनरयं महाजनपरिग्रहः हेतुदर्शनशून्यैर्ग्रहणधारणार्थानुष्ठानादिः। स ह्यत्र न स्यात् ऋते निमित्तम्॥

न ह्यत्रालस्यादिर्निमित्तम्; दुःखमयकर्मप्रधानत्वात्। नाप्यन्यत्र सिद्धप्रामाण्येऽभ्युपायेऽनधिकारेणास्मिन्ननन्यगतिकतयाऽनुप्रवेशः। परैः पूज्यानामप्यत्राप्रवेशात्। नापि भक्ष्यपेयाद्यद्वैतरागः, तद्विभागव्यवस्थापरत्वात्। नापि कुतर्काभ्यासाहितव्यामोहः आकुमारं प्रवृत्तेः। नापि संभवद्विप्रलम्भपाषण्डसंसर्गः पित्रादिक्रमेण प्रवर्तनात्। नापि योगाभ्यासाभिमानेनाव्यग्रताभिसन्धिः, प्राथमिकस्य कर्मकाण्डे सुतरां व्यग्रत्वात्। नापि जीविकाः प्रागुक्तेन न्यायेन दृष्टफलाभावात्। नापि कुहकवञ्चनाः प्रकृते तदसम्भवात्॥

परैः पूज्यानामपीति। तन्मतप्रविष्टतया पूज्यमानानामपीत्यर्थः। तेषामेव वैदिकमते प्रवेशानुपगमे तत्राप्यनधिकृतानां प्रवेशो नास्तीति किमु वक्तव्यमिति भावः। अद्वैतराग इति। अनियमस्पृहेति भावः। योगेति। चित्तनिरोध एव कर्तव्यः, न चित्तविक्षेपहेतुरित्यभिमानेनेति भावः। प्राथमिकस्येति। ब्रह्मचारिण इत्यर्थः। यदि चित्तविक्षेपहेतुः न कर्तव्य इति मतिस्स्यात्, तदा तादृशकर्मप्रचुरकर्मकाण्डाध्ययने स न प्रवर्तेतेति भावः। प्रागुक्तेनेति। 'विफला विश्ववृत्ति' रित्यत्रोक्तेनेत्यर्थः। अतः उक्तानां निमित्तानामभावात् प्रामाण्यमेव वेदस्य महाजनपरिग्रहनिमित्तमिति भावः।

बौद्धाद्यागमस्य निमित्तान्तरसंभवात् न प्रामाण्यनियामकः परिग्रह इत्याह—सम्भवन्ति चेति। उभयोरन्तरमिति।

सम्भवन्ति चैते हेतवो बौद्धाद्यागमपरिग्रहे। तथा हि भूयः तत्र कर्मलाघवमिति अलसाः – इतः पतितानामप्यनुप्रवेश इत्यनन्यगतिकाः भक्ष्याद्यनियम इति रागिणः स्वेच्छया परिग्रह इति कुतर्काभ्यासिनः पित्रादिक्रमाभावात् प्रवृत्तिरिति पाषण्डसंसर्गिणः–

'उभयोरन्तरं ज्ञात्वा कस्य शौचम् विधीयते'

इत्यादिश्रवणादव्यग्रताभिमानिनः सप्तघटिकाभोजनादिसिद्धेर्जीविकेत्ययोग्याः आदित्यस्तम्भनम् पाषाणपाटनम्, शाखाभङ्गः भूतावेशः, प्रतिमाजल्पनम्, धातुवाद इत्यादिधन्धनात्, कुहकवञ्चितास्तान् परिगृह्णन्तीति सम्भाव्यते। अतो न ते महाजनपरिगृहीता इति विभागः।

पुनः सर्गे हेतुनिरूपणम्

स्यादेतत्- यद्येवम् सर्वकर्मणां वृत्तिनिरोधः, न किञ्चिदुत्पद्यते, न किञ्चिद्विनश्यतीति स्तिमिताकाशकल्पे जगति कुतो विशेषात् पुनः सर्गः? प्रकृतिपरिणतेरिति सांख्यानां शोभते। ब्रह्मपरिणतेरिति भास्करगोत्रे युज्यते। वासनापरिपाकादिति सौगतमतमनुधावति। कालाविशेषादिति चोपाधिविशेषाभावादयुक्तम् असतां चोपलक्षणनां न विशेषकत्वम्; सर्वदा

'अत्यन्तमलिनः कायो देही चात्यन्तनिर्मल'

इति पूर्वार्धमस्य। सप्तघटिकेति। मध्याह्नकर्तव्यकर्मपरित्यागादिति भावः। धन्धनात्—निरर्थकाद स्थिरफलरहितात्। अल्पास्थिरफलकादिति यावत्॥

पुनः सर्गे किं कारणमिति पृच्छति–स्यादेतदिति। स्तिमिताकाशकल्पे।—निश्चलाकाशकल्पे। तथा च प्रलयाङ्गीकारे केवलपरमाणुपरिशेषे जगति क्रियाविशेषानङ्गीकारात् पुदस्सर्गारम्भानुपपत्त्या विद्यमानजगदुपलम्भो दुर्घट एव स्यादिति भावः। तदानीमुपाधिविशेषाणामभावेऽपि पूर्वभाविनामुलक्षणत्व स्यादित्यत्राह—असतामिति। अतीतानां सूर्यपरिस्पन्दादीनामित्यर्थः। अनित्यस्य तस्येति। ज्ञानस्येति अर्थः। नित्यस्येति। ईश्वरज्ञानस्येत्यर्थः। सर्वदा सत्त्वात्समानविषयत्वाच्चेति भावः। तथा च पुनस्सर्गारम्भकस्य दुर्वचत्वात् प्रलयों नाङ्गीकर्तुमुचित इत्युक्तं भवति अत्र युगपत्सर्ववृत्तिनिरोधेऽपि स्वापे श्वाससन्तानानुवृत्त्या पुनः प्रबोधवत् प्रलयेऽपि परमाणुकर्मसन्तनानुवृत्त्या पुनस्सर्ग इत्याह—शरीरेति। लब्धसंस्काराणामिति। वेगाख्यसंस्कारः विवक्षितः।

तुल्यरूपत्वात्। न च ज्ञानद्वारा ; अनित्यस्य तस्य तदानीमभावात् ; नित्यस्य च विषयतः स्वरूपतश्चाविशेषादिति चेत् – न।

शरीरसंक्षोभश्रमजनितनिद्राणां प्राणिनामायुःपरिपाकक्रमसम्पादनैकप्रयोजनश्वाससन्तानानुवृत्तिवत् महाभूतसंप्लवसंक्षोभलब्धसंस्काराणां परमाणूनां मन्दतरतमादिभावेन कालावच्छेदप्रयोजनस्य प्रचयाख्यसंयोगपर्यन्तस्य कर्मसन्तानस्येश्वरनिःश्वसितस्यानुवृत्तेः। कियानसावित्यत्र, अविरोधात् आगमप्रसिद्धमनतिक्रम्य तावन्तमेव कालमित्यनुमन्यते। ब्रह्माण्डन्तरव्यवहारो वा कालोपाधिः। तदवच्छिन्ने काले पुनः सर्गः। यथा खल्वलाबुलतायां विततानि फलानि, तथा परमेश्वरशक्तावनुस्यूतानि सहस्रशोऽण्डानीति श्रूयते॥

एवं विच्छेदसम्भवे कस्य केन परिग्रहः यतः प्रामाण्यं स्यात्। ज्ञापकश्चायमर्थः न कारकः। ततः कारकाभावान्निवर्तमानं कार्यं ज्ञापकाभिमतः कथङ्कारमास्थापयेत् ?

तदानीं कर्मसन्तानोपगमे संयोगावश्यंभावात् परमाण्वन्तरेण संयोगे द्व्यणुकोत्पत्त्यापत्त्या प्रलयानुपपत्तिरित्यत्राह – प्रचयेति। अनारम्भकशिथिलसंयोगमात्रजननान्नानुपपत्तिरिपि भावः। तावन्तमेव कालमिति। ब्रह्मवर्षशतमिति भावः। प्रलयारम्भकालीनसंक्षोभवेगात् तावत्कालपर्यन्तं कर्मसन्तानानुवृत्तौ अनिर्भरादाह —ब्रह्मण्डान्तरेति। तत्सत्त्वे न मानमस्तीत्यत्राह—यथा खल्विति।

एवं सर्गप्रलयोपपादनेन प्रवाहतोऽप्यनित्य इति निरूपितस्य वेदस्य सर्गादावीश्वरानभ्युपगमे प्रामाण्यं तद्ग्रहश्च न स्यादित्याह—एवमिति। प्रामाण्यं स्यादिति। प्रामाण्यं ज्ञातं स्यादित्यर्थः। अयमर्थः—महाजनपरिग्रहः। कार्यमिति—प्रामाण्यरूपमिति भावः। ज्ञापकाभिमतः परिग्रहविशेषः। आप्तरूपेश्वरानुपगमे तदुक्तत्वरूपस्य प्रामाण्यहेतोरभावेन प्रामाण्यस्यैवानुत्पादादिममसन्तमर्थं ज्ञापकाभिमतः परिग्रहस्सन्नपि कथं व्यवस्थापयेदिति भावः॥

तर्हि कपिलादिसिद्धप्रोक्तत्वेन वेदप्रामाण्यं स्यादिति शङ्कते—स्यादेतदिति। सर्वज्ञत्वं कपिलादेः न संभवतीत्यत्राह—अनपेक्षितेति। यावदपेक्षितज्ञानमेवालमिति भावः। भावनेति। संस्कारः विषयविशेषे मनोऽवस्थापनहेतुः यत्न इति वार्थः। नासौ सत्यमेवेति। सदा कामिनीं भावयतः तृणादावपि तत्साक्षात्कारजननादिति भावः। धर्मादावतीन्द्रिये न प्रमाणान्तरसंवाद इत्याह—

कपिलादीनां वेदकर्तृत्वनिरासः

स्यादेतत् । सन्ति कपिलादय एव साक्षात्कृतधर्माणः कर्मयोगसिद्धाः । त एव संसाराङ्गारेषु पच्यमानान् प्राणिनः पश्यन्तः परमकारुणिकाः प्रियहितोपदेशेनानुग्रहीष्यन्ति; कृतं परमेश्वरेणानपेक्षितकीटादिसंख्यापरिज्ञानवतेति चेत्-न, तदन्यस्मिन्ननाश्वासात् । तथा हि-अतीन्द्रियार्थदर्शनोपायो भावनेत्यभ्युपगमेऽपि नासौ सत्यमेव साक्षात्कारमुत्पादयति, यतः समाश्वसिमः । प्रमाणान्तरसंवादादिति चेत्-न, अहिंसादि हितसाधनमित्यत्र तदभावात् । आगमोऽस्तीति चेत्-न, भावनामात्रमूलत्वेन तस्याप्यनाश्वासविषयत्वात् । एकदेशसंवादेनापि प्रवृत्तिरिति चेत्-न, स्वप्नाख्यानवदन्यथाऽपि सम्भवात् । न चानुपलब्धे भावनापि । चोरसर्पादयो ह्युपलब्धा एव भीरुभिः भाव्यन्ते ॥

न च कर्मयोगयोर्हितसाधनत्वं कुतश्चिदुपलब्धम् । न चैतयोः स्वरूपेणोपलम्भः क्वचिदुपयुज्यते, भावनासाध्यो वा । न चास्मिन्नन्वयव्यतिरेकौ सम्भवतः, देहान्तर-

---

अहिंसादीति । आदिना यागादिग्रहः । भावनामात्रेति । कपिलादिभिः भावनामूलसाक्षात्कारबलादेव वेदप्रवचनाभ्युपगमात् तादृशसाक्षात्कारे प्रागुक्तानाश्वासस्य तन्मूलकेऽपि तुल्यत्वादिति भावः । प्रमाणान्तरयोग्यविषयसंवादेनायोग्यविषयेऽपि प्रामाण्यधीरिति शङ्कते—एकदेशेति । तत्रानियम इत्याह—स्वप्नाख्यानवदिति । स्वप्ने अस्येदं फलमिति अत्र कश्चिदंशः फलति नान्य इति भावः ॥

किञ्चानुभवाभावे न भावनासंभव इत्याह—न चेति । धर्मस्य तत्त्वेनोपलम्भो नास्तीत्याह—न चेति । कर्म—यागादि । योगः—चित्तवृत्तिनिरोधः भावनासाध्यो वेति । अन्योन्याश्रयापातादिति भावः । अन्वयव्यतिरेकाभ्यां हितसाधनत्वमुन्नीयत इत्यत्राह—न चास्मिन्निति । देहान्तरेति । एतद्देहसाध्यानुष्ठानकाले देहान्तरभोग्यफलाप्रतीत्या तयोरन्वयव्यतिरेकग्रहासंभवादिति भावः । फलभोगकाले पूर्वकर्मानुसन्धानात् अन्वयव्यतिरेकौ गृह्येतामित्यत्राह—न चेति । तदभावात्—उभयदेहप्रतिसन्धानासंभवात् । उपपादयति—नास्तीति ॥

जातिस्मराः केचित् पूर्वकर्माणि विज्ञायान्वयव्यतिरेकाभ्यां भुज्यमानफलसाधनानीति निश्चिनुयुरिति शङ्कामपाकरोति—केचिदिति । विनिगमनायामिति । पूर्वजन्मस्मरणे सत्यपि तदुपार्जितानां

योग्यत्वात्फलस्य, अप्रतीततया तदनुष्ठाने तदभावाच्च। न च कर्तृभोक्तृरूपोभयदेहप्रतिसन्धानादेव तदुपपद्यते; तदभावात्। न ह्येतस्य पूर्वकर्मणः फलमिदमनुभवामीपि कश्चित् प्रतिसन्धत्ते ॥

केचित् तथा भविष्यन्तीति सम्भावनामात्रेऽप्यनाश्वासात्। विनिगमनायां प्रमाणाभावात्। प्रतिपन्निशीथनिद्राणप्रातः प्रतिबुद्धसमस्तोपाध्यायवत् अन्योन्यसंवादात् कपिलादिषु समाश्वास इति चेत्—न, एकजन्मप्रतिसन्धानवत् जन्मान्तरप्रतिसन्धाने प्रमाणाभावात्। तथाऽपि चाधिकारिविशेषेण ब्राह्मणत्वाद्यप्रतिसन्धानेऽनुष्ठानरूपस्याश्वासस्याभावात्। न हि पूर्वजन्मनि मातापित्रोर्ब्राह्मण्यात्तदुत्तरत्र ब्राह्मण्यमिति नियमः। येन सर्गादौ वर्णादिधर्मव्यवस्था स्यात्। ईश्वरवत् अदृष्टविशेषोपनिबद्धभूतविशेषानुपलम्भात्। अतीन्द्रियार्थदर्शित्वे चानाश्वासस्य उक्तत्वात् ॥

कर्मणां आनन्त्यादिदमेव कर्म अस्य फलस्य साधनमिति विशिष्य निर्णये नियामकाभावात् स्वधिया कथञ्चित् साध्यसाधनभावेऽवगतेऽपि न विस्रम्भः स्यादिति भावः। संवादाद्भविष्यतीति शङ्कते—प्रतिपदिति। यथानध्यायकालेष्वस्मरन्तः प्राप्तेऽध्ययनकाले कालविलम्बेन सन्दिहानाः परस्परसंवादेन वर्णानुपूर्वी निश्चिन्वन्ति उपाध्यायास्तथा प्रकृतेऽपीति भावः। जातिस्मरस्य कस्यचित्संभवेऽपि अन्यस्य तथात्वे मानाभावात् न प्रकृते संवादसंभव इति दूषयति—नेति। तथाविधानेकाधिकार्युपगमेन संवादसंभवात् कर्मणां फलसाधनत्वे विस्रम्भोपगमेऽपि अनुष्ठानानुपपत्तिरित्याह—तथापीति।

सत्यपि पूर्वजन्मज्ञाने तदानीं ब्राह्मणस्य इदानीं ब्राह्मणत्वानियमात् ईश्वरवदतीन्द्रियादृष्टोपहितब्राह्मण्याश्रयभूतविशेषदर्शिते विस्रम्भाभावाच्च सर्गादौ ब्राह्मण्याद्यनवधारणे तदवच्छिन्नाधिकारिककर्मानुष्ठानानापत्तिरिति भावः।

एतेनेति। ब्रह्माण्डसर्गादौ तत्रत्यानां ब्राह्मण्यादेरीश्वरातिरिक्तेन निर्णेतुं अशक्यत्वेनेत्यर्थः। वर्षान्तरसञ्चरणमेवेति। भारतवर्षस्थितस्य ततः भूलोकस्थवर्षान्तरसञ्चरणमेव दुष्करमिति भावः। एवमपि स्यादिति। दुर्गमदेशसञ्चारशक्तिरपि स्यादिति भावः। महाजनपरिग्रहान्यथानुपपत्त्या अणिमादिसंपन्नाधिकारिकल्पनेऽपि तथाविधानेककल्पनं न युक्तं गौरवादित्याह—एवम्भूतेति।

ब्रह्माण्डान्तरसंचारिवर्णव्यवस्थया संप्रदायप्रवर्तनस्य निरासः

एतेन ब्रह्माण्डान्तरसञ्चारिवर्णव्यवस्थया सम्प्रदायप्रवर्तनमपास्तम्, सञ्चारशक्तेरभावात्। वर्णान्तरसञ्चरणमेव हि दुष्करम्। कुतो लोकान्तरसञ्चारः? कुतस्तरां च ब्रह्माण्डान्तरगमनम्। 'अणिमादिसम्पत्तेरेवमपि स्या'दिति चेत्—न, अत्रापि प्रमाणाभावात्। सम्भावनामात्रेण समाश्वासानुपपत्तेः। अथ महाजनपरिग्रहान्यथानुपपत्तिरेवात्र प्रमाणमिति चेत्—न। एवम्भूतैककल्पनयैवोपपत्तौ भूयः कल्पनायां गौरवप्रसङ्गात्। विदेहनिर्माणशक्तेरणिमादिविभूतेश्चावश्याभ्युपगन्तव्यत्वात्। अस्त्वेक एवेति चेत्-न तर्हीश्वरमन्तरेणान्यत्र समाश्वास इति ॥

कारं कारमलौकिकाद्भुतमयं मायावशात् संहरन्
हारं हारमपीन्द्रजालमिव यः कुर्वन् जगत्क्रीडति।
तं देवं निरवग्रहस्फुरदभिध्यानानुभावं भवं
विश्वासैकभुवं शिवं प्रति नमन् भूयासमन्तेष्वपि ॥ ४ ॥

इति न्यायकुसुमाञ्जलौ द्वितीयस्तवकः ॥

तदुपपादयति—विदेहेति। अस्मत्सजातीयदेहाभावेऽपि निर्माणशक्तेरित्यर्थः। विविधदेहनिर्माणशक्तेरिति वा। एक एव कल्प्यतामित्यत्राह—न तर्हीति। स एवेश्वर इति भावः।

स्तवकार्थमुपसंहरन् अनवरतमीश्वरं प्रति नतिमभ्यर्थयते—कारं कारमिति। कृत्वा कृत्वा इत्यर्थः। मायावशात् इति। अदृष्टवशादित्यर्थः। सृष्टस्य संहारमुक्त्वा संहृतस्य पुनस्सृष्टिमाह—हारं हारमिति। हृत्वा हृत्वा सृजतीति भावः। निरवग्रहेति। प्रतिबन्धरहितस्सर्वविषयेषु स्फुरत् ज्ञानप्रभावो यस्येत्यर्थः। नास्मादृशवत्प्रतिबन्धेन सङ्कुचितज्ञानः। किन्तु सर्वज्ञ इति भावः। विश्वासेति। आप्ततममिति भावः। शिवं—श्रितानां क्षेमंकरं अन्तेष्वपीति—अन्तकालेष्वपीत्यर्थः॥

इति न्यायवासनाभिधायां न्यायकुसुमाञ्जलिटीकायां
द्वितीयस्तवकः

न्यायकुसुमाञ्जलौ तृतीयस्तबकः

ईश्वरे अनुपलब्धेर्बाधकत्वशङ्का तन्निरासश्च

नन्वेतदपि कथम्, तत्र बाधकसद्भावात्। तथा हि—यदि स्यात्, उपलभ्येत। अयोग्यत्वात् सन्नपि नोपलभ्यत इति चेत् - एवं तर्हि शशशृङ्गमप्ययोग्यत्वान् नोपलभ्यत इति स्यात्। नैतदेवम्, शृङ्गस्य योग्यतयैव व्याप्तत्वादिति चेत् - चेतनस्यापि योग्योपाधिमत्तयैव व्याप्तत्वात् तद्बाधे सोऽपि बाधित एवेति तुल्यम्। व्यापकस्वार्थाद्यनुपलम्भेनाप्यनुमीयते, नास्तीति। को हि प्रयोजनमन्तरेण किञ्चित्कुर्यादिति॥

अयोग्ये योग्यानुपलब्धिर्न प्रवर्तत इति निरूपणम्

उच्यते-योग्यादृष्टिः कुतोऽयोग्ये प्रतिबन्दिः कुतस्तराम्।
क्वायोग्यं बाध्यते शृङ्गं क्वानुमानमनाश्रयम्॥ १॥

न्यायवासनायां तृतीयस्तबकः॥

एतदपीति। ईश्वर एव समाश्वास इत्यपीत्यर्थः। पूर्वोक्तमन्यथासिद्धिनिराकरणमपीति वा। बाधकेति। अनुपलब्धिरूपेत्यर्थः। प्रत्यक्षबाधो विवक्षितः। योग्यानुपलब्ध्यभावात् न बाध इति शङ्कामनुवदति—**अयोग्यत्वादिति**। प्रतिबन्द्या दूषयति—एवं तर्हीति। शशशृङ्गमप्ययोग्यमस्त्विति भावः। **योग्यतयैव व्याप्तत्वादिति**। गवादौ योग्यस्य शृङ्गस्य शशेऽनुपलम्भात् बाध इति भावः। **योग्योपाधीति**। शरीराद्युपाधीत्यर्थः। व्याप्तत्वादिति। विशिष्टस्यैव कर्तृत्वेन कर्तुः योग्यतानियमादिति भावः। **तद्बाधे**—विशेषणशरीरादिबाधे। **सोऽपीति**। विशिष्टचेतनोऽपीत्यर्थः। कर्तुरपि बाध इति भावः। अथानुमानेन बाधमाह—व्यापक इति। **स्वार्थः**—स्वप्रयोजनम्। ईश्वरो ह्यवाप्तसमस्तकामः न प्रयोजनार्थीति व्यापकाभावात् व्याप्यकर्तृत्वाभावोऽनुमीयत इति भावः। व्याप्तिमेवोपपादयति—**को हीति**।

योग्यादृष्टिः—योग्यानुपलब्धिः। सैव बाधिका, न तु केवला। अन्यथा अतीन्द्रियोच्छेदप्रसङ्गादिति भावः। **कुतस्तरामिति**। शृङ्गस्य योग्यत्वेन चेतनसाम्याभावादिति भावः। शशशृङ्गस्या-

स्वात्मैव तावत् योग्यानुपलब्ध्या प्रतिषेद्धुं न शक्यते; कुतस्त्वयोग्यः परात्मा? तथा हि-सुषुप्त्यवस्थायामात्मानमनुपलभमानः, नास्तीत्यवधारयेत्। कस्यापराधेन पुनः योग्योऽप्यात्मा तदानीं नोपलभ्यते? सामग्रीवैगुण्यात्। ज्ञानादिक्षणिकगुणोपधानो ह्यात्मा गृह्यत इत्यस्य स्वभावः। ज्ञानमेव कुतो न जायत इति चिन्त्यते पश्चाद्वा कथमुत्पत्स्यत इति चेत्–मनसोऽनिन्द्रियप्रत्यासन्नतयाऽजननात्; तत्प्रत्यासत्तौ च पश्चाज्जननात्॥

मनोविभुत्वनिराकरणम्

मनोवैभववादिनामिदमसम्मतम्। तथा हि। मनो विभु सर्वदा स्पर्शरहितद्रव्यत्वात्, (सर्वदा) विशेषगुणशून्यद्रव्यत्वात् नित्यत्वे सत्यनारम्भकद्रव्यत्वात् ज्ञानासमवायिकारणसंयोगाधारत्वादित्यादेरिति चेत्–

न, सर्वेषामापाततः स्वरूपासिद्धत्वात्। तथा हि- यदा हि रूपाद्युपलब्धीनां क्रियात्वेन करणतया मनोऽनुमितिः, न तदा द्रव्यत्वसिद्धिः; अद्रव्यस्यापि करणत्वात्। अथा-

---

योग्यत्वात् साम्यमिति चेत् आह—क्वेति। शशीयत्वविशिष्टशृङ्गस्य बाधो नोपपद्यत इति भावः। नानुमानेन बाध इत्याह—क्वानुमानमिति। ईश्वरासिद्धौ तत्र कर्तृत्वाभावानुमानं आश्रयासिद्धमिति भावः॥

अयोग्यानुपलब्धेरबाधकत्वं कैमुत्येन निरूपयति—स्वात्मैवेति। स्वात्मनोऽप्यनुपलब्धिं दर्शयति—तथा हीति। अनुपलब्धिमात्रेण प्रतिषेधे सुषुप्तौ स्वात्मनोऽपि प्रतिषेधस्स्यादिति भावः। सत्त्वे कथमनुपलब्धिरिति पृच्छति—कस्येति। सामग्रीति। ज्ञानादिविशेषगुणा इति भावः। उपपादयति–ज्ञानादीति। अदृष्टव्यावृत्तये क्षणिकेति। ज्ञानादिविशिष्टस्यैव आत्मनः ग्रहणात् ज्ञानादेस्तत्र विषयतया कारणत्वात् तदभावे न तदुपलम्भ इति भावः। तदानीं ज्ञानाभावे मनस्सन्निकर्षाभाव एव हेतुरित्युक्तम्॥

मनसोऽणुत्व एव सङ्गच्छत इति तद्व्यवस्थापयितुं विभुत्ववादिनां पूर्वपक्षमुत्थापयति–मनोवैभवेति। विभुत्वानुमाने आद्ययोः हेत्वोः गुणादौ घटादौ च व्यभिचारवारणाय विशेष्यविशेषणे तृतीये परमाण्वादावन्त्यावयविनि च तद्वारणाय। व्योमादिः कालो वा दृष्टान्तः। चतुर्थे आत्मेति बोध्यम्।

सामेव साक्षात्कारितयेन्द्रियत्वेन तदनुमातव्यम्; तथापि व्यापकस्य निरुपाधेर्नेन्द्रियत्व-मित्युपाधिर्वक्तव्यः। तत्र यदि कर्णशष्कुलीवत् नियतशरीरावयवस्योपाधित्वम्, तदा तावन्मात्रे वृत्तिलाभः तद्दोपे च वृत्तिनिरोधः श्रोत्रवत् प्रसज्येत। ततः शरीरमात्रमुपाधिर-भिधेयः। तथा च तदवच्छेदेन वृत्तिलाभे 'शिरसि मे वेदना, पादे मे सुखम्' इत्याद्य-व्याप्यवृत्तित्वप्रतीतिविरोधः, असमवायिकारणानुरोधेन विभुकार्याणां प्रादेशिकत्वनियमात्। शरीरतदवयवादिपरमाणुपर्यन्तोपाधिकल्पनायां कल्पनागौरवप्रसङ्गः, नियमानुपपत्तिश्चेति ततोऽन्यदेवैकं सूक्ष्ममुपाधित्वेनातीन्द्रियं कल्पनीयम्। तथा च तस्यैवेन्द्रियत्वे स्वाभावि-केऽधिककल्पनायां प्रमाणाभावात् धर्मिग्राहकप्रमाणबाधः॥

अथ ज्ञानक्रमेणेन्द्रियसहकारितया तदनुमानम्; ततः सुतरां प्रागुक्तदोषः। यदि च मनसो वैभवेऽप्यदृष्टवशात् क्रम उपपाद्येत, तदा मनसोऽसिद्धेराश्रयासिद्धिरेव वैभवहेतू-नामिति॥

उत्पत्तिक्षणे गुणशून्यघटादिव्यावृत्तये सर्वदेति। आपातत इति। यावन्मनसो द्रव्यत्वं न सिद्ध्यतीति भावः। अद्रव्यस्यापीति। व्याप्तिज्ञानादेरपीति अर्थः। तथा च द्रव्यत्वव्यभिचारिणा करणत्वेन न द्रव्यत्वसिद्धिरिति भावः। साक्षात्कारितयेति। लौकिकप्रत्यक्षत्वेनेति भावः। सुखाद्यु-पलब्धय इन्द्रियजन्याः साक्षात्कारित्वादिति प्रयोगो भाव्यः। व्यापकस्येति। विभुत्वोपग-मादिति भावः। तत्र किं केवलावयवस्य? उत केवलावयविनः? आहोस्वित् अवयव्यवयवसमुदाया-न्यतमस्य वा उपाधित्वमिति विकल्प्य आद्ये दूषणमाह तत्रेति। वृत्तिलाभः—सुखाद्युपलम्भः स्यादिति भावः। तद्दोषे—तदुपघाते। द्वितीये दूषणमाह—तथा चेति। अव्याप्यवृत्तित्वप्रतीतिविरोध इति। असमवायिनः शरीरावच्छिन्नमनोयोगस्य शरीरव्यापित्वादिति भावः। शब्दादिवदव्याप्यवृत्तित्वं न विरुद्धमित्यत्राह असमवायीति। शरीरावच्छिन्नमनोयोगस्य पादादिप्रदेशमात्रपरिसमाप्तत्वाभावादिति भावः। अन्त्ये दूषणमाह—कल्पनेति। नियमानुपपत्तिरिति। शरीरस्याप्युपाधित्वोपगमात् सुखादि-संवेदनस्य पादादिप्रदेशनियमानुपपत्तिरित्यर्थः। क्वचिदेव कस्यचिदुपाधित्वमन्यत्रान्यस्येति नियामका-भावादिति भावः। धर्मिग्राहकेति। मनोग्राहकानुमानेन उक्तानुपपत्तिसहकृतेनाणुरूपस्यैव मनसः साधनाच्चेन विभुत्वानुमानस्य बाध इति भावः।

अथ यत्रादृष्टस्य दृष्टकारणोपहारेणोपयोगः तत्र तत्पूर्णतायां कार्यमुत्पद्यत एव। अन्यथा अन्त्यतन्तुसंयोगेभ्योऽपि कदाचित् पटो न जायेत, जातोऽपि वा कदाचित् निर्गुणः स्यात्; बलवता कुलालेन दृढदण्डनुन्नमपि चक्रं न भ्राम्येत। यत्र तु दृष्टानुपहारेणादृष्टव्यापारः, तत्र तद्वैगुण्यात् कार्यानुदयः, यथा परमाणुकर्मणः। तदिहापि यदि विषयेन्द्रियात्मनां समवधानमेव ज्ञानहेतुः, तदा तत्सद्भावे सदैव कार्यं स्यात्। न ह्येतदतिरिक्तमप्यदृष्टस्योपहरणीयमस्ति। न च सदैव ज्ञानोदयः। ततोऽतिरिक्तमपेक्षितव्यम्। तच्च यद्यपि सर्वाण्येवेन्द्रियाणि व्याप्नोति, तथाऽपि करणधर्मत्वेन क्रियाक्रमः संगच्छते। अकल्पिते तु तस्मिन्नायं न्यायः; प्रतिपत्तुरकरणत्वात्, चक्षुरादीनामनेकत्वादिति चेत्—

नन्वेवमपि युगपज्ज्ञानानि माभूवन् युगपज्ज्ञानं तु केन वार्यते। भवत्येव समूहालम्बनमेकं ज्ञानमिति चेत् - न - एकेन्द्रियग्राह्येष्विव नानेन्द्रियग्राह्येष्वपि प्रसङ्गात्। तेष्वपि भवत्येवेति चेत् - न, व्यासङ्गकाले ज्ञानक्रमेण विवादविषये क्रमानुमानात्॥

नन्विन्द्रियत्वेन मनोऽनुमानं मामूत्, येन पूर्वोक्तरीत्या धर्मिग्राहकमानबाधः स्यात्, किन्तु इन्द्रियसहकारितया*। तत्र च नानेन्द्रियतत्सन्निकर्षादिसत्त्वेऽपि ज्ञानानामनुभूयमानं क्रमिकत्वमयौगपद्यं हेतुरिति शङ्कते—ज्ञानेति। प्रागुक्तदोष इति। विभुत्वे ज्ञानक्रमानुपपत्तितादवस्थ्येन अणुत्वसिद्धेः धर्मिग्राहकमानबाध इत्यर्थः। असिद्धेरिति। अदृष्टादेव क्रमोपपत्तेरिति भावः।

ननु नैवं वैभवहेतूनामाश्रयासिद्धिः। ज्ञानक्रमान्मनस्सिद्धेः। न चादृष्टेनान्यथासिद्धिः दृष्टसामग्रीसत्त्वे तत्संपादन एव तस्य उपयोगेन साक्षात्कार्यनियामकत्वायोगात्। न च विभुत्वे मनस्सत्त्वेऽपि क्रमानुपपत्तिः। एकदा एककार्यजनकत्वस्यैव कारणधर्मत्वादित्याशङ्कते—अथेति। तत्पूर्णतायां–दृष्टकारणपूर्णतायाम्। अन्यथा अदृष्टस्य तत्रापि साक्षात्कार्यं प्रत्युपयोगे। न जायेतेति। कदाचिददृष्टविलम्बादिनेति भावः। अदृष्टस्य साक्षात्कार्योपयोगस्थलं दर्शयति–यत्र त्विति। सदैवेति। ज्ञानान्तरोत्पत्तिदशायामपीति भावः। उपहरणीयं–सम्पादनीयम्। तत इति। अदृष्टमात्रेण ज्ञानक्रमनिर्वाहासंभवादिति अर्थः। तच्चापेक्षितं मनश्च। एकदा एकक्रिया-

---

* अत्रायमनुमानप्रकारः इन्द्रियाणि स्वकार्यज्ञानजनने सन्निकर्षादीतरसहकारिसापेक्षाणि, सन्निकर्षादिसत्त्वेऽपि स्वेतरेन्द्रियजन्यज्ञानजननकाले ज्ञानाजनकत्वे सति ज्ञानजनकत्वात्।

बुभुत्साविशेषेण व्यासङ्गे क्रियाक्रम इति चेत् - मैवम् । न ह्येष बुभुत्साया महिमा, यत् अबुभुत्सिते विषये ज्ञानसामग्र्यां सत्यामपि न ज्ञानम् । अपि तु न तत्र संस्कारातिशयाधायकः प्रत्ययः स्यात् । यदि त्वबुभुत्सिते विषये सामग्रीमेव सा निरुन्ध्यात्, घटायोन्मीलितं चक्षुः पटं नैव दर्शयेत् । तस्माद्बुभुत्सापीन्द्रियान्तरादाकृष्य बुभुत्सितार्थग्राहिणीन्द्रिये मनो निवेशयन्ती युगपज्ज्ञानानुत्पत्तावुपयुज्यते, न तु स्वरूपतः ॥

विभुनोऽपि मनसो व्यापारक्रमात् क्रम इति चेत्-न, तस्य संयोगातिरिक्तस्य कर्मरूपत्वे वैभवविरोधात्, गुणरूपत्वे नित्यस्य क्रमानुपपत्तेः; अनित्यस्य च नित्यैकगुणस्याविभुद्रव्यसंयोगासमवायिकारणकत्वेन तदन्तरेणानुपपत्तेः । तदपि कल्पयिष्यत इति चेत्—तदेव तर्हि मनस्स्थाने निवेश्यतां लाघवाय । तस्मादण्वेव मन इति ॥

जनकत्वनियमोपगमे कृतं मनसा । ज्ञातुश्चक्षुरादीनां वा तन्नियमेनैव क्रमोपपत्तेरित्यत्राह—अकल्पित इति । अकरणत्वादिति । करणस्यैवायं धर्म इति भावः । अनेकत्वादिति । सत्यप्युक्तनियमे ज्ञानयौगपद्यं दुर्वारमिति भावः ॥

एवमप्यनेकेन्द्रियग्राह्यगोचरमेकज्ञानं दुर्वारमित्याह—नन्वेवमिति । तेष्वपि भवत्येवेति । घृतसुरभिशष्कुलीभक्षणादाविति भावः । व्यासङ्गकाले—बुभुत्सापूर्वकमनोऽवधानकाल इत्यर्थः । विवादविषये— शष्कुलीस्वादनविषये ॥

बुभुत्साप्रयुक्तो ज्ञानक्रम इति आह—बुभुत्सेति । बुभुत्साया अबुभुत्सितज्ञानसामग्रीविरोधित्वाभावान्नैवमित्याह—मैवमिति । अतः बुभुत्साकाले ज्ञानक्रमः मनोऽणुत्वोपगमेनैव निर्वोढव्य इत्याह—तस्मादिति । मनो निवेशयन्तीति । मनस्संसर्गमापादयन्तीत्यर्थः । मनसो विभुत्वे तत्संसर्गस्य पूर्वसिद्धस्य बुभुत्साधीनत्वानुपपत्त्या ज्ञानक्रमो नोपपादयितुं शक्य इति भावः ।

विभुत्वेऽपि व्यापारक्रमात् क्रमनिर्वाह इति शङ्कते-विभुनोऽपीति । अविभुद्रव्य इति । शब्दादेः भेर्यादिसंयोगासमवायिकारणदर्शनादिति भावः । तदपीति । असमवायिकारणसंयोगाश्रयः अविभुद्रव्यमपीत्यर्थः ॥

तथा च तस्मिन्ननिन्द्रियप्रत्यासन्ने निरुपधानत्वादात्मनः सुषुप्त्यवस्थायामनुपलम्भः। एतदेव मनसः शीलमिति कुतो निश्चितमिति चेत् अन्वयव्यतिरेकाभ्याम्। न केवलं तस्य, किं तु सर्वेषामेवेन्द्रियाणाम्। न हि विशेषगुणमनपेक्ष्य चक्षुराद्यपि द्रव्ये प्रवर्तते। स्वप्नावस्थायां कथं ज्ञानमिति चेत्—तत्तत्संस्कारोद्बोधे विषयस्मरणेन स्वप्नविभ्रमाणामुत्पत्तेः। उद्बोध एव कथमिति चेत्-मन्दतरतमादिन्यायेन बाह्यानामेव शब्दादीनामुपलम्भात्। अन्ततः शरीरस्यैवोष्मादेः प्रतिपत्तेः। यदा च मनस्त्वचमपि परिहृत्य पुरीतति वर्तते, तदा सुषुप्तिः।

स्यादेतत्-परात्मा तु कथं परस्यायोग्यः। न हि साक्षात्कारिज्ञानविषयतामेवायं न प्राप्नोति; स्वयमप्यदर्शनप्रसङ्गात्। नापि ग्रहीतुरेवायमपराधः, तस्यापि हि ज्ञानसमवायिकारणतैव तद्योग्यता। नापि करणस्य; साधारणत्वात्। न ह्यासंसारमेकमेव मन एकमेवात्मानं गृह्णातीत्यत्र नियामकमस्ति। स्वभाव इति चेत्-तर्हि मुक्तौ निस्स्वभावत्वप्रसङ्गः; तदेकार्थताया अपायादिति-न; भोजकादृष्टोपग्रहस्य नियामकत्वात्। यद्धि मनो यच्छरीरं यानीन्द्रियाणि यस्यादृष्टेनाकृष्टानि, तानि तस्यैवेति नियमः। तदुक्तं प्राक्—'प्रत्यात्मनियमात् भुक्ते'रिति। एतेन परबुद्ध्यादयो व्याख्याताः॥

निरुपधानत्वादिति। ज्ञानादिविशेषगुणरहितत्वादिति भावः। एतदेवेति। ज्ञानादिविशेषगुणोपहितात्मग्रहजनकत्वमेवेत्यर्थः। कथं ज्ञानमिति। बाह्येन्द्रिययोगाभावादिति भावः। विषयस्मरणाद्यधीनः भ्रम इत्याह—तत्तदिति। भ्रमे दोषविषयस्मरणादिघटितसामग्र्या एव हेतुत्वादिति भावः। सदृशज्ञानाभावात्कथमुद्बोध इति शङ्कते-उद्बोध इति। मन्दतरतमादिन्यायेनेति। तारतारतरादीनां बाह्यशब्दानामेव सुषुप्तौ मन्दमन्दतरत्वादिना उपलम्भो भवतीति स एवोद्बोधक इति भावः। निश्शब्दप्रदेशेऽप्युद्बोधकमाह—अन्ततः इति। त्वङ्मनोयोगाभावे सुषुप्तिरित्याह—यदा चेति।

एवं योग्यस्यापि स्वात्मनः सुषुप्तिकालिकानुपलब्ध्या प्रतिषेधासंभवे कुतस्त्वयोग्यस्य परमात्मनः केवलानुपलब्धिमात्रात्प्रतिषेध इत्युक्ते कथमेकस्य पुरुषभेदेन योग्यत्वमयोग्यत्वं चेति शङ्कते—स्यादेतदिति। मुक्तौ—जीवन्मुक्तौ। योगिनां परात्मदर्शनादिति भावः। परममुक्ताविति वा। अपायादिति। मुक्तस्य मनस्साध्यकार्यानुपगमादिति भावः। यद्वा मुक्तस्य सर्वज्ञत्वेन परात्मोपलम्भस्यापि सत्त्वादिति भावः। तत्तच्चेतनभोगादृष्टाकृष्टस्य मनसः तत्तच्चेतनासाधारण्यमिति समाधत्ते-नेति। व्याख्याता इति। मनसः अयोग्यत्वेन व्याख्याता इत्यर्थः। तददृष्टाकृष्टस्य मनसः तदन्यात्मबुद्धिग्राहकत्वायोगादिति भावः।

अयोग्यानुपलब्धेर्निषेधकत्वायोगः

तदेवं योग्यानुपलब्धिः परात्मादौ नास्ति। तदितरा तु न बाधिकेति तवापि सम्मतम्। अतः किमधिकृत्य प्रतिबन्दिः। न हि शशशृङ्गमयोग्यानुपलब्ध्या कश्चिन्निषेधति। न च प्रकृते योग्यानुपलब्धिं कश्चिन्मन्यते। अथायमाशयः—अयोग्यशशशृङ्गादावनुपलब्धिर्न बाधिका स्यात्—इति। ततः किम्। तत्सिध्येदिति चेत्—एवमस्तु, यदि प्रमाणमस्ति। पशुत्वादिकमिति चेत्—परसाधने प्रतिबन्दिस्तर्हि; न तद्बाधने। तत्रैव भविष्यतीति चेत्—तत् किं तत्र प्रतिबन्दिरेव दूषणम्, अथ कथञ्चित्तुल्यन्यायतया योग्या एव परात्मबुद्ध्यादयः ते च बाधिता एवेत्यपहतविषयत्वम्? न प्रथमः अव्याप्तेः। न हि पशुत्वादेः शशशृङ्गसाधकत्वेन कार्यत्वादेः कर्तृमत्त्वसाधकत्वं व्याप्तम्, येन तस्मिन्नसति तत् प्रतिषिद्ध्येत। न द्वितीयः, मिथोऽनुपलभ्यमानत्वस्य वादिप्रतिवादिस्वीकारात्। तथाऽपि पशुत्वादौ को दोष इति चेत्—न जानीमस्तावत्; तद्विचारावसरे चिन्तयिष्यामः॥

तवापीति। स्वर्गादिपरलोकादिकमभ्युपगच्छत इति भावः। किमधिकृत्येति। सादृश्यसत्त्वे खलु प्रतिबन्ध्यवतार इति भावः। अयोग्यपरात्मवत् अयोग्यं शशशृङ्गमप्यस्तु इति प्रतिबन्द्याशय इति शङ्कते—अथेति। ततः किमिति। ईश्वरसाधनदूषणादिति भावः। एतदेव स्फुटीकरिष्यति—परसाधन इति। तत्रैवेति। यदीश्वरः सिद्ध्येद् शशशृङ्गमपीत्युक्तेः शशे शृङ्गाभावात् क्षित्यादौ कर्तुरप्यभाव इति पर्यवसानात् बाधनेऽपि भविष्यतीति भावः। किं प्रतिबन्दिः साक्षाद्दूषणम्, उत समानन्यायेनेति विकल्प्य निराकरोति—तत्किमिति। प्रतिबन्दिरेवेति। कार्यत्वेन कर्तृसाधने पशुत्वादिना शशशृङ्गसाधकेन भाव्यम्; तदभावे तु तदभाव एवेति रीत्येति भावः। अथ कथञ्चिदिति। यथा शशे योग्यस्य शृङ्गस्य अनुपलब्ध्या बाधितत्वं, तथा योग्यानां परात्मबुद्ध्यादीनामनुपलब्ध्या बाधितत्वमिति भावः। अव्याप्तेरिति। पशुत्वादेः शशशृङ्गसाधकत्वेन कार्यत्वादेः कर्तृमत्त्वसाधकत्वस्य व्याप्त्यभावादित्यर्थः। तथा च व्यापकाभावेन व्याप्यनिषेधो न सम्भवतीति भावः। मिथोऽनुपलभ्यमानत्वस्येति। शृङ्गवत्परात्मबुद्ध्यादीनां योग्यत्वापादनं स्वाभ्युपगमविरुद्धमिति भावः। न जानीम इति। तद्विचारस्येदानीमप्रकृततया न पर्यालोचयाम इत्यर्थः। चिन्तयिष्याम इति। शृङ्गत्वजातेः योग्यसंस्थानव्यङ्ग्यतया योग्यत्वनियतत्वात् अयोग्ये तद्ग्रहासंभवेन साध्याप्रसिद्ध्यादिदोषः स्यात् न त्वेवमयोग्यकर्त्रनुमाने अयोग्यस्यापि परात्मनः कर्तृत्वस्य योग्यत्वानियतत्वादिति भावः॥

प्रमाणाभावात् प्रमेयाभाव इति शङ्कायाः निरासः

स्यादेतत्—यत्प्रमाणगम्यं हि यत्, तदभाव एव तस्याभावमावेदयति। यथा रूपादिप्रतिपत्तेरभावश्चक्षुरादेरभावम्। कायवाग्व्यापारैकप्रमाणकश्च परात्मा; तदभाव एव तस्याभावे प्रमाणमङ्कुरादिषु—तन्न। तदेकप्रमाणकत्वासिद्धेः। अन्यथा सुषुप्तोऽपि न स्यात्। श्वाससन्तानोऽपि तत्र प्रमाणमिति चेत्—न—निरुद्धपवनोऽपि न स्यात्। कायसंस्थानविशेषोऽपि तत्र प्रमाणमिति चेत्—न, विषमूर्च्छितोऽपि न स्यात्। शरीरोष्मापि तत्र प्रमाणमिति चेत्—न, जलावसिक्तविषमूर्च्छितोऽपि न स्यात्। तस्मात् यद्यत् कार्यमुपलभ्यते, तत्तदनुगुणश्चेतनस्तत्र तत्र सिद्ध्यति। न च कार्यमात्रस्य क्वचिद्व्यावृत्तिरिति। न च त्वदभ्युपगतेनैव प्रमाणेन भवितव्यम्, नान्येनेति नियमोऽस्ति॥

प्रमेयस्य प्रमाणेन व्याप्तिर्नास्तीति प्रतिपादनम्

न च प्रमेयस्य प्रमाणेन व्याप्तिः। सा हि कार्त्स्न्येन वा स्यात् एकदेशेन वा स्यात्। न प्रथमः, प्रत्यक्षाद्यन्यतमसद्भावेऽपि तत्प्रमेयावस्थितेः। न द्वितीयः, पुरुषनियमेन सर्वप्रमाणव्यावृत्तावपि प्रमेयावस्थितेः। अनियमेन असिद्धेः, न हि सर्वस्य सर्वदा सर्वथाऽत्र प्रमाणं नास्तीति निश्चयः शक्य इति॥

प्रमाणाभावात् प्रमेयाभाव इति बाधं शङ्कते—स्यादेतदिति। यत्प्रमाणगम्यं—यदेकप्रमाणगम्यम्। यत्किञ्चित्प्रमाणाभावोऽनैकान्तिकः प्रमाणसामान्याभावस्त्वसिद्धः। त्वदनभिमतस्यापि प्रमाणत्वसंभवादिति परिहरति—तन्नेति। कार्यमात्रप्रमाणोन्नेयः तद्विशेषणनिवृत्तिमात्रेण न निवर्तते। कार्यमात्रस्य तु न निवृत्तिरित्युपसंहरति—तस्मादिति॥

वस्तुतस्तु प्रमाणसामान्याभावेनापि न बाधस्संभवी, प्रमाणस्य प्रमेयाव्यापकत्वादित्याह—न चेति। प्रमेयस्य प्रमाणव्याप्तिं दूषयितुं किं सर्वप्रमाणव्याप्तिः, उत यत्किञ्चित्प्रमाणव्याप्तिर्विवक्षितेति विकल्पयति—सा हीति। द्वितीयेऽपि किं पुरुषविशेषसंबन्धियत्किञ्चित्प्रमाणव्याप्तिः अथवा यस्य कस्यचित्पुरुषस्य संबन्धिना येन केनचित् प्रमाणेन व्याप्तिरिति विकल्पः। तत्राद्यं दूषयति—पुरुषनियमेनेति। द्वितीयं प्रत्याह—अनियमेनेति॥ असिद्धेरिति—प्रमाणाभावरूपहेतोरिति शेषः। उपपादयति—नहीति।

कथं तर्हि चक्षुरादेरभावो निश्चेयः? व्यापकानुपलब्धेः। चरमसामग्रीनिवेशिनो हि कार्यमेव व्यापकम्; तन्निवृत्तौ तथाभूतस्यापि निवृत्तिः। योग्यतामात्रस्य कदाचित् कार्यम् तन्निवृत्तौ तथाभूतस्यापि निवृत्तिः। अन्यथा तत्रापि सन्देहः॥

अभासप्रतिपन्नस्य निषेधाधिकरणत्वं वा निषेध्यत्वं वा न संभवति

प्रकृतेऽपि व्यापकानुपलब्ध्या तत्प्रतिषेधोऽस्तु—न, आश्रयासिद्धत्वात्। न हीश्वरस्तज्ज्ञानं वा क्वचित् सिद्धम्। आभासप्रतिपन्नमिति चेत्—न, तस्याश्रयत्वानुपपत्तेः प्रतिषेध्यत्वानुपपत्तेश्च॥

व्यावर्त्त्याभाववत्तैव भाविकी हि विशेष्यता।
अभावविरहात्मत्वं वस्तुनः प्रतियोगिता॥ २॥

न चैतदाभासप्रतिपन्नस्यास्तीति कुतस्तस्य निषेधाधिकरणत्वं निषेध्यता चेति॥

कथं तर्हि शशशृङ्गस्य निषेधः? न कथञ्चित्। स ह्यभावप्रत्यय एव। न चायमपारमार्थिकप्रतियोगिकः परमार्थाभावो नाम तथापारमार्थिकविषयं प्रमाणं नामेति॥

व्यापकानुपलब्धेरिति। प्रमाणत्वेन व्यापकत्वानुपगमेऽपि कार्यत्वेन फलोपधायकव्यापकत्वोपगमात् व्यापककार्यरूपाद्युपलम्भाभावात् चक्षुराद्यभावनिश्चय इति भावः। ननु नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावनियमेन स्वरूपयोग्यस्यापि नित्यस्य कदाचित् कार्यं व्यापकमिति स्वार्थरूपकर्तृत्वव्यापकानुपलब्ध्या ईश्वरस्यापि निषेधः स्यादिति शङ्कते—योग्यतामात्रस्येति। तत्रापि सन्देहः—योग्यतायामपि सन्देहः॥

तज्ज्ञानं वेति। उपादानगोचरापरोक्षज्ञानजन्यत्वसाधने व्यापकानुपलब्ध्या ज्ञानस्यापि निषेधे तत्रापि दूषणप्रदर्शनायेदम्। आश्रयत्वानुपपत्तेरिति। ईश्वरे कर्तृत्वनिषेधे ज्ञाने नित्यत्वजनकत्वादिनिषेधे चेति भावः। प्रतिषेध्यत्वानुपपत्तेश्चेति। ईश्वरो नास्ति ज्ञानं नास्ति इति निषेध इति भावः।

व्यावर्त्त्य—निषेध्यं प्रतियोगि। भाविकी स्वाभाविकी पारमार्थिकी। विशेष्यतेति। अभावाधिकरणयोः स्वाभाविकः विशेषणविशेष्यभावः इत्युच्यमानः स्वरूपसंबन्धानुयोगित्वाश्रयतापरपर्यायः इह विवाक्षितः। आभासप्रतिपन्नस्य पारमार्थिकनिषेध्याभावाधिकरणताया अभावान्नाश्रयत्वं भवतीति भावः। वस्तुनः परमार्थस्य न त्वाभासप्रतिपन्नस्येति भावः। न कथञ्चिदिति। न कल्पितस्य निषेध्यत्वमिति भावः। अभावप्रत्यय एवेति। पारमार्थिकाभावप्रत्ययः इत्यर्थः। अपारमार्थिकप्रतियोगिक इति। शशशृङ्गप्रतियोगिक इत्यर्थः॥

अपि च—

दुष्टोपलम्भसामग्री शशशृङ्गादियोग्यता ।
न तस्यां नोपलम्भोऽस्ति नास्ति सानुपलम्भने ॥ ३ ॥

केन च शशशृङ्गं प्रतिषिध्यते, सर्वथानुपलब्धस्य योग्यत्वासिद्धेः । तदितरसामग्रीसाकल्यं हि तत् । ननूक्तमाभासोपलब्धं हि तत् । अत एवाशक्यनिषेधमित्युक्तम् । अनुपलम्भकाले आभासोपलम्भसामग्र्याः अभावात्; तत्काले चानुपलम्भाभावादिति । कस्तर्हि शशशृङ्गं नास्तीत्यस्यार्थः ? शशेऽधिकरणे विषाणाभावोऽस्तीति ॥

ईश्वरबाधकानुमानस्य निराकरणम्

स्यादेतत्-यद्यपीश्वरो नावगतः; यद्यपि च नाभाससिद्धेन प्रमाणव्यवहारः शक्यसम्पादनः; तथाऽपि, आत्मानः सिद्धाः तेषां सार्वज्ञ्यं निषिध्यते, क्षित्यादिकर्तृत्वं चेति। तथाहि— मदितरे न सर्वज्ञाः चेतनत्वादहमिव । न च ते क्षित्यादिकर्तारः पुरुषत्वादहमिव । एवं वस्तुत्वादेरपीति । तदेतदपि प्रागेव परिहृतम् । तथा हि—

शशशृङ्गनिषेधोपगमे दूषणान्तरमाह - अपि चेति । अयं भावः । केवलानुपलंभात्प्रतिषेधे अतीन्द्रियोच्छेदात् योग्यानुपलंभ एव बाधक उपेयः । योग्यता च प्रतियोगितद्व्याप्येतरतदुपलम्भसामग्रीसाकल्यं शशशृङ्गोपलम्भश्च भ्रम एवेति दोषघटितैव तत्र सामग्री । तस्या उपलम्भसमव्याप्तत्वात् न कदाचिदपि योग्यताविशिष्टानुपलम्भ इति न तत्प्रतिषेधसिद्धिरिति । पारमार्थिकस्य तु व्यतिरेकिणः तत्सन्निकर्षस्य च तदुपलम्भहेतुत्वात् तदभावे, तदितरसामग्रीसाकल्येऽपि अनुपलम्भ इति योग्यताविशिष्टानुपलम्भसिद्धिरिति विशेषो भाव्यः ! अत एवेति । आभासोपलब्धत्वादेवेत्यर्थः । शशे अधिकरण इति । अत्र शशशृङ्गपदमेव लक्षणया शशाधिकरणकविषाणाभावं प्रत्याय्य तेन नास्तीत्युक्तमभावं विशेषयतीति न समासानुपपत्तिरिति भावः ।

अथ सिद्धानेवात्मनः पक्षीकृत्य सर्वज्ञत्वजगत्कर्तृत्वप्रतिषेधे सति अर्थादीश्वरबाध इति शङ्कते— स्यादेतदिति । सार्वज्ञ्यं निषिध्यते । किञ्चिदनभिज्ञत्वं साध्यत इति भावः । अतो न निषेध्याप्रसिद्धिः दोषः । एवमग्रेऽपि ।

इष्टसिद्धिः प्रसिद्धेंऽशे हेत्वसिद्धिरगोचरे ।
नान्या सामान्यतः सिद्धिः जातावपि तथैव सा ॥ ४ ॥

प्रमाणप्रतीतानां चेतनानां पक्षीकरणे सिद्धसाधनम् । ततोऽन्येषामसिद्धौ हेतोराश्रयासिद्धत्वम् । आत्मत्वमात्रेण सोऽपि सिद्ध इति चेत् - कोऽस्यार्थः ? किमात्मत्वेनोपलक्षिता सैव वस्तुगत्या सर्वज्ञविश्वकर्तृव्यक्तिः, अथ तदन्या, आत्ममात्रं आत्मत्वमात्रमेव वा पक्षः ; सर्वत्र पूर्वदोषानतिवृत्तेः । अथायमाशयः-आत्मत्वं न सर्वज्ञसर्वकर्तृव्यक्तिसमवेतं जातित्वात् गोत्ववत् इति–तदसत्--निषेध्यासिद्धेर्निषेधस्याशक्यत्वात् । तथा चाप्रासिद्धविशेषणः पक्ष इत्याश्रयासिद्धिरिति स एव दोषः । त्वदुपगतागमलोकप्रसिद्धस्यैवेश्वरस्यासर्वज्ञत्वमकर्तृत्वं च साध्यत इति चेत्–न—

आगमादेः प्रमाणत्वे बाधनादनिषेधनम् ।
आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धता ॥ ५ ॥

निगदव्याख्यातमेतत् ॥

इष्टसिद्धि :— सिद्धसाधनम् । प्रसिद्धेंश इति । प्रसिद्धात्मपक्षीकरण इत्यर्थः । हेत्वसिद्धिः-आश्रयासिद्धिः । नान्या सामान्यत इति । प्रसिद्धाप्रसिद्धकोट्यतिरिक्ताभावादिति भावः । जातावपीति । आत्मत्वं पक्षीकृत्य सर्वज्ञाद्यसमवेतत्वसाधनेऽपि प्रतियोग्यसिद्ध्यधीनसाध्याप्रसिद्ध्या तद्विशिष्टाश्रयासिद्धिरेवेति भावः । सर्वत्र पूर्वदोषानतिवृत्तेरिति । आद्ये साध्यविशिष्टपक्षाप्रसिद्धेः बाधस्य वा अन्त्ययोः सिद्धसाधनस्य च संभवादिति भावः । तृतीये साध्यपरिष्कारान्नोक्तदोष इत्याशयं दूषयितुमनुवदति–अथेति । आगमादिप्रसिद्धस्येश्वरस्यासर्वज्ञत्वादिसाधनात् सर्वज्ञादिव्यक्तिनिषेधसिद्धिरिति शङ्कते–त्वदुपगतेति ॥

आगमादेः प्रमाणत्व इति । धर्म्यंशे आगमप्रसिद्धिमुपजीव्य तत्प्रसिद्धसर्वज्ञत्वादेः अनुमानेन निषेधे उपजीव्यागमप्रमाणबाधः । आगमस्यार्धजरतीयन्यायेन धर्मिमात्रे प्रामाण्योपगमश्च न युक्तः इति भावः । आगमस्य किञ्चिदंशेऽपि प्रामाण्यं न स्वीक्रियते; अतो न प्रमाणबाधः आभासप्रतिपन्नत्वाच्च नाश्रयासिद्धिरित्यत्राह–आभासत्वे त्विति । आभासप्रतिपन्नस्याश्रयत्वानुपपत्तेः पूर्वमेवोपपादितत्वादिति भावः ।

अपि च—

दुष्टोपलम्भसामग्री शशशृङ्गादियोग्यता ।
न तस्यां नोपलम्भोऽस्ति नास्ति सानुपलम्भने ॥ ३ ॥

केन च शशशृङ्गं प्रतिषिध्यते, सर्वथानुपलब्धस्य योग्यत्वासिद्धेः । तदितरसामग्रीसाकल्यं हि तत् । ननूक्तमाभासोपलब्धं हि तत् । अत एवाशक्यनिषेधमित्युक्तम् । अनुपलम्भकाले आभासोपलम्भसामग्र्याः अभावात्; तत्काले चानुपलम्भाभावादिति । कस्तर्हि शशशृङ्गं नास्तीत्यस्यार्थः ? शशेऽधिकरणे विषाणाभावोऽस्तीति ॥

ईश्वरबाधकानुमानस्य निराकरणम्

स्यादेतत् - यद्यपीश्वरो नावगतः; यद्यपि च नाभाससिद्धेन प्रमाणव्यवहारः शक्यसम्पादनः ; तथाऽपि, आत्मानः सिद्धाः तेषां सार्वज्ञ्यं निषिध्यते, क्षित्यादिकर्तृत्वं चेति। तथाहि— मदितरे न सर्वज्ञाः चेतनत्वादहमिव । न च ते क्षित्यादिकर्तारः पुरुषत्वादहमिव । एवं वस्तुत्वादेरपीति । तदेतदपि प्रागेव परिहृतम् । तथा हि—

शशशृङ्गनिषेधोपगमे दूषणान्तरमाह - अपि चेति । अयं भावः । केवलानुपलंभात्प्रतिषेधे अतीन्द्रियोच्छेदात् योग्यानुपलंभ एव बाधक उपेयः । योग्यता च प्रतियोगितद्व्याप्येतरतदुपलम्भसामग्रीसाकल्यं शशशृङ्गोपलम्भश्च भ्रम एवेति दोषघटितैव तत्र सामग्री । तस्या उपलम्भसमव्याप्तत्वात् न कदाचिदपि योग्यताविशिष्टानुपलम्भ इति न तत्प्रतिषेधसिद्धिरिति । पारमार्थिकस्य तु व्यतिरेकिणः तत्सन्निकर्षस्य च तदुपलम्भहेतुत्वात् तदभावे, तदितरसामग्रीसाकल्येऽपि अनुपलम्भ इति योग्यताविशिष्टानुपलम्भसिद्धिरिति विशेषो भाव्यः ! अत एवेति । आभासोपलब्धत्वादेवेत्यर्थः । शशे अधिकरण इति । अत्र शशशृङ्गपदमेव लक्षणया शशाधिकरणकविषाणाभावं प्रत्याय्य तेन नास्तीत्युक्तमभावं विशेषयतीति न समासानुपपत्तिरिति भावः ।

अथ सिद्धानेवात्मनः पक्षीकृत्य सर्वज्ञत्वजगत्कर्तृत्वप्रतिषेधे सति अर्थादीश्वरबाध इति शङ्कते— स्यादेतदिति । सार्वज्ञ्यं निषिध्यते । किञ्चिदनभिज्ञत्वं साध्यत इति भावः । अतो न निषेध्याप्रसिद्धिः दोषः । एवमग्रेऽपि ।

इष्टसिद्धिः प्रसिद्धेंऽशे हेत्वसिद्धिरगोचरे ।
नान्या सामान्यतः सिद्धिः जातावपि तथैव सा ॥ ४ ॥

प्रमाणप्रतीतानां चेतनानां पक्षीकरणे सिद्धसाधनम् । ततोऽन्येषामसिद्धौ हेतोराश्रयासिद्धत्वम् । आत्मत्वमात्रेण सोऽपि सिद्ध इति चेत् - कोऽस्यार्थः ? किमात्मत्वेनोपलक्षिता सैव वस्तुगत्या सर्वज्ञविश्वकर्तृव्यक्तिः, अथ तदन्या, आत्ममात्रं आत्मत्वमात्रमेव वा पक्षः ; सर्वत्र पूर्वदोषानतिवृत्तेः । अथायमाशयः-आत्मत्वं न सर्वज्ञसर्वकर्तृव्यक्तिसमवेतं जातित्वात् गोत्ववत् इति–तदसत्–निषेध्यासिद्धेर्निषेधस्याशक्यत्वात् । तथा चाप्रासिद्धविशेषणः पक्ष इत्याश्रयासिद्धिरिति स एव दोषः । त्वदुपगतागमलोकप्रसिद्धस्यैवेश्वरस्यासर्वज्ञत्वमकर्तृत्वं च साध्यत इति चेत्–न—

आगमादेः प्रमाणत्वे बाधनादनिषेधनम् ।
आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धता ॥ ५ ॥

निगदव्याख्यातमेतत् ॥

इष्टसिद्धि :— सिद्धसाधनम् । प्रसिद्धेंश इति । प्रसिद्धात्मपक्षीकरण इत्यर्थः । हेत्वसिद्धिः- आश्रयासिद्धिः । नान्या सामान्यत इति । प्रसिद्धाप्रसिद्धकोट्यतिरिक्ताभावादिति भावः । जाताव- पीति । आत्मत्वं पक्षीकृत्य सर्वज्ञाद्यसमवेतत्वसाधनेऽपि प्रतियोग्यसिद्ध्यधीनसाध्याप्रसिद्ध्या तद्विशिष्टाश्रयासिद्धिरेवेति भावः । सर्वत्र पूर्वदोषानतिवृत्तेरिति । आद्ये साध्यविशिष्टपक्षाप्रसिद्धेः बाधस्य वा अन्त्ययोः सिद्धसाधनस्य च संभवादिति भावः । तृतीये साध्यपरिष्कारान्नोक्तदोष इत्याशयं दूषयितुमनुवदति–अथेति । आगमादिप्रसिद्धस्येश्वरस्यासर्वज्ञत्वादिसाधनात् सर्वज्ञादिव्यक्तिनिषेधसिद्धिरिति शङ्कते–त्वदुपगतेति ॥

आगमादेः प्रमाणत्व इति । धर्म्यंशे आगमप्रसिद्धिमुपजीव्य तत्प्रसिद्धसर्वज्ञत्वादेः अनुमानेन निषेधे उपजीव्यागमप्रमाणबाधः । आगमस्यार्धजरतीयन्यायेन धर्मिमात्रे प्रामाण्योपगमश्च न युक्तः इति भावः । आगमस्य किञ्चिदंशेऽपि प्रामाण्यं न स्वीक्रियते; अतो न प्रमाणबाधः आभासप्रतिपन्नत्वाच्च नाश्रयासिद्धिरित्यत्राह–आभासत्वे त्विति । आभासप्रतिपन्नस्याश्रयत्वानुपपत्तेः पूर्वमेवोपपादितत्वादिति भावः ।

अपि च—

दुष्टोपलम्भसामग्री शशशृङ्गादियोग्यता ।
न तस्यां नोपलम्भोऽस्ति नास्ति सानुपलम्भने ॥ ३ ॥

केन च शशशृङ्गं प्रतिषिध्यते, सर्वथानुपलब्धस्य योग्यत्वासिद्धेः । तदितरसामग्रीसाकल्यं हि तत् । ननूक्तमाभासोपलब्धं हि तत् । अत एवाशक्यनिषेधमित्युक्तम् । अनुपलम्भकाले आभासोपलम्भसामग्र्याः अभावात्; तत्काले चानुपलम्भाभावादिति । कस्तर्हि शशशृङ्गं नास्तीत्यस्यार्थः ? शशेऽधिकरणे विषाणाभावोऽस्तीति ॥

ईश्वरबाधकानुमानस्य निराकरणम्

स्यादेतत् - यद्यपीश्वरो नावगतः; यद्यपि च नाभाससिद्धेन प्रमाणव्यवहारः शक्यसम्पादनः; तथाऽपि, आत्मानः सिद्धाः तेषां सार्वज्ञ्यं निषिध्यते, क्षित्यादिकर्तृत्वं चेति। तथाहि— मदितरे न सर्वज्ञाः चेतनत्वादहमिव । न च ते क्षित्यादिकर्तारः पुरुषत्वादहमिव । एवं वस्तुत्वादेरपीति । तदेतदपि प्रागेव परिहृतम् । तथा हि —

शशशृङ्गनिषेधोपगमे दूषणान्तरमाह - अपि चेति । अयं भावः । केवलानुपलंभात्प्रतिषेधे अतीन्द्रियोच्छेदात् योग्यानुपलंभ एव बाधक उपेयः । योग्यता च प्रतियोगितद्व्याप्येतरतदुपलम्भसामग्रीसाकल्यं शशशृङ्गोपलम्भश्च भ्रम एवेति दोषघटितैव तत्र सामग्री । तस्या उपलम्भसमव्याप्तत्वात् न कदाचिदपि योग्यताविशिष्टानुपलम्भ इति न तत्प्रतिषेधसिद्धिरिति । पारमार्थिकस्य तु व्यतिरेकिणः तत्सन्निकर्षस्य च तदुपलम्भहेतुत्वात् तदभावे, तदितरसामग्रीसाकल्येऽपि अनुपलम्भ इति योग्यताविशिष्टानुपलम्भसिद्धिरिति विशेषो भाव्यः । अत एवेति । आभासोपलब्धत्वादेवेत्यर्थः । शशे अधिकरण इति । अत्र शशशृङ्गपदमेव लक्षणया शशाधिकरणकविषाणाभावं प्रत्याय्य तेन नास्तीत्युक्तमभावं विशेषयतीति न समासानुपपत्तिरिति भावः ।

अथ सिद्धानेवात्मनः पक्षीकृत्य सर्वज्ञत्वजगत्कर्तृत्वप्रतिषेधे सति अर्थादीश्वरबाध इति शङ्कते— स्यादेतदिति । सार्वज्ञ्यं निषिध्यते । किञ्चिदनभिज्ञत्वं साध्यत इति भावः । अतो न निषेध्याप्रसिद्धिः दोषः । एवमग्रेऽपि ।

इष्टसिद्धिः प्रसिद्धेंऽशे हेत्वसिद्धिरगोचरे ।
नान्या सामान्यतः सिद्धिः जातावपि तथैव सा ॥ ४ ॥

प्रमाणप्रतीतानां चेतनानां पक्षीकरणे सिद्धसाधनम् । ततोऽन्येषामसिद्धौ हेतोराश्रयासिद्धत्वम् । आत्मत्वमात्रेण सोऽपि सिद्ध इति चेत् - कोऽस्यार्थः ? किमात्मत्वेनोपलक्षिता सैव वस्तुगत्या सर्वज्ञविश्वकर्तृव्यक्तिः, अथ तदन्या, आत्ममात्रं आत्मत्वमात्रमेव वा पक्षः ; सर्वत्र पूर्वदोषानतिवृत्तेः । अथायमाशयः-आत्मत्वं न सर्वज्ञसर्वकर्तृव्यक्तिसमवेतं जातित्वात् गोत्ववत् इति-तदसत्-निषेध्यासिद्धेर्निषेधस्याशक्यत्वात् । तथा चाप्रासिद्धविशेषणः पक्ष इत्याश्रयासिद्धिरिति स एव दोषः । त्वदुपगतागमलोकप्रसिद्धस्यैवेश्वरस्यासर्वज्ञत्वमकर्तृत्वं च साध्यत इति चेत्-न—

आगमादेः प्रमाणत्वे बाधनादनिषेधनम् ।
आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धता ॥ ५ ॥

निगदव्याख्यातमेतत् ॥

इष्टसिद्धि :— सिद्धसाधनम् । प्रसिद्धेंश इति । प्रसिद्धात्मपक्षीकरण इत्यर्थः । हेत्वसिद्धिः-आश्रयासिद्धिः । नान्या सामान्यत इति । प्रसिद्धाप्रसिद्धकोट्यतिरिक्ताभावादिति भावः । जातावपीति । आत्मत्वं पक्षीकृत्य सर्वज्ञाद्यसमवेतत्वसाधनेऽपि प्रतियोग्यसिद्ध्यधीनसाध्याप्रसिद्ध्या तद्विशिष्टाश्रयासिद्धिरेवेति भावः । सर्वत्र पूर्वदोषानतिवृत्तेरिति । आद्ये साध्यविशिष्टपक्षाप्रसिद्धेः बाधस्य वा अन्त्ययोः सिद्धसाधनस्य च संभवादिति भावः । तृतीये साध्यपरिष्कारान्नोक्तदोष इत्याशयं दूषयितुमनुवदति-अथेति । आगमादिप्रसिद्धस्येश्वरस्यासर्वज्ञत्वादिसाधनात् सर्वज्ञादिव्यक्तिनिषेधसिद्धिरिति शङ्कते-त्वदुपगतेति ॥

आगमादेः प्रमाणत्व इति । धर्म्यंशे आगमप्रसिद्धिमुपजीव्य तत्प्रसिद्धसर्वज्ञत्वादेः अनुमानेन निषेधे उपजीव्यागमप्रमाणबाधः । आगमस्यार्धजरतीयन्यायेन धर्मिमात्रे प्रामाण्योपगमश्च न युक्तः इति भावः । आगमस्य किञ्चिदंशेऽपि प्रामाण्यं न स्वीक्रियते; अतो न प्रमाणबाधः आभासप्रतिपन्नत्वाच्च नाश्रयासिद्धिरित्यत्राह-आभासत्वे त्विति । आभासप्रतिपन्नस्याश्रयत्वानुपपत्तेः पूर्वमेवोपपादितत्वादिति भावः ।

योग्यत्वाविशेषिता अनुपलब्धिरेवाभावसाधिकेति चार्वाकमतस्य निरासः

चार्वाकस्त्वाह—किं योग्यताविशेषाग्रहेण। यन्नोपलभ्यते, तन्नास्ति। विपरीतमस्ति। न चेश्वरादयस्तथा, ततो न सन्तीत्येतदेव ज्यायः। एवमनुमानादिविलोप इति चेत् - नेदमनिष्टम्। तथा च लोकव्यवहारोच्छेद इति चेत् - न, सम्भावनामात्रेण तत्सिद्धेः। संवादेन च प्रामाण्याभिमानात् - इति।

अत्रोच्यते—

दृष्टयदृष्टयोः क्व सन्देहो भावाभावविनिश्चयात्।
अदृष्टिबाधिते हेतौ प्रत्यक्षमपि दुर्लभम्॥ ६॥

संभावना हि सन्देह एव। तस्माच्च व्यवहारः तस्मिन् सति स्यात्। स एव तु कुतः? दर्शनदशायां भावनिश्चयात्, अदर्शनदशायामभावावधारणात्। तथा च गृहात् बहिः गतः चार्वाको वराको न निवर्तेत; प्रत्युत पुत्रदारधनाद्यभावावधारणात् सोरस्ताडं शोकविकलो विक्रोशेत्। स्मरणानुभवात् नैवमिति चेत् - न, प्रतियोगिस्मरण एवाभावपरिच्छेदात्।

एवमास्तिकभूमिकामवलम्बमानस्येव प्रकटनास्तिकस्यापीश्वरप्रतिषेधो न शक्य इत्युपपादयितुं तन्मतमनुवदति—चार्वाक इति। संभावनामात्रेणेति। उत्कटैककोटिकसन्देहमात्रेणेत्यर्थः। संवादेन चेति। प्रवृत्तेः साफल्यप्रतिसन्धानेनेत्यर्थः॥

दृष्टयदृष्टयोरिति। वस्तुनः दर्शनादर्शनयोः क्रमेण भावाभावनिश्चयान्न सन्देहावकाश इति भावः। न केवलमनुमानस्योच्छेदः। किन्तु प्रत्यक्षस्यापि स्यादित्याह—अदृष्टीति। चक्षुष्यनुपलब्धे तत्प्रतिषेधेन कारणबाधात् न प्रत्यक्षमपीति भावः।

न निवर्तेतेति। बहिर्गतस्य गृहस्थपुत्राद्यनुपलब्ध्या तदभावनिश्चयादिति भावः। न च तदानीं गृहस्यानिन्द्रियसन्निकृष्टत्वात् तदधिकरणकाभावाध्यक्षासंभव इति वाच्यम्। अधिकरणज्ञानमेव हेतुः, न तु तदिन्द्रियसन्निकर्षोपीति तदभिमानात् असन्निकृष्टाधिकरणेऽपि देवताद्यभावनिश्चयोक्तेः। प्रतियोगिस्मरण एवेति। तस्याभावनिश्चये हेतुत्वेन बाधकत्वासंभवादिति भावः। 'यन्नोपलभ्यते तन्नास्तीत्यु'क्तं प्रतिवक्तुमाह-परावृत्तोपीति॥

परावृत्तोऽपि कथं पुनरासादयिष्यति? सत्त्वादिति चेत् - अनुपलम्भकालेऽपि तर्हि सन्तीति न तावन्मात्रेणाभावावधारणम्। तदैवोत्पन्ना इति चेत् - न, अनुपलम्भेन हेतूनां बाधात् अबाधे वा स एव दोषः ॥

अत एव प्रत्यक्षमपि न स्यात्; तद्धेतूनां चक्षुरादीनामनुपलम्भबाधितत्वात्। उपलभ्यन्त एव; गोलकादिरूपत्वात्तेषामिति चेत् - न - तदुपलब्धेः पूर्वं तेषामनुपलम्भात्। न च यौगपद्यनियमः; कार्यकारणभावादिति ॥

एतेन - न परमाणवः सन्ति; अनुपलब्धेः। न ते नित्या निरवयवा वा पार्थिवत्वात् घटादिवत्। न पार्थसीयपरमाणुरूपादयो नित्याः रूपादित्वात् दृश्यमानरूपादिवत्। न रूपत्वपार्थिवत्वादि नित्याकार्यातीन्द्रियसमवायिजातित्वात् भृङ्गत्ववत्। नेन्द्रियाणि सन्ति, योग्यानुपलब्धेः। अयोग्यानि च शशशृङ्गप्रतिबन्दिनिरसनीयानीत्येवं स्वर्गापूर्वदेवता-निराकरणं नास्तिकानां निरसनीयम्। 'मीमांसकश्च तोषयितव्यो भीषयितव्यश्च' इति।

चक्षुरादीनां स्वोपलम्भसमये सत्त्वं, अन्यदा त्वसत्त्वमेवेत्यत्राह—न चेति। चक्षुरादीनां स्वोपलम्भसमानकालीनत्वनियमोपगमे स्वोपलम्भं प्रति हेतुत्वं न स्यादिति भावः ॥

एतेनेति। केवलानुपलम्भस्यासाधकत्वेन अनुमानस्याश्रयासिद्ध्यादिदुष्टत्वेन चेत्यर्थः। निरसनीयमित्यग्रिमेणास्यान्वयः। रूपत्वादिपक्षकानुमाने तु अप्रसिद्धविशेषणः पक्ष इत्याश्रयासिद्धिरिति भावः। नित्याकार्येति। नित्यत्वं-ध्वंसाप्रतियोगित्वं, अकार्यत्वं प्रागभावाप्रतियोगित्वम्, अतो न पौनरुक्त्यम्। इन्द्रियाणि योग्यानि अयोग्यानि वेति विकल्प्य आद्ये दूषणमाह—योग्यानुपलब्धेरिति। द्वितीये दूषणमाह—अयोग्यानि चेति। शशशृङ्गप्रतिबन्दिश्च पूर्वोक्ता। इत्येवमिति। पूर्वोक्त-प्रकारेणेत्यर्थः। स्वर्गापूर्वेति। पूर्वोक्तपरमाणुरूपादीनामप्युपलक्षणम्। तोषयितव्यो भीषयितव्यश्चेति। केवलानुपलम्भस्याबाधकत्वस्थापनात् अतीन्द्रियापूर्वादिसिद्ध्या ईश्वरबाधासिद्ध्या चेति भावः।

अनुपलम्भादयोग्यप्रतिषेधस्य अभ्युपगमे अनभ्युपगमे च ईश्वरसिद्धिः न भवतीत्याह—यद्येवमिति। अनुपलभ्योपाधीति। अतीन्द्रियोपाधिरित्यर्थः। तथाभूतार्थसिद्धिः अयोग्यार्थसिद्धिः

अयोग्यविषये अनुपलब्धेरप्रवृत्तौ अयोग्योपाधिप्रतिषेधः कथमित्याक्षेपः

यद्येवमनुपलम्भेनादृश्यप्रतिषेधो नेष्यते, अनुपलभ्योपाधिप्रतिषेधोऽपि नैष्टव्यः। तथा च कथं तथाभूतार्थसिद्धिरपि, अनुमानबीजप्रतिबन्धासिद्धेः। तदभावे शब्दादेरप्यभावः; प्रामाण्यासिद्धेः। सेयमुभयतःपाशा रज्जुः॥

अत्र कश्चिदाह—माभूदुपाधिविधूननम्, चतुःपञ्चरूपसंपत्तिमात्रेणैव प्रतिबन्धनिर्वाहात्। तस्याश्च सपक्षासपक्षदर्शनादर्शनमात्रप्रमाणकत्वात्। यत्र तु तद्भङ्गः तत्र प्रमाणभङ्गोऽप्यावश्यकः। न ह्यस्ति संभवो दर्शनादर्शनयोरविप्लवे हेतुरूपविप्लव इति।

अप्रयोजकहेतुनिरूपणम्

अप्रयोजकोऽपि तर्हि हेतुः स्यादिति चेत्—भूयोदर्शनाविप्लवे कोऽयमप्रयोजको नाम? न तावत् साध्यं प्रत्यकार्यमकारणं वा; सामान्यतो दृष्टानुमानस्वीकारात्। नापि सामग्र्यां कारणैकदेशः; पूर्ववदभ्युपगमात्। नापि व्यभिचारी; तदनुपलम्भात्। व्यभिचारोपलम्भे वा स एव दोषः। न च शङ्कितव्यभिचारः, निर्बीजशङ्कायाः सर्वत्र सुलभत्वात्। नापि व्याप्यान्तरसहवृत्तिः; एकत्रापि साध्येऽनेकसाधनोपगमात्। नाप्यल्पविषयः; धूमादेस्तथा-

---

अनुमानात् स्यादित्यत्राह—अनुमानेति। अनुमित्यौपयिकव्याप्त्यसिद्धेरित्यर्थः। अतीन्द्रियोपाधिशङ्कासत्त्वादिति भावः। प्रामाण्यासिद्धेरिति। आप्तोक्तत्वेनानुमेयत्वादिति भावः।

सिद्धान्त्येकदेशी शङ्कते—अत्र कश्चिदिति। चतुःपञ्चरूपेति। पक्षसपक्षसत्त्वादीत्यर्थः। अन्वयव्यतिरेकिणि पञ्च—अन्यत्र चत्वारि। तस्याः पञ्चरूपसंपत्तेः। सपक्षेति। सपक्षे दर्शनं विपक्षे अदर्शनं च प्रमाणमिति भावः। तद्भङ्गः—रूपभङ्गः। हेतुरूपं—पक्षसत्त्वादि।

उपाधिविधूननस्यानावश्यकत्वे अनिष्टमाह अप्रयोजकोऽपीति। सामान्यतो दृष्टेति। कार्यकारणातिरिक्तस्य सामान्यतो दृष्टानुमानस्यापि रूपवान् रसात् गतिमान् देशान्तरे दर्शनात् इत्यादौ शाब्दैरुपगमादित्यर्थः। पूर्ववदिति। पूर्वं कारणं कपालयोगादि। तद्वतः तल्लिङ्गकस्योपगमादित्यर्थः। स एव दोष इति। व्यभिचार एव तत्र दोषः नत्वप्रयोजकत्वमिति भावः। अनेकसाधनेति। वह्न्यादौ धूमालोकादीनां साधनत्वोपगमादित्यर्थः। अल्पविषय इति। न्यूनवृत्तिरित्यर्थः। तन्निवृत्तावपि—धूमनि-

भावेऽपि हेतुत्वात्। ननु धूमो वह्निमात्रेऽप्रयोजक एव, तन्निवृत्तावपि तदनिवृत्तेः। आर्द्रेन्धनवत्त्वं वह्निविशेषं प्रति तु प्रयोजकः; तन्निवृत्तौ तस्यैव निवृत्तेरिति—एतदप्ययुक्तम्—सामान्यप्रयोजकतायां विशेषसाधकत्वायोगात्; तदसिद्धौ तस्यासिद्धिनियमात्; सिद्धौ वा सामान्यविशेषभावानुपपत्तेः। नापि क्लृप्तसामर्थ्येऽन्यस्मिन् कल्पनीयसामर्थ्योऽप्रयोजकः; नाशे कार्यत्वसावयवत्वयोरपि हेतुभावादिति।

तदेतदपेशलम्। कथं हि विशेषाभावात् कश्चिद्व्यभिचरति कश्चिच्च नेति शक्यमवगन्तुम्। ततो निर्णयकाभावे सति साहित्यदर्शनमेव शङ्काबीजमिति क्वासौ निर्बीजा। एवं सत्यतिप्रसक्तिरपि चार्वाकनन्दिनी नोपालम्भाय।

स्वभावादेव कश्चित् किञ्चिद्व्यभिचरति, कश्चिच्च नेति स्वभाव एव विशेष इति चेत्—केन चिह्नेन पुनरसौ निर्णय इति निपुणेन भावनीयम्; भूयोदर्शनस्य शतशः प्रवृत्तस्यापि भङ्गदर्शनात्। यत्र भङ्गो न दृश्यते तत् तथेति चेत्—आपाततो न दृश्यते इति सर्वत्र कालक्रमेणापि न द्रक्ष्यत इति को नियन्तेति।

वृत्तावपि। तदनिवृत्तेः- वह्निसामान्यानिवृत्तेः। तस्यैवेति। आर्द्रेन्धनवद्वह्नेरेवेत्यर्थः। तदसिद्धौ—सामान्यप्रयोजकत्वासिद्धौ। तस्य—विशेषसाधकत्वस्य। सामान्यविशेषभावानुपपत्तेरिति। विशेषव्यापकत्वात् सामान्यस्य तदव्याप्यत्वे विशेषव्याप्यत्वमपि न भवति। अन्यथा सामान्यविशेषभाव एव न स्यादिति भावः। क्लृप्तसामर्थ्ये—संप्रतिपन्नसाध्यगमकतौपयिकसामर्थ्ये। नाश इति। गुणादिसाधारण्येन नाशं प्रति भावकार्यत्वस्य गमकत्वे क्लृप्तेऽपि घटादौ सावयवत्वस्यापि हेतुत्वाश्रयणादिति भावः।

अपेशलमिति। शङ्कितव्यभिचारः अप्रयोजक इति वक्तुं शक्यत्वादिति भावः। अव्यभिचारनिश्चयेन बाधात् कथं शङ्का इत्यत आह - विशेषाभावादिति। बाधकाभावेऽपि कारणाभावे कथमियं शङ्केत्यत्राह-साहित्येति। साध्यसाहचर्यं व्यभिचार्यव्यभिचारिसाधारणो धर्मः, तद्दर्शनाद्भवन्ती शङ्का न निर्बीजेति भावः। अतिप्रसक्तिः सर्वत्र शङ्कायाः सुलभत्वेनानुमानमात्रोच्छेदप्रसक्तिः। चार्वाकनन्दिनीति। चार्वाकानन्दकरीत्यर्थः। नोपालम्भायेति। अयोग्यस्यानुपलम्भेन प्रतिषेधानुपगमे चार्वाक एव जेष्यतीति शङ्कितुस्तात्पर्यादिति भावः। यद्वा अवश्यं शङ्कया भाव्यं नियामकमपश्यतामिति चार्वाकोक्ताशङ्काबीजस्य सहचारदर्शनस्य सत्त्वात् नोपालम्भार्हेति भावः।

भङ्गदर्शनादिति। पार्थिवत्वलोहलेख्यत्वयोः वज्रमणाविति भावः।

तस्मादुपाधितद्विरहावेव व्यभिचारनिबन्धनम् । तदवधारणं चाशक्यमिति । ननु यः सर्वैः प्रमाणैः सर्वदाऽस्मदादिभिर्यद्वत्तया नोपलभ्यते, नासौ तद्वान्; यथा वक्रः श्यामिकया । नोपलभ्यते च वह्नौ धूम उपाधिमत्तया—इति शक्यमिति चेत्--न, अस्याप्यनुमानतया तदपेक्षायामनवस्थानात् । सर्वादृष्टेश्च सन्देहात्; स्वादृष्टेर्व्यभिचारतः; सर्वदेत्यसिद्धेः ।

तादात्म्यतदुत्पत्तिभ्यां व्याप्तिग्रह इति मतनिराकरणम्

तादात्म्यतदुत्पत्तिभ्यां नियम इत्यन्ये । तत्र तादात्म्यं विपक्षे बाधकात् भवति। तदुत्पत्तिश्च पौर्वापर्येण प्रत्यक्षानुपलम्भाभ्याम् । न ह्येवं सति शङ्कापिशाची अवकाशमासादयति; आशङ्क्यमानकारणभावस्यापि पिशाचादेरेतल्लक्षणाविरोधेनैव तत्त्वनिर्वाहादिति—नैवमपि; उभयगामिनोऽव्यभिचारनिबन्धनस्यैकस्याविवेचनात्; प्रत्येकं चाव्यापकत्वात्। कुतश्च कार्यात्मानौ कारणमात्मानं च न व्यभिचरत इति ॥

उपाधिशङ्कायाः परिहारमार्गः

अत्रोच्यते—

शङ्का चेदनुमास्त्येव न चेत् शङ्का ततस्तराम् ।
व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः ॥ ७ ॥

उपाधिविधूननमनुमाने न स्यादिति शङ्कते-नन्विति । अत्राप्युपाधिविधूननार्थमनुमान्तरापेक्षेति रीत्या अनवस्था स्यादिति दूषयति-नेति । किञ्चास्माभिरित्यत्र पुरुषसामान्यविवक्षायां केनचिदपि न दृश्यत इति निश्चेतुमशक्यतया असिद्धिः । स्वमात्रविवक्षायां वस्तुसद्भावेऽपि स्वस्यादर्शनसंभवात् व्यभिचारः, कालत्रयेऽपि न दर्शनमित्यस्य दुर्निश्चेयतया सर्वदेत्यस्य विवक्षितत्वे असिद्धिश्चेत्याह—सर्वादृष्टेरिति ।

उपाधिविधूननाभावेऽपि सौगतोक्तरीत्या अनुमानं भवतीति शङ्कते—तादात्म्येति । प्रत्यक्षानुपलम्भाभ्यां—अन्वयव्यतिरेकाभ्याम् । शङ्कापिशाचीति । अतीन्द्रियोपाधिशङ्कारूपा पिशाचीत्यर्थः । तन्मते वह्निं विना पिशाचादेवातीन्द्रियात् धूमोऽस्त्विति पिशाचस्य धूमकारणत्वं शङ्कनीयम्, तच्च न संभवति, कारणत्वनिर्वाहकस्यान्वयव्यतिरेकदर्शनस्यातीन्द्रियपिशाचे अभावादिति भावः । दूषयति—नेति । उभयोः तादात्म्यतदुत्पत्त्योः समुच्चित्याव्यभिचारनियामकत्वं न भवति—एकत्रास-

कालान्तरे कश्चिद्व्यभिचरिष्यतीति कालं भाविनमाकलय्याशङ्केत। तदाकलनं च नानुमानमवधीर्य कस्यचित्। मुहूर्तयामाहोरात्रपक्षमासर्त्वयनसंवत्सरादयो हि भाविनो भवन्मुहूर्ताद्यनुमेया एव, अनवगतेषु स्मरणस्याप्यनाशङ्कनीयत्वात्। अनाकलने वा क्रमाश्रित्य व्यभिचारः शङ्क्येत। तथा च सुतरामनुमानस्वीकारः। एवं च देशान्तरेऽपि वक्तव्यम्।

स्वीकृतमनुमानम्। सुहृद्भावेन पृच्छामः—कथमाशङ्का निवर्तनीयेति चेत्—न। यावदाशङ्कं तर्कप्रवृत्तेः। तेन हि वर्तमानेनोपाधिकोटौ तदायत्तव्यभिचारकोटौ वाऽनिष्टमुपनयता इच्छा विच्छिद्यते। विच्छिन्नविपक्षेच्छश्च प्रमाता भूयोदर्शनोपलब्धसाहचर्यं लिङ्गमनाकुलोऽधितिष्ठति, अधिष्ठिताच्च करणात् क्रियापरिनिष्पत्तिरिति किमनुपपन्नम्॥

ननु तर्कोऽप्यविनाभावमपेक्ष्य प्रवर्तते। ततोऽनवस्थया भवितव्यम्। न। शङ्काया व्याघातावधित्वात्। तदेव ह्याशङ्क्यते, यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातादयो दोषा नावतरन्तीति लोकमर्यादा। न हि हेतुफलभावो न भविष्यतीति शङ्कितुमपि शक्यते। तथा सति शङ्कैव न स्यात्, सर्वं मिथ्या भविष्यतीत्यादिवत्॥

मावेशात् एकैकश्च न सर्वानुगतम्, विपक्षबाधकतर्कस्यापि व्याप्त्यपेक्षत्वात् तत्रापि तर्कान्तरमिति रीत्यानवस्थापत्तिरप्येतन्मते दूषणमिति भावः। उभयगामिनः—तदात्मतदुत्पन्नोभयगामिनः। कुतश्चेति। तर्कान्तरानुधावनेऽनवस्थेति भावः।

शङ्का चेदिति। यदा यत्र साहचर्यदर्शनं, तदा तत्र व्यभिचारशङ्काया असंभवेन भाविकालावच्छेदेन देशान्तरावच्छेदेन वा व्यभिचारशङ्का वाच्या, तदा कालदेशान्तरावगतिः अनुमानेनैवेत्यनुमासिद्धिरिति भावः। न चेदिति। शङ्काभावे सुतरामनुमासिद्धिः। उभयथा नानुमानोच्छेद इति भावः। वस्तुतः कथं शङ्कानिवृत्तिरित्यत्राह—व्याघातावधिरिति। न तावदुपर्युपरि अनवस्थया शङ्कापरम्परा जायेरन् स्वक्रियाव्याघाते सति तन्निवृत्तेः ततः पूर्वं जायमाना अपि तर्कादपनेयाः नातोऽनवस्थादिरिति भावः॥

इच्छा विच्छिद्यत इति। धूमस्य सोपाधिकत्वे व्यभिचारित्वे वा वह्निजन्यत्वं न स्यादित्यनिष्टप्रसङ्गात्मकतर्केण धूमवानपि कश्चित् वह्निशून्यो भवत्विति जिज्ञासा निवर्तेत इति भावः। अनाकुलः—शङ्कारहितः। अधितिष्ठति—व्याप्यत्वेन निश्चिनोति। क्रियापरिनिष्पत्तिः—अनु-

अतीन्द्रियोपाधिनिषेधे किं प्रमाणमित्याक्षेपस्य समाधिः

अथाप्यतीन्द्रियोपाधिनिषेधे किं प्रमाणमित्युच्यतामिति चेत्—न वै कश्चिदतीन्द्रियोपाधिः प्रमाणसिद्धोऽस्ति, यस्याभावे प्रमाणमन्वेषणीयम्। केवलं साहचर्यं निबन्धनान्तरमात्रं शङ्क्यते। ततः शङ्कैव फलतः स्वरूपतश्च निवर्तनीया। तत्र फलमस्याः विपक्षस्यापि जिज्ञासा तर्कादाहत्य निवर्तते; ततोऽनुमानप्रवृत्तौ शङ्कास्वरूपमपीति सर्वं सुस्थम्॥

न चैतदनागमम्, न्यायाङ्गतया तर्कं व्युत्पादयतः सूत्रकारस्याभिमतत्वात्। अन्यथा तद्व्युत्पादनवैयर्थ्यात्। तदयं संक्षेपः—यत्रानुकूलतर्को नास्ति सोऽप्रयोजकः। स च द्विविधः, शङ्कितोपाधिः निश्चितोपाधिश्च; यत्रेदमुच्यते—

'यावच्चाव्यतिरेकित्वं शतांशेनापि शङ्क्यते।
विपक्षस्य कुतस्तावत् हेतोर्गमनिकाबलम्॥'

उपाधिलक्षणम्

तत्रोपाधिस्तु—साधनाव्यापकत्वे सति साध्यव्यापकः। तद्धर्मभूता हि व्याप्तिः जपाकुसुमरक्ततेव स्फटिके साधनाभिमते चकास्तीत्युपाधिरसावुच्यत इति। तदिदमाहुः—

अन्ये परप्रयुक्तानां व्याप्तीनामुपजीवकाः।
तैर्दृष्टैरपि नैवेष्टा व्यापकांशावधारणा॥ (मी. श्लो. वा. १४-२-५) इति।

मितिसम्पत्तिः। शङ्कैव न स्यादिति। तत्साध्यफलप्रसक्तेरिति भावः। सर्वं मिथ्येति। तद्वाक्यार्थस्यापि मिथ्यात्वापातादिति भावः।

एतावता अयोग्यानुपलम्भस्यानिषेधकत्वे अतीन्द्रियोपाधेः निषेधे किं प्रमाणमुक्तमिति पृच्छति—अथापीति। किं स निश्चितः संदिग्धो वेति विकल्प्याद्यं निरस्यति—नवेति। द्वितीयं प्रतिवक्तुमनुवदति—केवलमिति। उपाधिशङ्कया व्यभिचारशङ्का तया हेतुमानपि कश्चित् साध्यरहितोऽस्त्विति जिज्ञासा स्यात् सा च तर्कादपनीयत इति पूर्वमेवोक्तम्।' ततो व्याप्तिनिश्चये सति शङ्कास्वरूपमपि निवर्तत इत्याह तत इति। तदिदं शास्त्रसंमतमित्याह—न चैतदित्यादिना॥

यत्रेदमिति। शङ्कितोपाधिविषये वक्ष्यमाणमुच्यत इत्यर्थः। यावच्चेति। विपक्षस्य हेतुव्यतिरेकशून्यत्वं हेतुमत्त्वं यावन्मात्रयापि शङ्क्यते तावत् हेतोः साध्यगमकत्वं न भवतीति भावः।

तदनेन विपक्षदण्डभूतेन तर्केण सनाथे भूयोदर्शने, कार्यं वा कारणं वा ततोऽन्यद्वा, समवायि वा संयोगि वाऽन्यथा वा भावो वाऽभावो वा, सविशेषणं वा निर्विशेषणं वा लिङ्गमिति निश्शङ्कमवधारणीयम्; अन्यथा तदाभास इति रहस्यम् ॥

तादात्म्यतदुत्पत्त्योरप्येतदेव बीजम्। यदि हि कार्यात्मानौ कारणमात्मानं चातिपतेताम्, तदा तयोस्तत्त्वं व्याहन्येत। अत एव सामग्रीनिवेशिनश्चरमकारणादपि कार्यमनुमिमते सौगता अपि। तस्माद्विपक्षबाधकमेव प्रतिबन्धलक्षणम् ॥

तथा हि—शाकाद्याहारपरिणतिविरहिणि मित्रातनये, न किञ्चिदनिष्टमिति नासौ तस्य व्यापिका; व्यापिका तु श्यामिकायाः; कारणत्वावधारणात्। कारणं च तत् तस्य; तदतिपत्य भवति चेति व्याहतम्। एवमन्यत्राप्यूहनीयमिति ॥

अप्रयोजकस्य क्लृप्तहेत्वाभासेऽन्तर्भावकथनम्

क्व पुनरप्रयोजकोऽन्तर्भवति? न क्वचिदित्येके। यथा हि सिद्धसाधनम् न बाधितविषयम्, विषयापहाराभावात्; नापि निर्णये सति पक्षत्वातिपातादपक्षधर्मः, कालातीत-

---

उपाधिरित्युक्तेः बीजमाह—तत्रोपाधिरित्यादिना। साध्यव्यापक इति। साध्यसमव्यापक इत्यर्थः। उपाधिरसावुच्यत इति। जपाकुसुमादिवदन्यत्र स्ववृत्तिधर्माध्यासहेतुत्वात् शाकाहारपरिणत्यादिरुपाधिरुच्यते इति भावः। समव्याप्त्यभावे उपाधिव्यवहारो गौण इति ध्येयम्।

अन्य इति। सोपाधिका इत्यर्थः। परप्रयुक्तानां—उपाधिप्रयुक्तानां। तैर्दृष्टैरिति। पक्षे निश्चितैरपि सोपाधिकैरित्यर्थः। व्यापकेति। न साध्यानुमितिरिति भावः ॥

अतः अनुकूलतर्कस्यावश्यकत्वात् तत्सहिते भूयोदर्शने सति कार्यकारणाद्यात्मकमेव लिङ्गं भवतीति न नियम इत्याह—तदनेनेति। अन्यथा वेति—एकार्थसमवायि विरोधि वेति भावः।

एतदेवेति। तर्कानुगृहीतं भूयोदर्शनमेवेत्यर्थः। अत एवेति। विपक्षे बाधकात् अविनाभावग्रहोपगमादेवेत्यर्थः। चरमकारणादपीति। मुरजाभिघातदर्शनात् बधिरस्य शब्दानुमानमित्यादाविति भावः। प्रतिबन्धलक्षणं—व्याप्तिनिश्चायकम् ॥

विलोपप्रसङ्गात्; न त्वनैकान्तिकादिः व्यभिचाराद्यभावात्—तथाऽयमपि । सूत्रं तूपलक्षण-परमिति - तदसत् - विभागस्य न्यूनाधिकसंख्याव्यवच्छेदफलत्वात् ॥

क्व तर्हि तयोरन्तर्निवेशः ? असिद्धे एव । तथा हि—व्याप्तस्य हि पक्षधर्मताप्रतीतिः सिद्धिः । तदभावोऽसिद्धिः । इयं च व्याप्तिपक्षधर्मतास्वरूपाणामन्यतमाप्रतीत्या भवन्ती यथासंख्यमन्यथासिद्धिराश्रयासिद्धिः स्वरूपासिद्धिरित्याख्यायते । मध्यमाऽप्याश्रयस्वरूपा-प्रतीत्या तद्विशेषणपक्षत्वाप्रतीत्या वेति द्वयी । तत्र, चरमा सिद्धसाधनमिति व्यपदिश्यते; व्याप्तिस्थितौ पक्षत्वस्याहत्य विघटनात् । न त्वेवं बाधे, व्याप्तेरेव प्रथमं विघटनादिति विशेषः ।

तर्कस्य व्याप्तिनिश्चयं प्रति अन्वयव्यतिरेकावुपपादयति—तथा हीति । असौ—शाकाहार-परिणतिः । तस्य—मित्रातनयत्वस्य । तर्काप्रवृत्तेः न व्याप्तिनिश्चयः । अत एवाप्रयोजकसाधनाव्यापक-त्वशङ्केत्युक्तं भवति । कार्यकारणभावभङ्गलक्षणतर्केण साध्यव्यापकत्वमुपाधेः निश्चीयत इति आह—व्यापिकेति । ततः परं व्याघातेन शङ्कानिवृत्तिमाह—तदुतिपत्त्येति ।

अस्त्वप्रयोजको नाम कश्चिदुक्तलक्षणलक्षितो हेतुः, तथापि तस्य कस्मिन् हेत्वाभासेऽन्तर्भावः, येन कथायां तदुद्भावनात् परपराजयः स्यादिति शङ्कते—पुनरिति । सिद्धसाधनवदप्रयोजकोऽपि पञ्चधा विभक्तेष्वनन्तर्भूतः कश्चिद्धेत्वाभासः विभागसूत्रमुपलक्षणपरमिति केषाञ्चिन्मतमाह—न क्वचि-दित्येक इति । सिद्धसाधनस्य क्लृप्तेष्वनन्तर्भावमुपपादयति—यथा हीति । विपयापहारभावा-दिति । पक्षे साध्याभावनिश्चयाभावादिति भावः । निर्णये सति साध्यसिद्धौ सत्यां पक्षत्वातिपातात् साध्यसन्देहविषयत्वरूपपक्षताविरहात् । अपक्षधर्म इति । ततश्चासिद्धेष्वन्तर्भावः स्यादिति भावः । कालातीतविलापेति । बाधदशायामपि पक्षताविरहादसिद्धावेव बाधस्यान्तर्भावसंभवादिति भावः । अयमपीति । अप्रयोजकोऽपीत्यर्थः ।

अन्यतमाप्रतीत्येति । व्याप्त्यप्रतीत्या पक्षधर्मत्वाप्रतीत्या स्वरूपाप्रतीत्या वेति भावः । अन्यथासिद्धिः—व्याप्यत्वासिद्धिः । सिद्धसाधनान्तर्भावाय मध्यमां विभजते—मध्यमापीति । आश्रया-सिद्धिरपीत्यर्थः । सिद्धसाधनवत् बाधस्यापि पक्षताप्रतीतिविघटकत्वेनासिद्धावन्तर्भावसंभवात् पृथग्हे-त्वाभासत्वकथनं न युक्तमित्यत्राह—व्याप्तीति । सिद्धसाधने व्याप्तिसत्त्वात् पक्षतामात्रविघटनम् । 'ह्रदो

यत्त्वप्रयोजकः सन्दिग्धानैकान्तिक इत्यनैकान्तिकेऽन्तर्भाव्यते - तदसत् - व्याप्त्यसिद्ध्या हि निश्चितेन व्यभिचारः शङ्कनीयोऽन्यथा वा। प्रथमे असिद्धिरेव दूषणम्; उपजीव्यत्वात्; नानैकान्तिकम्; उपजीवकत्वात्। अन्यथाशङ्कात्वदूषणमेव; निर्णीते तदनवकाशादिति ॥

उपमानस्य ईश्वरबाधकत्वनिरासः

उपमानं तु बाधकमनाशङ्कनीयमेव, विषयानतिरेकादिति केचित्। तथा हि—न तावदस्य विषयः सादृश्यव्यपदेश्यं पदार्थान्तरमेव संभावनीयम्;

परस्परविरोधे हि न प्रकारान्तरस्थितिः।
नैकताऽपि विरुद्धानामुक्तिमात्रविरोधतः ॥ ८ ॥

पूर्वपक्षिणा उपमानस्य विषयो नास्तीति निरूपणम्

न हि भावाभावाभ्यामन्यः प्रकारः संभावनीयः, परस्परविधिनिषेधरूपत्वात्। न भाव इति हि निषेधमात्रेणैवाभावविधिः। ततः तं विहाय कथं स्ववचनेनैव पुनः सहृदयो निषेधेत्, नाभाव इति। एवं नाभाव इति हि निषेध एव भावविधिः। ततः तं विहाय

वह्निमान् जलादि' त्यादौ बाधे तु हेतुमतः पक्षस्य साध्याभाववत्त्वग्रहे व्याप्तेरेव प्रथमं विघटनम्, पश्चादेव पक्षताया इति विशेषात्। यौगपद्येऽपि व्याप्तिपक्षधर्मतयोरुभयोरभावेन असिद्ध्यनैकान्तिकान्यतरान्तर्भावनियामकाभावाच्च बाधस्य पृथगुक्तिरिति भावः ॥

मतान्तरं विकल्प्य निराकरोति—यत्त्विति। तदसदिति। व्यभिचारशङ्कायाः व्याप्त्यसिद्धिमूलकत्वे उपजीव्यत्वादसिद्धिरेव दोषः स्यात्। अन्यमूलकत्वे व्याप्तिनिश्चये सति निवृत्तिसंभवात न दोषत्वमिति भावः ॥

एवं प्रत्यक्षानुमानबाध ईश्वरे नास्तीति निरूपितम्। अथ उपमानबाधोऽपि नास्तीति निरूप्यते। तत्र प्रथममुपमानं प्रत्यक्षानुमानाद्यनतिरिक्तविषयकत्वात् तदबाधितं न बाधितुमलमिति केषांचिन्मतमाह—उपमानं तु इति ॥

परस्परेति। परस्परभिन्नभावाभावरूपपदार्थद्वयेऽप्यनन्तर्भवन् न पदार्थः स्यात। तृतीयप्रकाराभावादिति भावः। नैकतेति। भावभिन्नानामभावभिन्नानाञ्चान्योन्यभेदादेकसादृश्यरूपता न

स्ववाचैवानुन्मत्तः कथं पुनः निषेधेत्, न भाव इति। अत एवम्भूतानामेकताऽप्यशक्यप्रतिपत्तिः। प्रतिषेधविध्योरेकत्रासम्भवात्। तस्मात् भावाभावावेव तत्त्वम् ॥

भावत्वेऽपि गुणवन्निर्गुणं वेति द्वयमेव पूर्ववत्। पूर्वं द्रव्यमेव। उत्तरञ्चाश्रितमनाश्रितं वेति द्वयमेव पूर्ववत्। तत्रोत्तरं समवाय एव, अनवस्थाभयात्। आश्रितं तु सामान्यवन्निःसामान्यं चेति पूर्ववद्द्वयमेव। तत्र प्रथममपि स्पन्दोऽस्पन्द इति द्वयमेव। एतच्च यथासंख्यं कर्म गुण इति व्यपदिश्यते। निस्सामान्यं निर्गुणमाश्रितं तु एकाश्रितमनेकाश्रितं वेति प्रागिव द्वयमेव। एतदपि यथासंख्यं विशेषः सामान्यश्चेत्यभिधीयते। तत् एतत्सादृश्यमेतास्वेकां विधामासादयत् नातिरिच्यते। अनासादयन्न पदार्थीभूय स्थातुमुत्सहते। एतेन शक्तिसङ्ख्यादयो व्याख्याताः। ततोऽभावेन सह सप्तैव पदार्था इति नियमः। अतो नोपमानविषयोऽर्थान्तरमिति ॥

भवतीत्यर्थः। एकं सादृश्यं भावभिन्नं अभावभिन्नं चेति वक्तुं न शक्यम्। भावभिन्नत्वे अभावभिन्नत्वोक्तेरेव विरुद्धत्वादिति भावः।

त्वदुक्तेषु षट्सु भावेष्वनन्तर्भूतमिदं भावरूपमेवास्त्वित्यत्राह—भावेष्वपीति (भावत्वेपीति)। एवमग्रेऽपि भाव्यम्। पूर्ववदिति। परस्परविरोधे प्रकारान्तराभावादिति भावः।

नन्वेवं सामान्यादीनामपि साधर्म्यात् द्रव्यादित्रयेऽन्तर्भावः स्यादिति चेत्—न। वैधर्म्यस्यापि सत्त्वात्, सादृश्यस्य तु तत्त्वे मानाभाव इत्याशयात्। संख्यादय इति। सर्वपदार्थेष्वेकत्वादिप्रतीत्या संख्या अतिरिक्तेति केचित्। तत्राप्युक्तरीत्या अनतिरेको भाव्य इति भावः। आदिना अधिकरणत्वप्रतियोगित्वग्रहः ॥

एवमतिरिक्तसादृश्याख्यप्रमेयाभावादुपमानमिति न किञ्चित् प्रमाणमिति प्राप्ते, अनतिरिक्तमेव सामान्यादिरूपं सादृश्यं ग्राहयदुपमानं प्रमाणमस्त्विति शङ्कते—स्यादेतदिति। जरन्मीमांसकमतमिदम्। प्रत्यक्षादिना अन्यथासिद्धिं व्युदस्यति—तत्सदृशोऽयमिति। तदापातमात्रेणेति। इन्द्रियसन्निकर्षमात्रेणेत्यर्थः। सोऽयमिति प्रत्यभिज्ञानवत् तत्सदृशोऽयमित्यपि प्रत्ययः तत्तानुसन्धानमिव पूर्वानुभूतसादृश्यप्रतियोग्यनुसन्धानमपेक्ष्य इन्द्रियेणैव जन्यत इत्यदोषात् नोपमानमतिरिक्तमिति समाधत्ते—नेति।

साद्दश्यमेवोपमानस्य विषय इत्याक्षेपः

स्यादेतत् । भवतु सामान्यमेव साद्दश्यं, तदेव तस्य विषयः स्यात् । तत्सद्दशोऽयमिति हि प्रत्ययो नेन्द्रियजन्यः, तदापातमात्रेणानुत्पत्तेरिति चेत्—न, पूर्वपिण्डानुसन्धानरूपसहकारिवैधुर्येणानुत्पत्तेः सोऽयमिति प्रत्यभिज्ञानवदिति ॥

नन्वेतत्सद्दशः स इति नेन्द्रियजन्यम्, तेन तस्यासंबन्धात् । न चेदं स्मरणम्, तत्पिण्डानुभवेऽपि विशिष्टस्याननुभवात् । न चैतदपि, अयं स इति विपरीतप्रत्यभिज्ञानवदुपपादनीयम्; तत्तेदन्तोपस्थापनक्रमविपर्ययेऽपि विशेष्यस्येन्द्रियेण सन्निकर्षाविरोधात्; तस्य सन्निहितवर्तमानगोचरत्वात् । प्रकृते तु तदभावात् । तस्मात् तत्पिण्डस्मरणसहायमेतत्पिण्डवर्तिसाद्दश्यज्ञानमेव तथाविधं ज्ञानमुत्पादयदुपमानं प्रमाणमिति ।

तत्परिहारः

एतदपि नास्ति—

साधर्म्यमिव वैधर्म्यं मानमेवं प्रसज्यते ।
अर्थापत्तिरसौ व्यक्तमिति चेत्प्रकृतं न किम् ॥ ९ ॥

यदा हि एतद्विसद्दशोऽसौ इति प्रत्येति, तत्रापि तुल्यमेतत् । न हि तत् प्रत्यक्षम्, असन्निकृष्टविषयत्वात् । न स्मरणम्, विशिष्टस्याननुभवात् । नोपमानम्, असाद्दश्यविषयत्वात् ।

विकृतिसाद्दश्यप्रकारेण प्रकृतेरिव द्दश्यमानव्यक्तिसाद्दश्यविशिष्टतया विप्रकृष्टस्य प्रत्ययः उपमानफलं स्यादिति शङ्कते—नन्विति । विशिष्टस्येति । एतत्साद्दश्यविशिष्टस्येत्यर्थः । प्रत्यभिज्ञानवैषम्यमाह—तत्तेदन्तेति । सोऽयमिति वा अयं स इति वा जायमाने प्रत्यभिज्ञाने सन्निकृष्टमेकमेव विशेष्यमिति विशेषणोपनायकक्रमभेदेन आकारभेदेऽपि इन्द्रियजन्यत्वमुपपद्यते । एतत्सद्दशस्स इति प्रत्यये त्वसन्निकृष्टमेव विशेष्यमिति नेन्द्रियजन्यत्वं युज्यत इति भावः ॥

साधर्म्यमिवेति । एतत्सद्दशस्स इति प्रत्यये साद्दश्यमिव एतद्विसद्दशस्स इति प्रत्यये वैसाद्दश्यमप्यतिरिक्तं मानं स्यादिति भावः । अर्थापत्तिरिति । तस्य एतद्वैधर्म्यमन्तरा तद्वैधर्म्यमस्य द्दश्यमानं नोपपद्यत इत्यर्थापत्त्या तत्प्रत्यय इति चेत्—तदा तस्यैतत्साद्दश्यमन्तरा तत्साद्दश्यमस्य द्दश्यमानं नोपपद्यत इत्यर्थापत्त्यैव प्रकृतप्रत्ययेनोपमानं मानं स्यादिति भावः ॥

ननु—एतद्धर्माभावविशिष्टत्वमेव तस्य वैधर्म्यम्, तच्चाभावगम्यमेवेष्यते। न च प्रकृतेऽपि तथाऽस्तु, सादृश्यस्य भावरूपत्वादिति चेत्—न, इतो व्यावृत्तधर्मविशिष्टताया अपि वैधर्म्यरूपत्वात्; तस्य च भावरूपत्वात्। स्यादेतत्—तद्धर्मा इह न सन्तीत्यवगते, अर्थादापद्यते—इहाविद्यमानास्तत्र सन्तीति। न हि तद्विधर्मत्वमेतस्योपपद्यते, यद्येतद्विधर्माऽसौ न भवतीति चेत्—एवं तर्हि प्रकृतमप्यर्थापत्तिरेव। न हि तत्सादृश्यविशिष्टत्वमेतस्य प्रत्यक्षसिद्धमपि तस्यैतत्सादृश्यविशिष्टत्वं विनोपपद्यते।

एतेन दृष्टासन्निकृष्टप्रत्यभिज्ञानं व्याख्यातम्। तत्रापि तद्धर्मशालित्वं तस्य स्मरणाभिव्यक्तमनुपपद्यमानं तदिदन्तास्पदस्यैकतां व्यवस्थापयति। तस्मात् नोपमानमधिकमिति॥

सिद्धान्तिना उपमानस्य विषयोऽस्तीति निरूपणम्

एवं प्राप्तेऽभिधीयते—

संबन्धस्य परिच्छेदः संज्ञायास्संज्ञिना सह।
प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुः॥ १०॥

अभावगम्यमेवेति। अनुपलब्धिरूपप्रमाणगम्यत्वात्। नातिरिक्तमानकल्पनाप्रसङ्ग इति भावः। वैधर्म्यस्यापि क्वचिद्भावरूपतया वक्तुं शक्यत्वात् तत्र मानान्तरप्रसङ्गो दुर्वार एवेत्याह—इतो व्यावृत्तेति।

ननु प्रत्यभिज्ञायमानस्य पूर्वापरकालमध्यकालसत्त्वं नेन्द्रियगम्यम्, तत्र सन्निकर्षाभावेन तज्ज्ञानस्येन्द्रियजन्यत्वासंभवात् उपमानमेव मानमस्त्वित्यत्राह—एतेनेति। अर्थापत्त्यन्तर्भावेणेत्यर्थः। एतमेवोपपादयति—तत्रापीति। प्रत्यभिज्ञायमानस्य पूर्वापरकालमध्यकालावस्थानमुपमानपरिच्छेद्यमित्येतदेतेनेत्यादिना व्युदस्यत इति व्याख्यातारः॥ वस्तुतस्तु सोऽयमिति प्रत्यभिज्ञानस्य इदन्ताविशिष्टांशे सन्निकृष्टविषयकत्वेऽपि तत्ताविशिष्टांशे इन्द्रियसन्निकर्षाभावादसन्निकृष्टविषयकतया प्रत्यक्षत्वासंभवात् अतिरिक्तप्रमाणत्वं वदन्निरस्त इत्याह—एतेनेति। उपमानस्थले सादृश्यज्ञापकस्येव प्रत्यभिज्ञास्थले ऐक्यज्ञापकस्यापि अर्थापत्त्यन्तर्भावान्नातिरिक्तप्रमाणत्वमित्यर्थः तदुपपादयति तथापीति। इति व्याख्यानमेव ज्यायः।

एवं विषयाभावादुपमानं न प्रमाणमिति प्राप्ते सिद्धान्त्यस्य विषयं दर्शयति—अभिधीयत इति। संबन्धस्येति। वाच्यवाचकभावात्मकस्येत्यर्थः। परिच्छेदः—निश्चयः। इन्द्रियादिजन्यः

यथा गौस्तथा गवय इति श्रुतातिदेशवाक्यस्य, गोसदृशं पिण्डमनुभवतः, स्मरतश्च वाक्यार्थं अयमसौ गवयशब्दवाच्य इति भवति मतिः। सेयं न तावत् वाक्यमात्रफलम्, अनुपलब्धपिण्डस्यापि प्रसङ्गात्। नापि प्रत्यक्षफलम्। अश्रुतवाक्यस्यापि प्रसङ्गात्। नापि समाहारफलम्। वाक्यप्रत्यक्षयोर्भिन्नकालत्वात्। वाक्यतदर्थयोः स्मृतिद्वारोपनीतावपि गवयपिण्डसंबद्धेनापीन्द्रियेण तद्गतसादृश्यानुपलम्भे समयपरिच्छेदासिद्धेः। फलसमाहारे तु तदन्तर्भावे अनुमानादेरपि प्रत्यक्षत्वप्रसङ्गः। तत् किं तत्फलस्य तत्प्रमाणबहिर्भाव एव? अन्तर्भावे वा कियती सीमा? तत्तदसाधारणेन्द्रियादिसाहित्यम्। अस्ति तर्हि सादृश्यादिज्ञानकाले विस्फारितस्य चक्षुषो व्यापारः—न, उपलब्धगोसादृश्यविशिष्टगवयपिण्डस्य वाक्यतदर्थस्मृतिमतः कालान्तरेऽप्यनुसन्धानबलात् समयपरिच्छेदोपपत्तेः।

शब्देनानुमानेन वा उपमानं गतार्थमित्याक्षेपः

ननु च वाक्यादेवानेन समयः परिच्छिन्नः, गोसदृशस्य गवयशब्दस्संज्ञेति। केवलमिदानीं प्रत्यभिजानात्ययमसाविति। प्रयोगाद्वाऽनुमितः, यो यत्रासति वृत्त्यन्तरे वृद्धैः प्रयुज्यते, स तस्य वाचकः, यथा गोशब्द एव गोः, प्रयुज्यते चायं गोसदृशे इति किमुपमानेनेति—न—

स्यादित्यत्राह—प्रत्यक्षादेरिति। अतिदेशवाक्यश्रवणाभावे, गवयं पश्यतोऽपि गवयपदवाच्यत्वनिश्चयानुदयादिति भावः। आदिना वाक्यानुमानयोः ग्रहः। अदृष्टपिण्डस्य वाक्यश्रवणमात्रेण संबन्धपरिच्छेदादर्शनात् अनन्यथासिद्धलिङ्गस्य चासिद्धेश्चेति भावः। वाक्यप्रत्यक्षयोः प्रत्येकं व्यभिचारेऽपि समुदितयोस्तयोः फलमित्युक्ते नायं दोष इत्यत्राह—नापि समाहारेति। तद्गतसादृश्यानुपलम्भ इति। गवयाकारे सन्निकर्षसत्त्वेऽपि असन्निकृष्टगवाकारसंस्कारप्रमोषात् तद्गतसादृश्यानुपलम्भ इति भावः। फलसमाहारे त्विति। वाक्यप्रत्यक्षयोः ये अर्थस्मृतिसादृश्यदर्शनरूपे फले तयोः समाहारे सत्येव समयपरिच्छेदस्य दर्शनात् प्रत्यक्षादिमूलकत्वेन प्रत्यक्षाद्यन्तर्भावे लिङ्गदर्शनादिमूलकत्वेनानुमानादेरपि तत्रान्तर्भावः स्यादिति प्रत्यक्षादिप्रमाणफलीभूतलिङ्गदर्शनादेः तत्प्रमाणबहिर्भाववत् प्रत्यक्षादिप्रमाणफलीभूतसादृश्यदर्शनादेरपि तत्प्रमाणबहिर्भाव एव वक्तव्य इति भावः। यद्येवं, तर्हि निर्विकल्पप्रत्यक्षफलस्य सविकल्पस्य प्रत्यक्षान्तर्भावो न स्यात्, तदन्तर्भावे वा किं नियामकमिति पृच्छति—तत्किमिति। तत्प्रमाणबहिर्भाव एवेति। तथा सति निर्विकल्पफलस्य सविकल्पस्य प्रत्यक्षत्वं न

तत्परिहारः

साद्दश्यस्यानिमित्तत्वात् निमित्तस्याप्रतीतितः ।
समयो दुर्ग्रहः पूर्वं शब्देनानुमयाऽपि वा ॥ ११ ॥

उपमानस्य शब्देनागतार्थतायाः साधनम्

न हि गवयशब्दस्य साद्दश्यं प्रवृत्तिनिमित्तं, अप्रतीतगूनामव्यवहारप्रसङ्गात्। न चोभयमपि निमित्तम्, स्वयंप्रतीतसमयसंक्रान्तयेऽतिदेशवाक्यप्रयोगानुपपत्तेः । गवयत्वे ह्ययं व्युत्पन्नो वृद्धव्यवहारात्, न साद्दश्ये। कथमेतन्निर्धारणीयमिति चेत्—वस्तुगतिस्तावदियम्, तदापाततस्सन्देहेऽपि न फलसिद्धिः, गन्धवत्त्वमिव पृथिवीत्वस्य, गोसाद्दश्यं गवयशब्दप्रवृत्तिनिमित्तस्योपलक्षणम्, इदमेव वा निमित्तमित्यनिर्धारणात् ॥

स्यादेतत्। पूर्वं निमित्तानुपलब्धेः न फलसिद्धिः, इदानीं तु तस्मिन्नुपलब्धे तदेव वाक्यं स्मृतिसमारूढं फलिष्यति, अध्ययनसमयगृहीत एव वेदराशिरङ्गोपाङ्गपर्यवदातस्य कालान्तरे। न च वाच्यम्, वाक्येन स्वार्थस्य प्रागेव बोधितत्वात् प्रागेव पर्यवसितमिति,

---

स्यादिति भावः । कियती सीमेति। किं नियामकमिति भावः। चक्षुषो व्यापार इति। इन्द्रियसाहित्यसत्त्वात् तत्फलस्य प्रत्यक्षत्वं स्यादिति भावः। कालान्तरेऽपीति। गवयदर्शनानन्तरं तद्दर्शनरहितकालेऽपीत्यर्थः। तदानीमिन्द्रियसाहित्याभावात् प्रत्यक्षत्वं न सुवचमिति भावः।

ननु शब्देनानुमानेनैव वा अयं प्रत्ययः स्यादिति शङ्कते—ननु चेति। तर्हि गवयपिण्डदर्शनकाले तज्ज्ञानानुभवविरोध इत्यत्राह—केवलमिति। पूर्वं गवयपदवाच्यत्वेन योऽवगतः अयं स इति प्रत्यभिजानातीत्यर्थः। अनिमित्तत्वादिति। शक्यतानवच्छेदकत्वादित्यर्थः। निमित्तस्येति। गवयत्वजातेरित्यर्थः। पूर्वमिति। गवयदर्शनात्पूर्वमित्यर्थः। उभयमपीति। साद्दश्यगवयत्वोभयमपीत्यर्थः। समुच्चितस्य निमित्तत्वे गोप्रतीतिरहितानां आरण्यकानां गवयव्यवहारानुपपत्तिस्तदवस्थैवेति प्रत्येकं निमित्तत्वेऽपि दोषमाह—स्वयमिति। एतदिति। गवयत्वे व्युत्पन्न इत्येतदित्यर्थः। वस्तुगतिरिति। आरण्यकानां गोप्रतीतेरनियतेः साद्दश्यापेक्षया गवयत्वजातेः लघुत्वात् गवयपिण्डदर्शनाच्चेति भावः। फलसिद्धिः—शक्तिनिश्चयः। गोसाद्दश्यं प्रवृत्तिनिमित्तं तदुपलक्षितं धर्मान्तरं वेति सन्देहे न शक्तिनिश्चयो जायत इति भावः।

गोसादृश्यस्योपलक्षणनिमित्तत्वयोरन्यतरत्र तात्पर्ये सन्देहात्। इदानीं तु गवयत्वेऽवगते तर्कपुरस्कारात्सादृश्यस्योपलक्षणतायां व्यवस्थितायां गङ्गायां घोष इतिवदन्वयप्रतिपत्तिरिति चेत्—न,

श्रुतान्वयादनाकाङ्क्षं न वाक्यं ह्यन्यदिच्छति।
पदार्थान्वयवैधुर्यात् तदाक्षिप्तेन सङ्गतिः॥ १२॥

गोसदृशो गवयशब्दवाच्य इति सामानाधिकरण्यमात्रेणान्वयोपपत्तौ विशेषसन्देहेऽपि वाक्यस्य पर्यवसितत्वेन मानान्तरोपनीतानपेक्षणात्, रक्तारक्तसन्देहेऽपि घटो भवतीति वाक्यवत्। अन्यथा वाक्यभेददोषात्। न च गङ्गायां घोष इतिवत् पदार्था एवान्वयायोग्याः, येन प्रमाणान्तरोपनीतेनाऽन्वयः स्यात्। अथ प्रतीतवाक्यार्थबलायातोप्यर्थो यदि वाक्यस्यैव, दिवाभोजननिषेधवाक्यस्यापि रात्रिभोजनमर्थः स्यात्। तस्मात् यथा गवयशब्दः कस्यचित् वाचकः शिष्टप्रयोगादिति सामान्यतो निश्चितेऽपि, विशेषे मानान्तरापेक्षा,

---

श्रुतपूर्वमेवातिदेशवाक्यं गवयत्वावच्छिन्नोपलम्भानन्तरं गवयपदशक्तिं बोधयत्विति शङ्कते—स्यादेतदिति। पूर्वं—गवयदर्शनात्पूर्वम्। इदानीं—गवयदर्शनकाले। वाक्यं विनष्टमित्यत्राह—स्मृतिसमारूढमिति। अङ्गोपाङ्गपर्यवदातस्येति। अङ्गोपाङ्गाद्यध्ययनव्युत्पन्नपदपदार्थस्येति भावः। सन्देहादिति। पूर्वमनिश्चयात् न वाक्यपर्यवसानमिति भावः। कथमिदानीं निश्चय इत्यत्राह—इदानीन्त्विति। तर्कः—लाघवगौरवालंबनः। एवमुक्तां वाक्येनान्यथासिद्धिं निरस्यति—नेति। श्रुतान्वयादिति। गोसदृशो गवयपदवाच्य इति श्रुतान्वयसंभवात् निराकाङ्क्षं तद्वाक्यं पूर्वमेव पर्यवस्यति न पुनः प्रत्यक्षोपनेष्यमाणं प्रवृत्तिनिमित्तमपेक्ष्य विलम्बते। गङ्गायां घोष इति वाक्यं तु वाच्यार्थान्वयबाधात् तल्लक्षितयोग्यार्थान्वयबोधेन पर्यवसितुं किञ्चिद्विलम्बत इति भावः।

सामानाधिकरण्यमात्रेणेति। अवच्छेदकानवधारणेऽपि नान्वयानुपपत्तिरिति भावः। विशेषसन्देहेऽपि—प्रवृत्तिनिमित्तविशेषसन्देहेऽपि। वाक्यभेददोषादिति। बाधाभावेन पूर्वं जनितबोधस्य वाक्यस्य पश्चात् मानान्तरोपनीतार्थविशिष्टस्वार्थबोधार्थमावृत्तेरावश्यकत्वादिति भावः। वाक्यार्थसरणाधीनप्रतीतिविषयत्वादुपमानगम्यस्य वाक्यार्थत्वमित्याशङ्क्य परिहरति—प्रतीतेति। गौरवात् वाक्यार्थगोसादृश्यस्य प्रवृत्तिनिमित्तत्वानुपपत्त्या कल्पितः गवयत्वप्रवृत्तिनिमित्तकत्वरूपः अर्थोऽपीत्यर्थः।

तथा गोसदृशस्य गवयशब्दो वाचक इति वाक्यान्निश्चितेऽपि सामान्ये, विशेषवाचकत्वेऽस्य मानान्तरमनुसरणीयमिति ॥

उपमानस्यानुमानागतार्थतायाः साधनम्

अस्त्वनुमानम्। तथा हि–गवयशब्दो गवयस्य वाचकः असति वृत्त्यन्तरेऽभियुक्तैः तत्र प्रयुज्यमानत्वात्, गवि गोशब्दवदिति चेत्–न–असिद्धेः। न ह्यसति वृत्त्यन्तरे तद्विषयतया प्रयोगः सङ्गतिमविज्ञाय ज्ञातुं शक्यते। सामानाधिकरण्यादिति चेत्–न, पिण्डमात्रे सिद्धसाधनात्, निमित्ते चासिद्धेः; सादृश्यस्यानिमित्तत्वादित्युक्तम् ॥

ननु व्याप्तिपरमिदं वाक्यं स्यात्, यो गोसदृशः सः गवयपदार्थ इति। तथा च वाक्यादवगतप्रतिबन्धोऽनुमिनुयात्, अयमसौ गवयो गोसदृशत्वादतिदेशवाक्यावगतपिण्डवदिति–न, विपर्ययात्। न हि गोसदृशं बुद्धावारोप्यानेन पृष्टः स किंशब्दवाच्य इति। किन्तु सामान्यतो गवयपदार्थमवगम्य स कीदृगिति। तथा च यद्योगप्राथम्याभ्यां तस्यैव व्याप्यत्वम्। ततः किं तेन, प्रकृतानुपयोगात् ॥

रात्रिभोजनमर्थस्स्यादिति। अर्थापत्तिरपि लुप्यतामिति भावः। विशेषे—गोसदृशव्यक्तिविशेषे। मानान्तरापेक्षा—अतिदेशवाक्यापेक्षा। विशेषवाचकत्वे—गवयत्वावच्छिन्नवाचकत्वे। मानान्तरं-उपमानमित्यर्थः ॥

मा भूदुपमानम्, अनुमानमेव तत्र मानमित्याशङ्कते—अस्त्विति। असिद्धिमेवोपपादयति—न हीति। सामानाधिकरण्यादिति। गोसदृशः गवयः, अयं गवयः इति वा सामानाधिकरण्येन प्रयोगात् व्यक्तिविशेषे प्रयुज्यत इति ज्ञायेतेति भावः। सामानाधिकरण्यादित्यत्र किं पिण्डसमानाधिकरण्यं, उत गवयत्वसामानाधिकरण्यं विवक्षितमिति विकल्प्य क्रमेण दूषयति–पिण्डमात्र इति। अतिदेशवाक्यादेव सिद्धेरिति भावः। निमित्ते गवयत्वे।

एवमसिद्ध्या पूर्वप्रयोगे दूषिते प्रयोगान्तरपरमतिदेशवाक्यमिति शङ्कते—नन्विति। अयमसाविति। गवयत्वजातिमत्तया प्रत्यक्षसिद्धः गोसदृशव्यक्तिविशेष इत्यर्थः। गवयः गवयपदवाच्यः अत्र गवयत्वजातिविशिष्टे गवयपदवाच्यत्वानुमितौ गवयत्वस्य तत्पदप्रवृत्तिनिमित्तत्वं सिद्ध्यतीति भावः। विपर्ययादिति। त्वदुक्तविपर्ययेण गवयपदार्थत्वस्यैव व्याप्यत्वापातात् इत्यर्थः। तथा च न तदनुमेयमित्युपमेयमेव तदुपगन्तव्यमिति भावः ॥

अथ किंलक्षणकोऽसाविति प्रश्नार्थः। तदा व्यतिरेकपरं स्यात्, लक्षणस्य तथाभावात्। तथा च गोसदृशो गवय इत्यस्यार्थः यो गवय इति न व्यवह्रियते नासौ गोसदृश इति। एवञ्च प्रयोक्तव्यम्—अयमसौ गवय इति व्यवहर्तव्यः गोसदृशत्वात्, यस्तु न तथा, नासौ गोसदृशः यथा हस्ती। न च हस्त्यादीनां विपक्षत्वे प्रमाणमस्ति, सर्वाप्रयोगस्य दुरवधारणत्वात्; कतिपयाव्यवहारस्य चानैकान्तिकत्वात्॥

ननु लिङ्गमात्रे प्रश्नो भविष्यति, कीदृक् किं लिङ्गमिति, न, न ह्यनेन लिङ्गमविज्ञाय गवयशब्दस्य वाचकत्वं कस्यचिद्वाच्यत्वं वाऽवगतम्, येन तदर्थं प्रश्नः स्यात्। प्रवृत्तिनिमित्तविशेषलिङ्गे प्रश्नः, येन निमित्तेन गवयशब्दः प्रवर्तते तस्य किं लिङ्गमिति चेत्—न, न हि तदवश्यमनुमेयमेवेत्यनेन निश्चितम्, यत इदं स्यात्। ज्ञानोपायमात्रप्रश्ने तद्विशेषेणोत्तरमिति चेत्—न। अविशेषादिन्द्रियसन्निकर्षमप्युत्तरयेत्; पर्यायान्तरं वा। यथा गवयमहं कथं जानीयामिति प्रश्ने, वनं गतो द्रक्ष्यसीति; यथा वा—कः पिक इत्यत्र, कोकिल इति।

व्यतिरेक्यनुमानतत्परमतिदेशवाक्यमिति शङ्कते—अथेति। प्रश्नार्थः—गवयः कीदृगिति प्रश्नार्थः। तथाभावादिति। केवलव्यतिरेकित्वादित्यर्थः। शङ्कां निरस्यति—न च हस्त्यादीनामिति। दुरवधारणत्वादिति। असर्वज्ञदुर्ज्ञेयत्वादित्यर्थः। अनैकान्तिकत्वादिति। गवयेऽपि कस्यचिद्व्यवहाराभावस्य सत्त्वादिति भावः।

एवं व्यतिरेकिण्यपि दूषिते प्रयोगान्तरं वक्तुं शंकते—नन्विति। लिङ्गमात्रे—लिङ्गसामान्ये। न व्यतिरेकविशेष इति भावः। अनेन गोसादृश्यरूपान्वयिलिङ्गमात्रपरमतिदेशवाक्यमित्युक्तं भवति। व्याप्तिपरत्वाभावेन न पूर्वोक्तविपर्ययावकाशः वाच्यव्यक्तिविशेषज्ञानात्पूर्वं तत्र लिङ्गमिति प्रश्नो नोदियादित्याशयेन दूषयति—नेति। अनेन—गवयः कीदृगिति प्रश्नं कुर्वता। प्रवृत्तिनिमित्ते किं लिङ्गमिति प्रश्नार्थ इति शङ्कते— प्रवृत्तीति। अत्र लिङ्गपदं किमनुमापकार्थमुत ज्ञापकार्थकमिति विकल्प्य दूषयति—नेति। आद्यं प्रत्याह—न हीति। इदं स्यादिति। अनुमापकं किमिति पृच्छयेतेति भावः। द्वितीयं प्रत्याह—ज्ञानोपायेति। तद्विशेषेण—अनुमापकात्मकेन। इन्द्रियसन्निकर्षस्य पर्यायान्तरस्य च क्रमेणोत्तरत्वसंभवं क्वचिद्दर्शयति—यथेति। तस्मादिति। स कीदृगित्यत्र लक्षणादिप्रश्नासंभवस्योपपादितत्वादित्यर्थः। कथं तर्हि गोसदृश इत्युत्तरं तस्या निमित्तत्वादित्यत्राह—तस्य चेति।

तस्मात् निमित्तभेदप्रश्न एवायं, गवयो गवयपदवाच्यः कीदृक् केन निमित्तेनेति युक्तमुत्पश्यामः। तस्य च निमित्तविशेषस्य साक्षादुपदर्शयितुमशक्यत्वात् पृष्टस्तदुपलक्षणं किञ्चिदाचष्टे। तच्चोपमानसामग्रीसमुत्थापनमेव । तस्य च प्रमाणस्य सतस्तर्कः सहायतामापद्यते सादृश्यस्यैव निमित्ततायां कल्पनागौरवम्, निमित्तान्तरकल्पने च क्लृप्तकल्प्यविरोध इति तदेव निमित्तमवगच्छतीति ॥

उपमानलक्षणम्

लक्षणन्त्वस्यानवगतसङ्गतिसंज्ञासमभिव्याहृतवाक्यार्थस्य संज्ञिन्यनुसन्धानमुपमानम्। वाक्यार्थश्च क्वचित् साधर्म्यं क्वचित् वैधर्म्यम्। अतो नाव्यापकम् । तस्मान्नियतविषयत्वादेव न तेन बाधः, न त्वतिरेकादिति स्थितिः ॥

शब्दो नेश्वरबाधकः अनुमानानतिरेकादिति वैशेषिकमतनिरासः

शब्दोऽपि न बाधकम्, अनुमानानतिरेकादिति वैशेषिकादयः। तथा हि—यद्यप्येते पदार्थाः मिथस्संसर्गवन्तः वाक्यत्वादिति व्यधिकरणम्; पदार्थत्वादिति चानैकान्तिकम्; पदैस्स्मारितत्वादित्यपि तथा। यद्यपि चैतानि पदानि स्मारितार्थसंसर्गवन्ति तत्स्मारकत्वादित्यादौ साध्याभावः । न ह्यत्र मत्वर्थः संयोगः समवायस्तादात्म्यं विशेषणविशेष्यभावो वा

निमित्तविशेषस्य। गवयत्वस्य। उपदर्शितुमशक्यत्वादिति। तदानीं सन्निकर्षाभावादिति भावः। तदुपलक्षणम्—सन्निकर्षदशायां सामानाधिकरण्येन तस्य गवयत्वादेः वृत्तिनिमित्तत्वेन ज्ञापकं, न तु स्वयमपि प्रवृत्तिनिमित्तमिति भावः। कथमेवं निश्चीयत इत्यत्राह—तस्य चेति। तदेव—गवयत्वमेव॥

एवमुपमानस्यातिरिक्तप्रमाणत्वं प्रसाध्य वैधर्म्यस्थले मानान्तरप्रसङ्ग इति पूर्वोक्तदोषपरिहारायोभयानुगतं लक्षणमाह—लक्षणं त्विति। अनवगतेति। अगृहीतशक्तिकसंज्ञयेत्यर्थः। एवमुपमानस्यातिरिक्तविषयकत्वे अतिरिक्तप्रमाणत्वे च सत्यपि वाच्यवाचकभावरूपविषयनियमात् नेश्वरबाधकत्वं भवतीत्युपसंहरति—तस्मादिति।

शब्दोऽपि न बाधक इत्याह—शब्दोऽपीति। अनुमानानतिरेकादिति। नानुमानं बाधकमिति पूर्वं निरूपितत्वादिति भावः। व्यधिकरणमिति। साध्यवति पक्षे अवृत्तित्वात् स्वरूपासिद्धं विरुद्धं चेति भावः। तथेति। निराकाङ्क्षितपदस्मारितेष्वनैकान्तिकमित्यर्थः। स्वातन्त्र्येण ज्ञापकत्वं नेष्टमित्युक्ते लिङ्गतया ज्ञापकत्वमभ्युपेयत इति शङ्कामनूद्य व्युदस्यति—न च लिङ्गतयेति। लिङ्गस्य लिङ्गनिष्ठं

संभवति। ज्ञाप्यज्ञापकभावस्तु स्वातन्त्र्येणानुमानान्तर्भाववादिभिः नेष्यते। न च लिङ्गतया ज्ञापकत्वं यत् लिङ्गस्य विषयस्तदेव तस्य, परस्पराश्रयप्रसङ्गात्। तदुपलम्भे हि व्याप्तिसिद्धिः तत्सिद्धौ च तदनुमानमिति। तथापि आकाङ्क्षादिमद्भिः पदैः स्मरितत्वात् गामभ्याजेति पदार्थवदिति स्यात्। न च विशेषासिद्धिः दोषः। संसर्गस्य संसृज्यमानविशेषादेव विशिष्टत्वात्। यद्वा एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्त्वे सति तत्स्मारकत्वात् गामभ्याजेति पदवत्। न चैवमर्थासिद्धिः; ज्ञानावच्छेदकतयैव तत्सिद्धेः। तस्य च संसृज्यमानोपहितस्यैवावच्छेदकत्वात् न विशेषाप्रतिलम्भ इति।

अत्रोच्यते—

अनेकान्तः परिच्छेदे सम्भवे च न निश्चयः।
आकाङ्क्षा सत्तया हेतुः योग्यासत्तिरबन्धना॥ १३॥

एते पदार्था मिथस्संसर्गवन्त इति संसृष्टा एवेति नियमो वा साध्यः संभावितसंसर्गा इति वा॥

यल्लिङ्गविषया ज्ञापकत्वं तदेव तस्य मतुपः विषयः अर्थ इत्यर्थः। तदुपलम्भ इति। लिङ्गतया ज्ञापकत्वोपलम्भ इत्यर्थः। व्यापकप्रसिद्ध्यधीनत्वाद्व्याप्तेरिति भावः। यद्वा न च लिङ्गतया ज्ञापकत्वं मत्वर्थ इत्यनुषङ्गेणान्वयः। तत्र दूषणं यल्लिङ्गस्येति। तत्स्मारकत्वादित्युक्तस्य लिङ्गस्य यद्विषयः तदेव तस्य साध्यस्यापीति साध्यहेत्वोरविशेषात् पक्षे हेतोरुपलम्भे व्याप्तिविशिष्टपक्षधर्मतानिश्चयः, तस्मिन् हेतुरूपसाध्योपलम्भ इत्यन्योन्याश्रय इति भावः। अत्र ज्ञापकत्वसिद्धिमात्रेणार्थसिद्ध्यनियमात् प्रमापकत्वसाधने अनैकान्तिकत्वं दूषणं बोध्यम्। तेन लिङ्गतया ज्ञापकत्वस्य संप्रतिपन्नलिङ्गे प्रसिद्ध्या तत्स्मारकत्वसामान्यात् भिन्नतया चान्योन्याश्रयवारणेऽपि न निस्तारः। पूर्वोक्तदोषवारणायाद्यप्रयोगे हेत्वन्तरं निर्दिशति तथापीति। विशेषासिद्धिरिति। संसर्गविशेषासिद्धिरित्यर्थः। अनेनानुमानेन संसर्गरूपार्थस्य न सिद्धिरित्यत्राह न चैवमिति। अर्थासिद्धिः संसर्गरूपार्थासिद्धिः। ज्ञानावच्छेदकतयेति—ज्ञानविषयतयेत्यर्थः। ज्ञानमत्र प्रमात्मकं विवक्षितमिति भावः। तस्य चेति। संसर्गस्येत्यर्थः।

आद्यप्रयोगं प्रत्याह-अनेकान्त इति। परिच्छेद इति। संसर्गनियम इत्यर्थः। अनाप्तवक्तृकपदार्थेषु संसर्गाभावादिति भावः। संभव इति। सन्देह इत्यर्थः। यद्वा संसर्गयोग्यत्वे इत्यर्थः। न

न प्रथमः, अनाप्तोक्तपदकदम्बस्मारितैरनेकान्तात् । आप्तोक्त्या विशेषणीयमिति चेत्—न, वाक्यार्थप्रतीतेः प्राक् तदसिद्धेः । न ह्यविप्रलम्भकत्वमात्रमिहाप्तशब्देन निवक्षितम्, तदुक्तेरपि पदार्थसंसर्गव्यभिचारात् । अपि तु तदनुभवप्रामाण्यमपि । न चैतच्छक्यमसर्वज्ञेन सर्वदा सर्वविषये सत्यज्ञानवानयमिति निश्चेतुम्, भ्रान्तेः पुरुषधर्मत्वात् । यत्र क्वचिदाप्तत्वमनाप्तस्याप्यस्तीति न तेनोपयोगः । ततोऽस्मिन्नर्थेऽयमभ्रान्त इति केनचिदुपायेन ग्राह्यम् । न चैतत् संसर्गविशेषमप्रतीत्य शक्यम्; बुद्धेरर्थभेदमन्तरेण निरूपयितुमशक्यत्वात् । पदार्थमात्रे चाभ्रान्तत्वसिद्धौ न किञ्चित्; अनाप्तसाधारण्यात् । एतेषां संसर्गेऽयमभ्रान्त इति शक्यमिति चेत् न, एतेषां संसर्गे इत्यस्या एव बुद्धेरसिद्धेः । अननुभूतचरे स्मरणायोगात्, तदनुभवस्य लिङ्गाधीनतया तस्य च विशेषणासिद्धत्वेनानुपपत्तेरिति ॥

नापि द्वितीयः, योग्यतामात्रसिद्धावपि संसर्गानिश्चयात्, वाक्यस्य च तदेकफलत्वात् । योग्यतामात्रस्य प्रागेव सिद्धेः । अन्यथा तदसिद्धावासन्नसाकाङ्क्षपदस्मारितत्वादित्येव हेतुस्स्यात् । तथा चाग्निना सिञ्चेदित्यादिना स्मारितैरनेकान्तः तथाविधानां सर्वथा संसर्गायोग्यत्वादिति ॥

निश्चयः संसर्गस्येति भावः । द्वितीयप्रयोगेऽप्याह—आकाङ्क्षेति । सत्त्वयेति । न तु ज्ञाततयेति । हेतुविशेषणत्वमयुक्तमिति भावः । तां परित्यज्य योग्यतासत्तिमात्रविशेषणेऽप्याह—योग्येति । अबन्धनेति । अव्याप्येत्यर्थः । निराकाङ्क्षवाक्ये व्यभिचार इति भावः ॥

तदसिद्धेरिति । अर्थाप्रतीतौ तज्ज्ञानप्रामाण्यात्मकाप्तत्वग्रहासंभवादिति भावः । तदुक्तेरपीति । अविप्रलम्भकोक्तेरपीत्यर्थः । तस्यापि भ्रान्तिसंभवादिति भावः । तर्हि किं तदन्यत् यदाप्तशब्देन विवक्षितं तत्राह—अपि त्विति । अपिना अविप्रलम्भकत्वस्य समुच्चयः । संवादादिना क्वचिदन्यत्राप्तत्वनिश्चयः अकिञ्चित्कर इत्याह—यत्र क्वचिदिति । पदैरर्थानामुपस्थितेः तेष्वभ्रान्तत्वं प्रत्येतुं शक्यमित्यत्राह—पदार्थमात्रे इति । संसर्गव्यवच्छेदार्थं मात्रपदम् । तदनुभवस्येति । पदार्थसंसर्गानुभवस्येत्यर्थः । तस्य चेति । आप्तोक्तपदस्मारितत्वरूपलिङ्गस्येत्यर्थः । विशेषणासिद्धत्वेनेति । आप्तोक्तत्वरूपविशेषणविशिष्टस्यासिद्धत्वात् लिङ्गत्वानुपपत्तिरिति भावः ।

तदेकफलत्वात्—संसर्गनिश्चयैकफलत्वात्- प्रागेव सिद्धेरिति । हेतुघटकत्वादिति भावः । अन्यथा योग्यतायाः प्रागसिद्धावित्येव हेतुरिति योग्यताघटने असिद्धेरिति भावः । ततः किमित्यत्राह- तथा चेति ।

आकाङ्क्षानिरूपणम्

एवं द्वितीयेऽपि प्रयोगे हेतुराकाङ्क्षादिमत्त्वे सतीति। तत्र केयमाकाङ्क्षा नाम? न तावद्विशेषणविशेष्यभावः तस्य संसर्गस्वभावतया साध्यत्वात्। नापि तद्योग्यता, योग्यतयैव गतार्थत्वात्। नाप्यविनाभावः, नीलं सरोजमित्यादौ तदभावेपि वाक्यार्थप्रत्ययात्। तत्रापि विशेषाक्षिप्तसामान्ययोरविनाभावोऽस्तीति चेत्—न, 'अहो विमलं जलं नद्याः, कच्छे महिषश्चरती' त्यादौ वाक्यभेदानुपपत्तिप्रसङ्गात्। नापि प्रतिपत्तुर्जिज्ञासा, पटो भवतीत्यादौ शुक्लादिजिज्ञासायां रक्तः पटो भवतीत्यस्यैकदेशवत् सर्वदा वाक्यापर्यवसानप्रसङ्गात्। 'गुणक्रियाद्यशेषविशेषजिज्ञासायामपि पदस्मारितविशेषजिज्ञासा आकाङ्क्षा। पट इत्युक्ते किंरूपः, कुत्र, किं करोतीत्यादिरूपजिज्ञासा। तत्र, भवतीत्युक्ते किं करोतीत्येषैव पदस्मारितविषया, न तु किंरूप इत्यादिरपि। यदा तु रक्त इत्युच्यते तदा किंरूप इत्येषाऽपि स्मारितविषया स्यात् इति न किञ्चिदनुपपन्नमि'ति चेत्—एवं तर्हि चक्षुषी निमील्य परिभावयतु भवान्, किमस्यां जातायामन्वयप्रत्ययः अथ ज्ञातायामिति। तत्र प्रथमे नानया व्यभिचारव्यावर्तनाय हेतुर्विशेषणीयः, मनस्संयोगादिवत् सत्तामात्रेणोपयोगात्। आसत्तियोग्यतामात्रेण विशिष्टस्तु निश्चितोऽपि न गमकः, अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ व्यभिचारात्॥

'आकाङ्क्षा सत्तया हेतुरि'त्युत्तरार्धं विवरीतुमाह—द्वितीयेऽपीति। एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणीति प्रयोगे इत्यर्थः। साध्यत्वादिति। ज्ञाप्यत्वादित्यर्थः। तदभावेऽपीति। रक्तस्यापि सत्त्वेनाविनाभावाभावादिति भावः। विशेषाक्षिप्तेति। नीलसरोजाक्षिप्तगुणद्रव्यसामान्ययोरित्यर्थः। पदस्मारितयोः तदाक्षिप्तयोः वा अविनाभावसत्त्वेऽपि साकाङ्क्षत्वमिति हृदयम्। वाक्यभेदानुपपत्तीति। नदीकच्छयोरविनाभावेन साकाङ्क्षतापत्तेर्निर्मलजलवन्नदीकच्छे चरति महिष इत्यर्थैकत्वादेकवाक्यतापत्तेरिति भावः। न तावत्संभवजिज्ञासासामान्यं आकाङ्क्षेत्युच्यते; किन्तु यावत्पदस्मारितार्थविषयिणी सैवेति नोक्तदोष इत्याह—गुणक्रियादीति। इत्यादिरूपजिज्ञासेति। संभावितेति शेषः। तत्राकाङ्क्षारूपां जिज्ञासामाह—तत्र भवतीति। प्रथम इति। जातमात्राया एवानुभावकत्वे इत्यर्थः। हेतुर्विशेषणीय इति। ज्ञाततया उपयोगिन एव हेतुविशेषणत्वसंभवादिति भावः। व्यभिचारादिति। राजपुरुषसंसर्गज्ञानपूर्वकत्वाभावादिति भावः॥

द्वितीयस्तु स्यादपि, यद्यनुमानान्तरवत्तत्सद्भावेऽपि तज्ज्ञानवैधुर्यादन्वयप्रत्ययो न जायते। न त्वेतदस्ति, आसत्तियोग्यतामात्रप्रतिसन्धानादेव साकाङ्क्षस्य सर्वत्र वाक्यार्थ-प्रत्ययात्। निवृत्ताकाङ्क्षस्य च तदभावात्। कथमेष निश्चयः, साकाङ्क्ष एव प्रत्येति, न तु ज्ञाताकाङ्क्ष इति चेत्—तावन्मात्रेणोपपत्तावनुपलभ्यमानज्ञानकल्पनानुपपत्तेः। अन्यत्र तथा दर्शनाच्च। यदा हि दूराद्दृष्टसामान्यो जिज्ञासते कोऽयमिति, प्रत्यासीदंश्च, स्थाणु-रयमिति प्रत्येति, तदाऽस्य ज्ञातुमहमिच्छामीत्यनुव्यवसायाभावेऽपि स्थाणुरयमित्यर्थप्रत्ययो भवति, तथेहाप्यविशेषात् विशेषोपस्थानकाले संसर्गावगतिरेव जायते, न तु जिज्ञासावगति-रिति। न च विशेषोपस्थानात्प्रागेव जिज्ञासावगतिः प्रकृतोपयोगिनी, तावन्मात्रस्याना-काङ्क्षात्वात्।

न चैवम्भूतोऽप्ययमैकान्तिको हेतुः। यदा ह्ययमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामिति वक्तोच्चारयति, श्रोता च व्यासङ्गादिना निमित्तेन अयमेति पुत्र इत्युश्रुत्वैव, राज्ञः पुरुषोऽप-सार्यतामिति शृणोति, तदाऽस्त्याकाङ्क्षादिमत्त्वे सति पदकदम्बकत्वम्? न च स्मारितार्थ-संसर्गज्ञानपूर्वकत्वमिति॥

द्वितीयस्त्विति। ज्ञाततयैवानुभावकत्वकल्पस्त्वित्यर्थः। स्यादपीति। तदा स्यादिति भावः। अनुमानान्तरवदिति। धूमादिवदित्यर्थः। मात्रप्रतिसन्धानादेवेति। आकाङ्क्षाज्ञानाभावेऽपीति भावः। जिज्ञासायाः स्वरूपत एव ज्ञानोपयोगित्वमन्यत्र दृष्टमित्याह—अन्यत्रेति। प्रत्यक्षादा-वित्यर्थः। तदुपपादयति—यदा हीति। अनुव्यवसायाभावेऽपीति। आकाङ्क्षाज्ञानाभावेऽपीति भावः। विशेषोपस्थानकाले—अन्वयप्रतियोगितत्तत्पदार्थविशेषोपस्थितिकाले। तावन्मात्रस्येति—जिज्ञासामात्रस्येत्यर्थः। पदस्मारितविशेषजिज्ञासाया एवाकाङ्क्षारूपत्वादिति भावः।

उक्ताकाङ्क्षायाः ज्ञाततया हेतुत्वोपगमेऽपि हेतोरस्याविनाभावः न भवतीत्याह—न चेति। न तु स्मारितार्थेति। राजपुरुषसंसर्गप्रतीतिपूर्वकत्वाभावादिति भावः॥

स्यादेतत् । यावत्समभिव्याहृतत्वेन विशेषिते हेतौ नायं दोषः, तथाविधस्य व्यभिचारोदाहरणासंस्पर्शात् । कुतस्त्यस्तर्हि कतिपयपदश्राविणः संसर्गप्रत्ययः? अलिङ्ग एव लिङ्गत्वाध्यारोपात् । एतावानेवायं समभिव्याहार इति तत्र श्रोतुरभिमानः—न, तत्सन्देहेऽपि श्रुतानुरूपसंसर्गावगमात् । भवति हि तत्र प्रत्ययः, न जाने किमपरमनेनोक्तम्, एतावदेव श्रुतं; यद्राज्ञः पुरुषोऽपसार्यतामिति । भ्रान्तिरसाविति चेत्—न, तावदसौ दुष्टेन्द्रियजा, परोक्षाकारत्वात् । न लिङ्गाभासजा, लिङ्गाभिमानाभावेऽपि जायमानत्वात् । एतावत्पदकदम्बप्रतिसन्धानमेव तां जनयतीति चेत् । यद्येवम्, तदेवादुष्टं सदभ्रान्ति जनयत् केन वारणीयम् व्याप्तिप्रतिसन्धानं विनाऽपि तस्य संसर्गप्रत्यायने सामर्थ्यावधारणात् चक्षुरादिवत् ॥

नास्त्येव तत्र संसर्गप्रत्ययः, असंसर्गाग्रहमात्रेण तु तथा व्यवहार इति चेत्—तर्हि यावत्समभिव्याहारेणापि विशेषणेनाप्रतीकारः, तथाभूतस्यानाप्तवाक्यस्य संसर्गज्ञानपूर्वकत्वाभावात् । असंसर्गाग्रहपूर्वकत्वमात्रे साध्ये न व्यभिचार इति चेत्—एवं तर्हि संसर्गो न सिद्ध्येत् । आप्तवाक्येषु सेत्स्यतीति चेत्—न, सर्वविषयाऽऽप्तत्वस्यासिद्धेः, यत्र क्वचिदाप्तत्वस्यानैकान्तिकत्वात्, प्रकृतविषये चाप्तत्वसिद्धौ संसर्गविशेषस्य प्रागेव सिद्ध्यभ्युपगमादित्युक्तम् ॥

उक्तमनैकान्तिकत्वं परिहर्तुं हेतुः विशेषणीय इति शङ्कते—स्यादेतदिति । नायं दोष इति । श्रुतमात्रे यावत्समभिव्याहृतपदकदम्बत्वस्याभावादिति भावः । अलिङ्ग एव—समभिव्याहृतैकदेशसमुदाय एव । लिङ्गत्वाध्यारोपादिति । यावत्समभिव्याहृतत्वाध्यारोपादित्यर्थः । तत्र हेतुमाह—एतावानेवेति । तत्सन्देहेऽपि—यावत्समभिव्याहृतत्वसन्देहेऽपि । श्रुतानुरूपसंसर्गेति । राजपुरुषसंसर्गेत्यर्थः । सन्देहाकारमेव दर्शयति—भवति हीति । एवं कतिपयपदश्राविणः यः संसर्गप्रत्ययः तस्य लैङ्गिकत्वानुपपत्त्या प्रमाणान्तरमवर्जनीयमित्यत्राह—भ्रान्तिरसाविति । क्वचित्पदकदम्बस्य लिङ्गाभिमानाभावेऽपि स्वातन्त्र्येण प्रतीतिजनकत्वोपगमे शब्दप्रमाणस्यातिरिक्तस्य सिद्धिर्दुर्वारेत्याह—यद्येवमिति । अदुष्टमिति । व्यासङ्गादिदोषासहकृतमित्यर्थः ।

मानान्तरसिद्धिभयेन एकदेशश्रवणे न संसर्गप्रत्ययः । किन्त्वसंसर्गाग्रहादेव तत्र व्यवहार इत्याह नास्त्येवेति । तदा दूषणान्तरमाह—तर्हीति । संसर्गज्ञानपूर्वकत्वाभावादिति । भ्रान्तोचरित-

न च सर्वत्र जिज्ञासा निबन्धनम्, अजिज्ञासोरपि वाक्यार्थप्रत्ययात्। आकाङ्क्षा-पदार्थस्तर्हि कः? जिज्ञासां प्रति योग्यता। सा च स्मारिततदाक्षिप्तयोरविनाभावे सति श्रोतरि तदुत्पाद्यसंसर्गावगमप्रागभावः। न चैषोपि ज्ञानमपेक्षते, प्रतियोगिनिरूपणाधीननिरूपणत्वा-त्तदभावस्य, तस्य च विषयनिरूप्यत्वादिति ॥

अन्विताभिधानवादनिरासः

प्राभाकरास्तु—लोकवेदसाधारणव्युत्पत्तिबलेनान्विताभिधानं प्रसाध्य वेदस्यापौरुषेय-तया वक्तृज्ञानानुमानानवकाशात् संसर्गे शब्दस्यैव स्वातन्त्र्येण प्रामाण्यमास्थिषत; लोके त्वनुमानत एव वक्तृज्ञानोपसर्जनतया संसर्गस्य सिद्धेरन्विताभिधानबलायातेऽपि प्रति-पादकत्वेऽनुवादकतामात्रं वाक्यस्येति निर्णीतवन्तः।

तदतिस्थवीयः—

निर्णीतशक्तेः वाक्याद्धि प्रागेवार्थस्य निर्णये।
व्याप्तिस्मृतिविलम्बेन लिङ्गस्यैवानुवादिता ॥ १४ ॥

वाक्यार्थसंसर्गाभावादिति भावः। आप्तवाक्येषु सेत्स्यतीति। संसर्गज्ञानपूर्वकत्वसाधकहेतोः आप्तोक्त-त्वेन विशेषणात् नोक्तदोष इति भावः। अनैकान्तिकत्वादिति। अनाप्तेऽपि सत्त्वादिति भावः।

एवं जिज्ञासायाः परोक्तमाकाङ्क्षारूपत्वमभ्युपगम्य दूषणमुक्तम्। अथ तदेव नास्तीत्याह—न चेति। स्वयमाकाङ्क्षास्वरूपमाह—जिज्ञासां प्रतीति। एतादृशाकाङ्क्षायाः हेतुविशेषणत्वं न घटते। अनुमितेः पूर्वं ज्ञायमानत्वासंभवादित्याह—न चैषोपीति। संसर्गावगमप्रागभावोऽपीत्यर्थः। विषय-निरूप्यत्वादिति। पदार्थसंसर्गनिरूप्यत्वादित्यर्थः। तथा च विवक्षितसंसर्गावगमात्प्रागुक्ताकाङ्क्षाज्ञान-मसंभवीति भावः।

प्रसङ्गात् लौकिकमात्रस्यानुमानाधिगतानुवादकत्वं वदतः प्राभाकरस्य मतं दूषयितुमनुवदति—प्राभाकरास्तु इति। विपरीतमिदमिति। स्फुटमिति। दूषयति—तदतिस्थवीय इति।

निर्णीतेति। वेदे अर्थप्रत्यायनसमर्थत्वेन निश्चितादित्यर्थः। प्रागेवेति। अनुमानात्

यावती हि वेदे सामग्री, तावत्येव लोकेऽपि भवन्ती कथमिव नार्थं गमयेत्। न ह्यपेक्षणीयान्तरमस्ति। लिङ्गे तु परिपूर्णेऽप्यवगते व्याप्तिस्मृतिरपेक्षणीयाऽस्तीति, विलम्बेन किं निर्णयम्; अन्वयस्य प्रागेव प्रतीतेः।

लोके वक्तुराप्तत्वनिश्चयोऽपेक्षणीय इति चेत्—न। तद्रहितस्यापि स्वार्थप्रत्यायने शब्दस्य शक्तेरवधारणात्। अन्यथा वेदेऽप्यर्थप्रत्ययो न स्यात्, तदभावात्। न च लोके अन्यान्येव पदानि, येन शक्तिवैचित्र्यं स्यात्। अनाप्तोक्तौ व्यभिचारदर्शनात् तुल्याऽपि सामग्री सन्देहेन शिथिलायते इति चेत्—न, चक्षुरादौ व्यभिचारदर्शनेन शङ्कायामपि सत्यां ज्ञानसामग्रीतः तदुत्पत्तिदर्शनात्। ज्ञायमानस्यायं विधिः, यत् सन्देहे सति न निश्चायकं, यथा लिङ्गम्; चक्षुरादि तु सत्तयेति चेत्—न, वाक्यस्य निश्चितत्वात्; फलप्रमाण्यसंदेहस्य च फलोत्तरकालीनत्वात् आप्तोक्तत्वस्य चार्थप्रत्ययं प्रत्यनङ्गत्वात्। लोकेऽपि चाप्तत्वानिश्चयेऽपि वाक्यार्थप्रतीतेः। भवति हि वेदानुकारेण पठ्यमानेष्वपौरुषेयत्वाभिमानिनो गौडमीमांसकस्यार्थनिश्चयः। न चासौ भ्रान्तिः, पौरुषेयत्वत्वनिश्चयदशायामपि तथानिश्चयादिति॥

प्रागेवेत्यर्थः। अनुमानविलम्बे हेतुमाह—व्याप्तीति। योग्यतासत्त्यवगतिः विशिष्टहेतुनिश्चयार्थं अनुमानेऽप्यपेक्षितैवेति न ततो वाक्यस्यापि विलम्बो भवतीति शङ्क्यमिति भावः। परिपूर्णेऽपीति। विवक्षितविशेषणगणविशिष्टेऽपीति अर्थः।

अपेक्षणीयान्तरमस्त्येवेति शङ्कते—लोक इति। तदभावादिति। आप्तोक्तत्वनिश्चयाभावादित्यर्थः। लोकवेदयोः पदभेदात्सामग्रीभेद इति शङ्कां निराकरोति—न च लोक इति। शिथिलायत इति। स्थाणुपुरुषादिसंशये सति चक्षुरादिवदकार्यकरी भवतीति भावः। व्यभिचारदर्शनेन—अप्रमाजनकत्वदर्शनेन। तदुत्पत्तिदर्शनादिति। चाक्षुषोत्पत्तिदर्शनादित्यर्थः। समानप्रकारकशङ्काया एव निश्चयविरोधित्वादिति भावः। सत्तया हेतोः ज्ञायमानस्य विशेषं शङ्कते—ज्ञायमानस्येति। लोके वाक्यस्य वा तज्जन्यज्ञानप्रामाण्यस्य वा आप्तोक्तत्वस्य वा सन्देह इति विकल्प्य क्रमेण समाधत्ते—वाक्यस्येति। फलप्रामाण्यसन्देहस्येति। वाक्यजन्यज्ञानप्रामाण्यसन्देहस्येत्यर्थः। फलोत्तरकालीनत्वादिति। वाक्यजज्ञानस्यैव तद्धर्मित्वादिति भावः॥

स्यादेतत् । नाप्तोक्तत्वमर्थप्रतीतेरङ्गमिति ब्रूमः, किन्तु अनाप्तोक्तत्वशङ्कानिरासम् । स च क्वचिदपौरुषेयत्वनिश्चयात्, क्वचिदाप्तोक्तत्वावधारणादिति चेत्—तत् किमपौरुषेयत्वस्याप्रतीतौ, सन्देहे वा वेदवाक्याद्विदितपदार्थसङ्गतेरर्थप्रत्यय एव न भवेत्, भवन्नपि वा न श्रद्धेयः ? प्रथमे सत्याद्य एव प्रमाणम् । न चासंसर्गाग्रहे तदानीं संसर्गव्यवहारः, बाधकस्यात्यन्तमभावात् । तथापि तत्कल्पनायामन्वयोच्छेदप्रसङ्गात् । द्वितीये त्वश्रद्धा प्रत्यक्षवत् निमित्तान्तरात् निवर्त्स्यतीति वेदे यदि, लोकेऽपि तथा स्यादविशेषात् ॥

अन्यथा वेदस्याप्यनुवादकताप्रसङ्गात् । तथा हि—

व्यस्तपुंदूषणाशङ्कैः स्मारितत्वात् पदैरमी ।
अन्विता इति निर्णीते वेदस्यापि न तत् कुतः ॥ १५ ॥

यदा ह्यपौरुषेयत्वनिश्चयात् प्राक् वेदो न किञ्चिदभिधत्ते इति पक्षः ; तदा आप्तोक्तत्वनिश्चयोत्तरकालं लोकवत्, वेदेऽप्यपौरुषेयत्वनिश्चयात् पश्चादनुमानावतारः । इयांस्तु विशेषः—यदत्र पदार्थानेव पक्षीकृत्य निरस्तपुंदोषाशङ्कैराकाङ्क्षादिमद्भिः पदैः स्मारितत्वा-

---

न च धर्मिज्ञानमेवापेक्षितम्, न धर्म्यपीति वाच्यम् । इह धर्मिणः ज्ञानस्य विषयनिरूप्यत्वेन तज्ज्ञानस्य धर्म्यविनाभूतत्वात् लोकवेदसाधारण्येनानाप्तोक्तत्वशङ्काविरहः शब्दार्थप्रत्यये अपेक्षित इति शङ्कते—स्यादेतदिति । न श्रद्धेय इति । अप्रामाण्यशङ्काकलङ्कित इति भावः । सत्याद्य इति । शपथमेव प्रमाणीकरणीयमिति भावः । अन्वयोच्छेदेति । बाधकाभावेऽप्यसंसर्गाग्रहेण संसर्गव्यवहारोपगमादिति भावः । अश्रद्धा—अप्रमाण्यशङ्का । निमित्तान्तरादिति । संवादादिबलादिति भावः ॥

अन्यथा—वेदवाक्यस्यापौरुषेयत्वप्रतीतेः प्राक् अर्थप्रत्यायकत्वाभावे । अनुवादकतेति । अनुमानेन पूर्वमधिगमादिति भावः । तत्प्रयोगमेवाह—व्यस्तपुंदूषणेति । पदार्थपक्षकः परस्परसंसर्गसाध्यकोऽयं प्रयोगः । न तत् कुत इति । कुतोऽनुवादकत्वं न भवतीत्यर्थः । लिङ्गज्ञानादिसापेक्षादनुमानात् पूर्वप्रवृत्तस्य वेदस्य कथमनुवादकत्वमित्यत्राह—यदा हीति । अपौरुषेयत्वनिश्चयसापेक्षार्थाभिधायकत्वे वेदस्य पूर्वप्रवृत्तिः न घटते । तदानीं हेतुज्ञानादेरपि संभवादिति भावः । पश्चादनुमानावतार इति । अपौरुषेयत्वनिश्चयाधीनत्वात् हेतुज्ञानस्येति भावः । पदार्थानेवेति । न पदानीत्ये-

दाप्तोक्तपदकदम्बकस्मारितपदार्थवत् संसर्ग एवाहत्य साध्यः ; बुद्धिव्यवहितस्त्वितरत्रेति । फलतो न कश्चिद्विशेष इति । तथा चान्विताभिधानेऽपि जघन्यत्वाद्वेदस्यानुवादकत्वप्रसङ्गः । न चैवं सति तत्र प्रमाणमस्ति । विशिष्टप्रतिपत्त्यन्यथानुपपत्त्या हि शब्दस्य तत्र शक्तिः परिकल्पनीया । सा चानुमानेनैवोपपन्नेति वृथा प्रयासः । तस्मात् लोके शब्दस्यानुवादकतेति विपरीतकल्पनेयमायुष्मताम् ॥

अन्विताभिधानं विकल्प्य तस्य दूषणम्

किं चेदमन्विताभिधानं नाम ? न तावदन्वितप्रतिपादनमात्रम्, अविवादात् । नापि स्वार्थाभिधायास्तत्र तात्पर्यम्, अविवादादेव । नापि सङ्गतिबलेन तत्प्रतिपादनम्, वाक्यार्थस्यापूर्वत्वात् । नापि स्वार्थसङ्गतिबलेन, तस्य स्वार्थ एवोपक्षयात् । नापि सैव सङ्गतिरुभयप्रतिपादिका, प्रतीतिक्रमानुपपत्तेः । यौगपद्याभ्युपगमे तु योग्यत्वादिप्रतिसन्धानशून्यस्यापि पदार्थप्रत्ययवत् वाक्यार्थप्रत्ययप्रसङ्गात् । नापि सैव संगतिः स्वार्थे निरपेक्षा, वाक्यार्थे तु पदार्थप्रतिपादनावान्तरव्यापारेति युक्तम्, तस्याः स्वयमकरणत्वात् । संगतानि

वार्थः । वक्तृज्ञानानुमानानवकाशादिति भावः । आहत्य—साक्षात् । इतरत्रेति । लोके पदपक्षकानुमान इत्यर्थः । जघन्यत्वादिति । अनुमानात् पश्चात् प्रवृत्तत्वादित्यर्थः । तत्र अन्विताभिधाने । विपरीतकल्पनेति । अनुमानात् पूर्वमेव प्रवृत्तेरुक्तेः । अन्यथा वैदिकशब्देऽपि स्वाभिमतविपरीतानुवादकत्वापत्तेश्चेति भावः ।

प्रसङ्गादन्विताभिधानं विकल्प्य दूषयति—किंचेदमिति । अविवादादिति । वाक्यार्थप्रतीतिप्रयोजकत्वस्याभिहितान्वयवादिभिरप्युपगमादिति भावः । अविवादादेवेति । स्वार्थाभिधानस्य वाक्यार्थबोध एव प्रयोजनतया अभिप्रेत इति भावः । तत्प्रतिपादनम्—अन्वितप्रतिपादनम् । शक्त्यधीनान्वयनिष्ठप्रतीतीविषयताप्रयोजकत्वमिति भावः । अन्वये प्रथमतः शक्तिग्रहो न भवतीत्याह—वाक्यार्थस्येति । पदार्थसंसर्गस्येत्यर्थः । अपूर्वत्वादिति । शाब्दबोधात् पूर्वमनिश्चयात् तत्र सङ्गतिग्रहो न भवतीति भावः । स्वार्थ एवोपक्षयादिति । पदार्थमात्रविषयकत्वादिति भावः । वाक्यार्थस्यापि विषयीकरणे दोषमाह—नापि सैव सङ्गतिरिति । प्रतीतिक्रमेति । पदार्थवाक्यार्थयोरिति भावः । अकरणत्वादिति । करणस्यैव व्यापारवत्त्वोपगमादिति भावः । सङ्गतिशालीनि पदानीति । करणकोटि-

पदानि हि करणम्, न तु सङ्गतिः। तथापि तत्प्रतिपादनानुगुणसङ्गतिशालीनि पदानीति चेत् न तावत् वाक्यार्थप्रतिपादनानुगुणता सङ्गतेस्तदाश्रयत्वेन; सामान्यमात्रगोचरत्वात्, तद्वन्मात्रगोचरत्वाद्वा। नापि तदनुगुणव्यापारवत्त्वेन, अकरणत्वादित्युक्तम्। तदनुगुणकरण-व्यापारोत्थापकत्वात् तदनुगुणत्वे न नो विवादः। अन्वित एव शक्तिरिति चेत्—उक्तमत्र वाक्यार्थस्यापूर्वत्वात्, प्रतीतिक्रमानुपपत्तेश्चेति।

स्मृतक्रियान्विते कारके स्मृतकारकान्वितायां च क्रियायां सङ्गतिः। अतो नोक्त-दोषावकाशः। नापि पर्यायतापत्तिः। प्राधान्येन नियमात्। नापि पौनरुक्त्यम्, विशेषान्वये तात्पर्यात्। नापीतरेतराश्रयत्वम्, स्वार्थस्मृतावनपेक्षणात्। नापि वाक्यभेदापत्तिः, पर-स्परपदार्थस्मृतिसन्निधौ तदितरानपेक्षणादिति चेत्—न, अन्विते सङ्गतिग्रह इति कोऽर्थः ?

प्रवेशात् व्यापारवत्त्वं स्यादित्यभिमानः। तमेव निराकरोति—न तावदित्यादिना। तदाश्रयत्वेन वाक्यार्थाश्रयत्वेन। वाक्यार्थविषयकत्वेनेति यावत्। सामान्यमात्रगोचरत्वादिति। संगतेरित्यनुषङ्गः मीमांसकमते जातिविषयकत्वात् शक्तेः वाक्यार्थाविषयकत्वेन तत्प्रतीत्यनुगुणकं न भवतीति भावः। स्वमताभिप्रायेणाह—तद्वन्मात्रेति। वाक्यार्थव्यवच्छेदकं मात्रपदम्। तदनुगुणव्यापारोत्थापकत्व-मिति। वाक्यार्थप्रतीत्यनुकूलार्थोपस्थितिजनकत्वमित्यर्थः। तदाश्रयत्वेनेति। प्रथमे कल्पे उक्तं दोष-मुद्धर्तुं शङ्कते—अन्वित एवेति। अन्विताभिधानवादिनां जातितद्वन्मात्रशक्तेरनिष्टत्वात् वाक्यार्थ-प्रतीत्यनुगुणत्वं संगतेरुपपन्नमेवेति भावः। तत्र पूर्वोक्तदोषं स्मारयति—उक्तमिति।

अन्वयसामान्ये शक्त्युपगमात् नोक्तदोषः। विशेषस्य वाक्यविवक्षितत्वादिति शङ्कते—स्मृतेति। स्मृतिश्च क्रियाकारकयोरविनाभावबलादिति भावः। यद्वा समभिव्याहृतपदोस्थितेरित्यर्थः। प्राधान्येनेति—विशेष्यभेदादिति भावः। पौनरुक्त्यमिति। एकैकेन पदेन क्रियाकारकयोरुभयोरप्यभिधानादिति भावः। विशेषान्वय इति। क्रियापदादिना कारकादिसामान्याभिधानेऽपि तद्विशेषबोधनाय पदान्तर-मावश्यकमिति भावः। इतरेतराश्रयत्वमिति। स्मृतक्रियाद्यन्विते शक्त्युपगमे कारकपदार्थस्मरणं क्रिया-पदार्थस्मरणाधीनम्, क्रियापदार्थस्मरणं च कारकपदार्थस्मरणाधीनमिति वा क्रियापदापेक्षितविशेषः कार-कपदेन कारकपदापेक्षितविशेषः क्रियापदेन चाभिधीयत इति वा अन्योन्याश्रय इत्यर्थः। स्वार्थस्मृता-विति। सामान्यरूपेण क्रियाद्यन्वितस्वार्थस्मृतावित्यर्थः। यद्वा स्मारकशक्त्या कारकादिस्वार्थमात्रस्मृता-

यदि यत्र सङ्गतिः तद्वस्तुगत्या पदार्थान्वितं, न किञ्चित् प्रकृतोपयोगि। न हि यत्र चक्षुषः सामर्थ्यमवगतं तद्वस्तुगत्या स्पर्शवदिति, तद्वत्ताऽपि तस्य विषयः। अथाऽन्विततयैव तत्र व्युत्पत्तिरित्यर्थः। तदसत्, प्रमाणाभावात् ॥

अन्वितार्थप्रतिपत्त्यन्यथानुपपत्तिरिति चेत्—न। अनन्विताभिधानेनाप्युपपत्तेः। आकाङ्क्षानुपपत्तिरस्तु। न हि सामान्यतोऽन्वितानवगमेऽन्वयविशेषे जिज्ञासा स्यात्, न, दृष्टे फलविशेषे रसविशेषजिज्ञासावदाक्षेपतोऽप्युपपत्तेः ॥

शब्दमहिमानमन्तरेण यतः कुतश्चिदपि स्मृतेषु पदार्थेषु अन्वयप्रतीतिः स्यात्। न चैवम्। ततः शब्दशक्तिरवश्यं कल्पनीयेति चेत्—कुतस्तर्हि कविकाव्यानि विलसन्ति। न हि संसर्गविशेषमप्रतीत्य वाक्यरचना नाम। न च स्वोत्प्रेक्षायां प्रत्यक्षमनुमानं शब्दस्तदाभासा वा संभवन्ति, अन्यत्र चिन्तावशेन पदार्थस्मरणेभ्यः। असंसर्गाग्रहोऽसाविति चेत्; मम

वित्यर्थः। यदि तत्र परस्परापेक्षा स्यात्, तदा नैकाप्युत्पद्येतेति दोषः स्यात्। विशेषान्वये परस्परापेक्षा तु विशेषान्वयबोधे अनुकूलैवेति भावः। गामानयेत्यादौ एकैकपदस्यैवेतरान्वितस्वार्थपरत्वेन वाक्यत्वापत्त्या पदभेदेन वाक्यभेदाशङ्कायां विशेषान्वयस्य पदान्तरसापेक्षतया एकपदमात्रेणानिर्वाहात् इत्यभिप्रायादुक्तं वाक्यभेदं परिहरति—नापीति। समभिव्याहृतपदान्तरोपात्तविशेषान्वयनियमे बीजमाह—परस्परेति। विशेषापेक्षायां सन्निहितसत्त्वे तदेव गृह्यते, न त्वसन्निहितमिति भावः। अन्विते शक्तिरित्यनेन वस्तुगत्या यदन्वितं तत्र शक्तिरित्यर्थविवक्षायां न कश्चित् प्रकृतोपयोगः। अन्वयस्यापि शक्तिविषयत्वविवक्षायां मानाभाव इति तन्मतं निराकरोति— नेति ॥

अन्यथानुपपत्तिरेव तत्र मानमित्याशङ्कते—अन्वितार्थेति। अनन्विताभिधानेनेति। आकाङ्क्षादिभिरेवान्वितार्थप्रतिपत्त्युपपत्तेरिति भावः। रसविशेषजिज्ञासावदिति। फलदर्शने सत्यविनाभावेन रसवत्त्वाक्षेपादिति भावः ॥

मानान्तरोपनीतानामर्थानामन्वयबोधाभावात् शब्देनान्विताभिधानमावश्यकमिति शङ्कते—शब्दमहिमानमिति। न चैवमिति। विषयतया शाब्दबोधे पदवृत्तिज्ञानजन्योपस्थितेः हेतुत्वादिति भावः। भट्टमतानुरोधेन काव्यरचनामूलार्थान्वयबोधः पदनिरपेक्षोऽपि दृश्यते इति समाधत्ते —कुतस्तर्हीति। असंसर्गाग्रह इति। प्रसिद्धकथागोचरकाव्यमूलं वाक्यार्थज्ञानं प्रत्यक्षमनुमानमिति दृष्टान्तार्थम्।

तावत् संसर्गग्रह एवासौ। तत्रापि सैव पदावली क्वचिदन्वये पर्यवस्यति, क्वचिदनन्वयाग्रहे इति कुतो विशेषात्?

आप्तानाप्तवक्तृकतयेति चेत्; किं तथाविधेन वक्त्रा तत्र कश्चिद्विशेष आहितः? आहो वक्तैवावच्छेदकतया विशेषः? प्रथमे अभिहितान्वयवादिनामिव तत्रापि शक्तिकल्पना-गौरवम्। द्वितीये तु वक्तुरिव पदानामप्यवच्छेदकतयैव विशेषकत्वमस्तु। एवं तर्हि पदा-नामप्यन्वयप्रतीतावस्त्युपयोगः। कस्सन्देहः। परं पदार्थाभिधानेन, न त्वन्यथा। यथा तत्रैव, आप्तस्य संसर्गपरतया पदसमभिव्याहारमात्रेण; न त्वन्यथा। अन्यथा गुरुमतविदामेव श्लोक आप्तपदप्रक्षेपेण पठनीयः—

प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि।
आप्तानामेव सा शक्तिः वरमभ्युपगम्यताम्॥ इति।

शब्दाधीनमेव। कल्पितकथागोचरकाव्यमूलं तु न संसर्गज्ञानं अस्माभिरन्यथाख्यात्यनभ्युपगमात्। किन्त्वसंसर्गाग्रह एवेति भावः। संसर्गग्रह एवेति। अन्यथाख्यात्युपगमादिति भावः॥

अभिहितान्वयवादिनामिवेति। पदानां स्वार्थबोधनशक्तिः पदार्थानां संसर्गबोधनशक्तिः पदानामेव पदार्थेषु संसर्गबोधनशक्त्याधानशक्तिरिति शक्तित्रयमिच्छतामिति भावः। तत्रापीति। अन्विताभिधानवादिनोऽपीत्यर्थः। गौरवमिति। पदानां स्मारकशक्तिरन्विताभिधानशक्तिः आप्तानां पदेष्वन्विताभिधानशक्त्याधानशक्तिश्चेति शक्तित्रयोपगमादिति भावः। पदानामप्यवच्छेदकतयैवेति। भट्टमतेऽपि पदैरर्थेषु शक्त्याधानमनभ्युपेत्यैवावच्छेदकतयैव विशेषकत्वं वक्तुं शक्यमिति भावः। विशेषकत्वम्—मानान्तरोपस्थापितव्यावर्तकत्वम्। अन्विताभिधानसिद्ध्याशया शङ्कते—एवं तर्हीति। पदानां पदार्थविशेषकत्वोपगमे इत्यर्थः। उपयोगमात्रं स्वीक्रियते न तावतान्विताभिधानसिद्ध्यवकाश इति प्रतिवक्ति—कः सन्देह इति। उपयोगक्रममाह—परं पदार्थाभिधानेनेति। पदार्थ-बोधनद्वारेण वाक्यार्थबोधे पदानामुपयोग इत्यर्थः। पदसमभिव्याहारमात्रेणेति—पदोच्चारणमात्रेणे-त्यर्थः। अन्यथा—उच्चारणव्यापारातिरिक्तशक्त्याधायकशक्तिमत्त्वोपगमे। आप्तपदप्रक्षेपेणेति। पदानामिति स्थाने आप्तानामिति पदप्रक्षेपेणेत्यर्थः।

अभिहितान्वयवादः

तस्मात् प्रकारान्तरेण संसर्गप्रत्ययो भवतु मा वा, पदार्थानामाकाङ्क्षादिमत्त्वे सति अभिहितानामवश्यमन्वय इति कुतोऽतिप्रसङ्गः ? ॥

न चैवं सति पदार्था एव करणम्, तेषामनागतादिरूपतया कारकत्वानुपपत्तौ तद्विशेषस्य करणत्वस्यायोगात् । तत्संसर्गे प्रमाणान्तरासंकीर्णोदाहरणाभावाच्च । पदानां तु पूर्वभावनियमेन पदार्थस्मरणावान्तरव्यापारवत्तया तदुपपत्तेः, व्यापारस्यान्यवधायकत्वादिति कृतं प्रसक्तानुप्रसक्त्या ॥

शब्दस्य ईश्वरबाधकत्वशङ्का तत्परिहारश्च

अस्तु तर्हि शब्द एव बाधकम् सर्वज्ञे कर्तरि । तथा हि—

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ॥ (गी)

प्राथम्यादिति । पदेभ्योऽप्युच्चारयितुराप्तस्य प्राथम्यात् अभिधातृत्वात् तात्पर्यसत्त्वाच्च वाक्यार्थबोधनशक्तिर्युक्ता स्यादिति भावः ॥

अतिप्रसङ्ग इति । मानान्तरोपस्थितानामन्वयबोधप्रसङ्ग इत्यर्थः ॥

अथाभिहितान्वयपक्षमपि दूषयति—न चैवमिति । काव्यमूलसंसर्गप्रत्यये पदाभावादर्थानामेव करणत्वमित्यत्राह—तेषामिति । वर्तमानानामप्यर्थानां न प्रमाणत्वम् मनआदिनैव तत्संसर्गसिद्धेरित्याशयेनाह—तत्संसर्ग इति । पदार्थसंसर्ग इत्यर्थः । प्रमाणान्तरेति । अन्ततः उत्प्रेक्षादिसहकृतमनस एव प्रमाणत्वसंभवात् पदार्थानां क्वचित् प्रमाणत्वे असङ्कीर्णोदाहरणं दुर्लभमिति भावः ॥

एवं शब्दस्य पृथक्प्रामाण्ये साधिते ईश्वरबाधकत्वं शङ्कते—अस्तु तर्हीति । उपदर्शितागमेन बाधमुपपादयति—अस्यायमर्थ इति । सर्वज्ञकर्त्रभावावगमात् ईश्वरबाध इति भावः ॥

ईश्वरस्यासिद्धावुक्तागमस्य बाधकत्वं न शक्यं वक्तुम्, किमुत सिद्धावित्याह—न प्रमाणमिति । उक्तागमस्यानाप्तोक्तत्वे प्रामाण्याभावात् न तेन बाधः संभवतीति भावः । नादृष्ट इति ।

इत्यादि पठन्ति। अस्यायमर्थः—न पारमार्थिकं चेतनस्य कर्तृत्वमस्ति। आभिमानिकं तु तत्। न च सर्वज्ञस्याभिमानः। न चासर्वज्ञस्य जगत्कर्तृत्वमस्ति उच्यते—

न प्रमाणमनाप्तोक्तिर्नादृष्टे क्वचिदाप्तता।
अदृश्यदृष्टौ सर्वज्ञो न च नित्यागमः क्षमः॥ १६॥

यदि हि सर्वज्ञकर्त्रभावाऽऽवेदकः शब्दो नाप्तोक्तः, न तर्हि प्रमाणम्। अथाप्तोऽस्य वक्ता, कथं न तदर्थदर्शी। अतीन्द्रियार्थदर्शीति चेत्-कथमसर्वज्ञः, कथं वा न कर्ता, आगमस्यैव प्रणयनात्। न च नित्यागमसंभवः, विच्छेदादित्यावेदितम्॥

अपि च— न चासौ क्वचिदेकान्तः सत्त्वस्यापि प्रवेदनात्।
निरञ्जनावबोधार्थो न च सन्नपि तत्परः॥ १७॥

न ह्यसत्त्वपक्ष एवागमो नियतः ईश्वरसद्भावस्यैव भूयस्सु प्रदेशेषु प्रतिपादनात्। तथा चाग्रे दर्शयिष्यामः। तथा च सति क्वचिदसत्त्वप्रतिपादनमनेकान्तं न बाधकम्। सत्त्वप्रतिपादनमपि तर्हि न साधनमिति चेत्—आपाततस्तावदेवमेतत्। यदा तु निश्शेषविशेषगुणशून्यात्मस्वरूपप्रतिपादनार्थत्वमकर्तृकत्वागमानामवधारयिष्यते, तदा न तन्निषेधे तात्पर्य-

---

आगमोक्तातीन्द्रियार्थे अदृष्टे सति तद्वक्तुराप्तत्वं न स्यादिति भावः। अतीन्द्रियार्थदर्शनोपगमे आह-सर्वज्ञ इति। सर्वज्ञः आगमादिकर्ता सिद्ध्यतीत्यर्थः। न ह्यसर्वज्ञोऽतीन्द्रियं द्रष्टुमीष्ट इत्युक्तागमोऽन्यपर इति भावः। अस्त्वपौरुषेय इत्यत्राह—न च नित्यागम इति। सर्गप्रलयसंभवादिति निराकृतत्वादिति भावः॥

'द्यावाभूमी जनयन् देव एकः' इत्यादिसर्वज्ञकर्तृसाधकागमसत्त्वात् उक्तागमस्य पूर्वोक्तार्थपरत्वेऽपि न बाधकत्वसंभव इत्याह—अपि चेति। असौ—आगमः। क्वचिदेकान्त इति। असत्त्वमात्रं नाभिधत्त इति भावः। सत्त्वोक्तिविरुद्धत्वादसत्त्वपरोऽयमागमः यथा न बाधकः तथा असत्त्वोक्तिविरुद्धत्वात् सत्त्वप्रतिपादकागमः साधकोऽपि न स्यादित्यत्राह—निरञ्जनेति। उक्तागमस्य स्वाभाविकसुखदुःखादिविशेषगुणशून्यत्वानुसन्धानार्थत्वेनान्यपरत्वात् न सत्त्वप्रतिपादकागमप्रतिरोध इति भावः।

ममीषामिति सत्त्वप्रतिपादकानामेवागमानां प्रामाण्यं भविष्यतीति। न च तेषामप्यन्यत्र तात्पर्यमिति वक्ष्यामः ॥

अर्थापत्तिरीश्वरबाधिकेत्याक्षेपः

अस्त्वर्थापत्तिस्तर्हि बाधिका। तथा हि—यद्यभविष्यत्, नोपादेक्ष्यत्, न ह्यसावनुपदिश्य प्रवर्तयितुं न जानाति। अत उपदेश एवान्यथानुपपद्यमानः तथाविधस्याभावमौदासीन्यं वाऽऽवेदयति—न, अन्यथैवोपपत्तेः—

हेत्वभावे फलाभावात् प्रमाणेऽसति न प्रमा।
तदभावात् प्रवृत्तिः नो कर्मवादेऽप्ययं विधिः ॥ १८ ॥

बुद्धिपूर्वा हि प्रवृत्तिः न बुद्धिमनुत्पाद्य शक्यसम्पादना। न च प्रकृते बुद्धिरप्युपदेशमन्तरेण शक्यसिद्धिः; तस्यैव तत्कारणत्वात्। भूतावेशन्यायेन प्रवर्तयेदिति चेत्—प्रवर्तयेदेव, यदि तथा फलसिद्धिः स्यात्। न त्वेवम्। कुत एतदवसितम्? उपदेशान्य-

---

सत्त्वप्रतिपादकागमानामान्यपर्ये कल्प्यमाने अकर्तृत्वावेदकागमानां बाधकत्वं स्यादित्यत्राह—न चेति। सन्नपि—सत्त्वावेदकागमोऽपि। तत्परः—अन्यपर इति भावः। चतुर्थपादार्थमाह—न च तेषामपीति ॥

अथार्थापत्त्या बाधमाशङ्क्य परिहरति—अस्त्वित्यादिना। यद्यभविष्यदिति। सर्वज्ञकर्तेति शेषः। न ह्यसाविति। अन्यथा सर्वज्ञत्वानुपपत्तेरिति भावः ॥

तथाविधस्य सर्वज्ञस्य औदासीन्यं वा अकर्तृत्वं वा वस्तुतो यदस्ति तदज्ञानमेव सर्वज्ञत्वविरोधि, न स्वसतः अज्ञानमित्याशयेनाह—हेत्वभाव इति। कारणाभावे कार्याभाव इति सामान्यव्याप्तौ कारणविशेषप्रमाणाभावात् कार्यविशेषप्रमाभाव इत्यर्थः। प्रमाभावे न प्रवृत्तिरित्याह—तदभावादिति। बुद्धिपूर्वकप्रवृत्तिमेव फलसाधनतया शास्ति शास्त्रमिति भावः। पूर्वकर्माधीनादृष्टवशात् प्रवृत्तिमुपपादयतामपि इदं तुल्यमित्याह—कर्मवादेऽपीति। अदृष्टादेव प्रवृत्तावुपदेशो निरर्थकः स्यादिति भावः।

एतदेवोपपादयति—यद्यस्तीति। नित्य इति। शास्त्रोपदेशस्यापौरुषेयत्वादिति भावः। धारयन्ति विचारयन्ति चेति। प्रवृत्त्युपधायकबुद्ध्यर्थं ह्युभयं कुरुथेति भावः।

थानुपपत्त्यैव। यस्यापि मते अदृष्टवशादेव भूतानां प्रवृत्तिः ; तस्यापि तुल्यमेतत्। यद्यस्ति प्रवृत्तिनिमित्तमदृष्टं, किमुपदेशेन, तत एव प्रवृत्तिसिद्धेः। न चेत्, तथापि किमुपदेशेन, तदभावे तस्मिन् सत्यप्यप्रवृत्तेः। नित्यः स्वतन्त्र उपदेशो न पर्यनुयोज्य इति चेत्-यूयं पर्यनुयोज्याः, ये तमवधानतो धारयन्ति विचारयन्ति चेति॥

अर्थापत्तिरनुमानान्न भिद्यत इति निरूपणम्

न चार्थापत्तिरनुमानतो भिद्यते, लोके तदसंकीर्णोदाहरणाभावात् प्रकारान्तराभावाच्च। तथा हि—

अनियम्यस्य नायुक्तिः नानियन्तोपपादकः।
न मानयोः विरोधोऽस्ति प्रसिद्धे वाऽप्यसौ समः॥ १९॥

जीवंश्चैत्रो गृहे नास्तीति अनुपपद्यमानमसति बहिःसद्भावे, तमावेदयतीत्युदाहरन्ति। तत्र चिन्त्यते-किमनुपपन्नं जीवतो गृहाभावस्येति। न ह्यनियम्यस्यानियामकं विना किञ्चिदनुपपन्नम्, अतिप्रसङ्गात्। ननु स्वरूपमेव। तत् न तावद्बहिः सत्त्वेन कर्तव्यं, तदकार्यत्वात् तस्य। स्थितिरेवास्य तेन विना न स्यादित्यस्य स्वभाव इति चेत् एवं तर्हि तन्नियतस्वभाव एवासौ व्याप्तेरेव व्यतिरेकमुखनिरूप्यायास्तथाव्यपदेशात्॥

एवमर्थापत्तेः प्रमाणान्तरत्वमभ्युपगम्याबाधकत्वमुक्तम्, अथानुमानान्तर्भावात् प्रमाणान्तरत्वमेव नास्तीत्याह—न चार्थापत्तिरिति। प्रकारान्तराभावादिति। अनुमानापेक्षया फलतो व्यापारतश्च भिन्नप्रकाराभावादित्यर्थः। अनियम्यस्य—अव्याप्यस्य। अयुक्तिः—व्यापकमुपपादकं विना अनुपपत्तिः। अनियन्ता—अव्यापकः। व्यापक एवोपपादक इति व्याप्तिसत्त्वात् अनुमानमेवेति भावः। प्रमाणयोः विरोधे सत्यर्थापत्तिः विरोधप्रतिसन्धानरूपा अविरोधोपपादनादनुमानात् पृथक् मानं भवतीत्यत्राह—न मानयोरिति। उभयोः मानत्वे विरोध एव न स्यात्, विरोधे त्वन्यतरस्य मानत्वं न स्यादिति भावः। अन्यथा धूमात् वह्न्यवगतिरप्यर्थापत्तिस्स्यादित्याह—प्रसिद्धे वेति।

स्वरूपमेव—जीवतो गृहाभावस्य स्वरूपमेवानुपपन्नं बहिस्सत्त्वं विनेत्यर्थः। स्थितिरेवास्येति। गृहवृत्त्यभावस्य स्थितिरेवेत्यर्थः। तथा व्यपदेशादिति। तेन विना न स्यादिति व्यपदेशादित्यर्थः।

कथं वा बहिस्सत्त्वमस्योपपादकम्? न ह्यनियामको भवन्नप्यनियम्यमुपपादयति, अतिप्रसङ्गादेव। स्वभावोऽस्य, यदनेन बहिस्सत्त्वेन गेहासत्त्वं क्रोडीकृत्य स्थातव्यमिति चेत्—सेयं व्याप्तिरेवान्वयमुखनिरूप्या तथा व्यपदिश्यते इति॥

न वयमविनाभावमर्थापत्तावपजानीमहे, किन्तु तज्ज्ञानम्। न चासौ सत्तामात्रेण तदनुमानत्वमापादयतीति चेत्—न, अनुपपत्तिप्रतिसन्धानस्यावश्याभ्युपगन्तव्यत्वात्। अन्यथा त्वतिप्रसङ्गात्। अर्थापत्त्याभासानवकाशाच्च। यदा ह्यन्यथाप्युपपन्नमन्यथाऽनुपपन्नमिति मन्यते, तदाऽस्य विपर्ययः, न त्वन्यथेति।

तथापि कथमत्र व्याप्तिर्गृह्येतेति चेत्—यदाऽहमिह तदा नान्यत्र, यदान्यत्र तदा नेहेति सर्वप्रत्यक्षसिद्धमेतत्; का तत्रापि कथन्ता? सर्वदेशाप्रत्यक्षत्वे तत्राभावो दुरवधारण इत्यपि नास्ति, तेषामेव संसर्गस्यात्मनि प्रतिषेधात्। अयोग्यानां प्रतिषेधे का वार्तेति चेत्—तदवय-

---

एवं प्रथमपादं व्याख्याय द्वितीयं व्याख्यातुमारभते—कथं वेपि। अस्य—जीवतो गृहासत्त्वस्य। गृहासत्त्वं क्रोडीकृत्येति। गृहाभावमभिव्याप्येत्यर्थः। सेयं व्याप्तिरेवेति। बहिस्सत्त्वे गृहासत्वव्यापकत्वावगमादिति भावः।

अर्थापत्तावविनाभावनियमेऽपि तज्ज्ञानानियमात् नानुमानमिति शङ्कते—न वयमिति। अपजानीमहे—प्रतिषेधामः। अर्थापत्तावनुपपत्तिप्रतिसन्धानस्यावश्यकत्वात् व्याप्त्यग्रहे च तदसंभवात् व्याप्तिज्ञानमपि प्रतिषेद्धुं न शक्यमिति समाधत्ते—नेति। अर्थापत्त्याभासानवकाशादिति। वस्तुतः अनुपपत्त्यभावेऽपि अनुपपन्नमिति प्रतिसन्धानाद्यत्र विपर्ययरूप उपपादकग्रहः, तत्रार्थापत्त्याभासः स्यात् न तु प्रतिसन्धानाभावेऽपि। स्वरूपसत्या अनुपपत्तेः तत्राभावादिति भावः। यदाऽहमिह तदा नान्यत्रेति। सर्वेषु देशान्तरेषु स्वाभावो न प्रत्यक्षविषयः; देशान्तरे सन्निकर्षाभावादिति शङ्कते—सर्वदेशेति। तेषामेव संसर्गस्येति—देशान्तरसंसर्गस्येत्यर्थः। तदानीमात्मन एवाधिकरणत्वात् न पूर्वोक्तदोष इति भावः। देशान्तराणां प्रतियोगिकोटिप्रवेशे तत्र केषाञ्चिदयोग्यत्वे योग्यानुपलब्ध्यभावात् कथं प्रत्यक्षमिति शङ्कते—अयोग्यानामिति। योग्यावयवारम्भकाणां अयोग्यानां उपलभ्यमानावयविसंसर्गप्रतिषेधात् संसर्गप्रतिषेधोऽनुमीयते। अनारम्भकाणां तु स न ज्ञायत एवेति परिहरति तदवयवानामिति। तदवयवकानामित्यर्थः।

वानां तत्संसर्गप्रतिषेधादेवानुमानात्; अन्येषां न काचित्। न ह्यकारणीभूतेन परमाणुना नेदं संसृष्टमिति निश्चेतुं शक्यमिति।

न चाविनाभावनिश्चयेनापि गमयन्नपक्षधर्मोऽर्थापत्तिरिति युक्तम्—पक्षधर्मताया अनिमित्तत्वप्रसङ्गात्; अविशेषात्। व्यधिकरणेनाविभावनिश्चयायोगाच्च, यत् यत्र यदेति प्रकारानुपपत्तेः।

प्रमाणयोः विरोधे अर्थापत्तिरविरोधोपपादिका, न त्वेवमनुमानमित्यपि नास्ति। विरोधे हि रज्जुसर्पादिवदेकस्य बाध एव स्यात्, न तूभयोः प्रामाण्यम्। प्रामाण्ये वा न विरोधः, स्थूलमिदमेकमितिवत् सहसंभवात्, चैत्रोऽयमयं तु मैत्र इतिवद्वा विषयभेदात्। प्रकृते क्वाप्यस्तीति सामान्यतो गेहस्यापि प्रवेशादेकविषयताऽप्यस्तीति चेत्—यद्येवम्, क्वचिदस्ति क्वचिन्नास्तीतिवत् न विरोधः? अत्रापि विरोध एवेति चेत्—एकं तर्हि भज्येत॥

न भज्येत, अर्थापत्त्या उभयोरप्युपपादनादिति चेत्—किमनुपपद्यमानम्? विरोध एवान्यथानुपपद्यमानो विभिन्नविषयतया व्यवस्थापयतीति चेत्—अथाभिन्नविषयतयैव किं न

अथापि गृहाभावस्यापक्षधर्मत्वात् नानुमानत्वमिति शङ्कते—न चेति। गृहाभावप्रतियोगित्वं पक्षधर्मः स्यात्। व्याप्यस्य पक्षधर्मतां विनापि गमकत्वे, अनुमानेऽपि पक्षधर्मत्वमतन्त्रं स्यादिति दूषयति—पक्षाधर्मताया इति। अपक्षधर्मत्वे व्याप्तिनिश्चयोऽपि न स्यात् इत्याह—व्यधिकरणेनेति। यदिति। यद्धेतुमत् तत्साध्यवत् यत्र यदा वा हेतुः तत्र तदा वा साध्यं इति सामानाधिकरण्येनैव व्याप्तिनिश्चयादिति भावः।

'न मानयोरि'त्युत्तरार्धं व्याख्याति—प्रमाणयोरिति। जीवतः क्वचित् सत्त्वप्रतीतेः गृहस्यापि विषयत्वसंभवात् गृहे नास्तीति प्रत्यक्षेण विरोधप्रतिसन्धानात् करणात् क्वचिदित्यस्य गृहातिरिक्तविषयकत्वेनाविरोधोपपादनात्मकं फलमनुमानासाध्यमर्थापत्तिरित्युच्यते इति भावः। रज्जुसर्पादिवदिति! तज्ज्ञानयोरित्यर्थः। स्थूलमिति। स्थूलत्वैकत्वग्रहयोरित्यर्थः। सहसंभवात्—एकस्मिन्धर्मिणि संभवात्। यद्येवमिति। क्वापीत्यस्य सामान्यविषयकत्वोपगम इत्यर्थः। अत्रापीति। क्वचिदस्ति क्वचिन्नास्तीत्यत्रापीत्यर्थः। विरोध एवेति। एकविषयकत्वाभिमानात् ज्ञायत इति भावः। भज्येतेति। बाध्येतेत्यर्थः।

व्यवस्थापयेत् । व्यवस्थापनमविरोधापादनम् । एकविषयतयैव चानयोर्विरोधः । स कथं तयैव शमयितव्यः । न हि यो यद्विषमूर्च्छितः, स तेनैवोत्थाप्यते इति चेत् एकविषयतया अनयोर्विरोध इत्येतदेव कुतः । विभिन्नदेशस्वभावतयैव सर्वत्रोपलम्भादिति चेत्—नन्वियं व्याप्तिरेव । तथा च घट्टकुटयां प्रभातमिति ॥

धूमोपि वा अनुपपद्यमानतयैव वह्निं गमयेत् । न हि तेन विना असावुपपद्यते । विरोधोऽपि—धूमाद्वह्निना भवितव्यम्, अनुपलब्धेश्च न भवितव्यमिति । तथा चानुपलब्धेरर्वाग्भागव्यवस्थापनम्, धूमस्य च व्यवधानेनानुपलभ्यवह्निविषयत्वस्थितिरर्थापत्तिरिति कुतोऽनुमानम् । वह्निमानयमित्यनुमानं व्याप्तेः; अन्यथा अनुमानाभावे विरोधासिद्धेः । अर्वाग्भागानुपलब्धिविरोधेन परभागेऽस्य वह्निरित्यर्थापत्तिरेवेति चेत्—न, व्याप्तिग्राहकेण प्रमाणेन विरोधस्योक्तत्वात् । नाप्युत्तरा अर्थापत्तिः । अन्यथा पाण्डरत्वस्यापालालत्वविरोधेन पालालत्वस्थितिरप्यर्थापत्तिरेव स्यात् । तद्विशिष्टस्य तेनैव व्याप्तेः नैवमिति चेत्—यद्येवम्, अर्वाग्भागानुपलभ्यमानवह्नित्वेन विशिष्टस्य धूमस्य तेनैव व्याप्तेः कथमेवं भविष्यतीति तुल्यम् ॥

अनुपपद्यमानम्—अनुपपद्यमानत्वेन ज्ञायमानम् । नन्वियं व्याप्तिरेवेति । विभिन्नदेशस्वभावतयैवेत्यादिना सत्यगृहत्वमसत्यगृहधर्मिभिन्नधर्मिकत्वव्याप्तमित्यवगमादिति भावः । घट्टकुटयामिति । व्याप्तिभयात् पलायमानेन व्याप्तावेव निपतितमिति भावः ॥

प्रसिद्धे वेत्यस्यार्थमाह—धूमोऽपीति । विरोधमुपपादयति—धूमादिति । न भवितव्यमिति । वह्निनेति संबध्यते तथा च वह्नितदभावयोरधिगमात् तद्विरोध इति भावः । अथानयोरविरोधोपपादनमर्थापत्त्येत्याह—तथा चेति । कुतोऽनुमानमिति । अनुमानमात्रोच्छेद इति भावः । विषयभेदादनुमानमर्थापत्तिश्चेत्युभयमपि दुरपह्नवमिति शङ्कते—वह्निमानयमिति । विरोधासिद्धेरिति । वह्नेरज्ञानादिति भावः । परिहरति—नेति । व्याप्तिग्राहकेणेति । यो धूमवान् सोऽग्निमानिति व्याप्तिग्रहे धूमवत्त्वेन सामान्यरूपेण पक्षेऽपि वह्निभानात् विरोधसिद्धिरिति भावः । नाप्युत्तरेति । अर्वाग्भागानुपलब्धिविरोधेनेत्युक्तेत्यर्थः । पाण्डरत्वस्येति । पाण्डरधूमत्वस्येत्यर्थः । अपालालत्वविरोधेनेति । पलालवह्न्यजन्यत्वविरोधेनेत्यर्थः । तथा च धूमविशेषेण वह्निविशेषानुमानं लुप्येतेति

केवलव्यतिरेक्यनुमानं पराभिमतमर्थापत्तिः; अन्वयाभावादिति चेत्—एवमेतावता विशेषेणानुमानेऽर्थापत्तिव्यवहारं न वारयामः। तत्रानुमानव्यवहारः कुत इति चेत्—अविनाभूतलिङ्गसमुत्पन्नत्वात्। साध्यधर्मेण विना ह्यभवनमन्वयिन इव व्यतिरेकिणोऽप्यविशिष्टम्, तन्निश्चयश्चान्वयव्यतिरेकाभ्यामन्यतरेण वेति। तस्मादर्थापत्तिरित्यनुमानस्य पर्यायोऽयम्, तद्विशेषवचनं वा पूर्ववदादिवदिति युक्तम्॥

अनुपलब्धेरतिरिक्तप्रमाणत्वं नास्तीति निरूपणम्

अनुपलब्धिस्तु न बाधिकेति चिन्तितम्। न च प्रत्यक्षादेरतिरिच्यते। तदुच्यते—

प्रतिपत्तेरपारोक्ष्यादिन्द्रियस्यानुपक्षयात्।
अज्ञातकरणत्वात् च भावावेशाच्च चेतसः॥ २०॥

या हि साक्षात्कारिणी प्रतीतिः, सा इन्द्रियकरणिका, यथा रूपादिप्रतीतिः, तथेह भूतले घटो नास्तीत्यपि। साक्षात्कारित्वमस्या असिद्धमिति चेत्—न, एकजातीयत्वे

भावः। तद्विशिष्टस्येति। पाण्डरत्वविशिष्टस्येत्यर्थः। तेनैव—पलालवह्निनैव। अर्वाग्भागेति। तत्रानुपलभ्यमानो वह्निः यस्येति बहुव्रीहिः। तादृशवह्निकत्वेनेत्यर्थः। तेनैव व्याप्तेरिति। परभागवह्निनैव व्याप्तेरित्यर्थः। तथा च तत्राप्यनुमानमेव, नार्थापत्तिरिति भावः॥

अन्वयाभावादिति। अन्वयसहचाराभावात्। व्यतिरेकसाहचर्यात् साध्याभावसाधनाभावयोरेव व्याप्तेः पक्षधर्मस्य व्याप्यभावात् नानुमानमित्यभिमानादियं शङ्का। तत्रान्वयसाहचर्याभावेन हेतुना अर्थापत्तिरिति नामान्तरकल्पनेऽपि व्यतिरेकसाहचर्येणाप्यन्वयव्याप्तेर्ग्रहणात् व्याप्यस्य पक्षधर्मताग्रहसंभवादनुमानत्वं दुरपह्नवमिति समाधत्ते—एवमेतावतेति। अन्वयव्यतिरेकाभ्यां अन्यतरेण वेति। अन्वयव्यतिरेकसाहचर्यग्रहाभ्यां अन्यतरग्रहेण वेत्यर्थः। पूर्ववदादिवदिति। पूर्ववच्छेषवत्सामान्यतो दृष्टमितिवत् अनुमानविशेषवचनमिति भावः॥

अयोग्यत्वादीश्वरस्य स्वरूपसत्यनुपलब्धिः न बाधिका इत्युक्तम्, ज्ञाता तु बाधिका स्यादिति शङ्कामपाकर्तुमनुपलब्धेः पृथक्प्रामाण्यं निराकरोति—अनुपलब्धिस्त्वित्यादिना।

प्रतिपत्तेरिति। अत्र घटो नास्तीति प्रतिपत्तेरित्यर्थः। अपारोक्ष्यादिति। साक्षात्कारित्वादित्यर्थः। इन्द्रियस्येति। अन्यत्रानुपक्षीणः अचरितार्थः य इन्द्रियसंसर्गः तदनन्तरभावित्वादिति भावः।

ज्ञाताज्ञातकरणत्वानुपपत्तेः। न हि तस्मिन्नेव कार्ये तदेव करणमेकदा ज्ञातं अज्ञातश्चैकदोपयुज्यते, लिङ्गेन्द्रिययोरपि व्यत्ययप्रसङ्गात्, ज्ञानस्याकारणत्वप्रसङ्गाच्च। न हि तदतिपत्यापि भवतस्तत्कारणत्वं, व्याघातात्। तस्माज्ज्ञातानुपलब्धिजन्यस्य साक्षात्कारित्वात् तद्विपरीतकारणकमिदं तद्विपरीतजातीयमिति न्याय्यम्। ननु क्व नाम ज्ञातानुपलब्धिरसाक्षात्कारिणीमभावप्रतीतिं जनयति? तद्यथा—निपुणतरमनुसृतो मया मन्दिरे चैत्रः; न चोपलब्ध इति श्रुत्वा श्रोताऽनुमिनोति, नूनं नासीदेवेति। एतेन प्राङ्नास्तितापि व्याख्याता। ननु तथाप्यवान्तरजातिभेदोऽस्तु; अज्ञातानुपलब्धिजन्ये साक्षात्कारस्तु कुत इति चेत्—कारणविरोधात् कार्यविरोधेन भवितव्यमित्युक्तमेव।

अनुपलब्धेः प्रत्यक्षेऽन्तर्भावः

अनन्यत्रोपक्षीणेन्द्रियव्यापारानन्तरभावित्वाच्च। अधिकरणग्रहणे तदुपक्षीणमिति चेत्—न, अन्धस्यापि त्वगिन्द्रियोपनीते घटादौ रूपविशेषाभावप्रतीतिप्रसङ्गात्। अस्ति हि तस्याधिकरणग्रहणम्। अस्ति च प्रतियोगिस्मरणम्। अस्ति च श्यामे रक्तत्वस्य योग्यस्याभावोऽनुपलब्धिश्च। अधिकरणग्राहकेन्द्रियग्राह्याभाववादिनोऽपि समानमेतदिति चेत्—न, प्रतियोगिग्राहकेन्द्रियग्राह्योऽभाव इत्यभ्युपगमात्। ममापि प्रतियोगिग्राहकेन्द्रियगृहीतेऽधि-

---

अज्ञातेति। अज्ञायमानकरणकत्वादित्यर्थः। भावावेशादिति। अस्मदादीनां बाह्यानुभवे भावरूपबाह्यप्रमाणसहकृतस्यैव मनसः सामर्थ्यादित्यर्थः। लिङ्गज्ञानादिजन्य इव तदजन्यघटाभावाद्यनुभवेऽपि भावरूपप्रमाणमेव मनसः सहकारीति भावः।

एकजातीयत्व इति। असाक्षात्कारिप्रतीत्या सह एकजातीयत्वे इत्यर्थः। व्यत्ययप्रसङ्गादिति। इन्द्रियं ज्ञायमानं लिङ्गं अज्ञायमानं च करणं स्यात्। यद्वा ज्ञायमानकरणजं परोक्षं अज्ञायमानकरणजं त्वपरोक्षमिति नियमानुपगमे लिङ्गस्याप्यपरोक्षजनकत्वं इन्द्रियस्यापि परोक्षजनकत्वमिति व्यत्ययस्स्यादिति भावः। अकारणत्वप्रसङ्गादिति व्यभिचारादिति भावः। प्राङ्नास्िततापीति। प्रातश्चत्वरे गजो नोपलब्ध इति शृण्वता स्वयं प्रतिसन्दधता वा प्रातश्चत्वरे गजो नास्तीत्यनुमीयत इति भावः। अवान्तरजातिभेद इति। व्याप्यव्यापकभावापन्नजातिभेदः स्यात्, न तु विरुद्ध इति भावः। कारणविरोधात्—ज्ञाताज्ञातकरणयोः विरोधात्॥

करणे अनुपलब्धिः प्रमाणमित्यभ्युपगम इति चेत्—न, वायौ त्वगिन्द्रियोपनीते रूपाभावप्रतीत्यनुदयप्रसङ्गात्। तथापि तत्तत्र सन्निकृष्टमिति चेत्—हन्तैवमनन्यत्रचरितार्थमिन्द्रियमवश्यमपेक्षणीयं रूपाभावानुभवेन ॥

प्रत्यक्षस्याभावातिरिक्तवस्तुग्रहे उपक्षय इति शङ्कासमाधाने

स्यादेतत्—तथापि वस्त्वन्तरग्रह एव तस्योपयोग इति चेत्—न, तस्य तं प्रत्यकारणत्वात्। कारणत्वे वा महान्धकारे करपरामर्शेन स्पर्शवद्द्रव्याभावं न प्रतीयात्। प्रतीयाच्च पुरोविस्फारिताक्षः पृष्ठलग्नस्याश्यामत्वम्। आर्जवावस्थानमप्यधिकरणस्योपयुज्यते इति चेत्—तर्हि नयनसन्निकर्षोऽप्युपयोक्ष्यते। तदेकसहकारिप्रभासन्निकर्षापेक्षणात्; अन्यथा वातायनविवरविसारिकरपरामृष्टेऽप्यधिकरणे तदुपलम्भप्रसङ्गाच्च ॥

तथापि योग्यतापादनोपक्षीणश्चक्षुः। तदितरसामग्रीसाकल्ये ह्यनुपलभ्यमानस्याभावो निश्चीयते। तच्च चक्षुष्यधिकरणसन्निकृष्टे सति स्यादिति चेत्—परिपूर्णानि कारणान्येव

प्रतीतिप्रङ्गादिति। अभावभाने इन्द्रियानपेक्षणादिति भावः। प्रतियोगिग्राहकेन्द्रियगृहीतेऽधिकरण इत्यत्र इन्द्रियसन्निकृष्टेऽधिकरण इत्युच्यते वायोश्चक्षुस्सन्निकर्षान्नोक्तदोष इति शङ्कते—तथापीति।

चक्षुस्सन्निकर्षस्य वायुग्रहणेऽनुपयोगात् रूपाभावग्रहण एवोपयोगो वाच्य इति समाधत्ते—हन्तैवमिति।

अथाधिकरणातिरिक्तवस्तुग्रहणे चरितार्थमिन्द्रियमिति शङ्कते—स्यादेतदिति। तस्य—वस्त्वन्तरग्रहस्य। तं प्रति—अभावानुभवं प्रति। न प्रतीयादिति। वस्त्वन्तराग्रहणादिति भावः। तन्मते आकाशस्य प्रत्यक्षत्वोपगमे तद्ग्रहणमस्तीत्यत्राह—प्रतीयाच्चेति। पुरोवर्तिवस्त्वन्तरग्रहणकारणसंभवादिति भावः। आर्जवावस्थानमपीति। चक्षुस्सन्निकर्षयोग्यावस्थानमपीत्यर्थः। पृष्ठलग्नस्य तदभावात् न तत्राभावप्रत्ययप्रसङ्ग इति भावः। तदेकसहकारीति। चक्षुर्मात्रसहकारीत्यर्थः। अन्यथा—प्रभासन्निकर्षानपेक्षणे तदुपलम्भेति। प्रसारितकरपरामृष्टनिरालोकगृहान्तर्वर्त्यधिकरणे अश्यामत्वोपलम्भेत्यर्थः।

साकल्यम् । तथा च किं कुत्रोपक्षीणम् । अथान्योन्यमेलनं मिथःप्रत्यासत्त्यादिशब्द-वाच्यं तदुपक्षयविषयः, न तर्हि क्वचिच्चक्षुः कारणं स्यादिति । न हि रूपाद्युपलब्धिमपि असन्निकृष्टमेतदुपजनयति ॥

अथाधिकरणसमवेतकिञ्चिदुपलम्भोऽपि तद्विषयाभावग्रहेऽनुपलब्धेरपेक्षणीयः । ततस्तत्रेदं चरितार्थम् । वाय्वादिषु तु रूपाद्यभावप्रतीतिरानुमानिकी । तथानुपलब्ध्या ह्यनुमीयते, अयं नीरूपो वायुरिति—न, असिद्धेः । न ह्युपलम्भाभावो भवतामभावोपलम्भः । उपलम्भस्यातीन्द्रियत्वाभ्युपगमात् । प्राकट्याभावेनानुमेय इति चेत्—न, वायौ रूपवत्ता-प्राकट्याभावस्याप्यसिद्धेः । रूपाभावेन समानत्वात् । व्यवहाराभावेनानुमेय इति चेत्—न, कायवाग्व्यापाराभावेऽप्युपेक्षाज्ञानाभावाभ्युपगमात्; मूकस्वप्नोपपत्तेश्च । न च व्यवहारा-भावमात्रेणानुमातुमपि शक्यते, अनैकान्तिकत्वादसिद्धेश्च । तद्विषयस्तु व्यवहारः तद्विषय-

---

अथानुपलब्धिविशेषणयोग्यतासंपादने चक्षुरुपक्षय इति शङ्कते—तथापीति । यदितरेति । निश्चीयत इति यत् तच्चेत्युत्तरत्रान्वयः । अन्योन्यमेलकम्—परस्परसंसर्गरूपम्; तदुपक्षयः तस्मिन् संसर्गे उपक्षयः । न तर्हीति । विषयप्रत्यासत्ताविन्द्रियस्यान्यथासिद्धिसंभवादिति भावः । असन्निकृष्टम् सन्निकर्षनिरपेक्षमिति भावः ।

अधिकरणवृत्तिधर्मग्रहणे चरितार्थमिन्द्रियमिति शङ्कते—अथेति । तर्हि वायुवृत्तिकिञ्चिदुप-लम्भाभावेन तत्र रूपाभावोपलम्भो न स्यादित्यत्राह—वाय्वादिष्विति । आनुमानिकीति । अतः न तत्राधिकरणसमवेतकिञ्चिद्ग्रहोऽपेक्ष्यः इति भावः । असिद्धिमुपपादयति न हीति । उपलम्भाभाव इति । अनुपलब्धिरूपहेतुरित्यर्थः । अभावोपलम्भ इति । अभावादनुपलब्धेः उपलम्भो यस्य तथा-विधो न भवतीति भावः । कुत इत्यत्राह—उपलम्भस्येति । भट्टमते ज्ञानस्यातीन्द्रियत्वात् योग्यानु-पलब्ध्यभावात् वायौ रूपाभावसाधकः तत्र रूपोपलब्धेरभावरूपो हेतुः अनुपलब्ध्या नोपलभ्य इत्यसिद्ध एवेति भावः । प्राकट्याभावेनेति । कार्याभावेन कारणाभावानुमानमिति भावः । असिद्धेरिति । अनुपलब्धिसहकारिअधिकरणसमवेतकिञ्चिदुपलम्भाभावादिति भावः । उपेक्षाज्ञानभावेति । उपे-क्षात्मकज्ञानसद्भावेत्यर्थः । व्यवहाराभावो न व्याप्य इति भावः । किञ्च यत्किञ्चिद्व्यवहाराभावः व्यव-हारसामान्याभावो वा न हेतुः स्यादित्याह—न चेति । तद्विषयव्यवहाराभावोऽपि न हेतुरित्याह—

ज्ञानजन्यो वा, तद्विषयज्ञानजनको वा, तदाश्रयधर्मजनको वा। तदभावश्च तज्ज्ञानतदाश्रयधर्माभावान्तर्भूत एवेत्यशक्यनिश्चय एव। आत्माश्रय-इतरेतराश्रयचक्रकप्रवृत्तिप्रसंगात्।

न चाज्ञातस्योपलम्भाद्यभावस्य लिङ्गता। न च प्राकट्याभावः सत्तामात्रेणोपलम्भाभावमावेदयतीति युक्तम्—लिङ्गाभावस्य तथात्वेऽतिप्रसङ्गात्। अविनाभावबलेन तु नियमे तत्प्रतिसन्धानापत्तेः। न ह्यविनाभावः सत्तामात्रेण ज्ञानहेतुं नियमयति, धूमादावपि तथाभावप्रसङ्गादिति। ज्ञानप्रत्यक्षत्वेन त्वदिशा भविष्यतीति चेत्—न, शब्दध्वंसादिनोक्तोत्तरत्वात्॥

अपि च प्रतियोगिग्राहकेन्द्रियेणाधिकरणधर्मप्रतीतिरनुपलब्धेरङ्गमिति, तद्रहितायाः तस्याः कार्यव्यभिचारात् व्यवस्थाप्येत, व्याप्तिबलाद्वा। न तावदुक्तरूपानुपलब्धिः तां विना अभावप्रत्ययमजनयन्ती दृश्यते। नापि व्याप्तेः, तथा सति वायौ रूपाभावप्रत्ययः

तद्विषयस्त्विति। तदाश्रयधर्मजनकः—तद्वृत्तिप्राकट्याख्यधर्मजनकः। तदभावश्चेति। तद्विषयव्यवहाराभावश्चेत्यर्थः। तज्ज्ञानेति। स्वघटकतज्ज्ञानाद्यभावज्ञानाधीनज्ञानविषय एवेति भावः। आत्माश्रयेति। साध्यरूपतज्ज्ञानाभावज्ञानं प्रति हेतुघटकतज्ज्ञानाभावज्ञानस्यापेक्षितत्वादिति भावः। इतरेतराश्रयेति। व्यवहाराभावज्ञानात्तज्ज्ञानाभावज्ञानं तज्ज्ञानाभावज्ञानाच्च व्यवहाराभावज्ञानं व्यवहाराभावज्ञानात्प्राकट्याभावज्ञानं प्राकट्याभावज्ञानात् तज्ज्ञानाभावज्ञानमिति चक्रकमिति भावः॥

सत्तामात्रेण आवेदकत्वे किं लिङ्गाभावत्वं प्रयोजकम् उत व्याप्यत्वमिति विकल्प्य आद्ये आह—लिङ्गाभावस्येति। अतिप्रसङ्गादिति। धूमाभावस्यापि वन्ह्यभावावेदकत्वप्रसङ्गादित्यर्थः। द्वितीये आह—अविनाभावेति। नियमे—वेदहेतोर्नियमे। त्वन्मतरीत्या हेतुसिद्धिरस्त्वित्याह—ज्ञानप्रत्यक्षत्वेनेति। अस्मन्मते अभावोपलम्भे अधिकरणयोग्यताया अतन्त्रत्वस्य शब्दाभावप्रत्यक्षत्वनिरूपणावसरे उक्तत्वादयमप्यभावोपलम्भः नानुमितिरिति समाधत्ते—शब्दध्वंसेति॥

अथाधिकरणसमवेतधर्मोपलम्भस्य सहकारित्वे न मानमस्तीत्याह—अपि चेति। एवम्भूतत्वात् व्याप्यत्वात् न वा भवेदिति कारणाभावात् नोत्पद्येतेत्यर्थः। सैव—अनुपलब्धिरेव। अधिकरणधर्मोपलम्भसापेक्षैवेति भावः। अथ यथा ब्राह्मणमातापितृसंबन्धोऽलिङ्गतादशायां इन्द्रियसन्निकर्षसापेक्षः

तामाक्षिपेत्, एवम्भूतत्वात्। अनाक्षेपे वा न तत्कारणको भवेत्, न वा भवेत्। ततो न भवत्येव, लिङ्गात् तदुत्पत्तिरिति चेत्—ननु लिङ्गमपि सैव, न तत्त्वान्तरम्। यथा योनिसंबन्धोऽलिङ्गदशायामिन्द्रियसन्निकर्षमपेक्षते, लिङ्गदशायां तु तदनपेक्ष एव ब्राह्मण्यज्ञाने, तथैतत् स्यादिति चेत्—न, कार्यजातिभेदात् तदुपपत्तेः; प्रकृते च तदनभ्युपगमात्। पारोक्ष्यापारोक्ष्ये विहायान्यथाऽप्यसौ भविष्यतीति चेत्—न, अनुपलम्भात्। संभाव्यते तावदिति चेत् संभाव्यताम्, न त्वेतावताऽपि तमाश्रित्य करणनियमनिश्चयः॥

अभावप्रमायाः अज्ञातकरणकत्वात् प्रत्यक्षत्वम्

अज्ञातकरणत्वाच्च। यदज्ञायमानकरणजं ज्ञानं तत्साक्षादिन्द्रियजम्, यथा रूपप्रत्यक्षम्। तथाचेह भूतले घटो नास्तीति ज्ञानमिति। यथा वा स्मरणमज्ञायमानकरणजं साक्षान्मनोजन्म। कुतस्तर्हि न साक्षात्कार्यनुभवरूपम्? संस्कारातिरिक्तसन्निकर्षाभावादिति वक्ष्यामः।

तथापि भावविषये इयं व्यवस्था, अभावज्ञानं त्वज्ञातकरणत्वेऽपि न साक्षादिन्द्रियजं भविष्यतीति चेत्—न, उत्सर्गस्य बाधकाभावेन सङ्कोचानुपपत्तेः। अन्यथा सर्वव्याप्तीनां

लिङ्गतादशायां तु तन्निरपेक्षः ब्राह्मण्यमावेदयति, तथेयमनुपलब्धिरप्यलिङ्गतादशायां अधिकरणवृत्तिधर्मोपलम्भसापेक्षा लिङ्गतादशायां तु तन्निरपेक्षा अभावमावेदयतीत्याह—यथेति। कार्यजातिभेदादिति। परोक्षत्वापरोक्षत्वरूपकार्यतावच्छेदकजातिभेदात् तत्र न व्यभिचार इति भावः। तदनभ्युपगमादिति। अनुपलब्ध्या अपरोक्षानभ्युपगमादिति भावः। अनुपलम्भादिति। जातिभेदस्येति भावः। संभाव्यतामिति। संभावनायाः सन्देहरूपत्वेन जातिभेदनिश्चयाधीनकार्यकारणभावनिश्चयं प्रति नोपयोग इति भावः॥

अज्ञातकरणत्वाच्चेति। करणपदेनात्र व्यापारवत्त्वे सति ज्ञानत्वव्याप्यधर्मावच्छिन्ननिरूपितासाधारणकारणतावत् विवक्षितम्। तेन मनोरूपकरणमादायानुमित्यादौ न व्यभिचारः। संस्कारातिरिक्तेति। संस्कारान्यसन्निकर्षजन्यत्वमेव प्रत्यक्षत्वप्रयोजकमिति भावः।

उक्तव्याप्तौ भावविषयकत्वमुपाधिरिति शङ्कते—तथापीति। अभावज्ञानेऽपि प्रतियोगितया भावविषयकत्वसत्त्वेन साधनव्यापकत्वात् नायमुपाधिरित्याशयेन प्रत्याह—नेति। उत्सर्गस्य सामान्य-

भावमात्रविषयत्वप्रसङ्गः, अविशेषात्। तथापि विपक्षे किं बाधकमिति चेत्—नन्विदमेव तावत्। अन्यदप्युच्यमानमाकर्णय। तद्यथा—अकारणककार्यप्रसङ्गः, रूपाद्युपलब्धीनामपि वाऽनिन्द्रियकरणत्वप्रसङ्गः। न ह्यनुमित्यादिभिरुपलभ्यमानकरणिकाभिः चक्षुरादिव्यवस्थापनम्, अपित्वनुपलभ्यमानकरणिकाभी रूपाद्युपलब्धिभिरेव। यद्यपि साक्षात्कारिताऽपि तत्रैव पर्यवस्यति, तथापि प्रथमतोऽनुपलभ्यमानकरणत्वमेव प्रयोजकं चक्षुरादिकल्पने। न ह्युपलभ्यमाने करणान्तरे साक्षात्कारिणीष्वपि तासु चक्षुरादि अनुपलभ्यमानं कश्चिदकल्पयिष्यत्। अत एवासाक्षात्कारित्वेऽपि स्मृतेः मन एव करणमुपागमन् धीराः। संस्कारस्त्वर्थविशेषप्रत्यासत्तावुपयुज्यते, इन्द्रियाणां प्राप्यकारित्वव्यवस्थापनात्॥

भावावेशाच्च चेतसः। सर्वत्र हि बाह्यार्थानुभवे जनयितव्ये भावभूतप्रमाणाविष्टमेव चेत उपयुज्यते, नातोऽन्यथेति व्याप्तिः; तथैव शक्तेरवधारणात्। न ह्यनुपलब्धिमात्रसहायं तत् अभावेऽप्यनुभवमाधातुमुत्सहते, शब्दलिङ्गादेरपेक्षादर्शनात्। न च यत्र यदपेक्षं यस्य

व्याप्तेः संकोचेति। भावविषयत्वेनेति भावः। नन्विदमेवे त। सर्वव्याप्तीनां भावमात्रविषयत्वप्रसङ्ग एवेत्यर्थः। अकारणककार्येति। अज्ञातकरणकज्ञानत्वावच्छिन्नं प्रति इन्द्रियस्य करणत्वेन इन्द्रियं विना तन्न स्यादिति भावः। उक्तकार्यकारणभावानुपगमे आह—रूपादीति। ततः किमित्यत्राह—न हीति। इन्द्रियाण्येव तदा न सिद्ध्येयुरिति भावः। साक्षात्कारिग्रहकरणतया इन्द्रियसिद्धिः स्यात् अभावग्रहश्च न साक्षात्कारीति नेन्द्रियसापेक्ष इत्याशयेन शङ्कते—यद्यपीति। करणानुपलम्भ एव करणापेक्षासंभवात् अनुपलभ्यमानकरणकत्वमेवेन्द्रियरूपकरणकल्पने प्रयोजकं न त्वन्यदिति समाधत्ते—तथापीति। अत एवेति। अज्ञातकरणकत्वस्येन्द्रियकल्पकत्वादेवेत्यर्थः। असाक्षात्कारित्वेपीति। तत्र साक्षात्कारित्वरूपकल्पकाभावेपीति भावः। तर्हि संस्कारः किमर्थमपेक्ष्यत इत्यत्राह—संस्कारस्त्विति। बाह्यातीतादिविषयेषु मनसः संयोगादिसंनिकर्षासंभवादिति भावः॥

अन्यत्र मनसः भावरूपप्रमाणसाहित्येनोपयोगोपगमेऽपि अभावमात्रे तन्निरपेक्षस्याप्युपयोग उच्यत इति शङ्कां निराकरोति—न हीति। अपेक्षादर्शनादिति। अभावविषयकशाब्दाद्यनुभव इति भावः।

अभावोपलम्भे इन्द्रियाणि करणमित्यत्र प्रमाणान्तरमाह—अपि चेति। प्रतियोगिनीति। चक्षुरादीनि रूपादिग्रहणे करणत्वात्तदभावग्रहणेऽपि करणानीति भावः। व्यापारेति। आश्रयग्रह-

जनकत्वमुपलब्धम्, तदेव तस्यैव तदनपेक्षं जनकमिति न्यायसहम्। आर्द्रेन्धनसंबन्धमन्तरेणापि दहनाद्धूमसंभावनापत्तेः। तथा च गतं कार्यकारणभावपरिग्रहव्यसनेन॥

अभावोपलम्भे इन्द्रियाणि करणमित्यत्र हेतूनामुपन्यासः

अपि च— प्रतियोगिनि सामर्थ्यात् व्यापाराव्यवधानतः।
अक्षाश्रयत्वात् दोषाणामिन्द्रियाणि विकल्पनात्॥ २१॥

यद्धि प्रमाणं यद्भावावगाहि, तत् तदभावावगाहि, यथा लिङ्गं शब्दो वा; घटाद्यवगाहि चेन्द्रियमिति। अन्यथा हि शब्दादिकमपि नाभावमावेदयेत्, भाव एव सामर्थ्यावधारणात्। न चैवमेव न्याय्यम्। देवदत्तो गेहे नास्तीति शब्दात् मया तत्र जिज्ञासमानेनापि न दृष्टो मैत्र इत्यवगतानुपलब्ध्याऽनुमानादप्यवगतेः।

ग्राह्यतु वाऽऽश्रयमिन्द्रियं, तथापि न तेनेदं व्यवधीयते, व्यापारत्वात्। अन्यथा सर्वविकल्पकानां प्रत्यक्षत्वाय दत्तो जलाञ्जलिः स्यात्। नन्वेवं-सति धूमोपलम्भोऽप्यस्य व्यापारः स्यात्। तथा च गतमनुमानेनापीति चेत्—न, यया क्रियया विना यस्य

णस्य व्यापारत्वात् तज्जनकत्वेऽपि तेन नान्यथासिद्धिसंभव इति भावः। अक्षाश्रयत्वादिति। इन्द्रियाश्रितत्वात् दोषाणां अभावभ्रमहेतूनामभावभ्रमस्य दुष्टेन्द्रियजन्यत्वे अभावप्रमायाः निर्दुष्टेन्द्रियजन्यत्वं युक्तमिति भावः। इन्द्रियाणीति। अभावप्रमाकरणानीति शेषः। विकल्पनादिति। विशिष्टावगाहनादित्यर्थः। अघटं भूतलमिति ज्ञानस्याभावविशिष्टविषयकस्येन्द्रियजन्यत्वमनुपलब्धिजन्यत्वं वेति विकल्पे अभावबुद्धित्वेनेन्द्रियाजन्यत्वे भावबुद्धित्वेनानुपलब्धिजन्यत्वमपि न स्यादिति तत्र सप्तमप्रमाणकल्पनाप्रसङ्गात् अनुपलब्धिसहकृतेन्द्रियकरणकत्वमेव युक्तमिति भावः।

शब्दादिकमिति। आदिना लिङ्गपरिग्रहः। अत्र भावग्राहकशब्दादिव्यक्तेः अभावग्राहकत्वाभावात् शब्दत्वादिसामान्येनैकधर्मेणावच्छिन्नस्योभयग्राहकत्वमवगन्तव्यम्। अवगतानुपलब्ध्या—ज्ञातानुपलब्ध्या॥

दत्तो जलाञ्जलिरिति। निर्विकल्पेन व्यवधानादिति भावः। धूमोपलम्भोऽपीति। व्याप्त्यादिविशिष्टधूमोपलम्भोऽपीत्यर्थः। अस्येति चक्षुष इत्यर्थः। तद्व्यतिरेकेण करणत्वनिर्वाहे सत्येव

यत्कारणत्वं न निर्वहति, तं प्रति तस्या एव व्यापारत्वात्। न च धूमाद्युपलब्धिमन्तरेण चक्षुषो वह्निज्ञानकारणत्वं न निर्वहति संयोगवदिति।

अस्ति च भावाभावविपर्ययः। सोऽयं यस्य दोषमनुविधत्ते, तदेवात्र करणमिति न्याय्यम्। न चानुपलब्धिः स्वभावतो दुष्टा; नाप्यधिकरणग्रहणं प्रतियोगिस्मरणं वा स्वभावतो दुष्टम्; अनुत्पत्तिदशायामनुत्पत्तेः, उत्पत्तिदशायाञ्च स्वार्थप्रकाशनस्वभावताया अपरावृत्तेः। असंसृष्टयोरधिकरणप्रतियोगिनोः संसृष्टतया प्रतिभानं दुष्टम्; संसृष्टयोश्चासंसृष्टतयेति चेत्–नन्वयमेव विपर्ययः। तथाचात्माश्रयो दोषः। तस्माद्दुष्टेन्द्रियस्य तद्विपर्ययसामर्थ्ये अदुष्टस्य तत्समीचीनज्ञानसामर्थ्यमपि। तथा च प्रयोगः–इन्द्रियमभावप्रमाकरणं तद्विपर्ययकरणत्वात्, यत् यद्विपर्ययकरणं तत् तत्प्रमाकरणं, यथा रूपप्रमाकरणं चक्षुरिति॥

विकल्पनात् खल्वपि। अघटं भूतलमिति हि विशिष्टधीरवश्यमिन्द्रियकरणिका स्वीकर्तव्या, प्रमाणान्तरं वा सप्तममास्थेयम्। यथाहि विशेष्यमात्रोपक्षीणमिन्द्रियमकरणमत्र,

---

तस्य व्यापारत्वमुच्यत इत्याह—यया क्रिययेति। न च धूमादीति। धूमज्ञानमन्तरा चक्षुषा वह्निप्रत्यक्षादिति भावः। संयोगवदिति। यथा वह्न्यादौ संयोगप्रत्यासत्तिं विना तत्प्रत्यक्षकरणत्वं चक्षुषो न निर्वहति न तथा धूमोपलम्भमन्तरेणेति भावः॥

भावाभावविपर्यय इति। अत्राभावोऽस्ति स नास्तीत्याकारकः अभावे सत्त्वासत्त्वभ्रम इत्यर्थः। असंसृष्टयोरिति। अत्राभावो नास्तीति भ्रमेऽयं दोष इति भावः। संसृष्टयोरिति—अत्र अभावोऽस्तीति भ्रमेऽयं दोष इति भावः। अयमेव विपर्यय इति। अभावो नास्तीति भ्रमे अभावाभावस्य प्रतियोगिरूपस्याधिकरणे संसर्गभानात् अभावोऽस्तीति भ्रमे अभावस्य संसर्गभानेन प्रतियोग्यसंसर्गभानाच्चेति भावः। आत्माश्रय इति। विपर्ययस्यैव स्वहेतुत्वोक्तेरिति भावः। तत्समीचीनज्ञान इति। अभावविषयकयथार्थज्ञान इत्यर्थः।

प्रमाणान्तरं वा सप्तममिति। विशेष्यविशेषणोभयग्रहणक्षमच्चक्षुरादेरनुपलब्धेश्चातिरिक्तमपूर्वं किञ्चित्प्रमाणमित्यर्थः। विषयभेदे—अभावाधिकरणरूपविषयभेदे। फलवैजात्ये—परोक्षा-परोक्ष-

तथा विशेषणमात्रोपक्षीणानुपलब्धिरपि न करणं स्यात्। स्वस्वविषयमात्रप्रवृत्तयोः प्रमाणयोः समाहारः कारणमिति चेत्–न, विषयभेदे फलवैजात्ये च तदनुपपत्तेः। न हि मृत्सु तन्तुषु च व्याप्रियमाणयोः कुलालकुविन्दयोः समाहारः स्यात्। नापि घटपटादिकारिणां चक्रवेमादीनां समाहारः क्वचिदुपयुज्यते। तत्र कर्बुरकार्याभावात् न तथा; प्रकृते तु विशिष्टप्रत्ययस्य परोक्षापरोक्षरूपस्य दर्शनात् तथेति चेत्–न, विरुद्धजातिसमावेशाभावात्। भावे वा करम्बित एव कार्ये द्वयोरपि शक्तिरभ्युपगन्तव्या; दर्शनबलात्। न हि नियतविषयेण सामर्थ्येन कर्बुरकार्यसिद्धिः, अन्यत्रापि तथा प्रसङ्गात्। ननूभयोरप्युभयत्र सामर्थ्ये कोऽर्थो मिथस्सन्निधानेनेति चेत्–न, तत्सहितस्यैव तस्य तत्र सामर्थ्यादिति। एतेन सुरभि चन्दनमित्यादयो व्याख्याताः। तथा चाभावविषयेऽपीन्द्रियसामर्थ्यस्य दुरपह्नवत्वात् अलमसद्ग्रहेणेति ॥

स्यादेतत्–नागृहीते विशेषणे विशिष्टबुद्धिरुदेति, तत्कार्यत्वात्। न च विशिष्टसामर्थ्ये केवलविशेषणेऽपि सामर्थ्यम्, केवलसौरभेऽपि चक्षुषो वृत्तिप्रसङ्गात्। अतोऽभावविशेषणग्रहणाय मानान्तरसंभवः। अपि च कथमनालोचितोऽर्थ इन्द्रियेण विकल्प्येत? न च

स्वरूपे। तदनुपपत्तेः—समाहारकारणत्वानुपपत्तेः। तामुपपादयति न हीति वाक्यद्वयेन। दृष्टान्तवैषम्यं शङ्कते—तत्रेति। कर्बुरकार्यम्—विचित्रकार्यम्, विरुद्धजातिद्वयावच्छिन्नं कार्यमिति भावः। विरुद्धजातिसमावेशाभावादिति। साङ्कर्यापत्तेरिति भावः। समावेशे वा विरोधो नास्तीत्याह–भावे वेति। करम्बित एवेति। परोक्षापरोक्षरूप एवेत्यर्थः। द्वयोरिति। इन्द्रियानुपलब्ध्युभयोरित्यर्थः। तदभावोपलम्भस्यापीन्द्रियकरणकत्वं सिद्ध्यतीति भावः। एकैकस्यापि करम्बितकार्यजननसामर्थ्यसत्त्वे परस्परसन्निधिरनर्थक इति शङ्कते—नन्विति। अन्योन्यसाहित्यविशिष्टस्यैव तत्र सामर्थ्यमिष्यत इति नानर्थक्यमिति समाधत्ते—नेति। सुरभि चन्दनमिति। इन्द्रियसन्निकर्षविशिष्टस्यैव सौरभज्ञानस्य तद्विशिष्टप्रत्यक्षहेतुत्वात् न सौरभज्ञानमात्रात् तद्विशिष्टोपलम्भ इति व्याख्यातमिति भावः ॥

नन्वघटं भूतलमिति विशिष्टज्ञानं प्रति विशेषणीभूताभावज्ञानस्य कारणत्वेन पूर्वमपेक्षितत्वात् तत्रानुपलब्धिः प्रमाणमस्त्विति शङ्कते—स्यादेतदिति। अतिप्रसङ्गेन इन्द्रियस्य तत्र प्रमाणतां निरस्यति—न चेति। इन्द्रियेण निर्विकल्पपूर्वकमेव सविकल्पजननात् अभावे निर्विकल्पाभावेन सविकल्पो

मानान्तरस्याप्येषा रीतिः, अनुमानादिभिरनालोचितस्याप्यर्थस्य विकल्पनात् । अप्राप्तेश्च । न ह्यभावेनेन्द्रियस्य संयोगादिः संभवति । न च विशेषणत्वम्, संबन्धान्तरपूर्वकत्वात् तस्य । अवश्याभ्युपगन्तव्यात्वाच्चानुपलब्धेः । न हि तदुपलब्धौ तस्याभावोपलम्भ इति चेत्—

उच्यते— अवच्छेदग्रहध्रौव्यादध्रौव्ये सिद्धसाधनात् ।
प्राप्त्यन्तरेऽनवस्थानात् न चेदन्योऽपि दुर्घटः ॥ २२ ॥

स ह्यर्थविशेषणीभविष्यन् केवलोऽपि विष्फुरेत्, यस्यावच्छेदकज्ञानं न व्यञ्जकम् । स च विकल्पयितव्य आलोच्यते, यो विशेषणज्ञाननिरपेक्षेणेन्द्रियेण विज्ञाप्यते । यस्तु तत्पुरस्सर एव प्रकाशते, तत्र तस्य विकल्पसामग्रीसमवधानवत एव सामर्थ्यात् नायं विधिः ।

न भवितुमर्हतीत्याह—अपि चेति । अनुपलब्धिगम्यत्वे नायं दोष इत्याह—न च मानान्तरस्येति । अप्राप्तेश्चेति । असन्निकर्षाच्चेत्यर्थः । न च विशेषणत्वमिति । प्रकारतारूपस्य तस्य संबन्धान्तरपूर्वकत्वावश्यम्भावेन तत्कल्पनायां गौरवात् । अनुपलब्धिस्त्विन्द्रियसहकारितया भवताप्यनुमन्यत इति न गौरवमिति भावः ॥

अत्राश्रयनिरूप्यस्य विशेषणस्य न केवलं भानमस्ति एवं न सर्वत्र सविकल्पस्य निर्विकल्पपूर्वकत्वनियमः, किन्तु विशेषणान्तरज्ञाननिरपेक्षभानयोग्यविशेषणविषय एव, अभावस्यानुयोगिप्रतियोगिनिरूप्यत्वेन न केवलविशेषणज्ञानसंभवः न वा निर्विकल्पप्रसङ्गः, अन्यथा त्विष्ट एवेति प्रतिवक्ति-अवच्छेदेति । अधिकरणप्रतियोगिज्ञानपूर्वकत्वनियमादित्यर्थः । अध्रौव्य इति । अनियमे सिद्धसाधनमित्यर्थः । प्राप्त्यन्तर इति । स्वरूपसंबन्धे सत्यप्रतीतसंबन्धान्तरकल्पने तस्याप्यन्यदिति रीत्या अनवस्थितिरित्यर्थः । अन्योऽपीति । प्रमाणान्तरपक्षोऽपीत्यर्थः । दुर्घट इति । मानान्तरेऽपि परम्परयापि निर्विकल्पपूर्वकत्वसत्त्वात् संबन्धान्तराभावे विशेषणत्वासंभवचोद्यस्य तुल्यत्वाच्चेति भावः ॥

केवलोपि—विशेष्यसंबन्धरहितोऽपि । अवच्छेदकज्ञानम्— अनुयोगित्वादिना विशेषकं यदधिकरणादि तज्ज्ञानम् । विशेष्यभासकसामग्रीसमवहितस्यैवाभावभासकत्वात् केवलाभावरूपविशेषणमात्रभानं न भवति यत्रानुपलब्धिः प्रमाणं स्यादिति भावः । नायं विधिरिति । प्रतियोगिज्ञानं पुरस्कृत्यैवाभावस्य ज्ञातव्यतया न तत्सविकल्पस्य निर्विकल्पपूर्वकत्वसंभव इति भावः ।

स्वभावप्राप्तौ सत्यामप्यधिका प्राप्तिः प्रतिपत्तिबलेन रूपादावभ्युपगता। इह त्वनवस्था-दुस्थतया न तदभ्युपगमः; न तु स्वभावप्रत्यासत्तिरेतावतैव विफलायते॥

न चेदेवम्, प्रमाणान्तरेऽपि सर्वमेतत् दुर्घटं स्यात्। तथा हि—सर्वमेव मानं साक्षात्परम्परया वा निर्विकल्पकविश्रान्तम्। न ह्यनुमानादिकमप्यनालोचनपूर्वकम्। ततोऽनालोचितोऽभावः कथमनुपलब्ध्यापि विकल्प्येत। न च तया तदालोचनमेव जन्यते, प्रतियोग्यनवच्छिन्नस्य तस्य निरूपयितुमशक्यत्वात्। शक्यत्वे वा किमपराद्धमिन्द्रियेण। तथा संबन्धान्तरगर्भत्वनियमेन विशेषणत्वस्य, मानान्तरेऽपि कः प्रतीकारः तदभावस्य तदानीमपि समानत्वात्। परस्य तादात्म्यमस्तीति चेत्—ननु यद्यसावस्ति, अस्त्येव, न चेत्, नैव। न ह्यभ्युपगमेनार्थाः क्रियन्ते, अनभ्युपगमेन वा निवर्तन्ते इति।

अवश्याभ्युपगन्तव्यत्वे कारणत्वं सिद्ध्येत्, न तु मानान्तरत्वम्। अन्यथा भावो-

---

स्वभावप्राप्ताविति। स्वरूपसंबन्धे सतीति भावः। इह त्विति। अभावादौ स्वरूपातिरिक्तसंबन्धवत्तया अप्रतीत इति भावः। अनवस्थेति। प्रतीतिबलेनाभ्युपगमे नानवस्था स्यात्। प्रतीत्यभावे तदनभ्युपगमात् अप्रतिपन्नस्यापि कल्पने पुनः तस्याप्यन्यः तस्याप्यन्यः इति रीत्या संबन्धानवस्था दुस्त्यजेति भावः। एतावतैवेति। क्वचित्प्रतीतिबलात् संबन्धाभ्युपगमेनैव॥

'न चेदन्योऽपी'ति तुरीयपादं व्याख्याति—न चेदेवमिति। प्रमाणान्तरेऽपि—अनुपलब्धावपि। परम्परयेति। अनुमानादौ लिङ्गदर्शनादेः निर्विकल्पपूर्वकत्वादिति भावः। परस्येति—मीमांसकस्येत्यर्थः। तन्मते अभावस्याधिकरणात्मकत्वादिति भावः। अवश्याभ्युपगन्तव्यत्वाच्चानुपलब्धेरित्यस्योत्तरमाह—अवश्याभ्युपगन्तव्यत्व इति। भावोपलम्भं प्रत्यभावानुपलम्भस्याप्यवश्याभ्युपगन्तव्यत्वात् भावविषयेऽपि प्रसङ्गो दुष्परिहरः स्यादिति भावः॥

स्तबकार्थमुपसंहरन् ईश्वरं प्रपद्यते—प्रत्यक्षादिभिरिति। अधरः—उत्थितिरहितः। बाधकस्य स्वरूपलाभात् पश्चादेव हि बाधोदयः समुत्थातुमर्हति, न तु ततः प्रागपीति भावः। अत एव दूरे सबाधकतया अभिमतस्य स्वरूपलाभस्तु प्रायेण न स्यादेवेत्याह—प्राय इति। यस्य ईश्वरस्य मुखवीक्षणं—विषयीकरणं तत्रैवाक्षमैः प्रत्यक्षादिभिरीश्वरगोचरं बाधकस्वरूपमेव न लभ्यते बाधकज्ञान-

पलम्भेऽप्यभावानुपलब्धिरेव प्रमाणं स्यात्; नेन्द्रियम्। अभावोपलम्भे भावानुपलम्भवत् भावोपलम्भे अभावानुपलम्भस्यापि वज्रलेपायमानत्वादिति ॥

प्रत्यक्षादिभिरेभिरेवमधरो दूरे विरोधोदयः
प्रायो यन्मुखवीक्षणैकविधुरैरात्माऽपि नासाद्यते।
तं सर्वानुविधेयमेकमसमस्वच्छन्दलीलोत्सवं
देवानामपि देवमुद्धवदतिश्रद्धाः प्रपद्यामहे ॥

इति न्यायकुसुमाञ्जलौ तृतीयस्तवकः ॥

स्वरूपमेवासिद्धं न ह्यविषयीकृत्य तं तैः तत्प्रतिषेधः कर्तुं शक्य इति भावः। शब्दस्य बाधकतयाभिमतस्य तद्गोचरत्वसंभवेऽपि अनन्यथासिद्धधर्मिग्राहकमानबाधेनान्यपर्यावगमात् न बाधकत्वमिति प्राय इत्यनेन सूचितम्। सर्वानुविधेयम्—सर्वैराप्ततया प्रमाणीकर्तुं योग्यम्। एवम्—तादृशानेककल्पने गौरवात् व्यापकस्वार्थानुपलम्भेन बाधपरिहाराय—असमेति। लीलानन्द एव स्वार्थ इति भावः ॥

इति न्यायवासनामिध-न्यायकुसुमाञ्जलिटीकायां
तृतीयस्तवकः ॥

॥ न्यायकुसुमाञ्जलौ चतुर्थस्तबकः ॥

प्रमाणलक्षणकथनम्

ननु सदपीश्वरज्ञानं न प्रमाणम्, तल्लक्षणायोगात्; अनधिगतार्थगन्तुः तथाभावात्। अन्यथा स्मृतेरपि प्रामाण्यप्रसङ्गात्। न च नित्यस्य सर्वविषयस्य चानधिगतार्थता व्याघातात्।

अनधिगतार्थगन्तृत्वस्य प्रमालक्षणत्वाभावः

अत्रोच्यते—

अव्याप्तेरधिकव्याप्तेरलक्षणमपूर्वदृक्।
यथार्थानुभवो मानंमनपेक्षतयेष्यते ॥ १ ॥

न ह्यधिगतेऽर्थे अधिगतिरेव नोत्पद्यते, कारणानामप्रतिबन्धात्। न चोत्पद्यमानापि प्रमातुरनपेक्षितेति न प्रमा, प्रामाण्यस्यातदधीनत्वात्। नापि पूर्वाविशिष्टतामात्रेणाप्रामाण्यम्; उत्तराविशिष्टतया पूर्वस्याप्यप्रमाण्यप्रसङ्गात्। तदनपेक्षत्वेन तु तस्य प्रामाण्ये तदुत्तरस्यापि

न्यायवासनाभिधन्यायकुसुमाञ्जलिटीकायां चतुर्थस्तबकः

अथ सत्त्वेऽपि तस्याप्रमाणत्वादिति चतुर्थीं विप्रतिपत्तिं निरसितुमुत्थापयति—नन्विति। न प्रमाणमिति। न प्रमेत्यर्थः। अनधिगतार्थगन्तुः—अनधिगतार्थगोचरस्य। तथाभावात्—प्रमात्वात्। व्याघातादिति। प्रागेव सर्वविषयकस्येदानीमनधिगतार्थावगाहनं व्याहतमिति भावः।

अव्याप्तेरिति। धारावाहिप्रत्यक्षादावित्यर्थः। अधिकव्याप्तेः—अप्रमेऽतिव्याप्तेः। अलक्षणमिति। अपूर्वदृक्। अनधिगतार्थगोचरं ज्ञानमिति प्रमाया न लक्षणमित्यर्थः। यथार्थानुभव इति। यथार्थानुभवः प्रमेत्यर्थः। कुतः स एव तर्हि स्मृतिरपि तथा स्यादित्यत्राह—अनपेक्षतयेति अनुभवसापेक्षत्वात् स्मृतिः प्रमेति न व्यवह्रियते। किन्तु निरपेक्षत्वादनुभव एव, व्यवहारानुगुणं हि लक्षणकरणमिति भावः।

अनधिगतार्थज्ञानं प्रमेति वदतः किमधिगतार्थाधिगतिरेव नोत्पत्तुमर्हतीत्याशयः, उत उत्पत्तावपि प्रमात्वं न भवतीति विकल्प्य आद्यं प्रत्याह—न हीति। द्वितीयं निरस्यति—न चेति।

तथैव स्यात्, अविशेषात्। छिन्ने कुठारादीनामिव, परिच्छिन्ने नयनादीनां साधकतमत्वमेव नास्तीत्यपि नास्ति, फलोत्पादानुत्पादाभ्यां विशेषात्।

तत् फलं प्रमैव न भवति गृहीतमात्रगोचरत्वात् स्मृतिवदिति चेत्—न, यथार्थानुभवत्वनिषेधे साध्ये बाधितत्वात्। अनधिगतार्थत्वनिषेधे सिद्धसाधनात्, साध्यसमत्वाच्च। व्यवहारनिषेधे तन्निमित्तविरहोपाधिकत्वात्, बाधितत्वाच्च। न चानधिगतार्थत्वमेव तन्निमित्तम्, विपर्ययेपि प्रमाव्यवहारप्रसङ्गात्। नापि यथार्थत्वविशिष्टमेतदेव; धारावहनबुद्ध्यव्याप्तेः॥

धारावाहिकबुद्धिविचारः

न च तत्तत्कालकलाविशिष्टतया तत्राप्यनधिगतार्थगन्तृत्वमुपपादनीयम्; क्षणोपाधीनामनाकलनात्। न चाज्ञातेष्वपि विशेषणेषु तज्जनितविशिष्टता प्रकाशत इति कल्पनीयम्। स्वरूपेण तज्जननेऽनागतादिविशिष्टतानुभवविरोधात्; तज्ज्ञानेन तु तज्जनने सूर्यगत्यादीनामज्ञाने तद्विशिष्टतानुत्पादात्। न चैतस्यां प्रमाणमस्ति। नन्वनुपकार्यानु-

---

अतदधीनत्वात्—अपेक्षानधीनत्वात्। फलोत्पादेति। छिन्ने न पुनश्छेदनम्। ज्ञाते तु पुनरुत्पद्यते ज्ञानमिति विशेषादित्यर्थः।

यथार्थानुभवत्वनिषेध इति। प्रमैव न भवतीत्यत्रेति भावः।

अनधिगतार्थगन्तृत्व इति। निषेध्य इति शेषः। साध्यसमत्वादिति गृहीतमात्रगोचरत्वहेतोरित्यर्थः। व्यवहारनिषेध इति। साध्य इति शेषः। तन्निमित्तेति। प्रमाव्यवहारनिमित्तयथार्थानुभवत्वविरहः उपाधिरित्यर्थः।

कालकला—क्षणाद्यात्मा सूक्ष्मकालः। अनाकलनात्—अनवगाहनात्। स्वरूपेण—ज्ञानमन्तरेण। तज्जनने—विशेषणेन स्ववैशिष्ट्योत्पादने। अनागतादीति। अनागतादेरिदानीं स्वरूपतोऽभावेन वैशिष्ट्यजनकत्वासंभवादिति भावः। ननु सन्ति विशेषणानि स्वसत्तया स्वविशिष्टतां जनयन्तु, असन्ति तु स्वज्ञानसत्तयेति नोक्तदोष इत्यत आह—न चैतस्यामिति। विशिष्टतायामित्यर्थः। विशेष्यविशेषणभावानुपपत्तिरेव मानमित्याह—नन्विति। अतिप्रसङ्ग इति। सर्वं सर्वत्र विशेषणं स्यादिति भावः। अन्यथैवोपपत्तेरित्याह—व्यवच्छिनत्तीति। व्यावृत्तिबोधनेनेत्यर्थः। तत्रापि व्यव-

पकारकयोर्विशेषणविशेष्यभावे कथमतिप्रसङ्गो वारणीयः ? व्यवच्छित्तौ स्वभावेन । अन्यथा तत्राप्यनवस्थानादिति ॥

ज्ञाततैवोपाधिरिति चेत्–न–निराकरिष्यमाणत्वात् । तत्सद्भावेऽपि वा स्मृतेरपि तथैव प्रामाण्यप्रसङ्गात् । जनकागोचरत्वेऽप्युत्तरोत्तरस्मृतौ पूर्वपूर्वस्मरणजनितज्ञाततावभासनात् ॥

अस्तु वा प्रत्यक्षे यथातथा । गृहीतविस्मृतार्थश्रुतौ का वार्ता ? अप्रमैवासाविति चेत्–गतमिदानीं वेदप्रामाण्यप्रत्याशया । न ह्यनादौ संसारे 'स्वर्गकामो यजेते'ति वाक्यार्थः केनचिन्नावगतः ; सन्देहेऽपि प्रामाण्यसंदेहात् । न च तत्रापि कालकलाविशेषाः परिस्फुरन्ति । न चैकजन्मावच्छेदपरिभाषयेदं लक्षणम्, तत्राप्यनुभूतविस्मृतवेदार्थ प्रत्यप्रामाण्यप्रसङ्गात् ॥

च्छित्तेः कथं विशेषणत्वमित्यत्राह—व्यवच्छित्ताविति । स्वभावेनेति—स्वरूपेण विशेष्यसम्बद्धत्वान्नोपकारान्तरापेक्षेति भावः । अन्यथा—स्वभावसंबन्धानभ्युपगमे । तत्राप्यनवस्थानादिति । वैशिष्ट्यजनने अन्यन्नियामकं किञ्चित्कल्प्यम् । अन्यथातिप्रसङ्गात् । एवं तन्नियामकेऽप्यन्यत् किञ्चित् प्रयोजकमिति रीत्या अनवस्थितिः स्यादिति भावः ।

अथ धारावाहिष्वपि पूर्वज्ञानेन घटादावुत्पादितां ज्ञाततां द्वितीयादिज्ञानमवगाहत इत्यनधिगतार्थकत्वं नाव्याप्तमिति शङ्कते—ज्ञाततैवेति । निराकरिष्यमाणत्वादिति । ज्ञाततायां इत्यर्थः । स्मृतेरपीति । प्रमालक्षणे स्मृतिव्यावर्तकमनधिगतेति विशेषणं व्यर्थमिति भावः । नन्वनुभवजन्याया ज्ञाततायाः व्यवहितत्वात् न स्मृतौ भानप्रसक्तिः ; स्मृतिजन्यायास्तु अनन्तरभावित्वात् न पूर्वभाविस्वजनकस्मृतौ भानसंभव इति कथमनधिगतार्थकत्वं स्मृतेरिति शङ्कां निरस्यति—जनकागोचरत्वेऽपीति । ज्ञाततायाः स्वजनकस्मृतिविषयत्वासंभवेऽपि धारावाहिस्मृतिस्थले पूर्वस्मृतिजन्यज्ञाततायाः उत्तरस्मृतौ भानसंभवेन तत्रातिव्याप्तिरिति भावः ।

ननु स्मृतेरनुभवसमानविषयकत्वनियमेनानुभवाविषयज्ञाततावगाहित्वं न संभवतीति नोक्तदोष इत्यत आह–अस्तु वेति । गृहीतविस्मृतेति । विस्मरणे ज्ञातताभानासंम्भवादिति भावः । सन्देहेऽपि–पूर्वमधिगतो न वेति सन्देहेऽपि । एकजन्मावच्छेदेति । स्वावच्छेदकशरीरजातीयावच्छिन्नातीतज्ञानागोचरार्थकत्वमनधिगतार्थकत्वमिति भावः । तत्रापि—एकजन्मन्यपि ।

स्मृतेः प्रमात्वाभावः

कथं तर्हि स्मृतेः व्यवच्छेदः ? अननुभवत्वेनैव । यथार्थो ह्यनुभवः प्रमेति प्रामाणिकाः पठन्ति ; 'तत्त्वज्ञानादि'ति सूत्रणात् 'अव्यभिचारि ज्ञानमि'ति च । ननु स्मृतिः प्रमैव किं न स्यात् यथार्थज्ञानत्वात् प्रत्यक्षाद्यनुभूतिवदिति चेत्—न, सिद्धे व्यवहारे निमित्तानुसरणात् । न च स्वेच्छाकल्पितेन निमित्तेन लोकव्यवहारनियमनम् ; अव्यवस्थया लोकव्यवहार-विप्लवप्रसङ्गात् । न च स्मृतिहेतौ प्रमाणव्यवहाराभियुक्तानां महर्षीणां प्रमाणव्यवहारोऽस्ति; पृथगनुपदेशात् । उक्तेष्वनन्तर्भावादनुपदेश इति चेत्—न । प्रत्यक्षस्यासाक्षात्कारिफल-त्वानुपपत्तेः । लिङ्गशब्दादेश्च सत्तामात्रेण प्रतीत्यसाधनत्वादिति ॥

एवं व्यवस्थिते तर्क्यतेऽपि यत् इयमनुभवैकविषया सती तन्मुखनिरीक्षणेन तद्यथार्थ-त्वायथार्थत्वे अनुविधीयमाना तत्प्रामाण्यमव्यवस्थाप्य न यथार्थतया व्यवहर्तुं शक्यत इति व्यवहारेपि पूर्वानुभव एव प्रमितिः, अनपेक्षत्वात् ; न तु स्मृतिः, नित्यं तदपेक्षणात् ।

तत्त्वज्ञानादिति । याथार्थ्यमात्रेऽयं संवादः । सूत्रद्वयेऽप्यनधिगतार्थकत्वाकथनादिति भावः । अव्यभिचारि भ्रमभिन्नं यथार्थमित्यर्थः । ननु तैरनुभवस्याप्यनुक्तेः स्मृतिरपि यथार्थत्वात् प्रमा स्यादिति शङ्कते—नन्विति । स्मृतिहेतोः प्रमाणान्तरत्वेन महर्षीणां व्यवहाराभावेन स्मृतेः प्रमात्वमनभिमत-मित्यवगमात् सूत्रे ज्ञानपदमनुभवत्वावच्छिन्नपरमित्याशयेन समाधत्ते—सिद्ध इति । सत्तामात्रेणेति । स्मृतिहेतोरज्ञायमानत्वेनैव हेतुत्वोपगमे विशेषसत्त्वादिति भावः ॥

'अनपेक्षतये'ति तुरीयपादं विवृणोति— एवं व्यवस्थित इति । आगमबाधात् स्मृतिः न प्रमा इति व्यवस्थित इत्यर्थः । तर्क्यतेऽपीति । स्मृतिः न प्रमा, न वा तत्त्वेन व्यवहर्तव्या समान-विषयकानुभवप्रामाण्याप्रामाण्यसापेक्षप्रामाण्याप्रामाण्यकत्वात्, अनुवादजन्यबुद्धिवत् इत्यनुमीयत इत्यर्थः । उक्तागमबाधो विपक्षे बाधक इति भावः । यद्वा यदि स्मृतिः प्रमा स्यात् तदा समानविषय-कानुभवप्रामाण्याद्यनुविधायिप्रामाण्यादिका न स्यात् अनुभवानुविधानात्तु न प्रमेति तर्केण निश्चीयत इत्यर्थः । मूलप्रत्यक्षेति । व्याप्त्यादिविषयकं कारणीभूतं यत् प्रत्यक्षं तदनुविधानादित्यर्थः । विषय-भेदादिति । कारणीभूतप्रत्यक्षे व्याप्त्यादिः अनुमितौ साध्यविशिष्टः पक्ष इति विषयः भिद्यत इति भावः । मानान्तरानुविधानादिति । आगममूलज्ञानस्य प्रामाण्ये सत्येव तज्जन्यज्ञानस्य प्रामाण्यसंभवा-

असमीचीने ह्यनुभवे स्मृतिरपि तथैव। नन्वेवमनुमानमप्यप्रमाणमापद्येत, मूलप्रत्यक्षानुविधानात्। न, विषयभेदात्। आगमस्तर्हि न प्रमाणम्, तद्विषयमानान्तरानुविधानात्। न-प्रमातृभेदात्। धारावाहिकबुद्धयः तर्हि न प्रमाणं आद्यप्रमाणानुविधानात्। न, कारणविशुद्धिमात्रापेक्षया प्रथमवदुत्तरासामपि पूर्वमुखनिरीक्षणाभावात्। कारणबलायातं काकतालीयं पौर्वापर्यमिति।

यदि हि स्मृतिः न प्रमितिः, पूर्वानुभवे किं प्रमाणम्; स्मृत्यन्यथानुपपत्तिरिति चेत्—न, तया कारणमात्रसिद्धेः। न तु तेनानुभवेनैव भवितव्यमिति नियामकमस्ति। अननुभूतेपि तर्हि स्मरणं स्यादिति चेत्—किं न स्यात्। न ह्यत्र प्रमाणमस्ति। पूर्वानुभवाकारोल्लेखः स्मृतेः दृश्यते; सोऽन्यथा न स्यादिति चेत्—तत् किं बौद्धवत् विषयाकारान्यथानुपपत्त्या विषयसिद्धिस्त्वयापीष्यते? तथाभूतं ज्ञानमेव वा तत्सिद्धिः? आद्ये तद्वदेवानैकान्तिकत्वम्

दिति भावः। तर्हि न प्रमाणमिति। उत्तरज्ञानस्य पूर्वज्ञानेनैकविषयकत्वादेकाश्रयकत्वात् तदनुविधानाच्चेति भावः। पूर्वानुविधानमुत्तरस्य नेत्याह—नेति। पूर्वानपेक्षणे कुतः क्रमेणोत्पत्तिरित्यत्राह—कारणेति।

ननु स्मृतेरप्रमात्वे पूर्वपूर्वानुभवे मानाभावेन स्मृत्यनुभवयोः कार्यकारणभावो न सिद्ध्येदिति शङ्कते—यदि हीति। किं प्रमाणमिति न मानसामान्यस्याक्षेपः, किन्तु स्मृतिप्रतिसन्धानकालीनस्य येन तयोरन्वयव्यतिरेकानुविधानाद्धेतुहेतुमद्भावो निश्चीयेत। अतः अनुव्यवसायः न मानमिति नोक्तम् अयं भावः—स घट इत्यादिस्मृतेः प्रमात्वे पूर्वानुभवविषयतारूपतत्तावगाहिनी सा पूर्वानुभवे प्रमाण स्यात् नान्यथा। अप्रमायाः विषयसाधकत्वादिति। पूर्वानुभवाकारोल्लेख इति स घट इत्यत्र स्मृतौ स इत्युल्लिख्यमाना तत्ता अनुभवविषयतात्मिकेति भावः। तत्किमिति। ज्ञानगतार्थाकारान्यथानुपपत्त्य अर्थक्लृप्तिः विषयसिद्धिरितीष्यते उत अर्थाकारज्ञानमेव विषयसिद्धिरिति विकल्प्यत इत्यर्थः। क्रमेण दूषयति—आद्य इति। अनागतेति। भाविनोऽर्थस्य तदानीमसत्त्वात् तत्पूर्वकत्वं तज्ज्ञानस्य न संभवतीति भावः। कदाचिदर्थसत्त्वमात्रं अनुमीयते; न तद्धेतुकत्वमित्यत आह—विभ्रमे चेति। शुक्त्यादौ रजतत्वादिभ्रमे भासमानरजतत्वादेः शुक्त्यादौ सत्त्वमपि नास्तीति भावः। स्मृतिप्रामाण्यमवर्जनीयमिति। अन्यथा पूर्वानुभवसिद्धेरसंभवात् अनधिगतपूर्वानुभवविषयतागोचरत्वाच्चेति भावः

न हि यदाकारं ज्ञानं, तत्पूर्वकत्वं तस्येति नियमः; अनागतज्ञाने विभ्रमे च व्यभिचारात्। द्वितीये तु स्मृतिप्रामाण्यमवर्जनीयम्। माभूत् पूर्वानुभवसिद्धिः, किं नः छिन्नमिति चेत् न तर्हि स्मृत्यनुभवयोः कार्यकारणभावसिद्धिरिति। न तदप्रामाण्येऽपि पूर्वापरावस्थावदात्मप्रत्यभिज्ञानप्रामाण्यादेव तदुपपत्तेः। योऽहमन्वभवममुमर्थं, सोऽहं स्मरामीति मानसप्रत्यक्षमस्तीति।

न च गृहीतग्राहित्वमीश्वरज्ञानस्य, तदीयज्ञानान्तरागोचरत्वात् विश्वस्य। न च तदेव ज्ञानं कालभेदेनाप्रमाणम्; अनपेक्षत्वस्यापरावृत्तेः। तथापि वाऽप्रामाण्ये अतिप्रसङ्गादिति।

ज्ञातताखण्डनम्

स्यादेतत्—अनुपकारकं विषयस्य तदीयमेतदीयं वा न भवितुमर्हति, अविशेषात्।

अत्र स्मृत्यनुभवयोः कार्यकारणभावस्य तदुभयगोचरप्रत्यभिज्ञानेनान्वयव्यतिरेकग्रहणद्वारा ज्ञातुं शक्यत्वात् स्मृतेरनुभवसमानविषयकत्वनियमेनाधिकावगाहित्वासंभवाच्चाप्रमात्वमेव प्रत्यभिज्ञाने अर्थभेदसत्त्वेऽपि स घट इति स्मृतौ स इत्युल्लिख्यमानः अर्थः अयं घट इत्यनुभवे अयमित्युल्लिख्यमानादनतिरिक्त इत्याशयेन समाधत्ते—तदप्रामाण्येऽपीति। मानसप्रत्यक्षमिति प्रत्यक्षत्वात् तस्य प्रमात्वमिति भावः।

अनधिगतार्थकत्वस्य प्रमालक्षणप्रवेशेऽपि नेश्वरज्ञानासंग्रह इत्याह—न च गृहीतग्राहित्वमिति। समानाधिकरणातीतस्वभिन्नज्ञानगोचरावगाहित्वस्यैव तदर्थत्वादिति भावः। अत्रातीतत्वस्थाने पूर्ववृत्तित्वं निवेश्यत इत्यत्राह—न च तदेवेति। अतिप्रसङ्गादिति। प्रमाणतयाभिमतस्यास्मदीयप्रत्यक्षस्यापि द्वितीयक्षणे अप्रमात्वं स्यादिति भावः।

तटस्थः शङ्कते—स्यादेतदिति। अगृहीतग्राही यथार्थानुभवः प्रमेति न युज्यते। याथार्थ्यस्य विषयनियमाधीनत्वात् विषयनियमस्य च नियामकस्य विषयोपकारस्याभावे वक्तुमशक्यत्वात् विषयोपकारस्य च कार्यत्वेन तदभिज्ञपूर्वकत्वावश्यंभावात् तद्विषयकज्ञाने तदुपकारः, तदुपकारे तद्विषयज्ञानमिति परस्पराश्रयप्रसङ्गात् पूर्वपूर्वज्ञानोपगमेन तत्परिहारे च सर्वेषामपि ज्ञानानां गृहीतग्राहित्वापत्तेश्चेति भावः। अनुपकारकमिति। घटादिविषयगतज्ञातताख्योपकाराजनकं ज्ञानमित्यर्थः। तदीयमिति। घटीय-

न च तस्येत्यनियतं तत्र प्रमाणम्, अतिप्रसङ्गात्। न च तदभिज्ञमन्तरेण तदुपकारस्योत्पत्तिः, तथाऽनभ्युपगमात्। अभ्युपगमे वा, कार्यत्वस्यानैकान्तिकत्वात्। अत्रोच्यते—

स्वभावनियमाभावादुपकारोऽपि दुर्घटः।
सुघटत्वेऽपि सत्यर्थेऽसति का गतिरन्यथा ॥ २ ॥

विशेषाभावात् तत्रैव फलं नान्यत्रेत्यस्यापि नियमस्यानुपपत्तेः। स्वभावनियमेन चोपपत्तौ तथैव विषयव्यवस्थोपपत्तेः। अवश्यं चतदभ्युपगन्तव्यम्, अतीतादिविषयानुरोधात्। न हि तत्र ज्ञानेन किंचित्क्रियते इति शक्यमवगन्तुम्; असत्त्वात्। न च तद्धर्मसामान्याधारं किञ्चित् क्रियते इति युक्तम्; तेन तस्यैव विषयत्वप्राप्तेः। तादात्म्यात् विशेषस्यापि सैव ज्ञाततेति चेत्, तत् किं चक्षुषा घटे ज्ञायमाने रसोऽपि ज्ञायते, तादात्म्यात्? घटाकारेण ज्ञायत एवासौ इति चेत्-अथ रसाकारेण किं न ज्ञायते? तेन रूपेण ज्ञातताऽनाधारत्वादिति

मित्यर्थः। न च तस्येति। तदर्थविषयकत्वनियमरहितं ज्ञानं तदर्थे प्रमाणं न स्यादित्यर्थः। तदभिज्ञमिति। घटाद्यभिज्ञमित्यर्थः। तदुपकारस्येति। घटादिगतज्ञातताख्योपकारस्येत्यर्थः। कार्यत्वस्येति। स्वोपादानाद्यभिज्ञपूर्वकं कार्यत्वादितीश्वरसाधकानुमानस्येत्यर्थः।

इह तावत् न—विषयनियमान्यथानुपपत्त्या विषयोपकारः कल्पनीयः, स्वभावत एवोपपत्तेः। अन्यथा उपकारनियमोऽपि न स्यात्। स्वभावातिरिक्तस्य नियामकस्य दुर्वचत्वादिति प्रत्याह— अत्रेति। स्वभावनियमेति। स्वभावतो विषयनियमानभ्युपगमः आवश्यक इत्याह—सुघटत्वेऽपीति सति—वर्तमाने। असति—अवर्तमाने, भूते भाविनि वा का गतिरिति। तदानीमाश्रयस्य विषयस्याभावेनोपकारजननासंभवादिति भावः। फलम्—उपकारः। अतीतादिविषयस्यासत्त्वेऽपि तद्वृत्तिसामान्यस्य नित्यत्वेन सत्त्वात् विषयत्वाच्च तत्रैव कश्चिदुपकार आधीयते। तेन स्याद्विषयनियम इति शङ्कां निरस्यति—न चेति। तस्यैवेति। सामान्यस्यैवेत्यर्थः। यस्योपकारः, तस्यैव विषयत्वादिति भावः। तादात्म्यादिति। धर्मधर्मिणोरभेदोपगमादिति भावः। विशेषस्य—आश्रयव्यक्तेः। तेन रूपेण ज्ञातताश्रयस्यैव तेन रूपेण ज्ञानविषयत्वोपगमे, अतीतादिव्यक्तेः तेन रूपेण ज्ञाततानाश्रयत्वात् ज्ञानविषयत्वं न स्यादित्याह—न तर्हीति।

चेत्-न तर्हि वर्तमानसामान्यज्ञानेऽप्यतीतानागतादिज्ञानम्; तेनाकारेण प्राकट्यानाधारत्वादिति ॥

ननु क्रियया कर्मणि किञ्चित् कर्तव्यमिति व्याप्तेरस्त्वनुमानम्। न,

अनैकान्त्याद्सिद्धेः वा न च लिङ्गमिह क्रिया।
तद्वैशिष्ट्यप्रकाशत्वात् नाध्यक्षानुभवोऽधिके ॥ ३ ॥

धात्वर्थमात्राभिप्रायेण प्रयोगे संयोगादिभिरनेकान्तात्। न हि शरसंयोगेन गगने किंचित् क्रियते; अन्त्यशब्दाभिव्यक्त्या वा। स्पन्दाभिप्रायेण, असिद्धेः। व्यापाराभिप्रायेण, शब्दलिङ्गेन्द्रियव्यापारैः व्यभिचारात्। न हि तैः प्रमेये किञ्चित् क्रियते; अपि तु प्रमातर्येव। फलाभिप्रायेणापि तथा। अन्ततस्तेनैवानेकान्तात्, अनवस्थानाच्च। आशुविनाशिधर्माभिप्रायेण, द्वित्वादिभिरनियमात्। आशुकारकाभिप्रायेण कर्मण्यसिद्धेः। कर्मण्याशुकारकं ज्ञानमित्येव हि साध्यम्। कर्तर्याशुकारकत्वस्य कर्मोपकारत्वेनाव्याप्तेः; शब्दादिव्यापारैरेवानेकान्तात्।

एवं विषयनियमात् ज्ञाततासिद्धिः न भवतीत्युक्तम्। अथ क्रियाजन्यफलशालित्वस्यैव कर्मत्वात् क्रियात्मकं ज्ञानं कर्मणि विषये किञ्चित्करं क्रियात्वात् पाकादिवदित्यनुमानेन ज्ञाततोपकारसिद्धिं शङ्कते नन्विति। परिहरति—नेति। अनैकान्त्यादिति। क्रियेत्यनेन धात्वर्थमात्रविवक्षायां संयोगादौ व्यभिचारः। न हि गगने शरसंयोगादिना किंचित् क्रियत इति भावः। स्पन्दविवक्षायामाह—असिद्धेरिति। ज्ञाने स्पन्दत्वाभावादिति भावः। ज्ञातो घट इत्यनुभवे ज्ञानवैशिष्ट्यं घटे भासते, न तु तदतिरिक्ता ज्ञाततेत्याह—तद्वैशिष्ट्येति। अन्त्यशब्देति। अनन्तरक्षणे तस्यैव नाशादिति भावः। अन्यथाप्यनैकान्त्याद्युपपादयति—व्यापाराभिप्रायेणेत्यादिना। व्यापारत्वस्य हेतुत्वे न शरसंयोगादावनैकान्त्यमित्यन्यत्र तदाह—शब्देति। अन्ततस्तेनैवेति। क्रियेत्यनेन फलविवक्षायां फलेन फलं तेनापि फलान्तरमिति रीत्या फलपरम्परोपगमे अनवस्थानात् क्वचित् फलविश्रमोपगमे, यत्र विश्रमः, तत्रैव फलजनकत्वाभावेन व्यभिचाराच्चेत्यर्थः। आशुविनाशीति। चतुःक्षणानवस्थायीत्यर्थः। अनियमात्—अनैकान्त्यात्। क्रियेत्याशुकारकपरमित्यत्राह—आशुकारकेति। कर्मण्याशुकारकत्वस्य साध्याविशिष्टत्वादसिद्धिः। कर्तर्याशुकारकत्वस्य शब्दलिङ्गादिव्यापारे व्यभिचार इत्यर्थः ॥

प्राकट्यस्यानुभवसिद्धत्वनिरासः

स्यादेतत्—अनुभवसिद्धमेव प्राकट्यम्। तथा हि–ज्ञातोऽयमर्थ इति सामान्यतः, साक्षात्कृतोऽयमर्थ इति विशेषतो विषयविशेषणमेव किञ्चित् परिस्फुरतीति चेत्। तदसत्। यथा हि—

अर्थेनैव विशेषो हि निराकारतया धियाम्।
तथा–क्रिययैव विशेषो हि व्यवहारेषु कर्मणाम् ॥ ४ ॥

किं न पश्यसि, घटक्रिया पटक्रियेतिवत् कृतो घटः, करिष्यते घट इत्यादि। तथैव गृहाण, घटज्ञानं पटज्ञानमितिवत् ज्ञातो घटो ज्ञास्यते ज्ञायते इति। कथमसंबद्धयोर्धर्मधर्मिभाव इति चेत् ध्वस्तो घट इति यथा। एतदपि कथमिति चेत्–नूनं ध्वंसेनापि घटे किञ्चित् क्रियते इति वक्तुमध्यवसितोऽसि। तन्निरूपणाधीननिरूपणो ध्वंसः स्वभावादेव तदीय इति किमत्र संबन्धान्तरेणेति चेत्–प्रकृतेऽप्येवमेव।

एतेन फलानाधारत्वादर्थः कथं कर्मेति निरस्तम्। विनाश्यवत् करणव्यापारविषयत्वेन तदुपपत्तेः। स्वाभाविकफलनिरूपकत्वञ्च तुल्यम्।

'तद्वैशिष्ट्येत्यु'त्तरार्धं विवरीतुं तन्निरसनीयां शङ्कामनुवदति—स्यादेतदिति। सामान्यत इति। ज्ञाततासामान्यं साक्षात्कृतताविशेष इति भावः। यथा विषयजन्याकाररहितमपि ज्ञानं विषयाकारेण नीलादिज्ञानमिति व्यपदिश्यते; तथा ज्ञानजन्याकाररहितोऽपि विषयः ज्ञानविशेषणेन ज्ञातो विषय इत्यनुभूयते इत्याशयेन प्रतिवक्ति—तदसदिति। कृतो घट इति। एवं निदर्शयतः कृतो घट इत्यत्र यथा कृतिविषयत्वमन्तरा कृतता नाम कश्चिदतिरिक्तः उपकारः नेष्यते; तथा ज्ञात इत्यादावपीति भावः। प्रकृतेऽप्येवमेवेति। विषयनिरूप्यत्वेन ज्ञानस्य स्वभावत एव तदीयत्वात् किं संबन्धान्तरेणेति भावः।

अर्थस्य ज्ञानजन्यज्ञातताना श्रयत्वे ज्ञानकर्मत्वं दुरुपपादमित्यत्राह—एतेनेति। कथं कर्मेति। क्रियाजन्यफलशालित्वस्यैव कर्मत्वरूपत्वादिति भावः। उक्तरूपस्य सर्वकर्मानुगतत्वाभावात् अन्यादृशं तत्स्वरूपमाह—विनाश्यवदिति। विनाश्यस्य फलाश्रयत्वं न संभवतीति करणव्यापारविषयत्वरूपमेव

ज्ञानातीन्द्रियत्वनिरासः

ननु ज्ञानमतीन्द्रियत्वादसाधारणकार्यानुमेयं तदभावे कथमनुमीयेत, अप्रतीतश्च कथं व्यवहारपथमवतरेदिति ज्ञानव्यवहारान्यथानुपपत्त्या ज्ञाततकल्पनम्। तदप्यसत्–परस्पराश्रयप्रसङ्गात्। ज्ञाततया हि ज्ञानमनुमीयेत, ज्ञाते च तद्व्यवहारान्यथानुपपत्तिः तां ज्ञापयेत्॥

कुतश्च ज्ञानमतीन्द्रियम्? इन्द्रियेणानुपलभ्यमानत्वादिति चेत्–न। अनुमानपक्षे साध्याविशिष्टत्वात्। अनुपलब्धिमात्रोपन्यासे तु योग्यताऽविशेषिताऽसौ कथमैन्द्रियकोपलम्भाभावं गमयेत्। तद्विशेषणे तु कथमतीन्द्रियं ज्ञानमिति।

तथाविधज्ञातताऽनाश्रयत्वादिति चेत्–न, आश्रयासिद्धेः। व्यवहारान्यथानुपपत्त्यैव सिद्ध आश्रय इति चेत्–न, ज्ञानहेतुनैव तदुपपत्तेः। तस्यात्ममनस्संयोगादिरूपस्य सत्त्वेऽपि सुषुप्तिदशायामर्थव्यवहाराभावात् नैवमिति चेत्–न, तावन्मात्रस्य व्यवहाराहेतुत्वात्। अन्यथा ज्ञानस्वीकारेऽपि तुल्यत्वात्। स्मरणान्यथानुपपत्त्येति चेत्–न–तस्याप्यसिद्धेः।

तद्वाच्यमिति भावः। स्वाभाविकेति। स्वाभाविकं फलनिरूपकत्वमित्यर्थः। फलम्—नाशज्ञानादि। तन्निरूपकत्वं प्रतियोगिविषययोः स्वभावसिद्धमिति भावः॥

अथ ज्ञानव्यवहारान्यथानुपपत्त्या ज्ञाततासिद्धिमाशङ्कते—नन्विति। असाधरणकार्यमिह ज्ञातता। परस्पराश्रयमुपपादयति—ज्ञाततयेति।

ज्ञानस्यातीन्द्रियत्वमेवासिद्धमित्याह—कुतश्चेति। साध्याविशिष्टत्वादिति। अतीन्द्रियत्वमिन्द्रियेणानुपलभ्यमानत्वमित्यनयोः न विशेष इति भावः। तद्विशेषणे तु—योग्यतया विशेषणे तु। कथमतीन्द्रियमिति। प्रतियोगिग्राहकसामग्रीसाहित्यस्यैव योग्यतारूपत्वात् तत्सत्त्वे प्रतियोगिनः अतीन्द्रियत्वं व्याहतमिति भावः॥

तथाविधज्ञाततेति। साक्षात्कृततारूपेति भावः। आश्रयासिद्धेरिति। अतीन्द्रियत्वसाधकतयोक्तस्य हेतोः आश्रयस्य ज्ञानस्यासिद्धेरित्यर्थः। तावन्मात्रस्येति मात्रशब्देन त्वङ्मनोयोगव्यवच्छेदः। ज्ञानस्वीकारेऽपि तुल्यत्वादिति। ज्ञानमभ्युपगच्छतामपि तावन्मात्रस्य हेतुत्वे तदानीं ज्ञानप्रसङ्गोऽपि दुर्वारः स्यादिति भावः। स्मरणान्यथानुपपत्त्येति। सिद्ध आश्रय इत्यनुषज्यते।

अस्ति तावद्व्यवहारनिमित्तं किञ्चिदिति चेत्—किमतः ?। न ह्येतावता ज्ञानं तदिति सिद्ध्यति, तस्यैवासिद्धेः। तथापि नियतस्य कर्तुः प्रवृत्तेः कर्तृधर्मेणैव केनचित् प्रवृत्तिहेतुना भवितव्यमिति चेत्—अस्त्विच्छा प्रत्यक्षसिद्धा ; न तु ज्ञानम्। सैव कथं नियताधिकरणा उत्पद्यतामिति चेत् न, ज्ञानाभ्युपगमेऽपि तुल्यत्वात्। स्वहेतोः कुतश्चिदिति चेत्—तत एवेच्छाऽस्तु, किं ज्ञानकल्पनयेति ॥

स्यादेतत्—प्रकाशमाने खल्वर्थे तदुपादित्सादिरुपजायते ; न तु सुषुप्त्यवस्थायामप्रकाशमानेऽप्यर्थे इत्यनुभवसिद्धम्। तत इच्छायाः कारणं विलक्षणमेव किंचित् परिकल्पनीयम्, यस्मिन् सति सुस्वापलक्षणमौदासीन्यमर्थविषयमात्मनो निवर्तते इति चेत् हन्तैवं सुस्वापनिवृत्तिं अनुभवसिद्धां प्रतिजानानेन ज्ञानमेवापरोक्षमिष्यते। अचेतयन्नेव हि सुषुप्त इत्युच्यते ; अचैतन्यनिवृत्तिरेव हि चैतन्यं ज्ञानमिति। तथा च कालात्ययापदिष्टो हेतुः ॥

ज्ञानक्षणिकत्वविचारः

एतेन क्षणिकत्वादिति निरस्तम्। अपि च किमिदं क्षणिकत्वं नाम ? यद्याशुतरविनाशित्वं, तदाऽनैकान्तिकम्। अथैकक्षणावस्थायित्वं, तदसिद्धं प्रमाणाभावात्। ननु

तस्याप्यसिद्धेः—अतीन्द्रियत्वेन स्मरणस्याप्यसिद्धेः। अनुभवकारणादेव स्मरणजननादिति भावः। अस्त्विच्छेति। संप्रतिपन्नत्वादिति भावः। तद्धेतुतया ज्ञानं सिद्ध्येत्। अन्यथा सर्वस्य सर्वदा सर्वत्रेच्छाप्रसङ्गात् इत्याशयेनाह—सैवेति। ज्ञानाभ्युपगमेऽपि तुल्यत्वादिति। ज्ञानं वा कथं नियताधिकरणे उत्पद्यतामिति प्रश्नस्य तुल्योत्थानत्वादित्यर्थः। ज्ञानहेतोः ज्ञातुरसाधारणधर्मस्य कस्यचिदनभ्युपगमादिति भावः। आत्ममनोयोगादेः तन्नियम इति शङ्कामनुवक्ति—स्वहेतोरिति। तत एवेति। ज्ञानहेतुत्वेनाभिमतादेवेत्यर्थः ॥

ज्ञाने सत्येव इच्छा भवतीत्यन्वयतिरेकानुभवादिच्छाहेतुतया ज्ञानसिद्धिरित्याह—स्यादेतदिति। औदासीन्यमर्थविषयमिति। अर्थज्ञानाभाववत्त्वमित्यर्थः। निवर्तत इति। निवृत्ततया अनुभूयत इत्यर्थः। ज्ञानापरोक्षमवशेनाभ्युपगतं भवतीत्याह—हन्तैवमिति। कालात्ययापदिष्ट इति। अतीन्द्रियत्वबाधादिति भावः।

एतेनेति। कालात्ययापदेशेनेत्यर्थः। दूषणान्तरमाह—अपि चेति। अनैकान्तिकमिति। इच्छादिभिरिति भावः। अथ विज्ञानस्य क्षणान्तरावस्थानेऽनुपपत्तिमात्रेण क्षणिकत्वसिद्धिरित्याह—

स्थायि विज्ञानं यादृशमर्थक्षणं गृह्णदुत्पद्यते, द्वितीयेऽपि क्षणे किं तादृशमेव गृह्णाति, अन्यादृशं वा, न वा कमपीति। न प्रथमः, तस्य क्षणस्यातीतत्वात्; प्रत्यक्षज्ञानस्य च वर्तमानाभत्वात्। न चातीतमेव वर्तमानतयोल्लिखति, भ्रान्तत्वप्रसङ्गात्। न द्वितीयः, विरम्यव्यापारायोगात्। प्रथमतोऽपि तथाऽभ्युपगमेऽनागतावेक्षणप्रसङ्गात्। न तृतीयः, ज्ञानत्वहानेरिति महाव्रतीयाः। तदसत्। ज्ञानं गृह्णातीत्यस्यैवाऽर्थस्याऽनभ्युपगमात्। अपि तु तदेव ग्रहणमित्यभ्युपगमः। तथा च ज्ञानं प्रथमे यमर्थमालम्ब्य जातम्, द्वितीयेऽपि क्षणे तदालम्बनमेव तन्नवेति प्रश्नार्थः। तत्र तदालम्बनमेव तदिति परमार्थः। न चैवं भ्रान्तत्वम्, विपरीतानवगाहनात्। तथापि ज्ञेयनिवृत्तौ कथं ज्ञानानुवृत्तिः? तदनुवृत्तौ वा कथं ज्ञेयनिवृत्तिरिति चेत्—किमस्मिन्ननुपपन्नम्? न हि ज्ञानमर्थश्चेत्येकं तत्त्वमेकायुष्कं वेति॥

सत्यपि वा क्षणिकत्वे कथमप्रत्यक्षम्? इत्थं यथोच्यते—न स्वप्रकाशम्, वस्तुत्वादितरवस्तुवत्। न च ज्ञानान्तरग्राह्यं, ज्ञानयौगपद्यनिषेधेन समानकालस्य तस्याभावात्। ग्राहककाले ग्राह्यस्यातीतत्वेन वर्तमानाभत्वानुपपत्तेः। ग्राह्यकाले च ग्राहकस्यानागतत्वात्—इति चेत्—नन्वेवं ज्ञाततापि न प्रत्यक्षा स्यात्, क्षणिकत्वात्। कथम्? इत्थम्—न स्वप्रकाशा। वस्तुत्वात्। न जनकग्राह्या, अनागतत्वात्। विरम्यव्यापारायोगाच्च। न

नन्विति। यादृशमर्थक्षणमिति। वर्तमानं क्षणिकं घटाद्यर्थमित्यर्थः। तस्य क्षणस्य घटादेः। अतीतमेव गृह्णातु इत्यत्राह—प्रत्यक्षज्ञानस्येति। वर्तमानाभत्वात्—विद्यमानविषयत्वात्। विरम्येति। प्रथमक्षणेऽनवगाह्य द्वितीयक्षणे कस्यचिदवगाहनादिति भावः। अनागतावेक्षणेति। वर्तमानाभत्वभङ्ग इति भावः। अर्थस्य क्षणिकत्वोपगमेऽपि ज्ञानस्य स्थायित्वं नानुपपन्नमित्याशयेन समाधत्ते—तदसदिति। तदेव ग्रहणमिति। ज्ञानमेव ग्रहणमित्यर्थः। ततश्च संभवदुक्तिकं पूर्वोक्तप्रश्नस्यार्थं शिक्षयति—तथा चेति।

क्षणिकत्वोपगमेऽपि नाप्रत्यक्षत्वेन भाव्यम्, अप्रयोजकत्वादित्याक्षिपति—सत्यपीति। क्षणिकत्वे प्रत्यक्षानुपपत्तिमाह—यथोच्यत इति। न स्वप्रकाशमिति। न स्वविषय इत्यर्थः। सर्वं ज्ञानं गुण इति ज्ञाने स्वविषयत्वं प्रसिद्धमिति न प्रतियोग्यप्रसिद्धिः। तस्याभावादिति। ज्ञानान्तरस्याभावादित्यर्थः। उत्तरक्षणोत्पन्नं ज्ञानं ग्राहकमस्त्वित्यत्राह—ग्राहककाल इति। न जनकग्राह्येति।

समसमयज्ञानग्राह्या, ज्ञानजनकेन्द्रियसम्बन्धाननुभवात्। न च तदुत्तरज्ञानग्राह्या, तदानीमतीतत्वात्—इति। क्षणिकत्वमेव तस्याः कुत इति चेत्—त्वदुक्तयुक्तेरेव। तथा हि—यं क्षणमाश्रित्य जाता ततः परमपि तमेवाश्रयते अन्यं वा, न वा कमपीति। तत्र न प्रथमः, तस्य तदानीमसत्त्वात्। न द्वितीयः, अप्रतिसंक्रमात्। एकक्षणावगाहिनि च ज्ञाने तदन्यक्षणाश्रयज्ञातताफलत्वेन भ्रान्तत्वप्रसङ्गात्, रजतावगाहिनि पुरोवर्तिवृत्तिज्ञाततफल इव न चान्यमपि क्षणं ज्ञानमवगाहते, तदानीं तस्यासत्त्वात्। न तृतीयः, निःस्वभावताप्रसङ्गात्। न ह्यसौ तदानीं तदीयाऽन्यदीया वेति॥

अतीतेनापि तेनैव क्षणेनोपलक्षिताऽनुवर्तते इति चेत्। एवं तर्हि वर्तमानार्थता प्रकाशस्य न स्यात्। अन्यथा ज्ञानस्यापि तथानुवृत्तेः को दोषः ? न हि वर्तमानार्थप्रकाशसम्बन्धमन्तरेण ज्ञानस्यान्या वर्तमानावभासता नाम। अर्थनिरपेक्षप्रकाशनानुवृत्तिमात्रेण तथात्वे भूतभाविविषयस्यापि ज्ञानस्य तथाभावप्रसङ्गात्॥

न स्वजनकज्ञानग्राह्येत्यर्थः। अनागतत्वादिति। ज्ञानक्षणानन्तरक्षण एव ज्ञातताजननादिति भावः। ज्ञानमेकस्मिन्नेव क्षणे ज्ञाततां जनयित्वा तां ग्रहिष्यतीत्यस्यासंभवदुक्तिकत्वेऽपि तत्र दोषान्तरमप्यस्तीत्याह विरम्यव्यापारेति। इन्द्रियसंबन्धाननुभवादिति इन्द्रियसंबन्धाप्राप्तेरित्यर्थः। ज्ञाततोत्पत्त्यनन्तरक्षण एव तया इन्द्रियसंबन्धसंभवादिति भावः। ज्ञाततायाः क्षणिकत्वं साधयति --तथा हीति। अप्रतिसङ्क्रमात्—आश्रयान्तरे संक्रान्त्यसम्भवात्। दोषान्तरमाह—एकक्षणेति। एकक्षणावगाहिज्ञानेन तद्विषयक्षणान्तरे ज्ञातताजननादिति भावः। भ्रान्तत्वप्रसङ्गादिति। भ्रान्तित्वे निदर्शनमाह—रजतावगाहिनीति। अन्यथाख्यात्यनभ्युपगन्तृमते शुक्त्यनवगाहिनि रजतस्मरण इत्यर्थः। पुरोवृत्तीति। शुक्त्यादिनिष्ठज्ञाततफलक इत्यर्थः।

वर्तमानार्थता—वर्तमानाश्रयता। प्रकाशस्य—ज्ञाततायाः। अन्यथा—वर्तमानाश्रयकत्वानुपगमे। तथानुवृत्तेः—अतीतविषयोपलक्षितानुवृत्तेः वर्तमानाभत्वभङ्ग एव दोष इत्यत्राह—न हीति। सत्यसति वार्थे प्रकाशस्य वर्तमानत्वे तज्जनकज्ञानस्य वर्तमानावभासत्वं न भज्येतेति भावः। अथैवम्भूतभाविगोचरज्ञानस्यापि वर्तमानावभासत्वप्रसङ्गात् निराश्रयज्ञातत्तानुवृत्तिः नोपगन्तव्येत्याह—अर्थनिरपेक्षप्रकाशनानुवृत्तिमात्रेणेति। आश्रयनिरपेक्षज्ञातत्तानुवृत्तिमात्रेणेत्यर्थः। तथात्वे—वर्तमानाभत्वे। तथाभावेति। वर्तमानाभत्वेत्यर्थः।

अथ माभूदयं दोष इति स्थूल एव वर्तमानः प्रकाशेनाश्रीयते इत्यभ्युपगमः, तदा तज्ज्ञानस्यापि स एव विषय इति तस्यापि न क्षणिकत्वमिति ॥

ननु ज्ञानमैन्द्रियकं चेत्, विषयसञ्चारो न स्यात्, सञ्जातसंबन्धत्वात्। न च जिज्ञासानियमात् नियमः, तस्याः संशयपूर्वकत्वात्, तस्यं च धर्मिज्ञानपूर्वकत्वात्, धर्मिणश्च सन्निधिमात्रेण ज्ञाने जिज्ञासापेक्षणे वा उभयथाप्यनवस्थानादिति तन्न, ज्ञाततापक्षेऽपि तुल्यत्वात्। तस्या अपि हि ज्ञेयत्वे तत्परम्पराज्ञानापातात्; जिज्ञासानियमस्य च तद्वदनुपपत्तेः। न चेन्द्रियसम्बन्धविच्छेदाद्विराम इति युक्तम्–आत्मप्राकट्याव्यापनात्। स्वभावत एव काचिदसावजिज्ञासिताऽपि ज्ञायते, न तु सर्वेति चेत्–तुल्यम्। प्रागुत्पन्नज्ञाततास्मरणजनितजिज्ञासः समुन्मीलितनयनः सञ्जातज्ञानसमुत्पादितप्राकट्यं जिज्ञासुरेव प्रतिपद्यते इत्यतो नानवस्थेति चेत्–तुल्यमेतत् ॥

उक्तदोषस्य कः परिहार इत्यत्राह—अथ माभूदिति। अनेकक्षणानुवर्त्त्याश्रयकल्पने स एव ज्ञानस्यापि विषय इति नोक्तयुक्त्या क्षणिकत्वाप्रत्यक्षत्वे इत्याह—तदेति। ज्ञानस्य मनोग्राह्यत्वे तत्सन्निकर्षस्य ज्ञानकाले नियमात् तस्यैव ग्रहः स्यात् न विषयस्य। अतः बहिर्विषयग्रहान्यथानुपपत्त्या ज्ञानस्यातीन्द्रियत्वमेष्टव्यमित्याह—नन्विति। ज्ञानस्य योग्यत्वे मन प्रत्यासत्तेः संयुक्तसमवायस्य सत्त्वेन सर्वदा ज्ञानस्यैव ग्रहः स्यात्; न बाह्यार्थस्येति भावः। ज्ञानस्य योग्यताप्रत्यासत्त्योः सत्त्वेऽपि जिज्ञासाविरहे सत्यस्य ग्रहः स्यादित्यत्राह— न चेति। उभयथाप्यनवस्थानादिति। धर्मिणः जिज्ञासानिरपेक्षेण प्रत्यासत्तिमात्रेण ग्रहे तद्ग्रहपरम्पराया अविश्रान्त्यापत्त्या अनवस्था। धर्मिज्ञानं प्रत्यपि जिज्ञासापेक्षायां तस्याः संशयपूर्वकत्वं तस्य च धर्मिज्ञानपूर्वकत्वं इत्येवं रीत्या स्यादनवस्थेति भावः। इन्द्रियसंबन्धविच्छेदादिति। बाह्यार्थवृत्तिज्ञाततायां कदाचिदिन्द्रियसंसर्गविच्छेदस्यापि संभवादिति भावः। आत्मप्राकट्येति। आत्मगतज्ञाततायां इन्द्रियसंसर्गविच्छेदः न वक्तुं शक्य इति भावः। जिज्ञासया काचिज्ज्ञातता ज्ञायते, काचिदजिज्ञासितापि; काचित् नैव ज्ञायते इति तत्तत्स्वभावव्यवस्थाप्यमिति चेत्—ज्ञानेऽपि तुल्यमित्याह—स्वभावत एवेति। सजातीयव्यक्त्यन्तरस्मरणात्मकसामान्यज्ञानाधीनजिज्ञासया तदानीन्तनज्ञाततोपलम्भ इति नानवस्थेति चेत्, तत् ज्ञानेऽपि तुल्यमित्याह—प्रागिति। पूर्वोत्पन्नज्ञाततायाः ज्ञातत्वेन सामान्यतो ग्रहे इदानीन्तनज्ञाततया अपि सामान्यतो भानात् तदधीनविशेषजिज्ञासाया इन्द्रियसन्निकृष्टेदानीन्तनज्ञातताप्रत्यक्षेणापि विषयसिद्धेरिति भावः ॥

ज्ञानस्यैन्द्रियकत्वस्थापनम्

ननु ज्ञानं न सविकल्पकग्राह्यम्, तस्य निर्विकल्पकपूर्वकत्वात्; निर्विकल्पकगृहीतस्य तावत्कालानवस्थानात्; तस्य तेनैव विनाशात्। नापि केवलनिर्विकल्पकवेद्यम्, तस्य सविकल्पकोन्नेयत्वेन तदभावे प्रमाणाभावात्। न च समवायाभाववन्निर्विकल्पकनिरपेक्ष-सविकल्पकगोचरत्वं ज्ञानस्येति साम्प्रतम्—तयोः विशेषणांशस्य प्राग्ग्रहणादनुमानादिवत् तदुपपत्तेः; प्रकृते तु ज्ञानत्वादेरनुपलब्धेरगृहीतविशेषणायाश्च बुद्धेः विशेष्यानुपसंक्रमात् कथमेवं स्यात्? न; उत्पन्नमात्रस्यैव बाह्यविषयज्ञानस्यालोचनात्। ततस्तत्पुरस्सरं प्रथमत एव तज्जातीयस्य ज्ञानान्तरस्य विकल्पनात्। इन्द्रियसन्निकर्षस्य तदैव विशेषणग्रहणलक्षण-सहकारिसम्पत्तेः। व्यक्त्यन्तरसमवेतमपि हि सामान्यं गृहीतं तदेवेत्युपयुज्यते। अन्यथाऽनुमानादिविकल्पानामनुत्पादप्रसङ्गः; तद्गतस्य विशेषणस्याग्रहणादन्यगतस्य चानुपयोगात् किं लिङ्गग्रहणसहकारि स्यादिति। एतेन शब्दादिप्रत्यक्ष व्याख्यातमिति॥

परमाण्वाद्यतीन्द्रियविषयकज्ञानस्याप्यैन्द्रियकत्वसाधनम्

स्यादेतत्। विषयनिरूप्यं हि ज्ञानमिष्यते। न चातीन्द्रियस्य परमाण्वादेः मनसा वेदनमस्ति। न चागृहीतस्य विशेषणत्वम्। न च नित्यपरोक्षस्यापरोक्षविशिष्टबुद्धि-

---

अथ प्रकारान्तरेण ज्ञानोपलम्भो न संभवतीत्याह—ननु ज्ञानमिति। तावत्कालम्—सविकल्पककालपर्यन्तम्। अनवस्थानादिति। द्विक्षणावस्थायित्वादिति भावः। तेनैव—निर्विकल्पेनैव। तस्य—निर्विकल्पस्य। उन्नेयत्वेनेति। अतीन्द्रियत्वेन सम्प्रतिपन्नत्वादिति भावः। समवायेति। समवायवत् अभाववच्चेत्यर्थः। तयोः—समवायाभावयोः। विशेषणांशस्य संबन्धिनः प्रतियोगिनो वा आदिमज्ञानस्य विकल्पासंभवेऽपि तदनन्तरोत्पन्नद्वितीयादिज्ञानानां तत्संभव इत्याह—उत्पन्नमात्रस्यैवेति। आलोचनात्—निर्विकल्पनात्। तदैव—प्रथमज्ञाननिर्विकल्पकाल एव। एतेन प्रथमज्ञानस्य द्वितीयादिज्ञानस्येव प्रथमत एव न कुतस्सविकल्प इति शङ्कापि पराकृता। पूर्वं विशेषणज्ञानाभावात् व्यक्त्यन्तरनिर्विकल्पकं कथं व्यक्त्यन्तरविकल्पे विशेषणज्ञानं स्यादित्यत आह—व्यक्त्यन्तरेति। तदेवेति। ज्ञानत्वधर्मस्यैकत्वादिति भावः। विशेष्यवृत्तित्वेन विशेषणज्ञानस्यैव विशिष्टबुद्धिं प्रत्युपयोगित्वे अनुमानादिविकल्पानुपपत्तिरित्याह—अन्यथेति। पक्षवृत्तित्वेन साध्यवत्त्वस्य पूर्वमगृहीतत्वा-

विषयत्वम्, व्याघातादिति—न, बाह्येन्द्रियग्राह्यस्याग्राह्यस्य वा पूर्वज्ञानोपनीतस्यैव मनसा वेदनात्। अन्यथाऽतीन्द्रियस्मरणस्याप्यनुत्पत्तिप्रसङ्गात्। इयांस्तु विशेषः—तस्मिन् सति तद्बलादेव, असति तु तज्जनितवासनाबलात्। न चैवं सति स्मरणमेतत्; अगृहीतज्ञान-गोचरत्वात्। न च विषयांशे तत्तथा स्यादिति युक्तम्—अत्र च्छेदकतया प्रागवस्थावदव-भासनात्। न च प्रत्यभिज्ञानमपि ग्रहणस्मरणाकारम्; विरोधात्। अथ ग्रहणस्मरणयोः कियती सामग्री? अधिकोऽर्थसन्निकर्षो ग्रहणस्य, संस्कारमात्रं सन्निकर्षः स्मरणस्य। अथ ग्रहणत्वेऽपि कुत एतदपरोक्षाकारम्? कारणान्तरनिरपेक्षेण संस्काराधिवसंनिकर्षवतेन्द्रियेण जनितत्वात्। अथ कस्सन्निकर्षः? ज्ञानेन संयुक्तसमवायः, तदर्थेन संयुक्तसमवेतविशेषण-त्वमिति। मनसो निरपेक्षस्य बहिर्व्यापारेऽन्धबधिराद्यभावप्रसङ्ग इति चेत्—ज्ञानावच्छेदकं प्रति नायं दोषः। न च ज्ञानापेक्षया बहिरित्यस्ति। नापि तद्विषयापेक्षया निरपेक्षत्वं, तस्यैव ज्ञानस्यापेक्षणात्।

दिति भावः। शब्दादिप्रत्यक्षमिति। प्रथमगकारादेः निर्विकल्पेन द्वितीयादिगकारादेः सविकल्पक-मिति व्याख्यातमित्यर्थः॥

ज्ञानस्य विषयनिरूप्यत्वात् विषयावच्छिन्नस्यैव प्रत्यक्षविषयताया वक्तव्यतया परमाण्वादेरती-न्द्रियत्वेन तद्विषयकत्वावच्छिन्नज्ञानस्याप्रत्यक्षत्वे तद्दृष्टान्तेन सर्वमपि ज्ञानमप्रत्यक्षमिति साध्यत इति शङ्कते—स्यादेतदिति। बाह्यार्थस्यैन्द्रियकत्वेऽपि ज्ञानलक्षणालौकिकसन्निकर्षेणैव मानसे भानुमुपेयते; तदतीन्द्रियस्याप्यविशिष्टमिति परमाण्वादिज्ञानं प्रत्यक्षविषयो भवितुमर्हत्येवेति न दृष्टान्तसिद्धिः। अतीन्द्रियगोचरज्ञानस्य प्रत्यासत्त्यनुपगमे तज्जन्यसंस्कारस्य सुतरां तत्त्वासंभवात् स्मरणमपि न स्यादि-त्याह—बाह्येन्द्रियेत्यादिना। तर्ह्यर्थस्य मानसादनुभवात् अनुव्यवसायात् स्मरणस्य को विशेषः यदेकमनुभव इत्युच्यते परं स्मृतिरितीत्यत्राह—इयांस्त्विति। तस्मिन्सति—ज्ञाने सति। वासना-बलात्—संस्कारबलात्, संस्कारमात्राज्ज्ञाने स्मृतिरित्युच्यते। अन्यथाऽनुभव इति विशेष इति भावः। स्मरणमेतदिति। मानसमित्यर्थः। बाह्यार्थस्य पूर्वमेव गृहीतत्वादिति भावः। न स्मरणमित्यत्र हेतु-माह—अगृहीतेति। विषयांशे—स्वविषयज्ञानविषयांशे। तथा स्मृतिः प्रागवस्थावदिति। निदर्शनमिदम्। सोऽयमिति प्रत्यभिज्ञायां संस्कारबलात् तत्तास्फुरणेऽपि यथा न तदंशे स्मृतित्वं तथा ज्ञानविशेषणतया अर्थभानेऽपीति भावः। विरोधादिति। स्मृतित्वादिजातेः व्याप्यवृत्तित्वादिति

ज्ञानस्य प्रत्यक्षत्वे प्रमाणप्रदर्शनम्

अथापि ज्ञानं प्रत्यक्षमित्यत्र किं प्रमाणम्? प्रत्यक्षमेव। यदसूत्रयत्—'ज्ञानविकल्पानाम् भावाभावसंवेदनादध्यात्मम्' (न्या. सू. ५-१-३१) इति।

ईश्वरज्ञानस्य प्रमात्वसाधनम्

ननु नेश्वरज्ञानं प्रमा, नित्यत्वेनाफलत्वात्। नापि प्रमाणम्, अकारकत्वात्। अत एव च न तदाश्रयः प्रमातेति—उच्यते—

मितिः सम्यक् परिच्छित्तिः तद्वत्ता च प्रमातृता।
तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते ॥ ५ ॥

समीचीनो ह्यनुभवः प्रमेति व्यवस्थितम्। तथा चानित्यत्वेन विशेषणमनर्थकम्। नित्यानुभवसिद्धौ तद्व्यवच्छेदस्यानिष्टत्वात्, असिद्धौ च व्यवच्छेद्याभावात्। न चेदमनुमानम्, आश्रयासिद्धिबाधयोरन्यतराक्रान्तत्वात्। न तत् प्रमाकरणमिति त्विष्यत एव,

---

भावः। अनुभवत्वे सत्यपि कुतः प्रत्यक्षत्वमित्याशङ्क्य समाधत्ते—अथेति। प्रत्यभिज्ञानमेतच्छब्दार्थः। ज्ञानग्रहणं वा कारणान्तरं लिङ्गज्ञानादि। ज्ञानावच्छेदकं प्रति—मानसे ज्ञानविशेषणतया भासमानमर्थं प्रति। नायं दोष इति। साक्षाद्रूपादिगोचरप्रत्यक्षाभावस्यैवान्धादिभावत्वादिति नोक्तप्रसङ्ग इति भावः। उक्तं प्रसञ्जकं च नास्तीत्याह—न चेत्यादि। तत्र भासमानं ज्ञानमान्तरमेव। विषयस्तु बाह्यस्सन्नपि ज्ञानसापेक्ष एव भासते; न निरपेक्ष इति भावः।

प्रत्यक्षमेवेति। जानामीत्यनुव्यवसाय एवेत्यर्थः। ज्ञानविकल्पानामिति। ज्ञानविशेषाणां भावाभावयोरात्मनि संवेदनमुपलम्भः, तस्मादित्यर्थः।

अथेश्वरज्ञानं प्रमाणमित्यत्र प्रमाणपदेन किं प्रमात्वं उत तत्करणत्वं विवक्षितमिति विकल्पं हृदि निधाय तत्राद्ये प्रमायाः क्रियात्वेन जन्यत्वात् नित्यमीश्वरज्ञानं न प्रमा भवितुमर्हतीति शङ्कते—नन्विति। द्वितीये त्वाह—नापीति। अकारकत्वादिति। नित्यस्य स्वस्य स्वकारकत्वासंभवादित्यर्थः। तदाश्रयः ईश्वरः। परिहरति—उच्यत इति। सम्यक्परिच्छित्तिः—यथार्थानुभवः। तद्वत्ता—तत्समवायिता। तदयोगेति। प्रमायोगव्यवच्छेदः। न चेदमिति। इदम्—नेश्वरज्ञानं प्रमा नित्यत्वेनाफलत्वादित्येतत्, ईश्वरज्ञानस्य सिद्धौ यथार्थानुभवत्वस्य सत्त्वात् बाधः। असिद्धौ आश्रयासिद्धिरित्यर्थः। ईश्वरज्ञानस्य-

प्रमया संबन्धाभावात्। तदाश्रयस्य तु प्रमातृत्वमेतदेव यत् तत्समवायः। कारकत्वे सतीति तु विशेषणं पूर्ववन्निरर्थकमनुसन्धेयम्। यद्येवं 'आप्तप्रामाण्यात्' (न्या. सू. २-२-३७) इति सूत्रविरोधः। तेन हीश्वरस्य प्रामाण्यं प्रतिपाद्यते, न तु प्रमातृत्वमिति चेत्—न, निमित्तसमावेशेन व्यवहारसमावेशाविरोधात्। प्रमासमवायो हि प्रमातृव्यवहारनिमित्तम्; प्रमया त्वयोगव्यवच्छेदेन सम्बन्धः प्रमाणव्यवहारनिमित्तम्। तदुभयश्चेश्वरे। अत्रापि कार्ययेति विशेषणं पूर्ववदनर्थकमूहनीयम्॥

स्यादेतत्—प्रमीयतेऽनेनेति प्रमाणम्, प्रमिणोतीति प्रमाता इति कारकशब्दत्वमनयोः। तथा च कथमकारकमर्थ इति चेत्—न, एतस्य व्युत्पत्तिमात्रनिमित्तत्वात्। प्रवृत्तिनिमित्तं तु यथोपदर्शितमेव; व्यवस्थापनात्। अन्यथा अस्मदादिषु न प्रमातृव्यवहारः स्यात्; सर्वत्र स्वातन्त्र्याभावात्। करणव्यवहारस्त्वन्यत्र यद्यप्यन्यनिमित्तकोऽपि तथापीहोक्तनिमित्त-विवक्षयैवेति। एवं तर्हि पञ्चमप्रमाणाभ्युपगमेऽपसिद्धान्तः। न हि तत् प्रत्यक्षमनुमान-

---

जन्यत्वाभावेऽपि धात्वर्थत्वेन क्रियात्वमुपपद्यत इति भावः। नापि प्रमाणमित्यत्र इष्टापत्तिरित्याह—न तदिति। तत्—ईश्वरज्ञानम्। संबन्धाभावादिति। संबन्धस्य भेदव्याप्यत्वादिति भावः। तदाश्रयस्य—ईश्वरस्य। पूर्ववदिति। सिद्ध्यसिद्धिभ्यां प्रयोजनाभावादिति भावः। सूत्रविरोध-इति। प्रमातृत्वे प्रमाणं न भवतीत्यभिमानः। निमित्तसमावेशेनेति। प्रमाणप्रमातृव्यवहारयोरिति भावः। कारकत्वे सतीति विशेषणमिति। प्रमाया इत्यादिः। पूर्ववदिति। नित्यप्रमासिद्ध्य-सिद्ध्योरनर्थकमिति भावः॥

ननु प्रमाणप्रमातृपदयोः करणे ल्युटा कर्तरि तृचा च निष्पत्त्या कारकपरत्वावगमात् कथमकारके व्यवहार इति शङ्कते—स्यादेतदिति। यथोपदर्शितमेवेति। प्रमासमवायो हीत्यादिना प्रागुपदर्शि-तमेवेत्यर्थः। अन्यथा—प्रमाकर्तृत्वस्यैव प्रमातृपदप्रवृत्तिनिमित्तत्वे। स्वातन्त्र्याभावादिति। अस्म-दीयप्रयत्नमन्तरापि सामग्रीसमवधाने प्रत्यक्षादिजननादिति भावः। अन्यत्र—लोके। अन्यनिमित्त-कोऽपि—कारकत्वनिमित्तकोऽपि। एवं तर्हीति। ईश्वरस्य प्रमाणत्वे सतीत्यर्थः। पञ्चमेति। प्रत्यक्षादिष्वनन्तर्भावादिति भावः। तदेवोपपादयति—न हीति। तत्—ईश्वररूपं प्रमाणम्। उक्तेष्वन-न्तर्भावे हेतुमाह—अनिन्द्रियेति। इन्द्रियादिरूपकरणभिन्नत्वादित्यर्थः। साक्षात्कारिप्रमावत्तया-

मागमो वा, अनिन्द्रियलिङ्गशब्दकरणत्वात्, न, साक्षात्कारिप्रमावत्तया प्रत्यक्षान्तर्भावात्; इन्द्रियार्थसन्निकर्षोत्पन्नत्वस्य च लौकिकमात्रविषयत्वात् ॥

स्यादेतत्–तथापीश्वरज्ञानं न प्रमा, विपर्ययत्वात्। यदा खल्वेतदस्मदादिभ्रमानालम्बते, तदैतस्य विषयमस्पृशतो न ज्ञानावगाहनसम्भव इति तदर्थोऽप्यालम्बनमभ्युपेयम्। तथा च तदपि विपर्ययः, विपरीतार्थालम्बनत्वात्। तदनवगाहने वा अस्मदादेर्विभ्रमानविदुषस्तदुपशमायोपदेशानामसर्वज्ञपूर्वकत्वमिति–न, विभ्रमस्याप्रामाण्येऽपि तद्विषयस्य तत्त्वमुल्लिखतोऽभ्रान्तत्वात्। अन्यथा भ्रान्तिसमुच्छेदप्रसङ्गः प्रमाणाभावात्। तथाप्यारोपितार्थावच्छिन्नज्ञानालम्बनत्वेन कथं न भ्रान्तत्वमिति चेत्–न, यत् यत्र नास्ति तत्र तस्या-

---

साक्षात्कारिप्रमायोगव्यवच्छेदवत्तया। तस्या एव प्रत्यक्षप्रमाणपदप्रवृत्तिनिमित्तत्वादिति भावः। ईश्वरज्ञानं प्रत्यक्षलक्षणाभावात् न प्रत्यक्षं भवितुमर्हतीत्यत्राह—इन्द्रियार्थेति। साक्षात्कारित्वमेव प्रत्यक्षसामान्यलक्षणमिति भावः ॥

अथ ईश्वरस्य सर्वज्ञत्वोपगमेन तज्ज्ञाने अस्मदीयभ्रमस्यापि स्वविषयेण सह भानावश्यम्भावेन भ्रमविषयगोचरत्वे भ्रमत्वस्यावर्जनीयत्वात् सर्वांशे प्रमात्वं न संभवतीति शङ्कते—स्यादेतदिति। भ्रमगोचरं ज्ञानं तदभाववति तत्प्रकारकत्वेन तमवगाहते, न तु स्वयमपि तदभाववति तत्प्रकारमिति न भ्रम इत्याशयेन परिहरति—नेति। तद्विषयस्य—भ्रमविषयज्ञानस्य। तत्त्वं—तदभाववति तत्प्रकारकत्वं भ्रमत्वम्। अन्यथा—भ्रमविषयकस्य भ्रमत्वनियमे। प्रमाणाभावादिति। सविषयभ्रमाविषयकं न तत्र प्रमाणं सविषयकभ्रमविषयकमपि भ्रमश्चेत् न प्रमाणं स्यादिति भावः। आशयमजानानश्चोदयति तथापीति। आशयमुद्घाटयति—यत् यत्रेति। तदभाववति तत्प्रकारकत्वरूपं भ्रमत्वं तदभाववति तत्प्रकारकत्वेन किंचिज्ज्ञानावगाहिनः ज्ञानस्य तदभाववति तत्प्रकारकत्वाभावात् नास्तीति भावः। ये पुनरत्र विषयतादिविशेषणतया प्रकारीभूताः तत्र क्वचिदपि भ्रमत्वं न वक्तुं शक्यमित्याह—न हीति। शुक्तावयं रजतत्वं जानातीति ईश्वरज्ञाने ज्ञानावच्छेदकतया भ्रमविषयरजतत्वमेव भासते; न त्वन्यदिति भावः। अत एव भासमानसंबन्धेन तदभाववत्त्वं तद्भ्रमे न वक्तुं शक्यमित्याशयेनाह—नापीति। एवं ज्ञानावच्छेदकांशे भ्रमत्वं निरस्य ज्ञानवत्त्वांशेऽपि तन्निरस्यति—नापि तन्नावगतमिति ॥

वगतिरिति भ्रान्त्यर्थत्वात् । एतदालम्बनस्य चैत्रमुल्लिखतः सर्वत्र यथार्थत्वात् । न हि न तद्रजतम्, नाऽपि तत्रासत्, नाऽपि तन्नावगतमिति ॥

साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ
भूतार्थानुभवे निविष्टनिखिलप्रस्ताविवस्तुक्रमः ।
लेशादृष्टिनिमित्तदुष्टविगमप्रभ्रष्टशङ्कातुषः
शङ्कोन्मेषकलङ्किभिः किमपरैः तन्मे प्रमाणं शिवः ॥

इति न्यायकुसुमाञ्जलौ चतुर्थस्तबकः ॥

साक्षात्कारिणीति । प्रत्यक्षरूप इत्यर्थः । नित्ययोगिनि नित्ये । परेति । इन्द्रियादिद्वारनिरपेक्षसत्ताक इत्यर्थः । भूतार्थानुभवे—यथार्थानुभवे । निविष्टेति । विषयीकृताखिलनानाविधप्रपञ्चक्रम इत्यर्थः । लेशेति । क्वचिदप्यदर्शनाभावेन तन्निबन्धनदोषासंभवात् । अप्रामाण्यशङ्कानास्कन्दित इति भावः । केचित् शङ्किष्यन्त इति चेत् का नो हानिरित्याह—शङ्कोन्मेषेति । प्रमाणम्—प्रमायोगव्यवच्छेदवान् प्रमाता वा सत्यवादी वेति भावः ॥

इति न्यायवासनाभिध - न्यायकुसुमाञ्जलिटीकायां
चतुर्थस्तबकः ॥ ४ ॥

न्यायकुसुमाञ्जलौ पञ्चमस्तबकः ॥

नन्वीश्वरे प्रमाणोपपत्तौ सत्यां सर्वमेतदेवं स्यात्। तदेव तु न पश्याम इति चेत्—न ह्येष स्थाणोरपराधः यदेनमन्धो न पश्यति। तथाहि—

कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।
वाक्यात् संख्याविशेषात् च साध्यो विश्वजिदव्ययः ॥ १ ॥

कार्यत्वहेतुकानुमानविचारः

क्षित्यादि कर्तृपूर्वकं कार्यत्वादिति—

न बाधोऽस्योपजीव्यत्वात् प्रतिबन्धो न दुर्बलैः।
सिद्ध्यसिद्ध्योर्विरोधो नो नासिद्धिरनिबन्धना ॥ २ ॥

न्यायवासनाभिधन्यायकुसुमाञ्जलिटीकायां पञ्चमस्तबकः

तत्साधकप्रमाणाभावादिति पञ्चमीं विप्रतिपत्तिं निराकर्तुं तामाशङ्कते—नन्विति। सर्वमेतदिति। प्रागुक्तान्यन्थासिद्ध्यादिनिरसनमित्यर्थः। न हि बाधकाभावमात्रेणासति माने किञ्चित् सिध्यतीति भावः। निराकरोति—न हीति। कार्येति। कार्यत्वादिलिङ्गात्सर्वज्ञः नित्य ईश्वरः साध्यत इति भावः। आयोजनम्—द्व्यणुकारम्भकसंयोगजनकं सर्गाद्यकालीनं परमाणुकर्म। धृतिः—ब्रह्माण्डादिधरणम्। आदिना संहरणादिग्रहः। पदम्—वृद्धव्यवहारः। प्रत्ययः—विश्वासौपयिकं प्रामाण्यम्। संख्याविशेषः द्व्यणुकत्र्यणुकपरिमाणजनकावयवसंख्या विशेषः ॥

क्षित्यादीति। स्वरूपसंबन्धरूपकार्यत्वेन क्षित्याद्यन्यतमत्वेन वा पक्षत्वं अतो नाननुगमः साध्ये अदृष्टाद्वारकत्वं निवेशनीयम्। तेनासदादिना नार्थान्तरम्। प्रागभावप्रतियोगित्वं प्रतियोगितासंबन्धेन प्रागभाववत्त्वं वा कार्यत्वं हेतुः। तेन न पक्षतावच्छेदकहेत्वोरैक्यम्। ईश्वरस्य कर्तृत्वे सशरीरत्वं प्रसञ्जयतामाशयं विकल्प्य दूषयति—न बाध इति। ज्ञातेन व्यापकशरीराद्यनुपलम्भेनेनि भावः। अतीन्द्रिये वस्तुनि स्वरूपसत्याः योग्यानुपलब्धेरभावेनाबाधकत्वस्य प्रागेवोक्तत्वात्। अस्य—कार्यत्वानुमानस्य। उपजीव्यत्वादिति। ईश्वररूपधर्मिसिद्ध्यर्थं सशरीरत्वापादककर्तृत्वादिभिरुपजीव्यत्वा-

ईश्वरस्याशरीरत्वनिरूपणम्

तथा हि—अत्र ये शरीरप्रसङ्गमुद्घाटयन्ति, कस्तेषामाशयः ? किमीश्वरं पक्षयित्वा कर्तृत्वाच्छरीरित्वम्, ततः शरीरव्यावृत्तेरकर्तृत्वम्; अथ क्षित्यादिकमेव पक्षयित्वा कार्यत्वाच्छरीरिकर्तृकत्वम्; यद्वा शरीराजन्यत्वादकार्यत्वम्; तत एव वाऽकर्तृकत्वम्; परव्याप्तिस्तम्भनार्थं विपरीतव्याप्त्युपदर्शनमात्रं वेति ? तत्र प्रथमद्वितीययोराश्रयासिद्धिबाधापसिद्धान्तप्रतिज्ञाविरोधाः। तृतीये तु व्याप्तौ सत्यां नेदमनिष्टम्; असत्यान्तु न प्रसङ्गः। चतुर्थे बाधानेकान्तौ। पञ्चमे त्वसमर्थविशेषणत्वम्। षष्ठेऽपि नागृह्यमाणविशेषया व्याप्त्या बाधः।

दित्यर्थः। उपजीव्यधर्मिग्राहकमानविरोधात् न बाधः अन्यथा आश्रयासिद्धिरिति भावः। प्रतिबन्धो नेति। प्रतिरोधो नेत्यर्थः कुत इत्यत्राह—दुर्बलैरिति। समानबलेन हि प्रतिरोधः स्यादिति भावः। दौर्बल्यं च व्याप्तिपक्षधर्मताग्रहविरहात् प्रकृतहेतोः कार्यत्वस्य तु व्याप्तिपक्षधर्मताग्रहात् अधिकबलत्वम्, अतो न प्रतिरोध इत्याह—सिद्ध्यसिद्ध्योरिति। प्रकृतहेतौ पक्षधर्मतासिद्धौ प्रतिहेतौ तदसिद्धौ चेत्यर्थः। अथवा ईश्वररूपधर्मिसिद्ध्यसिद्ध्योरित्यर्थः। आद्ये धर्मिग्राहकमानबाधात्। द्वितीये च धर्म्यसिद्धेः प्रतिहेतोः पक्षताविशिष्टधर्मिवृत्तित्वासिद्ध्या दुर्बलत्वेन न प्रतिरोधसंभव इति भावः। यद्वा नापि विशेषविरोध इत्याह—सिद्ध्यसिध्योरिति। व्याप्त्यादिबलात् ईश्वरे सशरीरत्वसिद्धौ अशरीरत्वेन सामानाधिकरण्यसिद्ध्या न विरोधः। असिद्धौ च विरोधिधर्मासिद्ध्या नाशरीरकर्तृरूपेश्वरत्वविरोध इति भावः। अथापि व्याप्यत्वासिद्धिः स्यादित्यत्राह—नासिद्धिरिति। अनिबन्धनेति। निबन्धनमप्रयोजकत्वशङ्कादि। विपक्षे बाधकतर्कादिना तदभावादिति भावः॥

परव्याप्तिः—कार्यत्वसकर्तृकत्वव्याप्तिः। आश्रयासिद्धिबाधेति। ईश्वररूपधर्मिसिद्धौ धर्मिग्राहकमानबाधः। अन्यथा आश्रयासिद्धिः। ईश्वरानङ्गीकर्तुः परस्य मते ईश्वरस्य कर्तृत्वोपगमे अपसिद्धान्त इत्यर्थः। ईश्वरपदस्याशरीरकर्तृवाचकत्वेन ईश्वरः शरीरी अकर्ता वेति प्रतिज्ञायां व्याघातात् प्रतिज्ञाविरोध इत्यर्थः। नेदमनिष्टमिति। अशरीरकर्तुरनिरासादिति भावः। अङ्कुरादौ व्यभिचारेण न व्याप्तिरित्याशयेनाह—असत्यां त्विति। बाधानैकान्तिकाविति। क्षित्यादेः सर्वस्य पक्षत्वे बाधः। कस्यचिदपक्षत्वे तत्रानेकान्त इत्यर्थः। असमर्थविशेषणत्वम्—व्यर्थविशेषणत्वम्, शरीरपदस्य प्रयोजनाभावादिति भावः। परव्याप्तिस्तम्भनं नाम किं बाधः प्रतिरोधो वेति विकल्प्यो-

न चागृह्यमाणविशेषया व्याप्त्या गृह्यमाणविशेषायाः सत्प्रतिपक्षत्वम्। अस्ति च कार्यत्वव्याप्तेः पक्षधर्मतापरिग्रहो विशेषः। कर्ता शरीरी, विपरीतो न कर्तेति चानयोस्तद्विरहः॥

ननु यत् बुद्धिमद्धेतुकं तच्छरीरहेतुकमिति नियमे यच्छरीरहेतुकं न भवति तत् बुद्धिमद्धेतुकमपि न भवतीति विपर्ययनियमोऽपि स्यात्। तथा च पक्षधर्मतापि लभ्यत इति चेत् न, गगनादेस्सपक्षभागस्यापि संभवात्केवलव्यतिरेकित्वानुपपत्तेः। अन्वये तु विशेषणा-

---

भयमपि न संभवतीत्याह—षष्ठोऽपीति। विशेष इति। अधिकं बलमिति भावः। सशरीरकर्तृकत्वाशरीर्यकर्तृकत्वसाधनयोरयं विशेषो नेत्याह—कर्तेति॥ अत्र अङ्कुरादि सकर्तृकत्वात् शरीरिकर्तृकं शरीराजन्यत्वादकर्तृकं वा इति प्रत्यनुमानयोः प्रथमे न पक्षधर्मः सकर्तृकत्वासिद्धेः द्वितीये न व्याप्ति व्यर्थविशेषणत्वादिति भावः।

अशरीर्यकर्तृकत्वसाधने व्यतिरेकव्याप्तावुक्तविशेषसंभवमाशङ्कते—नन्विति। नियम इति। सिद्ध इति शेषः। अयमेव विपर्ययनियम इति वक्ष्यते। न भवतीति। अस्य पूर्वोक्तनियमः व्यतिरेकव्याप्तिरित्यर्थः। तेन अग्रे अन्वयव्याप्त्यभावकथनेऽपि न विरोधः। विपर्ययनियम इति। व्यापकाभावस्य व्याप्याभावव्याप्यत्वादिति भावः। पक्षधर्मतापि लभ्यत इति। यद्बुद्धिमद्धेतुकं तच्छरीरजन्यमिति व्यतिरेकव्याप्तिमतः शरीराजन्यत्वहेतोरिति भावः। क्षित्यादि न बुद्धिमद्धेतुकं शरीराजन्यत्वादित्यस्य केवलव्यतिरेकित्वाभावात् नैवं युज्यत इत्याह—नेति। अन्वयव्यतिरेकित्वोपगमेऽप्याह—अन्वये त्विति। विशेषणासामर्थ्यादिति। जन्यत्वाभावात् शरीराजन्यत्वाभावस्यातिरिक्तत्वेन वैयर्थ्याभावेऽपि अजन्यत्वमुपाधिरित्यत्र तात्पर्यम्। अजन्यत्वस्य व्याप्यत्वेऽपि न पक्षधर्मत्वम् शरीराजन्यत्वस्य पक्षधर्मत्वेऽपि न व्याप्यत्वमिति न समानबलप्रतिहेतुप्रसक्तिरिति भावेनाह—व्याप्तश्चेति। क्षित्यादि अकर्तृकम्, सकर्तृकत्वव्यापकरहितत्वादित्युक्तौ नोक्तदोष इत्यत आह—एतेनेति। अन्वयव्यतिरेकानुपसंहारे व्याप्यत्वाभाववचनेनेत्यर्थः। तव्द्यापकरहितत्वादिति। सकर्तृकत्वव्यापकरहितत्वादित्यर्थः। साध्यमत्र सकर्तृकत्वाभावः। व्यापकाभावात् व्याप्याभावसिद्धिर्निष्प्रत्यूहेत्यभिमानः। पूर्वं व्यापकविशेषाभावहेतुर्दूषितः। इदानीं व्यापकसामान्याभावरूपो हेतुरित्यनयोः भेदात् न पौनरुक्त्यम्। अत्र दोषमाह—असिद्धत्वमिति। साध्यव्यापकसामान्याभावस्य वाच्यत्वादिमति पक्षेऽभावादसिद्धिः इति भावः। यत्किञ्चिद्व्यापकाभावस्य हेतुत्वे नायं दोष इत्यत्राह—न हीति।

सामर्थ्यात्। हेतुव्यावृत्तिमात्रमेव हि तत्र कर्तृव्यावृत्तिव्याप्तम्, न तु शरीररूपहेतुव्यावृत्तिरित्युक्तम्। व्याप्तश्च पक्षधर्म उपयुज्यते, न त्वन्योऽतिप्रसङ्गात्। एतेन तद्व्यापकरहितत्वादिति सामान्योपसंहारस्यासिद्धत्वमुक्तं वेदितव्यम्। न हि यद्व्यावृत्तिः यदभावेऽन्वयव्यतिरेकाभ्यामुपसंहर्तुमशक्या, तत्तस्य व्यापकं नामेति॥

विशेषविरोधस्तु विशेषसिद्धौ सहोपलम्भेन तदसिद्धौ मिथोधर्मिपरिहारानुपलम्भेन निरस्तो नाशङ्कामप्यधिरोहतीति॥

स्यादेतत्—अस्ति तावत् कार्यस्यावान्तरविशेषः यतः शरीरिकर्तृकत्वमनुमीयते। तथा च तत्प्रयुक्तामेव व्याप्तिमुपजीवेत्कार्यत्वसामान्यमिति स्यात्। न स्यात्—न हि

व्यापकाभावाद्व्याप्याभावसाधने विशेषरूपेण निर्देशमन्तरा सामान्यरूपेण अन्वयव्यतिरेकयोः यथा श्रोतृबुद्ध्यावारोहो भवति तथा दर्शयितुमशक्यतया साध्यव्यापकत्वस्यैव असिद्ध्या तद्वदभावासिद्धिरिति भावः। अथवा असिद्धत्वमिति हेतुरस्तु साध्यं मास्त्वित्येवमुक्तहेतोरप्रयोजकत्वशङ्कायामनुकूलतर्काभावात् व्याप्यत्वासिद्धत्वमिति भावः। तर्काभावमेवोपपादयति—न हीति। यद्व्यावृत्तिः साध्याभावः यदभावे हेत्वभावे उपसंहर्तुमशक्येति। अयमाशयः। अत्रोक्तसाध्याभावे निरुक्तहेतुरपि न स्यादित्येव तर्को वक्तव्यः। तत्रापाद्यापादकयोः हेत्वभावसाध्याभावयोः व्याप्तिग्रहेण भवितव्यम्। स चान्वयव्यतिरेकोपसंहारेण स्यात्। स चात्र न शक्यः। न ह्यत्र विशेषातिरिक्तं सकर्तृकत्वव्यापकं सामान्यं नाम किंचिदस्ति। यत्रान्वयव्यतिरेकावुपसंह्रियेयाताम्। तदभावादन्वयव्यतिरेकानुपसंहारे साध्याभावहेत्वभावयोः व्याप्त्यसिद्ध्या हेत्वभावो न साध्याभावव्यापक इति विज्ञातुं शक्यते। अतस्तत्प्रसङ्गो न तर्को भवितुमर्हति। 'व्याप्यारोपेण व्यापकारोपस्तर्कः' इति हि तल्लक्षणमाहुः। तर्कासंभवे च हेतुसत्त्वे साध्येनापि भाव्यम्, हेतुव्यापकं हि साध्यमिति प्रतिवक्तुमशक्यतया हेतुरस्तु साध्यं माभूदिति शङ्कायाः न निरासः स्यादिति।

अथोक्तरीत्या सत्प्रतिपक्षासम्भवेऽपि विशेषविरोधः स्यादित्याशङ्कां परिहरति—विशेषविरोधस्त्विति। विशेषसिद्धौ—कार्यत्वेन कर्तुः सशरीरत्वसिद्धौ। सहोपलम्भेनेति। कर्तुरशरीरत्वेन सशरीरत्वस्य सामानाधिकरण्यसिद्ध्या न विरोधशङ्कावकाश इति भावः। तदसिद्धौ—शरीरत्वासिद्धौ, तदुभयासिद्धौ वा। मिथ इति। परस्परधर्मिप्रतिक्षेपकत्वानुपलम्भेनेत्यर्थः। अशरीरत्वप्रतिक्षेपा-

विशेषोऽस्तीति सामान्यमप्रयोजकम् । तथा सति सौरभकदुत्वनीलिमादिविशेषे सति न धूमसामान्यमग्निङ्गमयेत् । किन्नाम साधकसामान्ये साध्यसामान्यमाश्रित्य प्रवर्तमाने तद्विशेषः साध्यविशेषव्याप्तिमाश्रयेत्; न तु विशेषे सति सामान्यमकिञ्चित्करम्, तस्यापि विशेषान्तरापेक्षयाऽकिञ्चित्करत्वप्रसङ्गात् ॥

सौरभादिविशेषं विहायापि धूमे वह्निः दृष्टः, न तु विशेषं विहाय कार्यं कर्तेति चेत्—न, कार्यविशेषः कारणविशेषे व्यवतिष्ठते; न तु कार्यकारणसामान्ययोः प्रतिबन्धमन्यथा-कुर्यादिति । किं न दृष्टं कार्यं कारणमात्रे अङ्कुरो बीजे तद्विशेषो धान्ये तद्विशेषश्शालौ तद्विशेषः कलमे इत्यादि बहुलं लोके ? क्व वा दृष्टमणुद्रव्यारभ्यं द्रव्यम्, नित्यरूपाद्यारब्धं रूपादि ? तथापि सामान्यव्याप्तेरविरोधात् सिद्ध्यत्येव । अवश्यं चैतदेवमङ्गीकर्तव्यम्; अन्यथा कार्यत्वस्याकस्मिकत्वप्रसङ्गात् ।

सिद्धेरिति यावत् । सशरीरत्वेन कर्तुरशरीरकाद्भेदप्रत्याथनाभावात् नाशरीरकर्तृरूपेश्वरसिद्धिविरोध इति भावः । एवं घटादावज्ञकर्तृत्वव्याप्तत्वेनाधिगतेन कार्यत्वेन सर्वज्ञकर्तृविशेषसाधने विरोधशङ्काप्यत्र निरस्तेति भाव्यम् तदा विशेषासिद्धाविस्यस्य अज्ञकर्तृकत्वासिद्धावित्यर्थः । सहोपलम्भः सर्वज्ञकर्तृकत्वकार्यत्वयोरज्ञकर्तृकत्वसर्वज्ञकर्तृकत्वयोः वेति ध्येयम् ।

शरीरिकर्तृककार्यमात्रवृत्तिकार्यत्वविशेषः उपाधिरिति शङ्कते—स्यादेतदिति । परिहरति—न स्यादिति । सौरभेत्यादि । अगरुप्रभृतिधूमविशेषो विवक्षितः । किं नामेति । किन्त्वित्यर्थः । न तु विशेषे सति सामान्यमकिञ्चित्करमिति यद्विशेषयोरिति न्यायादिति भावः ॥

धूमविशेषस्य वह्निसामान्यं प्रति अव्यापकत्वान्नोपाधित्वमित्याह—सौरभादीति । तर्हि शरीरिकर्तृरूपकारणविशेषनिबन्धनकार्यत्वविशेषोऽपि शरीरिकर्तृकत्वव्यापकोऽपि सकर्तृकत्वसामान्याव्यापकत्वात् अनुपाधिरिति तुल्यमिति प्रत्याह—कार्यविशेष इति । वस्तुतस्तु घटत्वादिव्यतिरिक्तशरीरिजन्यतावच्छेदककार्यत्वव्याप्यवैजात्ये मानाभावात् घटत्वादीनां प्रत्येकं साध्याव्यापकत्वाच्च नोपाधित्वप्रसक्तिरिति भावः । नन्वशरीरिकर्तुरदर्शनात् न तत्पूर्वकत्वं कस्यचिदपि कार्यस्योपगन्तुं युक्तमित्यत्राह—क्व वा दृष्टमिति । अण्वादेरदृष्टत्वात् तज्जन्यत्वमपि द्व्यणुकादेः न स्यादिति भावः । अन्यथेति । सकर्तृकत्वसामान्यव्याप्त्यनुपगमे इत्यर्थः । कार्यत्वस्येति । क्षित्यादिनिष्ठस्येति भावः ॥

स्यादेतत्–अन्वयव्यतिरेकि तावदिदं कार्यत्वमिति परमार्थः। तत्राकाशादेर्विपक्षात् किं कर्तृव्यावृत्तेः कार्यत्वव्यावृत्तिः आहोस्वित्कारणमात्रव्यावृत्तेरिति सन्दिह्यते- तदसत्, कर्तुरपि कारणत्वात्। कारणेषु चान्यतमव्यतिरेकस्यापि कार्यानुत्पत्तिं प्रति प्रयोजकत्वात्; अन्यथा कारणत्वव्याघातात्, करणादिविशेषव्यतिरेकसन्देहप्रसङ्गाच्च; कथं हि निश्चीयते किमाकाशात् कारणव्यावृत्त्या कार्यत्वव्यावृत्तिः उत करणव्यावृत्त्या, एवं किमुपादानव्यावृत्त्या किमसमवायिव्यावृत्त्या, किं निमित्तव्यावृत्त्येति ? कार्यत्वात् करणमुपादानमसमवायि निमित्तं वा बुद्ध्यादिषु न सिध्येत्। कर्तुः कारणत्वे सिद्धे सर्वमेतदुचितम्; तदेव त्वसिद्धमिति चेत्–किं पटादौ कुविन्दादिरकारणमेव कर्ता ? प्रस्तुते वोदासीन एव साधयितुमुपक्रान्तः ? तस्मात् यत्किञ्चिदेतदपीति।

कार्यत्वहेतुकानुमाने सत्प्रतिपक्षोद्धारः

ननु कर्ता कारणानामधिष्ठाता साक्षाद्वा शरीरवत्, साध्यपरम्परया वा दण्डादिवत् ? तत्र न पूर्वः, परमाण्वादीनां शरीरत्वप्रसङ्गात्। न द्वितीयः, द्वाराभावात्। न हि कस्यचित्

सन्दिग्धव्यतिरेकित्वात् सन्दिग्धासिद्धिरित्याशंकते—स्यादेतदिति। कारणाभावरूपोपाधिना सकर्तृकत्वाभावस्याप्रयोजकत्वशङ्कया व्यतिरेकव्याप्तिसन्देह इत्याह—तत्रेति। तथा च व्यतिरेकव्याप्तिनिश्चयाभावादुक्तहेतोः व्याप्यत्वासिद्धिर्दुर्वारैवेति भावः। कर्त्रभावस्य कारणाभावरूपत्वेन प्रयोजकत्वात् नाप्रयोजकत्वशङ्कासंभव इत्याशयेन समाधत्ते—तदसदिति। कारणसामान्याभावस्यैव प्रयोजकत्वम्, न तु विशेषाभावस्येति शङ्कां निरस्यति—कारणेष्विति। कारणविशेषाभावस्याप्रयोजकत्वे दोषमाह—कारणत्वव्याघातादिति। स्वव्याप्येतरयावत्कारणसत्त्वे कार्याभावप्रयोजकाभावप्रतियोगित्वेनैव ज्ञातेन कारणत्वावगमादिति भावः। एवं करणाद्यभावस्यापि कार्याभावं प्रत्यप्रयोजकत्वशङ्का स्यादित्याह – करणादीति। एवमुपादानादीनामपि सन्दिग्धव्यतिरेकित्वापत्त्या तत्सिद्धिरपि न स्यादित्याह—एवमिति। इष्टापत्तावनिष्टमाह—कार्यत्वादिति। कारणविशेषाभावस्य प्रयोजकत्वोपगमेऽपि नोक्तशङ्कानिरासः कर्तुः करणत्वासिद्धेरित्याशङ्कते—कर्तुरिति। उदासीन एवेति। कारणव्यतिरिक्त एवेत्यर्थः। कर्तृजन्यत्वस्यैव साधनादिति भावः। प्रकारान्तरेण सत्प्रतिपक्षं वक्तुमुपक्रमते—नन्विति। शरीरवदिति। शरीरस्येवेत्यर्थः। साध्यपरम्परयेति। शरीरचेष्टाद्वारेणेति भावः। दण्डादिवदिति।

साक्षादधिष्ठेयस्याभावे परम्परयाऽधिष्ठानं संभवति। तदयं प्रमाणार्थः—परमाण्वादयः न साक्षाच्चेतनाधिष्ठेयाः शरीरेतरत्वात्, यत्पुनः साक्षादधिष्ठेयम्, न तदेवम्, यथास्मच्छरीरमिति; नापि परम्परयाऽधिष्ठेयाः, स्वव्यापारे शरीरानपेक्षत्वात् स्वचेष्टयामस्मच्छरीरवत्, व्यतिरेकेण वा दण्डादि उदाहरणम्। एवं क्षित्यादि न चेतनाधिष्ठितहेतुकं शरीरेतरहेतुकत्वादित्यतिपीडया सत्प्रतिपक्षत्वम्। अपि च पटादौ कुविन्दादेः किं कारकाधिष्ठानार्थमपेक्षा, तेषामचेतनानां स्वतोऽप्रवृत्तेः? आहो कारकत्वेन? न पूर्वः, तेषां परमेश्वरेणैवाधिष्ठानात्। न ह्यस्य ज्ञानमिच्छा प्रयत्नो वा वेमादीन्न व्याप्नोतीति संभवति। न चाधिष्ठितानामधिष्ठात्रन्तरापेक्षा तदर्थमेव, तथासत्यनवस्थानादेवाविशेषात्। न द्वितीयः अधिष्ठातृत्वस्यानङ्गत्वप्रसङ्गे दृष्टान्तस्य साध्यविकलत्वापत्तेः। न च हेतुत्वेनैव तस्यापेक्षाऽस्त्विति वाच्यम्, एवं तर्हि यत् कार्यं तत्सहेतुकमिति व्याप्तिः, न तु सकर्तृकमिति। तथा च तथैव

दण्डादिरिवेत्यर्थः। शरीरत्वप्रसङ्गादिति। शरीरस्यैव साक्षादधिष्ठेयत्वादिति भावः। क्रियान्तराद्वारकतत्समवेतक्रियोत्पादकप्रयत्नवत्त्वं साक्षादधिष्ठातृत्वम् क्रियान्तरद्वारकतत्समवेतक्रियोत्पादकप्रयत्नवत्त्वं परम्परया तदधिष्ठातृत्वमित्यवधेयम्। प्रतिप्रयोगानाह—तदयमिति। अनेन क्षित्यादिहेतूनामनधिष्ठितत्वसाधनात् चेतनाधिष्ठितहेतुकत्वरूपसकर्तृकत्वसाधकानुमानस्य प्रतिरोधो भवेदिति भावः। शरीरानपेक्षत्वादिति। शरीरव्यापारानपेक्षत्वादित्यर्थः। व्यतिरेकेण वेति। यत् परम्परयाऽधिष्ठेयं तत् स्वव्यापारे शरीरव्यापारसापेक्षम्। यथा दण्डादीत्युदाहरणीयमिति भावः। कार्यत्वानुमानस्य साक्षात्प्रत्यनुमानमाह—एवं क्षित्यादीति। शरीरेतरेति। शरीराहेतुकत्वादित्यर्थः। यत् चेतनाधिष्ठितहेतुकं तत् शरीरहेतुकम्, यथा घटादीत्यत्र व्यतिरेक्युदाहरणम्। अतिपीडयेति। क्षित्यादिहेतूनामधिष्ठेयत्वासंभवोपपादनादिप्रयासेनेति भावः। एवं प्रतिरोधमुक्त्वा सिद्धसाधनं वक्तुमारभते—अपि चेति। अस्य—परमेश्वरस्य। तदर्थमेव—अधिष्ठेयत्वार्थमेव। यद्वा प्रवृत्त्यर्थमेव। अनवस्थानादेवाविशेषादिति। एकाधिष्ठानार्थमपराधिष्ठानापेक्षायां तस्याप्यधिष्ठानान्तरापेक्षेति रीत्या अनवस्थानादिति भावः। घटादिदृष्टान्तेन क्षित्यादावपि कर्त्रन्तरसिद्धौ तस्यापि पक्षधर्मताबलात् सर्वज्ञत्वापत्त्या तेन सह घटादेः त्रिकर्तृकत्वं तन्न्यायेन क्षित्यादेरपि तथेत्येवंरीत्यानवस्था बोध्या। दृष्टान्तस्य-घटादेः। साध्येति। चेतनाधिष्ठितहेतुकत्ववैकल्यापत्तेरित्यर्थः। अधिष्ठितत्वाघटितमेव साध्यमिष्यत इति नायं दोष इति शङ्कते—न चेति। सिद्धसाधनादिति। परमाण्वादिहेतुकत्वस्यास्माभिरपि स्वीकृतत्वादिति भावः।

प्रयोगे सिद्धसाधनात् । किञ्चानित्यप्रयत्नपूर्वकत्वप्रयुक्तां व्याप्तिमुपजीवत् कार्यत्वं न बुद्धिमत्पूर्वकत्वेन स्वभावप्रतिबद्धम् । न ह्यनित्यप्रयत्नोऽपि बुद्ध्या शरीरवत् कारणत्वेनोपयोक्ष्यते, येन तन्निवृत्तावप्यकार्यबुद्धिः न निवर्तत इति ॥

तदेतत् प्रागेव निरस्तप्रायं नोत्तरान्तरमपेक्षते । तथा हि साक्षादधिष्ठातरि साध्ये परमाण्वादीनां शरीरत्वप्रसङ्ग इति किमिदं शरीरत्वम्, यत् प्रसज्यते ? यदि साक्षात्प्रयत्नवदधिष्ठेयत्वम्, तदिष्यत एव । न च ततोऽन्यत् प्रसञ्जकमपि । अथेन्द्रियाश्रयत्वम् ? तन्न, तदवच्छिन्नज्ञानजननद्वारेणेन्द्रियाणामुपयोगात् । अनवच्छिन्ने प्रयत्ने नायं विधिः, नित्यत्वात् । अत एव नार्थाश्रयत्वम् । न हि नित्यज्ञानं भोगरूपमभोगरूपं वा, यत्नमपेक्षते, तस्य कारणविशेषत्वात् । न च नित्यसर्वज्ञस्य भोगसम्भावनाऽपि विशेषादर्शनाभावे मिथ्याज्ञानानवकाशे दोषानुत्पत्तौ धर्माधर्मयोरसत्त्वात् । तस्मात्, साक्षात्प्रयत्नानधिष्ठेयत्वात्

पुनश्चासिद्धिं वक्तुमुपाधिमाह—किञ्चेति । बुद्धिमत्पूर्वके घटादौ सर्वत्र विद्यमानमनित्यप्रयत्नपूर्वकत्वमङ्कुरादिकार्ये असत्त्वादुपाधिः स्यादिति भावः । शरीरपूर्वकत्वस्येव नास्याप्युपाधित्वं स्यादित्यत्राह—न हीति । शरीरवदिति । शरीरमिवेत्यर्थः । यथा बुद्ध्या शरीरं कारणतया अपेक्ष्यते न तथा अनित्यः प्रयत्नः, किन्तु व्यापकत्वमात्रेणेति तन्निवृत्तौ बुद्धिसामान्यनिवृत्तिः स्यादिति भावः ॥

तदेतदिति । सत्प्रतिपक्षादिकमित्यर्थः । प्रागेवेति । दुर्बलत्वाद्युक्त्येत्यर्थः । प्रसञ्जितं शरीरत्वं विकल्प्य क्रमेण समाधत्ते—किमिदमिति । तदिष्यत एवेति । नानिष्टप्रसङ्ग इति भावः । कथमिदमवगम्यत इत्यत आह—न चेति । साक्षात् अधिष्ठेयत्वस्यैव प्रसञ्जकत्वात् प्रसञ्जकानुपगमे तदभेदे च प्रसङ्गानवताराच्चेति भावः । एवं चेष्टाश्रय इत्यनेन विवक्षितं शरीरलक्षणं इष्टत्वान्न प्रसङ्गमर्हतीत्युक्त्वा इन्द्रियाश्रयत्वप्रसङ्गं निराकर्तुमाह—अथेति । प्रसङ्गौपयिकव्याप्तावनित्यप्रयत्नवदधिष्ठेयत्वमुपाधिरित्याशयेनाह—तदवच्छिन्नेति । उत्पत्तावुपयोगादित्यन्वयः । अर्थाश्रयत्वरूपशरीरत्वप्रसङ्गं निराकरोति—अत एवेति । सोपाधिकत्वादेवेत्यर्थः । अर्थाश्रयत्वमिति । भोगावच्छेदकत्वमित्यर्थः । नित्यसुखाभिव्यक्तिरस्तीति मते अनित्यज्ञानवदधिष्ठेयत्वमुपाधिरित्यभिप्रेत्याह—न हि नित्यज्ञानमिति । सुखानङ्गीकारे भोगावच्छेदकत्वमेवोपाधिरित्यभिप्रेत्याह—न चेति । यदवच्छिन्नात्मन्यर्थाः स्पर्शादयः विषयाः भोगं जनयन्ति तस्यैवार्थाश्रयत्वमिति भावः । एवं परोक्तप्रसङ्गदूषणमभिधाय तदनुग्राह्यप्रति-

स्वव्यापारे तदनपेक्षत्वाच्चेति द्वयं साध्याविशिष्टम्। अनिन्द्रियाश्रयत्वादभोगायतनत्वात् स्वव्यापारे तदनपेक्षत्वाच्चेति त्रयमप्यन्यथासिद्धम्। अभोगायतनत्वादनिन्द्रियाश्रयोऽपि, भोक्तृकर्मानुपग्रहादभोगायतनमपि, स्पर्शवद्वेगवद्द्रव्यान्तरानुद्यत्वात्तदनपेक्षमपि स्यात्; अचेतनत्वाच्चेतनाधिष्ठितमपि स्यादिति को विरोधः? तथा च साक्षात्प्रयत्नाधिष्ठितेतरजन्यत्वादिति साध्यसमः। इन्द्रियाश्रयेतरजन्यत्वात् भोगायतनेतरजन्यत्वादिति द्वयमप्यन्यथासिद्धम्। कार्यज्ञानाद्यनपेक्षत्वात् शरीरेतरजन्यमपि स्यात्; अचेतनहेतुकत्वाच्चेतनाधिष्ठितहेतुकमपीति को विरोधः? अप्रसिद्धविशेषणश्च पक्षः। न हि चेतनानधिष्ठितहेतुकत्वं क्वचित् प्रमाणसिद्धम्। न च चेतनाधिष्ठितहेतुकत्वनिषेधः साध्यः, हेतोरसाधारण्यप्रसङ्गात्। गगनादेरपि सपक्षाद्व्यावृत्तेः॥

यत्पुनरुक्तं कुविन्दादेः पटादौ कथमपेक्षेति, तत्र कारकतयेति कस्सन्देहः? किन्तु कारकत्वमेव तस्य ज्ञानचिकीर्षाप्रयत्नवतः, न स्वरूपतः। तदेव चाधिष्ठातृत्वम्। यत्त्वधिष्ठिते

प्रयोगदूषणमाह—तस्मादिति। तदनपेक्षत्वादिति। इन्द्रियाश्रयानपेक्षत्वाद्भोगायतनानपेक्षत्वादित्यनयोः तन्त्रेणोक्तिः। द्वयमिति। शरीरत्वं साक्षात् प्रयत्नाधिष्ठेयत्वमित्युक्तौ पूर्वोक्तकारणपक्षकहेतुद्वयानुवादोऽयम्। साध्याविशिष्टम्—साध्याभिन्नम्, साध्यवदसिद्धं वा। इन्द्रियाश्रयत्वं भोगायतनत्वं वा शरीरत्वमित्युक्तावुक्तहेत्वर्थानुवादेन दोषमाह—अनिन्द्रियेति। अन्यथासिद्धमिति। व्याप्यत्वासिद्धमित्यर्थः। अन्यथासिद्धिमेवाह-अभोगायतनत्वादिति। व्यतिरेकःयासौ भोगायतनत्वादिरुपाधिरिति भावः। कर्मानुपग्रहात्— अदृष्टानधीनत्वात्। स्पर्शवदिति। दण्डाद्यप्रेर्यत्वात् शरीरानपेक्षमपि स्यादित्यर्थः। ननु वाय्वादिनुद्यपरमाणूनां कथं तादृशद्रव्यानुद्यत्वं वाय्वाद्यभावेऽपि सततपरिस्पन्दनशीलत्वस्य विवक्षितत्वात्। को विरोध इति। चेतनाधिष्ठितत्वादेः उक्तहेत्वभावव्याप्यत्वाभावात् हेतुत्वे सत्यचेतनत्वस्य व्यापकत्वाच्चेति भावः। परमाण्वादिपक्षकहेतुदूषणमुक्त्वा क्षित्यादिपक्षकहेतुदूषणमाह–तथा चेति। शरीरेतरहेतुकत्वादिति हि तदुक्तो हेतुः। तत्र शरीरत्वविकल्पेन दूषणभेदः। कार्यज्ञानाद्यनपेक्षत्वादिति। अनित्यज्ञानसापेक्षत्वं व्यतिरेकव्याप्तावुपाधिः। चेतनाधिष्ठितमपीति। चेतनाधिष्ठितहेतुकमपीत्यर्थः। अप्रसिद्धविशेषण इति। साध्याप्रसिद्धिरिति भावः। उपपादयति–न हीति। न चेति। प्रतियोगिप्रसिद्ध्या तन्निषेधसाधनं भवतीति भावः। वस्तुतस्तु गगनादौ साध्यं प्रसिद्धमेव। असाधारण्यमुपपादयति—गगनादेरपीति। गगनादिरूपात्सपक्षादपि व्यावृत्तेरित्यर्थः।

किमधिष्ठानेनेति—तत्किं कुविन्द उद्धार्यते, ईश्वरो वा, अनवस्था वाऽऽपाद्यते ? न प्रथमः, अन्वयव्यतिरेकसिद्धत्वात् । न द्वितीयः, परमाण्वदृष्टाद्यधिष्ठातृत्वसिद्धौ ज्ञानादीनां सर्वविषयत्वे वेमाद्यधिष्ठानस्यापि न्यायप्राप्तत्वात् । न तु तदधिष्ठानार्थमेवेश्वरसिद्धिः । न तृतीयः, तस्मिन् प्रमाणाभावात् । तथाप्येकाधिष्ठितमपरः किमर्थमधितिष्ठतीति प्रश्ने किमुत्तरमिति चेत्—हेतुप्रश्नोऽयम्, प्रयोजनप्रश्नो वा ? नाद्यः, ईश्वराधिष्ठानस्य नित्यत्वात् । कुविन्दाद्यधिष्ठानस्य स्वहेत्वधीनत्वात् । न द्वितीयः, कार्यनिष्पादनेन भोगसिद्धेः स्पष्टत्वात् । एकाधिष्ठानेनैव कार्यं स्यादिति चेत् स्यादेव । तथापि न सम्भेदेऽन्यतरवैयर्थ्यम् । परिमाणं प्रति सङ्ख्यापरिमाणप्रचयवत् प्रत्येकं सामर्थ्योपलब्धौ सम्भूयकारित्वोपपत्तेः । अस्ति तत्र वैजात्यमिति चेत्—इहापि किञ्चिद्भविष्यतीति । न चाकुर्वतः कुलालादेः कायसंक्षोभादिसाध्यो भोगः सिद्ध्येदिति तदर्थमस्य कर्तृत्वमीश्वरोऽनुमन्यते, तदर्थमात्रत्वादैश्वर्यस्येति ॥

यत्त्वनित्यप्रयत्नेत्यादि—भवेदप्येवम्, यद्यनित्यप्रयत्ननिवृत्तावेव बुद्धिरपि निवर्तेत ;

सिद्धसाधनं परिहर्तुं तदुक्तमनुवदति—यत्पुनरुक्तमिति । कारकत्वमिहाधिष्ठातृत्व एव पर्यवस्यतीत्याह—किन्त्विति । ज्ञानचिकीर्षाकृतिविशिष्टत्वेनैव कारणत्वेन तस्य कारणाधिष्ठातृत्वरूपत्वादिति भावः । तत्राधिष्ठातृद्वयकैमर्थ्याशङ्कां प्रतिवक्तुमनुवदति—यदीति । परमाण्विति । कुविन्दादेः परमाण्वदृष्टाद्यधिष्ठातृत्वस्यासंभावितत्वेन तदधिष्ठानार्थमीश्वरस्य तज्ज्ञानादीनां चाभ्युपगन्तव्यत्वात् तेषां सर्वविषयकत्वेन वेमाद्यधिष्ठानमपि दुरपह्नवमिति भावः । तस्मिन्ननवस्थापादने प्रमाणाभावादिति । ईश्वरे परमाण्वाद्यधिष्ठानान्यथानुपपत्तिवत् कुविन्दादावन्वयतिरेकवच्च तदुभयातिरिक्ते तृतीयाद्यधिष्ठातरि कस्यचिदपि प्रमाणस्याभावात् नानवस्थापत्तिरिति भावः । संभेदे—समावेशे । सङ्ख्यापरिमाणेति । त्र्यणुकादिपरिमाणे अवयवसंख्यायाः घटादिपरिमाणे अवयवपरिमाणस्य च पृथक्पृथग्घेतुत्वेऽपि प्रचयाधीनतूलादिपरिमाणे अवयवसङ्ख्यापरिमाणयोरपि संभूयकारित्ववत् प्रकृतेऽप्युपपत्तेरिति भावः । नन्वेकधर्मावच्छिन्नं प्रति प्रत्येकं संभूय च न हेतुत्वमुपपद्यते । किन्तु कार्यतावच्छेदकधर्मभेदेन स्यादित्याशयेन शङ्कते—अस्तीति । इहापि किंचिदेतदिति । क्षित्याद्यपेक्षया घटादावपि किंचिद्वैजात्यमधिष्ठातृद्वयसमावेशप्रयोज्यं किं न स्यादिति भावः ।

उपाधिं निरसितुमनुवदति—यत्त्विति । साध्यव्यापकत्वं न संभवतीत्याशयेन दूषयति—भवेदप्येवमित्यादिना । अनित्यप्रयत्नबुद्धिसामान्ययोः व्याप्यव्यापकभावाभावमुपपादयति—न त्वेतदिति ।

न त्वेतदस्ति ; उदासीनस्य प्रयत्नाभावेऽपि बुद्धिसद्भावात् । हेतुभूता बुद्धिर्निवर्तते इति चेत्—न, उदासीनबुद्धेरपि संस्कारं प्रति हेतुत्वात् । कारकविषया बुद्धिर्निवर्तते इति चेत्—न, उदासीनस्यापि कारकबोद्धृत्वात् । न हि घटादिकमकुर्वन्तश्चक्रादिकं नेक्षामहे । हेतुभूता कारकबुद्धिः निवर्तते इति चेत्—न [1](चक्रादिबुद्धेरपि संस्कारं प्रति हेतुत्वात् । कारकफलहेतुभूता कारकबुद्धिः निवर्तते इति चेत्—न) अयतमानस्यापि दुःखहेतुभूताया अपि तद्धेतुकण्टकस्पर्शबुद्धेः भावात् । चिकीर्षाहेतुभूतोऽनुभवो निवर्तते इति चेत्—न, केनचिन्निमित्तेनाऽकुर्वतोऽपि चिकीर्षातद्धेतुबुद्धिसंभवात् । अनपेक्षकृतिहेतुचिकीर्षाकारणं बुद्धिः निवर्तते इति चेत्—न तर्हि बुद्धिमात्रम् । तथाचानित्यप्रयत्नहेतुकत्वप्रयुक्तं विशिष्टप्रयत्नचिकीर्षाहेतुबुद्धिमत्पूर्वकत्वमिति तन्निवृत्तौ तदेव निवर्तताम्, न तु बुद्धिमत्पूर्वकत्वमात्रम् । तत्र तस्याप्रयोजकत्वादिति बुद्धिमत्पूर्वकत्वमिति साध्यपक्षे परिहारः । सकर्तृकमिति प्रयत्नप्रधानपक्षे शङ्कैव नास्ति ; तस्यैव तत्रानुपाधित्वात् ॥

उदासीनस्य कारणान्यव्यापारयतः । तद्धेत्विति । कण्ठकस्पर्शान्वयिबुद्धेः दुःखहेतुत्वस्य पूर्वमुक्तत्वात् । अनपेक्षकृतिहेत्विति । कृत्युपधायकार्थकम् । न तर्हि बुद्धिमात्रमिति । केवलबुद्धिमत्पूर्वकत्वमात्रस्यैवात्र साध्यत्वेन तत्रानित्यप्रयत्नपूर्वकत्वस्याप्रयोजकत्वात् न प्रकृतहेतोः सोपाधिकत्वमिति भावः । विशिष्टप्रयत्नचिकीर्षेति । निरपेक्षप्रयत्नहेतुचिकीर्षेत्यर्थः । कृत्युपधायकचिकीर्षेति यावत् । यद्यप्यनित्यप्रयत्नपूर्वकत्वव्याप्यकोटौ बुद्धेः हेतुत्वादिमात्रेण विशेषणेऽप्युक्तरीत्या उपाधिपरिहारः स्यात् अविशेषितबुद्धेरेव साध्यघटकत्वात्, तथापि तत्र व्याप्यत्वमेव न संभवतीति तदुक्तिरिति ध्येयम् । प्रयत्नसाधनपक्ष इति । सकर्तृकमित्यनेन कृतिमत्पूर्वकत्वविवक्षायामिति भावः । अनुपाधित्वादिति । साध्योपाध्योरैक्यानुपगमात् । अन्यथा अनुमानस्यैवोच्छेदप्रसङ्गादिति भावः ।

ननु सकर्तृकत्वमित्यनेन कृतिमत्पूर्वकत्वमात्रविवक्षायां क्षित्यादिकर्तुः बुद्धिमत्त्वं न सिद्ध्येत् । न च कृतित्वादिना बुद्धिपूर्वकत्वं साधयितुं शक्यम् । कार्यप्रयत्नं प्रति बुद्धेर्हेतुतया अपेक्षितत्वेऽपि नित्यप्रयत्नं प्रत्यनपेक्षितत्वेन कृतित्वस्याप्रयोजकत्वात यत्नगतकार्यत्वस्यैव तत्रोपाधित्वादिति शङ्कां परिहरति—एतेनेति । तस्यैव तत्रानुपाधित्वेनेत्यर्थः । निरस्तमिति । सकर्तृकमित्यनेनैव बुद्धिप्रयत्नव-

---

1. कुण्डलितग्रन्थः औचित्यादूहितः वास्तवपाठस्तु तं विना ।

एतेन शरीरसंबन्धे बुद्धिगतकार्यत्ववत् बुद्धिसम्बन्धे प्रयत्नगतकार्यत्वमुपाधिरिति-निरस्तम्। यो हि बुद्ध्या शरीरवच्छरीरनिवृत्त्या बुद्धिनिवृत्तिवद्वा प्रयत्नेन बुद्धिं बुद्धिनिवृत्त्या प्रयत्ननिवृत्तिं साधयेत्, स एवं कदाचिदुपालभ्यः। वयं त्ववगतहेतुभावं कलितसकलशक्तिकारकप्रयोक्तारं कार्यादेवानुमिमाना नैवमास्कन्दनीयाः। तत्र तस्यानुपाधित्वात्॥

न च प्रयत्न आत्मलाभार्थमेव मतिमपेक्षते, विषयलाभार्थमप्यपेक्षणात्। ततः प्रयत्नाद्बुद्धिः तन्निवृत्तेश्च प्रयत्ननिवृत्तिः सिद्ध्यत्येवेति विस्तृतमन्यत्र। कार्यबुद्धिनिवृत्त्या तु कार्य एव प्रयत्नो निवर्तते, न नित्यः। नित्ये च प्रयत्ने नित्यैव बुद्धिः प्रवर्तते, नानित्या। न हि तया तस्य विषयलाभसंभवः। शरीरादेः प्राक् तदसम्भवे देहानुपपत्तौ सर्वदाऽनुत्पत्तेः। शरीराजन्यत्ववच्चानित्यप्रयत्नाजन्यत्वमिति सङ्क्षेपः॥

तर्काभासतयाऽन्येषां तर्काशुद्धिरदूषणम्।
अनुकूलस्तु तर्कोऽत्र कार्यलोपो विभूषणम्॥ ३॥

कारकव्यापारविगमे हि कार्यानुत्पत्तिप्रसङ्गः, चेतनाचेतनव्यापारयोः हेतुफलभावावधारणात्, कारणान्तराभाव इव कर्त्रभावे कार्यानुत्पत्तिप्रसङ्गः, कर्तुरपि कारणत्वात्।

त्पूर्वकत्वसाधनादिति भावः। कलितसकलशक्तीति। ज्ञातसर्ववस्तुसामर्थ्यं कारकव्यापारानुगुणप्रयत्नवन्तमित्यर्थः।

नित्यप्रयत्नादपि बुद्धिसाधनं शक्यमिति वक्ष्यन्नाह—न चेति। नित्यश्चेत् प्रयत्नः किं बुद्ध्येत्यत्राह—विषयलाभार्थमिति। तथा च यत्नसामान्ये बुद्ध्या भाव्यम्, न हि यत्नः कश्चित् निर्विषयोऽपीति भावः। अस्तु प्रयत्नादपि बुद्धिसिद्धिः; तस्या नित्यत्वे किं मानमित्यत्राह—कार्यबुद्धीति। तदसंभवे—अनित्यबुद्ध्यसंभवे। तत्र शरीरस्य करणत्वादिति भावः। देहानुपपत्ताविति। बुद्ध्यभावेन यत्नाभावात् न शरीरोत्पत्तिः स्यादिति भावः। अनित्यप्रयत्नाजन्यत्वादकर्तृकं स्यादित्यत्राह—शरीरेति। व्यर्थविशेषणकमिति भावः।

तथा च बाधकाभावात् साधकसत्त्वाच्चोक्तानुमानादीश्वरसिद्धिर्निष्प्रत्यूहेत्याह—तर्काभासतयेति। व्यर्थविशेषणत्वबाधाश्रयासिद्ध्यादिभिरिति भावः। अन्येषाम्—परोक्ततर्काणाम्। तर्का-

यस्त्वाह—प्रत्यक्षानुपलम्भाभ्यां तदुत्पत्तिनिश्चयो दृश्ययोरेव, न त्वदृश्ययोः। प्रत्यक्षस्यानुपलम्भस्य च तावन्मात्रविधिनिषेधसमर्थत्वात् धूमाग्निवत्, कम्पमारुतवच्च। न हि धूमः कार्योऽनलस्येति उदर्यस्यापि, न हि शाखाकम्पो मातरिश्वन इति स्तिमितस्यापि स्यात्। किन्तु भौमस्पृश्ययोरेव। तथेहापि शरीरवत एव कारणत्वमवगन्तुमुचितम्, नान्यस्येति, तदसत्। प्रत्यक्षानुपलम्भौ हि दृश्यविषयावुपायस्तदुत्पत्तिनिश्चये; न तु दृश्यतैव तत्रोपेया; किं नाम दृश्याश्रितं सामान्यद्वयम्। तदालीढस्य हि तदुत्पत्तिनिश्चये दृश्यमदृश्यं वा सर्वमेव तज्जातीयं तदुत्पत्तिमत्तया निश्चितं भवति, यथा स्पर्शरूपरसगन्धानामुत्तरोत्तरनिमित्ततायां तव; अस्माकञ्चातीन्द्रियसमवायादिसिद्धौ। न चेदेवम्, उदाहृतयोरेव दहनपवनयोः; आलोकरूपवतोस्तदुत्पत्तिनिश्चये, कथमनालोकनिरस्तरूपयोः सिद्धिः? यत् उदर्यस्तिमितसाधारणी सिद्धिस्स्यादिति—तद्भवेदप्येवम्, यदि शरीरादिकं विना कार्य-

---

शुद्धिः—प्रतितर्कपराहतिः। कार्यलोप इति। कार्यलोपप्रसङ्ग इत्यर्थः। अमुमेवोपपादयति—कारकव्यापारेति।

ननु शरीरवतः कर्तुरेव घटादिकार्ये अन्वयव्यतिरेकदर्शनात् कारणत्वं न शरीरिण इति सौगतशङ्कामनुवदति—यस्त्विति। प्रत्यक्षानुपलम्भाभ्याम्—अन्वयव्यतिरेकाभ्याम्। स्तिमितस्यापि—निश्चलस्यापि वायोः। परिहरति—तदसदिति। न तु दृश्यतैवेति। दृश्ययोरेवान्वयव्यतिरेकदर्शनेऽपि तदधीनकार्यकारणभावावधारणे न दृश्यत्वमेवावच्छेदकमवधार्यत इत्यर्थः। किं नामेति। किन्त्वित्यर्थः। सामान्यद्वयमिति। सामान्यधर्मयोश्चादृश्यसाधारण्यात् अशरीरिणोऽपि कर्तुः कारणत्वं दुरपह्नवमिति भावः। तवेति। सौगतस्येत्यर्थः। परमाण्वाद्यदृश्यसाधारण्येन स्पर्शादिस्वभावपूर्वपूर्वक्षणानां उत्तरोत्तरक्षणं प्रति हेतुत्वोपगमादिति भावः। अतीन्द्रियसमवायादिति। विशिष्टबुद्धिनियामकतावच्छेदकतया संयोगादावधिगतेन विशेषणविशेष्यसंसर्गत्वेन सामान्यरूपेण 'रूपवान् घट' इत्यादौ अतीन्द्रियसमवायस्य नियामकतया सिद्धिवदिति भावः। असत्यपि व्यभिचारे सामान्यधर्मानादरेऽनिष्टमाह—न चेदेवमिति। उदाहृतयोः—पूर्वोक्तयोः। दहनेति। जठरानलपवनयोरित्यर्थः। अनालोकनिरस्तरूपयोरित्यग्रेतनेनान्वयः। आलोकरूपवतोः—भौमानलप्लवङ्गमाबोः। तदुत्पत्तीति। पाककम्पादिकार्योत्पत्तिनिश्चये सतीत्यर्थः। सिद्धिरिति। तदुत्पत्तिसिद्धिरित्यर्थः। जाठरानलस्य वायो-

मिव, भौमं स्पर्शवद्वेगवन्तश्च विना अग्निमात्रात् पवनमात्राद्वा धूमकम्पौ स्याताम्। न त्वेवम्। न चैवं चेतनेऽव्यभिचारोऽपि शक्याभिधान इत्यलं बालप्रलापानां समाधानैः॥

तदुत्पत्तेरसिद्धावपि तत्तदुपाधिविधूननेन स्वाभाविकत्वस्थितौ यदि कर्तारमतिपत्य कार्यं स्यात्, स्वभावमेवातिपतेदिति कार्यविलोपप्रसङ्ग इति। एतच्च सर्वं आत्मतत्त्वविवेके निपुणतरमुपपादितमिति नेह प्रतन्यते। एवञ्च सिद्धे प्रतिबंधे न प्रतिबन्द्यादेः क्षुद्रोपद्रवस्यावकाशः। प्रतिबन्धसिद्धाविष्टापादनात्, तदसिद्धौ तत एव तत्सिद्धेः अप्रसङ्गादिति। ननु तस्य सर्वदा सर्वत्राविशेषे कार्यस्य सर्वदोत्पत्तिप्रसङ्ग इति निरपेक्षेश्वरपक्षे दोषः, सापेक्षे उपेक्षणीय एवास्त्विति बालस्य प्रदीपकलिकाक्रीडयैव नगरदाहः, तन्न. स्थेमभाजो जगत एवाकारणत्वप्रसङ्गात्। ओमिति ब्रुवतस्सौगतस्य दत्तमुत्तरं प्राक्॥

'आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥' (मनु. १२-१०६)

रस्तिमितस्यापि चाप्रत्यक्षतया तयोरन्वयव्यतिरेकग्रहणासंभवात्पाककम्पादिहेतुत्वं न सिध्येदिति भावः। सामान्यस्वरूपेण हेतुत्वोपगमे उदर्यस्तिमितयोरपि धूमकम्पहेतुतापत्तिरिति पूर्वोक्तशङ्कामनूद्य परिहरति–यदुदर्येति। धूमकम्पादिकं प्रति अग्नित्ववायुत्वादिना सामान्येन व्यभिचारादहेतुत्वेऽपि विशेषरूपेण व्यभिचाराभावेन भौमानलस्पर्शवद्वेगवत्त्वादिना हेतुत्ववत्कार्यसामान्ये चेतनत्वेन हेतुत्वमपि अव्यभिचारात्सिद्धमित्याह—न चैवमिति॥

हेतुत्वानुपगमेऽपि विपक्षे बाधकतर्केणानुगृहीतायाः कर्तृव्याप्तेः सत्त्वात् कार्यात् कर्तृसिद्धिर्दुर्वारेत्याह—तदुत्पत्तेरिति। एतच्चेति। उपाधिविधूननादिकमित्यर्थः। प्रतिबन्द्यादेः—अयोग्यशशशृङ्गाद्यापत्तेः। प्रतिबन्धसिद्धौ—व्याप्तिसिद्धौ। अथ नित्यविभोरीश्वरस्य किं सापेक्षस्य हेतुत्वं उत निरपेक्षस्य इति विकल्प्य आद्ये कार्यस्य सर्वदेशकालोत्पत्तिप्रसङ्गः। अन्त्ये अपेक्षणीयस्यान्यस्यैव बलात् कार्योत्पत्तिसिद्धौ ईश्वरसिद्धिर्निरर्थिकेति शङ्कते—नन्विति। दत्तमुत्तरमिति। कादाचित्कत्वानुमानोच्छेदापत्त्यादिकमिति भावः। प्रागिति। प्रथमस्तबके इत्यर्थः॥

ननु सौगतादिभिरपि स्वपक्षसाधकस्तर्क उक्त एवेत्यत्राह–आर्षमिति। इदं मानवं वचनम्। आर्षं—ऋषिदृष्टत्वात्। वेदं—धर्मोपदेशम्, तन्मूलस्मृत्यादिकं च। वेदाख्यशास्त्राविरोधिना

तमिममर्थमागमस्संवदति, विसंवदति तु परेषां विचारम्—

'विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्'।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥

अत्र प्रथमेन सर्वज्ञत्वं, चक्षुषा दृष्टेरुपलक्षणात्। द्वितीयेन सर्ववक्तृत्वं, मुखेन वागुपलक्षणात्। तृतीयेन सर्वसहकारित्वम्, बाहुना सहकारित्वोपलक्षणात्। चतुर्थेन व्यापकत्वं, पदा व्याप्तेरुपलक्षणात्। पञ्चमेन धर्माधर्मलक्षणप्रधानकारणत्वम्; तौ हि लोकयात्रावहनान् बाहू। षष्ठेन परमाणुरूपप्रधानाधिष्ठेयत्वम्; ते हि गतिशीलत्वात्पतत्रव्यपदेशाः, पतन्तीति। संधमति सञ्जनयन्निति च व्यवहितोपसर्गसम्बन्धः; तेन संयोजयति समुत्पादयन्नित्यर्थः। द्यावा इत्यूर्ध्वलोकोपलक्षणं भूमीत्यधस्तात्, एक इत्यनादितेति। स्मृतिरपि—

'अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते' (गी. १०.८) इत्यादिः। एतेन ब्रह्मादिप्रतिपादका आगमा बोद्धव्याः ॥

तर्केण—मीमांसादिन्यायेन यो विचारयति स एव धर्मं वेद—विजानीयादित्यर्थः। वेदविरुद्धत्वात् बाह्यतर्काणां अनुपादेयत्वमिति भावः। स्वोक्तानुमानस्य वेदविरोधमुपपादयति —तमिममिति। अत्र द्यावापृथिवीमात्रहेतुत्वोक्त्या कथं सर्वहेतुत्वादिलाभ इत्यत्राह—द्यावा इतीति।

स्मृत्यविरोधमाह—स्मृतिरपीति। एतेन—श्रुतिस्मृतिभ्यां परमेश्वरस्यैव कारणत्वावगमेन। ब्रह्मादीति। चतुर्मुखादीनां ईश्वरानुप्रवेशादेव कारणत्वं वदन्त्यागमा इति न विरोध इति भावः ॥

आयोजनादपीश्वरसिद्धिमुपपादयति—आयोजनादिति। कार्यारम्भकसंयोगजनकात् परमाणुकर्मण इत्यर्थः। साध्य इति शेषः। अचेतने परमाणौ चेतनाधिष्ठानेनैव कर्मसंभव इति भावः। अन्यथा अनिष्टमाह—स्वातन्त्र्य इति। अनधिष्ठितस्यैव परमाणोः कर्मवत्त्वे अचेतनत्वं न स्यादित्यर्थः। अचेतनव्यापारे चेतनाधिष्ठानस्य हेतुत्वादिति भावः। अदृष्टमेव तत्र हेतुः स्यादिति अत्राह नादृष्टमिति। अदृष्टेन कारणान्तरस्य नान्यथासिद्धिरिति भावः। विपक्षे बाधकमाह—हेत्वभाव

आयोजनहेतुकानुमानविचारः

आयोजनात् खल्वपि—

स्वातन्त्र्ये जडताहानिः नादृष्टं दृष्टघातकम् ।
हेत्वभावे फलाभावो विशेषस्तु विशेषवान् ॥ ४ ॥

परमाण्वादयो हि चेतनाऽऽयोजिताः प्रवर्त्तन्ते अचेतनत्वात् वास्यादिवत् । अन्यथा कारणं विना कार्यानुत्पत्तिप्रसङ्गः, अचेतनक्रियायाश्चेतनाधिष्ठानकार्यत्वावधारणात् ॥

क्रियाविशेषविश्रान्तोऽयमर्थः ; न तु तन्मात्रगोचरः । चेष्टा हि चेतनाधिष्ठानमपेक्षत इति चेत्—अथ केयं चेष्टा नाम ? यदि प्रयत्नवदात्मसंयोगासमवायिकारणिका क्रिया, प्रयत्नमात्रकारणिकेति वा विवक्षितम्, तन्न । तस्यैव तत्रानुपाधित्वात् । अथ हिताहितप्राप्तिपरिहारफलत्वं तत्त्वम्–तन्न, विषभक्षणोद्बन्धनाद्यव्यापनात् । इष्टानिष्टप्राप्तिपरिहारफलत्वमिति चेत्-कर्तारं प्रति, अन्यं वा ? उभयथापि परमाण्वादिक्रियासाधारण्यादविशेषः । भ्रान्तसमीहाया अतथाभूताया अपि चेतनव्यापारापेक्षणाच्च । शरीरसमवायिक्रियात्वं तदिति चेत्–न, मृतशरीरक्रियाया अपि चेतनपूर्वकत्वप्रसक्तेः । जीवत इति चेत्–न, नेत्रस्पन्दादेश्चेतनाधिष्ठानाभ्युपगमप्रसङ्गात् । स्पर्शवद्द्रव्यान्तराप्रयोगे सतीति चेत्–न,

---

इति । दृष्टकारणाभावे इत्यर्थः । चेष्टात्वमुपाधिरित्यत्राह—विशेषस्त्विति । चेष्टारूपक्रियाविशेषस्तु भोक्तृचेतनविशेषाधिष्ठानाधीनः, न तु चेतनसामान्याधिष्ठानाधीन इत्यर्थः । विशेषयोः व्याप्तिसत्त्वमात्रेण सामान्ययोः व्याप्तिः नापयातीति भावः । चेतनायोजिता इति । चेतनव्यापाराधीनक्रियावन्त इत्यर्थः ।

क्रियाविशेषविश्रान्तः—चेष्टारूपक्रियाविशेषासाधारण इत्यर्थः । तन्मात्रगोचरः—क्रियासामान्यविषयः । तस्यैव तत्रेति । चेतनप्रयत्नाधीनक्रियावत्त्वस्यैव साध्यत्वात् तस्य च प्रयत्नवदात्मसंयोगासमवायिकारणकक्रियावत्त्वाद्यभिन्नत्वादिति भावः । परमाण्वादीति । भोगोपकरणमहदारम्भकव्यणुकाद्यारम्भकसंयोगफलकत्वात् तत्क्रियासाधारण्यमित्यविशेषरूपत्वमिति भावः । अतिव्याप्तिमुक्त्वा अव्याप्तिमाह—भ्रान्तेति । मृगतृष्णिकाजलभ्रमाधीनगमनादिचेष्टाया इत्यर्थः । स्पर्शवदिति । नेत्र-

ज्वलनपवनादौ तथाभावाभ्युपगमापत्तेः। शरीरस्य स्पर्शवद्द्रव्यान्तराप्रयुक्तस्येति चेत्—न, चेष्टयैव शरीरस्य लक्ष्यमाणत्वात् ॥

सामान्यविशेषश्चेष्टात्वम्, यत उन्नीयते प्रयत्नपूर्विकेयं क्रियेति चेत्—न, क्रियामात्रेणैव तदुन्नयनात्। भोक्तृबुद्धिमत्पूर्वकत्वं यत इति चेत्—तर्हि तद्विश्रान्तत्वमेव तस्य। न चैतावतैव क्रियामात्रं प्रत्यचेतनमात्रस्य चेतनाधिष्ठानेन व्याप्तिरपसार्यते। विशेषस्य विशेषं प्रति प्रयोजकतया सामान्यव्याप्तिं प्रत्यविरोधकत्वात्। अन्यथा सर्वसामान्यव्याप्तेरुच्छेदादित्युक्तम्। एतेनाशरीरत्वादिना सत्प्रतिपक्षत्वमपास्तम्।

अत्राप्यागमसंवादः—

'यदा स देवो जागर्ति तदेदं चेष्टते जगत्।
यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति ॥'

'अज्ञो जन्तुरनीशोऽयमात्मनस्सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा ॥"

स्पन्दादेः वाय्वादिसंयोगाधीनत्वादिति नोक्तदोष इति भावः। ज्वलनेति। स्पर्शवद्द्रव्यान्तराप्रयोगे सति क्रियात्वस्याग्निवाय्वादिक्रियायां स्वतः प्रवृत्तायां सत्त्वात् चेष्टापत्तिरिति भावः। चेष्टालक्षणे शरीरस्य निवेशे अन्योन्याश्रयमाह—चेष्टयैवेति।

'चेष्टाश्रयः शरीरम्' इति तल्लक्षणात् प्रयत्नजन्यतावच्छेदकः जातिविशेषः चेष्टात्वमित्याशङ्कते सामान्यविशेष इति। क्रियात्वमेव तादृशजातिः, न तु चेष्टात्वमिति परिहरति—नेति। भोक्त्रिति। भोक्तृचेतनप्रयत्नजन्यतावच्छेदकं चेष्टात्वं जातिरिति भावः। प्रयत्नसामान्यपूर्वकत्वस्याव्यापकत्वान्नोपाधित्वमित्याशङ्कायामाह—तर्हीति। एतेनेति। विशेषरूपेण व्याप्तेः सामान्यरूपेण व्याप्तिं प्रत्यविरोधित्वेनेत्यर्थः। अशरीरत्वादिनेति। परमाणवः चेतनानधिष्ठिताः प्रवर्तन्ते शरीरेतरत्वात् इति प्रत्यनुमानमिति भावः। शरीरेतरक्रियाया अचेष्टात्वेऽपि क्रियात्वेन सामान्यरूपेण चेतनप्रयत्नप्रयोज्यत्वावश्यंभावादित्याशयः।

आयोजनानुमाने आगमानुग्रहमाह—अत्रापीति। प्रत्यनुमानस्यागमबाधादपि दुर्बलत्वमिति भावः। जागर्ति—प्रवर्तयितुं सङ्कल्पयति। स्वपिति—उदास्ते। निमीलति—न चेष्टते। अध्यक्षेण-

'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।' (गी. ९. १०)
'तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ॥' (गी. ९. १९)

इत्यादि ।

अत्र जागरस्वापौ सहकारिलाभालाभौ । ईश्वरप्रेरणायामज्ञत्वमप्रयतमानत्वञ्च हेतू दर्शितौ परमाण्वादिसाधारणौ । स्वर्गश्वभ्रे च इष्टानिष्टोपलक्षणे । एतदेव सर्वाधिष्ठानमुत्तरत्र विभाव्यते, मयेत्यादिना । न केवलं प्रेरणायामहमधिष्ठाता, अपि तु प्रतिरोधेऽपि । यो हि यत्र प्रभवति, स तस्य प्रेरणावत् धारणेऽपि समर्थः ; यथाऽर्वाचीनश्शरीरप्राणप्रेरणधारणयोरिति दर्शितम्, तपामीत्यादिना ।

धृतिहेतुकानुमानविचारः

धृतेः खल्वपि । क्षित्यादि ब्रह्माण्डपर्यन्तं हि जगत् साक्षात् परम्परया वा विधारकप्रयत्नाधिष्ठितं गुरुत्वे सत्यपतनधर्मकत्वात् वियति विहङ्गमशरीरवत् तत्संयुक्तद्रव्यवच्च । एतेनेन्द्राग्नियमादिलोकपालप्रतिपादका अप्यागमा व्याख्याताः । सर्वावेशनिबन्धनश्च सर्वतादात्म्यव्यवहारः, आत्मैवेदं सर्वमिति ; यथैक एव मायावी, 'अश्वो वराहो व्याघ्रो वानरः किन्नरो भिक्षुः तापसो विप्र' इत्यादिः । अदृष्टादेव तदुपपत्तेरन्यथासिद्धमिति चेत्-

---

अधिष्ठात्रा प्रकृतिः—परमाणुः । सहकारीति । प्रयत्नसहकारिभावाभावादित्यर्थः । अप्रयतमानत्वम्—स्वाधीनप्रवृत्तिरहितत्वम् । धारणेऽपि प्रतिरोधेऽपि ।

धृतिः—पतनाभावः, पतनप्रतिबन्धकसंयोगविशेषो वा । विहङ्गमादिसंयुक्ते द्रव्ये व्यभिचारवारणाय परम्परयेति । विधारकेति । चेतनप्रयत्नप्रतिबद्धपतनकमित्यर्थः । परम्परयेत्यत्र दृष्टान्तमाह तत्संयुक्तेति । एतेनेति । धारकप्रयत्नविधृतत्वाभिधानेनेत्यर्थः । इन्द्राग्नीति । 'इन्द्राग्निभ्यां वा इमौ लोकौ विधृतौ' 'यमो दाधार पृथिवीम्' 'यमो विश्वमिदं जगत्' इत्यादय इत्यर्थः । तेषामीश्वरानुप्रवेशात् धारकत्वमिति भावः । आत्मैवेदं सर्वमिति श्रुत्या परमात्मनः इन्द्राग्न्याद्यैक्यमेव स्यादित्यत्राह—सर्वावेशेति । अत्र 'तदनुप्रविश्य, सच्च त्यच्चाभवदि'त्यादिश्रुत्यादिकमनुसन्धेयम् । उक्तं निदर्शयति—यथेति । भेदकण्ठोक्तिमत्प्रमाणं दर्शयति—उत्तम इति । अन्यथासिद्धमिति । अप्रयोजकमित्यर्थः । तद्भावेपि—अदृष्टसद्भावेपि । अनुपाधित्वादिति । अप्रयोजकत्वानापादकत्वादित्यर्थः । कारणान्तरे

(न ?) तद्भावेऽपि प्रयत्नान्वयव्यतिरेकानुविधानेन तस्याः स्थितिं प्रति कारणत्वात् । कारणैकदेशस्य च कारणान्तरं प्रत्यनुपाधित्वात् । उपाधित्वे वा सर्वेषामकारणत्वप्रसङ्गात् । शरीरस्थितिरेवम्, न त्वन्यस्थितिरिति चेत्—न, प्राणेन्द्रिययोः स्थितेरव्यापनात् । प्राङ्न्यायेनापास्तत्वाच्च ।

अत्राप्यागमः, 'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः' (बृ. उ. ५-७-७) । प्रशासनं दण्डभूतः प्रयत्नः । 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः' (गी. १५-१७) इति स्मृतिः । अत्रोत्तमत्वमसंसारित्वं सर्वज्ञत्वादि च । परमत्वं सर्वोपास्यता । लोकत्रयमिति सर्वोपलक्षणम् । आवेशो ज्ञानचिकीर्षाप्रयत्नवत्संयोगः । भरणम् धारणम् । अव्ययत्वमागन्तुकविशेषगुणशून्यत्वम् । ऐश्वर्यं सङ्कल्पाप्रतिघात इति । एतेन कूर्मादिविषया अप्यागमा व्याख्याताः ॥

संहरणहेतुकानुमानविचारः

संहरणात् खल्वपि । ब्रह्माण्डादि द्व्यणुकपर्यन्तं जगत् प्रयत्नवद्विनाश्यं विनाश्यत्वात् पाटयमानपटवत् । अत्राप्यागमः—

शङ्कानुत्थापकत्वादिति यावत् । अत्रोपाधिव्यपदेशो गौणः । अथवा अनुपाधित्वादित्यस्य साधनव्यापकत्वादिति भावः । शरीरधृतेरेव यत्नकार्यतया तद्व्याप्यत्वं न तु क्षित्यादिधृतेरिति न तत्सामान्यस्य यत्नसाधकत्वमिति शङ्कते—शरीरस्थितिरिति । अव्यापनादिति । शरीरस्थितित्वस्य साध्याव्यापकत्वात् नोपाधित्वम् । अन्यथा प्राणादिस्थितौ शरीरस्थितित्वाभावेन यत्नपूर्वकत्वं न स्यादिति भावः । शरीरप्राणेन्द्रियादिस्थितिरेव प्रयत्नपूर्विका, न तु स्थितिसामान्यमित्युक्तावप्याह—प्राङ्न्यायेनेति । विशेषस्तु विशेषवानित्युक्तेनेत्यर्थः । विशेषयोः कार्यकारणभावे सामान्ययोरपि तत्सिद्धिर्निष्प्रत्यूहेति भावः ।

आगमसंवादमाह—अत्रापीति । दण्डभूत इति । अनतिक्रमणीय इत्यर्थः । प्रयत्नवत्संयोग इति । संयोगस्य भेदव्याप्यत्वात् ऐक्यायोग इति भावः । कूर्मादीत्यादिना शेषपरिग्रहः । 'तेनेयं नागवर्येण शिरसा विधृता मही' इत्यादयस्तद्विषयागमाः ।

'एष सर्वाणि भूतानि समभिव्याप्य मूर्तिभिः ।
जन्मवृद्धिक्षयैर्नित्यं संभ्रामयति चक्रवत्' ॥
सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।

कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् । (गी. ९-७) इत्यादिः । एतेन रौद्रमंशं प्रतिपादयन्तोऽप्यागमा व्याख्याताः ॥

पदहेतुकानुमानविचारः

पदात् खल्वपि—

कार्यत्वान्निरुपाधित्वमेवं धृतिविनाशयोः ।
विच्छेदेन पदस्यापि प्रत्ययादेश्च पूर्ववत् ॥ ५ ॥

पदशब्देनात्र पद्यते गम्यते व्यवहाराङ्गमर्थोऽनेनेति वृद्धव्यवहार एवोच्यते । अतोऽपीश्वरसिद्धिः । तथाहि—यदेतत् पटादिनिर्माणनैपुण्यं कुविन्दादीनां, वाग्व्यवहारश्च व्यक्तवाचां, लिपितत्क्रमव्यवहारश्च बालानां, स सर्वस्स्वतन्त्रपुरुषविश्रान्तः व्यवहारत्वात् निपुणतरशिल्पिनिर्मितापूर्वघटघटनानैपुण्यवत्, चैत्रमैत्रादिपदवत्, पत्राक्षरवत्, पाणिनीयवर्णनिर्देशक्रमवच्चेति ।

धृत्यादेरित्यादिशब्दग्राह्यमाह—संहरणादिति । मूर्तिभिः—स्वशरीरभूतैः परमाणुभिः । प्रकृतिं—परमाणुरूपाम् । रौद्रमंशं प्रतिपादयन्त इति । 'योऽनन्तः पठ्यते सिद्धैः देवदेवर्षिपूजितः । कल्पान्ते यस्य वक्त्रेभ्यो विषानलशिखोज्ज्वलः । सङ्कर्षणात्मको रुद्रो निष्क्रम्यात्ति जगत् त्रयम्' इत्यादय इत्यर्थः ।

ग्रन्थलाघवाय अत्र भूतभविष्यद्वर्तमानप्रयोगसाधारण्येन विपक्षे बाधकसंभवात् विशेषस्य नोपाधित्वमित्याह—कार्यत्वादिति । धृतिविनाशयोः प्रयत्नकार्यत्वात् यथा निरुपाधिकत्वं, एवं पदस्यापीत्यर्थः । कार्यकारणभावभङ्गप्रसङ्गस्य विपक्षे बाधकत्वादिति भावः । अथाप्यादिमत्त्वमुपाधिः स्यादित्यत्राह—विच्छेदेनेति । प्रलये व्यवहारस्यापि विच्छेदेन साधनव्यापकत्वादिति भावः । प्रत्ययादिहेतुष्वपि वक्ष्यमाणेषु कार्यकारणभाव एव विपक्षबाधक इत्याह—प्रत्ययादेश्चेति । व्यक्तवाचाम्—मनुष्याणाम् । प्रयोगत्रयमत्र पक्षभेदेन विवक्षितम् । स्वतन्त्रपुरुषेति । तज्जातीयव्यवहारानुपजीवित्वं पुरुषस्य स्वातन्त्र्यम् । निपुणतरेति । पक्षक्रमेण दृष्टान्तक्रमः । तृतीयस्य द्वयम् ॥

आदिमान् व्यवहार एवम्, अयन्त्वनादिरन्यथापि भविष्यतीति चेत्–न, तदसिद्धेः। आदिमत्तामेव साधयितुमयमारम्भः। न चैवं संसारस्यानादित्वभङ्गप्रसङ्गः, तथापि तस्याविरोधात्। न हि चैत्रादिव्यवहारोऽयमादिमानिति भवस्याप्यनादिता नास्ति, तदनादित्वे वा न चैत्रादिपदव्यवहारोऽप्यादिमानिति। अस्त्ववार्ग्दर्शी कश्चिदेवात्र मूलमिति चेत्–न तेनाशक्यत्वात्। कल्पादाव दर्शाभासस्याप्यसिद्धेः। साधितौ च सर्गप्रलयौ।

ननु व्यवहारयितृवृद्धशरीरी समधिगतः, न चेश्वरस्तथा। तत्कथमेवं स्यात्–न, शरीरान्वयव्यतिरेकानुविधायिनि कार्ये तस्यापि तद्वत्त्वात्। गृह्णाति हीश्वरोऽपि कार्यवशाच्छरीरमन्तरान्तरा, दर्शयति च विभूतिमिति। अत्राप्यागमः —

पिताऽहमस्य जगतो माता धाता पितामहः। (गी. ९-१७) तथा—
यदि ह्यहं न वर्तेयं (यः) जातु कर्मण्यतन्द्रितः।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः।
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्॥ (गी. ३-२३, २४)

एतेन 'नमः कुलालेभ्यः कर्मारेभ्य' इत्यादियजूंपि बोद्धव्यानि॥

आदिमत्त्वमप्यसिद्धमित्यत्राह–आदिमत्तामेवेति। तस्याविरोधादिति। संसारानादित्वस्याविरोधादित्यर्थः। पूर्वपूर्वसर्गेऽपि तज्जातीयव्यवहारस्येश्वरपूर्वकस्य संभवात् न संसारानिर्वाह इति भावः। उक्तप्रसङ्गौपयिकव्याप्तिरेव नास्तीति दर्शयति–न हीति। तदनादित्वे वेत्यत्रापि इदमनुषज्यते। आधुनिकचैत्रादिव्यवहारस्यादिमत्त्वेऽपि यथा न संसारानादित्वविरोध एवं घटादिव्यवहारस्यादिमत्त्वेऽपीति निदर्शयति–न हीति। आदर्शेति। यद्व्यवहारं दृष्ट्वा व्यवह्रियेत तस्याप्यभावादित्यर्थः। तस्यापि तद्वत्त्वादिति। ईश्वरस्य शरीरोत्पादकादृष्टाभावेऽप्यस्मदीयभोगादृष्टेनैव तत्प्रयोजकशरीरसंभवादिति भावः। न चैवमशरीरकर्तृत्वमीश्वरत्वमित्युक्तिविरोधः। शरीरनियमाभावे कर्माधीनशरीराभावे वा तस्यास्तात्पर्यात्, स्वच्छन्दशरीरस्य चात्राभ्युपगमात्। तथा च गीतम् 'संभवाम्यात्ममायया' इति।

एतेनेति। शरीरोपगमेनेत्यर्थः। बोद्धव्यानीति। कुलालादिजातीयशरीरकारणपराणि बोद्धव्यानीत्यर्थः।

प्रत्ययहेतुकानुमानविचारः

प्रत्ययोऽपि (यादपि ?)। प्रत्ययशब्देनात्र समाश्वासविषयप्रामाण्यमुच्यते। तथा च प्रयोगः—आगमसम्प्रदायोऽयं कारणगुणपूर्वकः प्रमाणत्वात् प्रत्यक्षादिवत्। न हि प्रामाण्यप्रत्ययं विना क्वचित् समाश्वासः। न चासिद्धस्य प्रामाण्यस्य प्रतीतिः। न च स्वतःप्रामाण्यमित्यावेदितम्। न च नेदं प्रमाणम्, महाजनपरिग्रहादित्युक्तम्। न चासर्वज्ञो धर्माधर्मयोः स्वातन्त्र्येण प्रभवति। न चासर्वज्ञस्य गुणवत्तेति निश्शङ्कमेतत्॥

श्रुतिहेतुकानुमानविचारः

श्रुतेः खल्वपि। तथा हि–सर्वज्ञप्रणीता वेदाः वेदत्वात्। यत् पुनः न सर्वज्ञप्रणीतम्, नासौ वेदो यथेतरवाक्यम्। ननु किमिदं वेदत्वं नाम? वाक्यत्वस्यादृष्टविषय-

---

प्रत्ययोऽपीति। साधक इति शेषः। समाश्वासेति। समाश्वासे शक्तेनापि तत्संबन्धात् लक्षणया प्रामाण्यमुच्यत इति भावः। हेत्वसिद्धिं परिहरति–न हीति। वाक्यद्वयेन प्रेक्षावतां आगमकप्रवृत्त्यन्यथानुपपत्त्या तत्र विस्रम्भः प्रामाण्यप्रमितिः प्रामाण्यं च सिद्ध्यतीति भावः। अप्रयोजकत्वशङ्कां निराकरोति—न च स्वत इति। प्रामाण्यभ्रान्त्या प्रवृत्तिरस्त्वित्यत्राह—न च नेदमिति। तथापि कथमीश्वरसिद्धिरित्यत्राह—न चेति। गुणवत्तेति। वाक्यार्थयथार्थज्ञानवत्त्वेत्यर्थः। शब्दप्रामाण्यस्य स्वतन्त्रवक्तृप्रमापूर्वकत्वनियमात् अतीन्द्रियधर्माधर्मप्रमाया असर्वज्ञदुर्लभत्वात् आगमवक्तृसर्वज्ञेश्वरसिद्धिरिति भावः॥

श्रुतेरीश्वरसिद्धावनुमानप्रयोगमाह–सर्वज्ञप्रणीता इति। ननु परमते कथं साध्यप्रसिद्धिः? जातित्वेन परत्ववदात्मत्वस्यासंसारिवृत्तित्वे तस्य च पुरुषत्वेन यत्किंचिद्वाक्यप्रणेतृत्वे च सिद्धे साध्यप्रसिद्धिरिति बोध्यम्। अथवा जीवाप्रणीतत्वे सति पुरुषप्रणीतत्वं साध्यमित्यत्र तात्पर्यात्। यत्पुनः जीवप्रणीतमप्रणीतं वा नासौ वेद इति व्यतिरेकव्याप्त्या जीवातिरिक्तपुरुषसिद्धिरिति भावः। विरुद्धत्वादिति। अदृष्टगोचरप्रतारकवाक्यसाधारण्यादिति भावः। असिद्धरिति। सर्वज्ञप्रणीतत्वसिद्ध्यधीनसिद्धिकत्वात् वेदप्रामाण्यस्येति भावः। अनुपलभ्यमानेति। वेदमूलकमन्वादिस्मृतिव्यावर्तनायेदम्। प्रतारकवाक्यव्यावृत्त्यर्थमाह—महाजनेति। वाक्यत्वं पदसमुदायत्वं, उक्तवेदत्वं वेदे संगमयति—न हीत्यादिना।

वाक्यत्वस्य च विरुद्धत्वात् । अदृष्टविषयप्रमाणवाक्यत्वस्य चासिद्धेः, मन्वादिवाक्ये गतत्वेन विरोधाच्चेति चेत् न, अनुपलभ्यमानमूलान्तरत्वे सति महाजनपरिगृहीतवाक्यत्वस्य तत्त्वात् । न ह्यस्मदादीनां प्रत्यक्षादि मूलम् । नापि भ्रमविप्रलिप्से, महाजनपरिग्रहादित्युक्तम् । नापि परम्परैव मूलम् , महाप्रलये विच्छेदादित्युक्तम् ।

वाक्यहेतुकानुमानविचारः

अन्वयतो वा । वेदवाक्यानि पौरुषेयाणि वाक्यत्वादस्मदादिवाक्यवत् । अस्मर्यमाणकर्तृकत्वात् नैवमिति चेत्–न, असिद्धेः 'अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिस्सृताः' । 'प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते' । 'वेदान्तकृत् वेदविदेव चाहम्' इति स्मृतेः । 'तस्माद्यज्ञात् सर्वहुतः ऋचस्सामानि जज्ञिरे' इत्यादिश्रुतिपाठकस्मृतेश्च । अर्थवादमात्रमिदमिति चेत्–न, कर्तृस्मरणस्य सर्वत्राविध्यर्थत्वात् । तथा चास्मरणे कलिदासादेरस्मरणात् । एवञ्च कुमारसम्भवादेरकर्तृकत्वप्रसङ्गः, अनैकान्तिकत्वं वा हेतोः ।

वाक्यादित्युक्तं हेतुमाह—अन्वयतो वेति । पौरुषेयाणीति । सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं पौरुषेयत्वम् । तेन नाध्यापकपुरुषोच्चरितत्वमादाय सिद्धसाधनम् । न वा अस्मदुच्चरितवेदे बाधः । स्वतन्त्रपुरुषोच्चरितत्वाभावेऽपि तज्जातीयत्वस्य सत्त्वात् । स्मर्यमाणकर्तृत्वमुपाधिरिति शङ्कामनूद्य निराकरोति—अस्मर्यमाणेति । अथवा सत्प्रतिपक्षो विवक्षितः । यज्ञादिति । विष्णोरित्यर्थः, 'यज्ञो वै विष्णुरि'ति श्रुतेरिति भावः । इदमिति । कर्तृस्मरणमित्यर्थः । सर्वत्र–आधुनिककाव्यादावपि । अविध्यर्थत्वादिति । विध्यर्थत्वाभावेऽपि स्वर्गादिवत्प्रामाणिकत्वमस्त्येवेति भावः । अन्यथा अनिष्टमाह—तथा चेति । विध्यर्थतया स्मरणाभावे विवक्षित इत्यर्थः । कर्तृस्मरणाभावेऽपि सकर्तृकत्वोपगमे दोषमाह—अनैकान्तिकत्वं वेति । हेतोरिति । अस्मर्यमाणकर्तृकत्वहेतोरित्यर्थः । यद्वा कुमारसंभवादेरकर्तृकत्वप्रसङ्गे इष्टापत्तौ तदन्तर्भावेण वाक्यत्वहेतोरनैकान्त्यमित्यर्थः । तथा चास्मर्यमाणकर्तृकत्वादित्यत्र कर्तृस्मरणसामान्याभावविवक्षायामसिद्धिः । विध्यर्थतया स्मरणस्याभावे विवक्षितेऽनैकान्त्यमिति न तेन सत्प्रतिपक्षत्वमिति भावः ॥

पुनः प्रकारान्तरेण सत्प्रतिपक्षं शङ्कते—प्रमाणान्तरेति । वेदाः न पौरुषेयाः प्रमाणान्तरागोचरार्थत्वात्, यन्नैवं तन्नैवं यथा मन्वादिवाक्यमिति प्रत्यनुमानं बोध्यम् । अत्र प्रमाणान्तरागोचरत्वं

प्रमाणान्तरगोचरार्थत्वात् सत्प्रतिपक्षत्वमिति चेत्—न। प्रणेतारं प्रत्यसिद्धेः, अन्यं प्रत्यनैकान्तिकत्वात्। आकस्मिकस्मितबीजसुखानुस्मृतेः कारणविशेषस्यान्यं प्रति प्रमाणान्तरागोचरस्यापि तेनैव वक्त्रा प्रतिपाद्यमानत्वात् ॥

वक्तैव प्रकृते न सम्भवति, हेत्वभावे फलाभावात्। चक्षुरादीनां तत्रासामर्थ्यात् अस्मदादीन्द्रियवत्। मनसो बहिरस्वातन्त्र्यात्, न, चेतनस्य ज्ञानेन्द्रियस्य मनसो वा पक्षीकरणे आश्रयासिद्धेः प्रागेव प्रपञ्चनात्। नित्यनिराकरणे चासामर्थ्यात्। परमाण्वादयो न कस्यचित् प्रत्यक्षाः तत्सामग्रीरहितत्वादिति चेत्—न द्रष्टारं प्रत्यसिद्धेः, अन्यं प्रति सिद्धसाधनात् ॥

तथापि वाक्यत्वं न प्रमाणम्, अप्रयोजकत्वात्, प्रमाणान्तरगोचरार्थत्वप्रयुक्तं तत्र पौरुषेयत्वम्, न तु वाक्यत्वप्रयुक्तम्, न—सुगताद्यागमानामपौरुषेयत्वप्रसङ्गात्। प्रमाणवाक्यस्य मत इति चेत् न, प्रणेतृप्रमाणान्तरगोचरार्थत्वस्य साध्यानुप्रवेशात्, स्वतन्त्रपुरुष-

---

किं कर्तारं प्रत्यन्यं प्रति वेति विकल्प्य दोषमाह—प्रणेतारमित्यादिना। असिद्धेरिति। प्रमाणान्तरेण विज्ञायैव प्रणयनादिति भावः। अनैकान्तिकत्वमुपपादयति आकस्मिकेति। प्रकृते वेदे वक्तैव न सम्भवति, वाक्यार्थज्ञान—सामग्र्यभावात् न ह्यविज्ञाय वचनमुपपद्यत इति शङ्कते—वक्तैवेति। फलाभावात्—ज्ञानाभावात्। तत्रासामर्थ्यादिति। अतीन्द्रियार्थे सामर्थ्याभावादित्यर्थः। चेतनस्येति। ईश्वरो नातीन्द्रियार्थदर्शी पुरुषत्वात् तज्ज्ञानं नातीन्द्रियगोचरं ज्ञानत्वात् तदिन्द्रियं नातीन्द्रियग्राहि इन्द्रियत्वात्। एवं तन्मनः बाह्यार्थे न मानम् स्वतन्त्रं प्रमाणं मनस्त्वादित्यादिप्रयोगे आश्रयासिद्धिरेव दूषणं पूर्वमुक्तमित्यर्थः। सामग्र्यभावेन कार्यनिराकरणेऽपि नित्यज्ञाननिराकरणं न संभवतीत्याह—नित्येति। प्रकारान्तरेण ईश्वरस्यासर्वज्ञत्वं साधयति—परमाण्वादय इति।

वाक्यत्वहेतोः सोपाधिकत्वमाह—तथापीति। न प्रमाणमिति। पौरुषेयत्व इति शेषः। उपाधिमाह—प्रमाणान्तरेति। परिहरति—नेति। अपौरुषेयत्वप्रसङ्गादिति। पौरुषेयत्वव्यापकत्वे प्रमाणान्तरगोचरार्थत्वस्य तदभावे पौरुषेयत्वाभावस्याप्यावश्यकत्वादिति भावः। मास्तु केवलसाध्यव्यापकत्वं पक्षधर्मावच्छिन्नसाध्यव्यापकत्वं तु स्यादित्याह—प्रमाणेति। साध्यानुप्रवेशादिति। साध्याविशिष्टत्वेनोपाधित्वासंभवादिति भावः। साध्यानुप्रवेशमुपपादयति—स्वतन्त्रेति। किं च

प्रणीतत्वं हि पौरुषेयत्वम्, अर्थप्रतीत्येकविषयौ हि विवक्षाप्रयत्नौ स्वातन्त्र्यम्। मन्वादिवाक्यस्यापौरुषेयत्वप्रसङ्गाच्च, तदर्थस्य शब्देतरप्रमाणागोचरत्वात्। प्रयुज्यमानवाक्येतरगोचरार्थत्वमात्रमिति चेत्-न, तस्य वेदेऽपि सत्त्वात्, एकस्याप्यर्थस्य शाखाभेदेन बहुभिर्वाक्यैः प्रतिपादनात्। अस्त्वेवम्, न तु तेषां मिथोमूलमूलिभाव इति चेत् न, उक्तोत्तरत्वात्।

संख्याविशेषहेतुकानुमानविचारः

सङ्ख्याविशेषात् खल्वपि। द्व्यणुकत्र्यणुके तावत् परिमाणवती द्रव्यत्वात्। तच्च परिमाणं कार्यं कार्यगुणत्वात्। न च तस्य परमाणुपरिमाणं द्व्यणुकपरिमाणं वा कारणम्, नित्यपरिमाणत्वात्, अणुपरिमाणत्वाच्च। अन्यथा अनाश्रयकार्योत्पत्तिप्रसंगात्, द्व्यणुकस्य महत्वप्रसङ्गाच्च, त्र्यणुकवदण्वारभ्यत्वाविशेषात्, तत्र कारणबहुत्वेन महत्त्वे अणुपरिमाणस्यानारम्भकत्वस्थितेः। अणुत्वमेव महदारम्भे विशेष इत्यपि न युक्तम्, महतो महदनारम्भप्रसंगात्, अणुत्वमहत्त्वयोर्विरुद्धतया एकजातीयकार्यानारम्भकत्वप्रसङ्गात्। बहुभिरपि

प्रमाणान्तरेत्यनेन किं शब्देतरप्रमाणं विवक्षितम्, उत स्वेतरप्रमाणसामान्यं, आहो मूलभूतप्रमाणान्तरमिति विकल्पाभिप्रायेण क्रमेण दोषानाह—मन्वादीति। उक्तोत्तरत्वादिति। प्रणेतारं प्रति मूलभूतमानान्तरागोचरार्थकत्वस्यासिद्ध्या उक्तोपाधेः साधनव्यापकत्वात् मानान्तरागोचरार्थत्वस्यान्यप्रत्यनैकान्तिकत्वादित्युक्तत्वेनोपाधेः साध्यव्यापकत्वासंभवादिति भावः।

संख्याविशेषादिति। द्व्यणुकादिपरिमाणजनकद्वित्वादिसंख्याविशेषादित्यर्थः। तद्धेत्वतीन्द्रियपरमाण्वादिविषयकापेक्षाबुद्ध्याश्रयतया सर्वज्ञेश्वरसिद्धिरिति भावः। कार्यगुणत्वात्—कार्यवृत्तिगुणत्वात्। अतो न साध्याविशेषः। प्राथमिकप्रतिज्ञायां हेतुः नित्यपरिमाणत्वादिति, द्वितीयायामणुपरिमाणत्वादिति। क्रमेण विपक्षे बाधकमाह—अन्यथेति। अनाश्रयेति। नित्यपरिमाणस्यापि कारणत्वोपगमे आकाशादिपरिमाणस्यापि तथात्वापत्त्या आकाशादिभिः द्रव्यानारम्भेऽपि तत्परिमाणेन निराश्रयं परिमाणमात्रमारभ्येतेति भावः। समवाय्यभावात् नायं प्रसङ्ग इत्यत्राह—द्व्यणुकस्येति। अणुत्वमेवेति। परमाणुपरिमाणव्यावृत्तविजातीयाणुत्वमित्यर्थः। महत्त्वमपि विकल्पेन कारणमित्यत्राह—अणुत्त्वमहत्त्वयोरिति। परस्परं व्यभिचारादिति भावः। तृणारणिन्यायेन कार्यमहत्त्ववैजात्योपगमेन

परमाणुभिर्द्वाभ्यामपि द्व्यणुकाभ्यामारम्भप्रसङ्गात् च। एवं सति को दोष इति चेत् परमाणुकार्यस्य महत्त्वप्रसङ्गः, कारणबहुत्वस्य तद्धेतुत्वात्। अन्यथा द्वाभ्यां त्रिभिश्चतुर्भिरित्यनियमेनाप्यण्वारम्भे तद्वैयर्थ्यप्रसङ्गात्। अणुन एव तारतम्याभ्युपगमस्तु संख्यामवधीर्य न स्यात्। अस्तु महदारम्भ एव त्रिभिरिति चेत् न, महतः कार्यस्य कार्यद्रव्यारभ्यत्वनियमात्। तथापि वा तारतम्ये संख्यैव प्रयोजिकेति। न च प्रचयोऽपेक्षणीयः अवयवसंयोगस्याभावात्। तस्मात् परिमाणप्रचयौ महत एवारम्भकाविति स्थितिः।

अतोऽनेकसंख्या परिशिष्यते। सा अपेक्षाबुद्धिजन्या अनेकसंख्यात्वात्। न चास्मदादीनामपेक्षाबुद्धिः परमाणुषु सम्भवति। तद्यस्यासौ स सर्वज्ञः। अन्यथा अपेक्षाबुद्धेरभावात् संख्याऽनुत्पत्तौ तद्गतपरिमाणानुत्पादेऽपरिमितस्य द्रव्यस्यानारम्भकत्वात् त्र्यणुका-

---

व्यभिचारवारणेऽप्याह—बहुभिरपीति। द्वित्वत्रित्वादिसंख्याया हेतुत्वानुपगमादिति भावः। कारणबहुत्वस्य तद्धेतुत्वादिति। त्रिभिः द्व्यणुकैः महदारम्भोपगमस्य द्वाभ्यां द्व्यणुकाभ्यां महदारम्भवारणायावश्यकत्वादिति भावः। द्व्यणुकबहुत्वमेव महदारम्भकम्, परमाणुबहुत्वन्तु अणुन एवेत्यत्राह—अन्यथेति। तद्वैयर्थ्यप्रसङ्गादिति। चतुरादिवैयर्थ्यप्रसङ्गात्। अणुष्वेव तारतम्योपगमात् सार्थक्यमित्यत्राह—अणुन एवेति। संख्यामवधीर्येति। संख्याविशेषस्य हेतुत्वमनभ्युपगम्येत्यर्थः। संख्याविशेषस्य परिमाणविशेषहेतुत्वानुपगमेऽपि तत्तारतम्यहेतुत्वोपगमावश्यंभावेन तद्धेतुबुद्ध्याश्रयतयैव विवक्षितेश्वरसिद्धिः स्यादिति भावः। नियमानुपगमेऽप्याह—तथापि वेति। तारतम्य इति। त्रिचतुराद्यारब्धापेक्षया पञ्चाद्यारब्धस्य महत्त्वतारतम्य इत्यर्थः। संख्यैव—त्रित्वादिसंख्याविशेष एव। प्रचयविशेष एव तारतम्यहेतुरित्यत्राह—न चेति। अवयवसंयोगस्येति। भूयोऽवयवावच्छेदेनावयवान्तरासंयोगिन्यवयवे वर्तमानस्यावयवान्तरसंयोगस्यैव प्रचयत्वात् निरवयवस्य तदसंभवादिति भावः। महत एवेति परिमाणप्रचयावित्यनेनान्वयि।

परिशिष्यत इति। परिमाणकारणेष्विति शेषः। संख्यया ईश्वरसिद्धिमाह—सेति। न चास्मदादीनामिति। तत्तद्व्यक्तिमात्रनिष्ठदन्त्वावच्छिन्नविशेष्यकैकत्वप्रकारकबुद्धेरेवापेक्षाबुद्धित्वादिति भावः। तद्यस्यासाविति। तस्माद्यस्यासावपेक्षाबुद्धिः स सर्वज्ञ एवेत्यर्थः। सर्वज्ञानभ्युपगमे बाधकमाह—अन्यथेति। इतरेतराश्रयमुपपादयति—जाते हीति। नन्वीश्वरापेक्षाबुद्धेः हेतुत्वे तस्याःनित्यतया

नुत्पत्तौ विश्वानुत्पत्तिप्रसङ्गः । अस्मदादीनामेवाऽऽनुमानिक्यपेक्षाबुद्धिरस्त्विति चेत्-न, इतरेतराश्रयप्रसङ्गात् । जाते हि स्थूलकार्ये तेन परमाण्वाद्यनुमानं, तस्मिन् सति द्व्यणुकादिक्रमेण स्थूलोत्पत्तिः । अस्त्वदृष्टादेव परिमाणं, कृतमपेक्षाबुद्ध्येति चेत्–न, अस्तु तत एव सर्वम्, किं दृष्टकारणेनेत्यादेरसमाधेयत्वप्रसङ्गादिति ॥

कार्यायोजनेत्यादेः द्वितीयं व्याख्यानम्

अथवा कार्येत्यादिकमन्यथा व्याख्यायते ।

तात्पर्याश्रयतया ईश्वरसिद्धिः

उद्देश एव तात्पर्यं व्याख्या विश्वदृशस्सती ।
ईश्वरादिपदं सार्थं लोकवृत्तानुसारतः ॥ ६ ॥

आम्नायस्य हि भाव्यार्थस्य कार्ये पुरुषप्रवृत्तिनिवृत्ती । भूतार्थस्य तु यद्यपि नाहत्य प्रवर्तकत्वं निवर्तकत्वं वा, तथापि तात्पर्यतस्तत्रैव प्रामाण्यम् । तथा हि–विधिशक्तिरेत्रावसीदन्ती स्तुत्यादिभिरुत्तभ्यते । प्रशस्ते हि सर्वः प्रवर्तते, निन्दिताच्च निवर्तते इति स्थितिः ।

परमाणुद्वित्वादेरपि नित्यतापत्तिः । अपेक्षाबुद्धिनाशस्यैव द्वित्वादिनाशकत्वोक्तेः । तथा च तत्कारणतया अपेक्षाबुद्धिः तदाश्रयतया चेश्वरः न सेद्धुमर्हतीति चेत् न । अपेक्षाबुद्धिनाशवत् आश्रयनाशसर्गाद्यक्षणादिसहकारिविशेषणविगमादेरपि द्वित्वनाशकत्वोपगमात् अदृष्टेन संख्याया अन्यथासिद्धिमाशंकते — अस्त्विति । सर्वत्र दृष्टकारणोच्छेदेन परिहरति–नेति ।

अथ कार्येत्यादेः वेदानुबन्धिन एवार्थानभिधाय तैरीश्वरसाधनपरं योजनान्तरं, तत्र कार्यमुद्देश्यम्, उद्देशस्तात्पर्यम्, तच्च वक्तुरिच्छा । सा च वेदार्थेनास्मदादीनामिति तदाश्रयतया ईश्वरसिद्धिरित्याशयेनाह — उद्देश एवेति । आयोजनधृत्यादेरित्यभिप्रायेणाह -- व्याख्येति । आयोजनं–वेदव्याख्यानम्, सर्वज्ञस्य सकलवेदतदर्थावधारणस्मरणादिमत एव सम्यक् भवतीति भावः । पदादित्यस्यार्थमाह—ईश्वरादिपदमिति । आदिपदमहमादिपरम् । उद्देश एव तात्पर्यमिति कारिकांशं व्याख्यातुमारभते–आम्नायस्येति । भाव्यार्थस्य–साध्यार्थकस्य । भूतार्थस्य—सिद्धार्थकस्य । तत्रैवेति । प्रवृत्तिनिवृत्त्योरेवेत्यर्थः ।

तात्पर्यार्थचिन्ता

तत्र पदशक्तिस्तावदभिधा, तद्बलायातः पदार्थः। आकांक्षादिमत्त्वे सति चान्वयशक्तिः पदानां पदार्थानां वा वाक्यम्, तद्बलायातो वाक्यार्थः। तात्पर्यार्थस्तु चिन्त्यते। तदेव परं साध्यं प्रतिपाद्यं प्रयोजनमुद्देश्यं वा यस्य, तदिदं तत्परम्। तस्य भावः तत्त्वम्। तद् यद्विषयं, स तात्पर्यार्थ इति स्यात्।

तत्र न प्रथमः, प्रमाणेनार्थस्य कर्मणोऽसाध्यत्वात्। फलस्य च तत्प्रतिपत्तितोऽन्यस्याभावात्। प्रशस्तनिन्दितस्वार्थप्रतिपादनद्वारेण प्रवृत्तिनिवृत्तिरूपं साध्यं परमुच्यते इति चेत्—न, गङ्गायां घोष इत्यत्र तीरस्याप्रवृत्तिनिवृत्तिरूपस्यासाध्यस्यापि परत्वात्। तीरविषये प्रवृत्तिनिवृत्ती साध्ये इति तीरस्यापि परत्वमिति चेत्—न, स्वरूपाख्यानमात्रेणापि पर्यवसानात्॥

न द्वितीयः, पदवाक्ययोः पदार्थतत्संसर्गौ विहाय प्रतिपाद्यान्तराभावात्। पदशक्तिसंसर्गशक्ती विना स्वार्थाविनाभावेन प्रतिपाद्यं परमुच्यते इत्यपि न साम्प्रतम्—न हि यद्यच्छब्दार्थाविनाभूतं तत्र तत्र तात्पर्यं शब्दस्य, अतिप्रसङ्गात्। तदा हि गङ्गायां

पदार्थवाक्यार्थाभ्यां तात्पर्यार्थस्य भेदं दर्शयितुमाह—तत्रेति। पदार्थानां वेति भाष्यानुसारेणोक्तम्॥

परशब्दस्योद्देश्यार्थकतां परिशेषयितुं साध्याद्यर्थकतां क्रमेण दूषयति—तत्रेति। अर्थस्य फलद्वारा साध्यत्वं स्यादित्यत्राह—फलस्य चेति। तस्य द्वितीयविकल्पेऽन्तर्भावात् तद्दूषणमेव दूषणमिति भावः। स्वस्य वाच्यमर्थं विहाय तत्प्रतीतिसाध्यप्रवृत्त्यादिकमेव परमित्युच्यते इत्याह—प्रशस्तेति। प्रवृत्तिनिवृत्त्यनात्मकतीरस्य परत्वाभावप्रसङ्गेन दूषयति—नेति। तीरस्य प्रवृत्तिनिवृत्तिरूपत्वाभावेऽपि तद्विषयत्वेन परत्वमस्त्वित्याह—तीरविषय इति। स्वरूपकथने प्रवृत्तितात्पर्यविरहे तीरतात्पर्यं नोपपद्यतेति दूषयति—नेति। स्वरूपाख्यानमात्रेणापीति। क्वचिदिति शेषः।

प्रतिपाद्यान्तराभावादिति। तथा चार्थवादवाक्यस्य प्रवृत्त्यादौ तात्पर्यानुपपत्तिरिति भावः। पूर्वोक्तमतिप्रसङ्गमेवाह—तदा हीति। तत्तथा स्यादिति। शब्दार्थाविनाभूतं परं स्यादित्यर्थः।

जलमित्याद्यपि तीरपरं स्यात्; अविनाभावस्य तादवस्थ्यात्। मुख्ये बाधके सति तत्तथा स्यादिति चेत्—न, तस्मिन्नसत्यपि भावात्। तद् यथा— 'गच्छ गच्छसि चेत् कान्त पन्थानस्सन्तु ते शिवाः। ममापि जन्म तत्रैव भूयाद् यत्र गतो भवान्' इति मुख्यार्थाबाधनेऽपि वारणे तात्पर्यम्। न च परं व्यापकमेव, अव्यापकेऽपि तात्पर्यदर्शनात्। तद् यथा-'मञ्चाः क्रोशन्ती'ति पुरुषे तात्पर्यम्। न च मञ्चपुरुषयोरविनाभावः, नापि पुरुषक्रोशनयोः।

नापि तृतीयः तद्धि प्रतिपाद्यापेक्षितं, प्रतिपादकापेक्षितं वा स्यात्। नाद्यः, शब्दप्रामाण्यस्यातदधीनत्वात्। तथात्वे वाऽतिप्रसंगात्। यस्य यदपेक्षितं तं प्रति तस्य परत्वप्रसङ्गात्। तदर्थसाध्यत्वेनापेक्षानियम इति चेत्—न, कार्यज्ञाप्यभेदेन साध्यस्य बहुविधत्वे भिन्नतात्पर्यतया वाक्यभेदप्रसङ्गात्। धूमस्य हि प्रदेशश्यामलतामशकनिवृत्त्याद्यनेकं कार्यम्; आर्द्रेन्धनदहनाद्यनेकं ज्ञाप्यम्। तथा चेह प्रदेशे धूमोद्गम इत्यभिहिते तात्पर्यतः को वाक्यार्थो भवेत्; चेतनापेक्षाया नियन्तुमशक्यत्वात्। नापि प्रतिपादकापेक्षितम्, वेदे तदभावात्॥

चतुर्थस्तु स्यात्। यदुद्देशेन यश्शब्दः प्रवृत्तः स तत्परः। तथैव लोकव्युत्पत्तेः।

तस्मिन्नसत्यपीति। मुख्यबाधके असत्यपीत्यर्थः। एवं मुख्यार्थाविनाभावेऽपि क्वचित् तात्पर्यं नास्तीत्युक्तम्, अथ मुख्यार्थाविनाभावाभावेऽपि तात्पर्यसत्त्वात् यत् परं तदविनाभूतमित्यपि वचनव्यक्तिः न संगच्छत इति आह— न चेति। अव्यापकत्वमेवोपपादयति—तद्यथेति। नामार्थस्य वा धात्वर्थस्य वा कस्यापि पुरुषाविनाभावो नास्तीति प्रतिपादयति—न चेति। तथा च व्याप्यत्वस्य व्यापकत्वस्य वा अभावात् अविनाभूतं परमित्युक्तिरयुक्तेति भावः।

तद्धीति। प्रयोजनं हीत्यर्थः। प्रतिपाद्यः—श्रोता। प्रतिपादकः—वक्ता। अतदधीनत्वात्—श्रोत्रपेक्षानधीनत्वात्। वक्तृतात्पर्याधीनत्वादिति भावः। अतिप्रसङ्गादिति। श्रोत्रपेक्षानुरोधेन एकस्यैव वाक्यस्य नानार्थतात्पर्यकत्वापत्त्या वाक्यभेदप्रसङ्ग इति भावः। ननु प्रतिपाद्यापेक्षितत्वमात्रं न परत्वापादकं, येनोक्तदोषः स्यात्। किन्तु तत्पदार्थसाध्यत्वसहितं तदित्याशङ्कते—तदर्थेति। तथापि साध्यार्थभेदात् वाक्यभेदो दुष्परिहर इति प्रत्याह—नेति। वेदे तदभावादिति। भवद्भिरपौरुषेयत्वोक्तेरिति भावः॥

तथा हि—प्रशंसावाक्यमुपादानमुद्दिश्य लोके प्रयुज्यते तदुपादानपरम् । निन्दावाक्यं हानमुद्दिश्य प्रयुज्यते तद्धानपरम् । एवमन्यत्रापि स्वयमूहनीयम् । तस्मात् लोकानुसारेण वेदेऽप्येवं स्वीकारणीयम्, अन्यथा अर्थवादानां सर्वथैवानर्थक्यप्रसंगात् । स चोद्देशो व्यवसायोऽधिकारोऽभिप्रायो भाव आशय इत्यनर्थान्तरमिति तदाधारप्रणेतृपुरुषधौरेयसिद्धिः । तथा च प्रयोगः—वैदिकानि प्रशंसावाक्यानि उपादानाभिप्रायपूर्वकाणि प्रशंसावाक्यत्वात् परिणतिसुरसमाम्रफलमित्यादिलोकवाक्यवदिति । एवं निन्दावाक्यानि हानाभिप्रायपूर्वकाणि निन्दावाक्यत्वात् परिणतिविरसं पनसफलमित्यादिवाक्यवत् । अन्यथा निरर्थकत्वप्रसङ्गश्च विपक्षे बाधकमुक्तम् ॥

अपि च नो चेदेवम्, श्रुतार्थापत्तिरपि हीयेत । सिद्धो ह्यर्थः प्रमाणविषयः, न तु तेनैव कर्तव्यः । न च पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र रात्रौ भुङ्क्ते इति वाक्यशेषोऽस्ति; अनुपलम्भबाधितत्वात्; उत्पत्त्यभिव्यक्तिसामग्रीताल्वादिव्यापारविरहात्; अयो-

---

तथैवेति । स्वप्रयोक्तृस्वतन्त्राभिप्रायविषयार्थपरत्वेनैवेत्यर्थः । लोकव्युत्पत्तेरिति । लोकवेदयोः पदतदर्थैक्यादिति भावः । लोके तात्पर्यार्थं प्रदर्शयति—तथा हीति । लोकवृत्तानुसारत इति कारिकांशं तात्पर्ये संगमय्य प्रदर्शयति—तस्मादिति । विपक्षे बाधकमाह—अन्यथेति । तात्पर्यादीश्वरसिद्धिमुपपादयितुं आह—स चोद्देश इति । तदर्थे प्रयोगमाह—तथा चेति । प्रशंसावाक्यानीति । अर्थवादवाक्यानीत्यर्थः । उपादानाभिप्रायेति स्वतन्त्राभिप्रायो विवक्षितः । समानविषयकाभिप्रायान्तरज्ञानाधीन इति यावत् । तेन नाध्यापकादिना अर्थान्तरम् । एवमग्रेऽपि ।

वेदे वक्त्रभिप्रायानभ्युपगमे पराभिमता श्रुतार्थापत्तिरपि न स्यादित्याह—अपि चेति । तथा चाहुः—'पीनो दिवा न भुङ्क्ते चेत्येवमादिवचःश्रुतौ । रात्रिभोजनविज्ञानं श्रुतार्थापत्तिरुच्यते । तामर्थगोचरां केचिदपरे शब्दगोचराम्' इति । श्रुतार्थापत्तिरिति । कथञ्चिदुपस्थितानामन्वयोपगमे अतिप्रसङ्गात् साकांक्षपदोपस्थितानामेवान्वयबोधस्योपगन्तव्यत्वेन पदाध्याहारस्यावश्यकत्वं वदतां भवतां मते रात्रिभोजनवाक्ये श्रुतार्थापत्तेः प्रमाणतयाऽभ्युपगमादिति भावः । हीयेतेति । अध्याहर्तव्यस्य पदस्योच्चरितत्ववत् अभिप्रायस्थताया अप्यभावे विषयाभावादिति भावः । अस्तु श्रुतार्थापत्त्यैव विषयसिद्धिरित्यत्राह—सिद्धो ह्यर्थ इति । सिद्धः—लब्धसत्ताकः, ज्ञापनामात्रमेव खलु प्रमाणकार्यम्;

ग्यस्याशङ्कितुमप्यशक्यत्वात् । तस्मादभिप्रायस्थ एव परिशिष्यते, गत्यन्तराभावात् । स चेद्वेदे नास्ति, नास्ति श्रुतार्थापत्तिरिति तद्व्युत्पादनानर्थक्यप्रसङ्गः । तस्मात् कार्यात् तात्पर्यादप्युन्नीयते, अस्ति प्रणेतेति ।

वेदव्याख्यानादीश्वरसिद्धिः

आयोजनात् खल्वपि । न हि वेदादव्याख्यातात् कश्चिदर्थमधिगच्छति । न चैकदेशदर्शिनो व्याख्यानमादरणीयम्; 'पौर्वापर्यापरामृष्टः शब्दोऽन्यां कुरुते मतिम्' इति न्यायेनानाश्वासात् । त्रिचतुरपदकादपि वाक्यादेकदेशश्राविणोऽन्यथार्थप्रत्ययः स्यात्, किमुतातीन्द्रियादन्तरान्तरा वाक्यसम्भेददुरधिगमात् । ततस्सकलवेदवेदार्थदर्शी कश्चिद्देवाऽभ्युपेयः; अन्यथाऽन्धपरम्पराप्रसङ्गात् । स च श्रुताधीतावधृतस्मृतसाङ्गोपाङ्गवेदार्थस्तद्विपरीतो वा न सर्वज्ञादन्यः सम्भवति । को ह्यप्रत्यक्षीकृतविश्वतदनुष्ठानः, एतावानेवायमाम्नाय इति निश्चिनुयात् । कश्चार्वाग्दृक् निश्शेषाः श्रुतीर्ग्रन्थतोऽर्थतो वाऽधीयीत,

---

न तूत्पादनमपीति भावः । अन्यसिद्ध एव विषयः स्यादित्यत्राह—न चेति । योग्यताविरहात् नोपलम्भ इत्यत्राह—उत्पत्तीति । गत्यन्तराभावादिति । पदयोः परस्परान्वितार्थकत्वे उच्चारणाभिप्रायान्यतरमूलकः समभिव्याहार एव गतिरिति भावः । उपसंहरति—तस्मादिति ।

एवं कार्येत्येतत् वेदतात्पर्यपरतया व्याकृत्य आयोजनेत्येतत् वेदव्याख्यानपरतया योजयति—आयोजनात् खल्विति । व्याख्यानमेव नास्तीत्यत्राह—न हीति । तत्कर्तृतया ईश्वरसिद्धिरिति भावः । तत्कर्ता कश्चिदस्मादृश एव स्यादित्यत्राह—न चेति । अन्धपरम्परेति । असर्वज्ञतच्चदुपाध्यायादिपरम्परया अर्थाधिगमस्य अभ्युपगन्तव्यत्वापातादिति भावः । धृत्यादेरित्येतत् विवृण्वन्नाह—स चेति । श्रुतः—श्रोत्रेण साक्षात्कृतः । अधीतः—श्रवणानुसारादनूच्चरितः धृतः—सतताभ्यासाहितदृढसंस्कारविषयीकृतः । तद्विपरीतः—श्रवणादिकं विनैव स्मृतावधृताध्यापितसकलवेदतदर्थः । साङ्गोपाङ्गनिखिलवेदधारकत्वेनेश्वरसिद्धिरिति भावः । स्मरणाध्यापनादिरादिशब्दार्थ इति भावः । आयोजनविषये प्रयोगमाह—अत्रापीति । अनुष्ठातृमतिचलनेऽपीति । कस्यचिदनुष्ठातुरर्थनिश्चयाभावेऽपि संप्रतिपन्नपूर्वानुष्ठानबलात् निष्कम्पानुष्ठेयार्थकत्वादित्यर्थः । एकदेशदर्श्युपाध्यायादिव्याख्यानादपि शिष्याणां निश्चलानुष्ठानमस्तीत्यनैकान्त्यादाह—अनुष्ठातृमतिचलनेऽपीति ।

अध्यापयेद्वा। अत्रापि प्रयोगः—वेदाः कदाचित् सर्ववेदार्थविद्व्याख्याताः, अनुष्ठातृमतिचलनेऽपि निश्चलार्थानुष्ठानत्वात्। यदेवं तत्सर्वं तदर्थविद्व्याख्यातम्, यथा मन्त्रादिसंहितेति। अन्यथा त्वनाश्वासेनाव्यवस्थानादननुष्ठानमव्यवस्था वा भवेदनादेशिकत्वात्। अनुष्ठातार एवादेष्टार इति चेत्—न—तेषामनियतबोधत्वात्। वेदवद्वेदार्थानुष्ठानमप्यनादीति चेत्—न—तद्धि स्वतन्त्रं वा वेदार्थबोधतन्त्रं वा आद्ये निर्मूलत्वप्रसङ्गः। द्वितीये त्वनियमापत्तिः। न ह्यसर्वज्ञाविशेषे पूर्वेषां तदवबोधः प्रमाणम्, न त्विदानीन्तनानामिति नियामकमस्ति।

प्रणवेश्वरादिपदहेतुकेश्वरानुमानम्

पदात् खल्वपि। श्रूयते हि प्रणवेश्वरेशानादिपदम्। तच्च सार्थकम्। अविगानेन श्रुतिस्मृतीतिहासेषु प्रयुज्यमानत्वात् घटादिपदवदिति सामान्यतः सिद्धे, कोऽस्यार्थ इति व्युत्पित्सोर्विमर्शे सति निर्णयः, स्वर्गादिपदवत्, 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर' इत्यर्थवादात् यववराहादिवद्वाक्यशेषाद्वा। तद्-

---

तत्रानुष्ठातॄणां नाव्यवस्थिता मतिरिति नोक्तदोषः। विपक्षे बाधमाह—अन्यथेति। अनाश्वासेन—असर्ववेदिन्यविस्रम्भेण। अव्यवस्थानादिति: अर्थनिश्चयस्येति शेषः। अव्यवस्था वेति। अनुष्ठानस्येति भावः। अनादेशिकत्वात्—अनौपदेशिकत्वात्। अनियतबोधकत्वादिति। तादृशानामुपदेशात् सार्वदिकसार्वत्रिकनिष्कम्पानुष्ठानसिद्धिर्न स्यादिति भावः। अर्थनिश्चयाभावेऽपि पूर्वपूर्वानुष्ठानदर्शनात् अनुष्ठानमुपपद्यत इत्याशङ्कते—वेदवदिति। अनादीति—प्रवाहानादीत्यर्थः। सर्गप्रलयसम्भवोपपादनेनानुष्ठानानादित्वासम्भवस्य स्फुटत्वात् सर्गाद्यनुष्ठानस्य वेदमूलकत्वानुपगमे निर्मूलत्वापत्त्या तन्मूलकानुष्ठानानामश्रद्धेयत्वापातात् वेदमूलकत्वोपगमे असर्वज्ञस्य तदानीन्तनस्यापीदानीन्तनस्येव वेदार्थबोधासम्भवतादवस्थ्यात् अगत्या सर्वज्ञाभ्युपगम आवश्यक इत्याशयवान् उक्तशङ्कां परिहरति—नेति।

अविगानेनेति। निरर्थकत्वप्रसिद्ध्यभावेनेत्यर्थः। तेन न स्तोभसाधारण्यमिति भावः। स्वर्गादिपदवदिति। 'यजेत स्वर्गकाम' इत्यादिविधिवाक्यस्थस्वर्गादिपदस्य 'यन्न दुःखेन संभिन्नम्' इत्यार्थवादवाक्येन यथा अर्थविशेषनिर्णयः तद्वदित्यर्थः। यववराहादिवदिति। यवमयश्चरुः,

यथा ईश्वरप्रणिधानमुपक्रम्य श्रूयते—'सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः। अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य' इति।

एवम्भूतोऽर्थः प्रमाणबाधित इति चेत्—न—प्रागेव प्रतिषेधात्। तथापि न तत्र प्रमाणमस्तीति चेत्—स्वर्गे अस्तीति का श्रद्धा? न ह्युक्तविशेषणे सुखे किञ्चित् प्रमाणमस्त्यस्मदादीनाम्। याज्ञिकप्रवृत्त्यन्यथानुपपत्त्या तथैव तदित्यवधार्यत इति चेत्—न। इतरेतराश्रयप्रसङ्गात्। अवधृते हि स्वर्गरूपे तत्र प्रवृत्तिः, प्रवृत्त्यन्यथानुपपत्त्या च तदवधारणमिति। पूर्ववृद्धप्रवृत्त्या तदवधारणेऽयमदोष इति चेत्—न, अन्धपरम्पराप्रसङ्गात्। विशिष्टादृष्टवशात् कदाचित् कस्यचिदेवंविधमपि सुखं स्यादिति नास्ति विरोधः; तन्निषेधे प्रमाणाभावादिति चेत्—तुल्यमितरत्रापि।

अत्रापि प्रयोगः—यश्शब्दो यत्र वृद्धैरसति वृत्त्यन्तरे प्रयुज्यते स तस्य वाचकः, यथा स्वर्गशब्दः सुखविशेषे प्रयुज्यमानः तस्य वाचकः। प्रयुज्यते चायं जगत्कर्तरीति। अन्यथा

वाराही उपानहौ, वैतसे कटे, इत्यादौ यववराहवेतसशब्दाः कङ्गुवायसजम्बूनां दीर्घशूकशूकरवञ्जुलानां वा वाचका इत्यार्यम्लेच्छप्रसिद्धिभ्यां संशये, "वसन्ते सर्वसस्यानां वाराहं गावोऽनुधावन्ति, अप्सुजो वेतसः" इत्यादिवाक्यशेषाद् निर्णयवदित्यर्थः। तृप्तिः—भोगे निस्स्पृहता। अलुप्तशक्तिः—नित्यप्रवृत्तिः। अङ्गानि—धर्माः।

प्रतिषेधादिति। बाधस्येत्यादिः। उक्तविशेषणे—दुःखासंभेदविशिष्टे। किञ्चित्प्रमाणमिति—शब्दातिरिक्त इति शेषः। शब्दस्योभयत्राविशेषात्। देवानां प्रत्यक्षसंभवादाह—अस्मदादीनामिति। यस्य कस्यचित् प्रत्यक्षस्य ईश्वरेऽपि वक्तुं शक्यत्वात् असदादिप्रत्यक्षादेरेव निषेधसम्भवादिति भावः। अन्यथानुपपत्त्येति। विलक्षणसुखमन्तरा बहुवित्तव्ययायाससाध्ये प्रवृत्त्यनुपपत्तेरित्यर्थः। तथैव तदिति। अर्थवादाधिगतविधमेव स्वर्गसुखमित्यर्थः। प्रवृत्तिव्यक्तिभेदान्नान्योन्याश्रय इति शङ्कते—पूर्वेति।

व्याख्याता इति। वाक्यशेषान्निर्णीतार्थका इति भावः।

पदादित्येतत्पुनरस्मदादिसर्वनामपरतयापि योजयति-अपि चेति। परात्मन्यपि प्रयोगप्रसङ्गादिति। न च अहं पण्डित इति जानाति मौनीत्यत्रानुच्चारयितर्यपि प्रयोगसत्त्वादिष्ट एवायं प्रसङ्ग

निरर्थकत्वप्रसङ्गे सार्थकपदकदम्बसमभिव्याहारानुपपत्तिरिति। एतेन रुद्रोपेन्द्रमहेन्द्रादिदेवता-विशेषवाचका व्याख्याताः।

अपि चास्मत्पदं लोकवद्वेदेऽपि प्रयुज्यते। तस्य च लोके नाचेतनेऽन्यतमदर्थः, तत्र सर्वथैवाप्रयोगात्। नाप्यात्ममात्रमर्थः; परात्मन्यपि प्रयोगप्रसङ्गात्। अपि तु यस्तं स्वातन्त्र्येणोच्चारयति, तमेवाह; तथैवान्वयव्यतिरेकाभ्यामवसायात्। ततो लोकव्युत्पत्ति-मनतिक्रम्य वेदेऽप्यनेन स्वप्रयोक्तैव वक्तव्यः। अन्यथाऽप्रयोगप्रसङ्गात्। न च यो यदो-च्चारयति वैदिकमहंशब्दं, स एव तदा तस्यार्थ इति युक्तम्। तथा सति 'मामुपासीते'त्यादौ स एवोपास्यः स्यात्। 'अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते' इत्युपाध्यायशिष्यपरम्परयै-वात्मन्यैश्वर्यं समधिगच्छेत्। तथा चोपासनां प्रत्युन्मत्तकेलिस्स्यात्। लोकव्यवहारश्चो-च्छिद्येत। तस्मान्नानुवक्ताऽस्य वाच्यः; अपि तु वक्तैवेति स्थिते प्रयुज्यते वेदे अस्मच्छब्दः स्वप्रयोक्तृवचनः अस्मच्छब्दत्वाल्लोकवदिति।

इति वाच्यम्। अस्य स्वतन्त्रोच्चरितासच्छब्दपरत्वात्। द्विविधो ह्यसच्छब्दः स्वतन्त्रोच्चरितः परतन्त्रोच्चरितश्चेति। अहं पण्डित इति जानाति मौनीत्यत्र परतन्त्रोच्चरितः। तस्य स्वघटितवाक्यार्थ-कर्मकवाक्यार्थक्रियाकर्तृवाचकत्वात् परात्मन्यपि प्रयोगस्स्यात्, स्वतन्त्रोच्चरितस्य तु वाक्यान्तरस्थ-क्रियाकर्मतापन्नवाक्यार्थकर्तृत्वेन प्रत्यायनेच्छाधीनस्वोच्चारणकत्वेन न परात्मनि प्रयोगसंभवः। किन्तु स्वतन्त्रोच्चारयितर्यैवेत्युक्तप्रसङ्गे इष्टापत्त्यसम्भवात्। अनुवक्तृव्यावृत्त्यर्थमाह—स्वातन्त्र्येणेति। स्वा-तन्त्र्यमिहोच्चारणे समानविषयकान्यदीयतात्पर्यज्ञानानधीनतात्पर्याधीनत्वम्। स एव—तदानीमुच्चारयितैव। अस्मच्छब्द इति। स्वतन्त्रोच्चरित इत्यर्थः। स्वप्रयोक्तृवचनः—स्वतन्त्रप्रयोक्तृवचनः। अस्म-च्छब्दत्वादिति। अनन्यपरासच्छब्दत्वादित्यर्थः। 'तेन अहं तेजस्वी भूयासं' इति मन्त्रगत-मसच्छब्दमादाय नानैकान्त्यमिति भावः। आहवनीयोपस्थानाङ्गमन्त्रगतत्वेन तस्य यजमानपरत्वात्।

यच्छब्दादीनां क्रमेणार्थमाह—तेषामिति। उपहितमर्यादत्वादिति। बुद्ध्यादिविषय-तावच्छेदकत्वोपलक्षितधर्मावच्छिन्नवाचकत्वात् इत्यर्थः। अत्र बुद्ध्युपक्रमादिपरेण यच्छब्दादिना ईश्वरसिद्धिमाविष्करोति—तस्य चेति। प्रकृतपरो यच्छब्द इत्यत्राह—बुद्ध्युपक्रमो हीति। प्रश्नस्य वक्तृधर्मतामुपपादयति—जिज्ञासेति। परामर्शस्यापि तान्निदर्शयति—प्रतिसन्धानश्चेति। अधिगतस्यैव

एवमन्येऽपि यः कः स इत्यादिशब्दाः द्रष्टव्याः, तेषां बुद्ध्युपक्रमप्रश्नपरामर्शोद्यु-पहितमर्यादत्वात्; तस्य वक्तृधर्मत्वात्। बुद्ध्युपक्रमो हि प्रक्रान्तत्वं, जिज्ञासाविष्करणञ्च प्रश्नः, प्रतिसन्धानञ्च परामर्श इति। एवं च संशयादिवाचका अप्युन्नेयाः। न च जिज्ञासा-संशयादयः सर्वज्ञे प्रतिषिद्धा इति युक्तम्। शिष्यप्रतिबोधनायाहार्यत्वेनाविरोधात्। को धर्मः कथलक्षणक इत्यादिभाष्यवदिति। एतेन धिगङ्गे बत हन्तेत्यादयो निपाता व्याख्याताः।

लिङादिप्रत्ययैरीश्वरसाधनम्

प्रत्ययादपि। लिङादिप्रत्यया हि पुरुषधौरेयनियोगार्था भवन्तस्तं प्रतिपादयन्ति। तथाहि—

> प्रवृत्तिः कृतिरेवात्र, सा चेच्छातो, यतश्च सा।
> तज्ज्ञानं, विषयस्तस्य विधिस्तज्ज्ञापकोऽथवा ॥ ७ ॥

विध्यर्थविचारः

प्रवृत्तिः खलु विधिकार्या सती न तावत्कायपरिस्पन्दमात्रम्, 'आत्मा ज्ञातव्य'

पुनरनुसन्धानमित्यर्थः। तथा चैवं चेतनधर्मतया चेतनान्तरधर्मत्वे अतिप्रसङ्गात् वक्तृचेतनधर्मत्वमे-वैष्टव्यमिति तद्वक्तृत्वेनेश्वरसिद्धिरिति भावः। संशयादिवाचका अपीति। तद्यथा चिकित्सदित्यादय इत्यर्थः। व्याख्याता इति। गर्हाविस्मयखेदानुशयानां वक्तृधर्मत्वेन तदर्थकैरुक्तैरपि वेदगतैः पदैरीश्वरसिद्धिरिति भावः।

विधिप्रत्ययपरतया प्रत्यय इत्येतद्योजयति—प्रत्ययादपीति। पुरुषधौरेयेति। वेदे अस्म-दादीनामसंभवादिति भावः। नियोगार्थाः—प्रवृत्तिप्रयोजकाभिप्रायार्थाः। तदाश्रयतयेश्वरसिद्धि-रिति भावः।

इष्टसाधनत्वादिविधिपक्षे विधिलक्षणमाह—प्रवृत्तिरिति। प्रवृत्तिजनकचिकीर्षाजनकज्ञान-विषयत्वं विधित्वमिति भावः। अत्र विधिलक्षणे अन्यत्र चेष्टादौ प्रवृत्तिशब्दप्रयोगेऽपि प्रकृते यत्नपर एवेति भावः। स्वमतमाह—तज्ज्ञापक इति। प्रवर्तकचिकीर्षाजनकज्ञानविषयस्येष्टसाधन-त्वादेरनुमापकः वक्त्रभिप्राय इत्यर्थः।

इत्याद्यव्यापनात् । नापीच्छामात्रम् तत एव फलसिद्धौ कर्मानारम्भप्रसङ्गात् । ततः प्रयत्नः परिशिष्यते । आत्मज्ञानभूतदयादावपि तस्या भावात् । तदुक्तं–'प्रवृत्तिरारम्भ' इति ।

सेयं प्रवृत्तिर्यतस्सत्तामात्रावस्थितात्, नासौ विधिः; तत्र शास्त्रवैयर्थ्यात् । अप्रतीतादेव कुतश्चित्प्रवृत्तिसिद्धौ तत्प्रत्यायनार्थं तदभ्यर्थनाभावात् । न च प्रवृत्तिहेतुजननार्थं तदुपयोगः, प्रवृत्तिहेतोरिच्छाया ज्ञानयोनित्वात् ज्ञानमनुत्पाद्य तदुत्पादनस्याशक्यत्वात् । तस्य च निरालम्बनस्यानुत्पत्तेः; अप्रवर्तकत्वाच्च, नियामकाभावात् । तस्मात् यस्य ज्ञानं प्रयत्नजननीमिच्छां प्रसूते सोऽर्थविशेषस्तज्ज्ञापको वाऽर्थविशेषो विधिः प्रवर्तना नियुक्तिर्नियोग उपदेश इत्यनर्थान्तरमिति स्थिते विचार्यते–स हि कर्तृधर्मो वा स्यात् । कर्मधर्मो वा, करणधर्मो वा नियोक्तृधर्मो वेति । न प्रथमः—

कर्तृधर्मस्य विध्यर्थत्वनिरासः

इष्टहानेरनिष्टाप्तेरप्रवृत्तेर्विरोधतः ।
असत्त्वात् प्रत्ययत्यागात् कर्तृधर्मो न सङ्करात् ॥ ८ ॥

विधिकार्या—विधिज्ञानकार्या । अव्यापनादिति । 'आत्मा ज्ञातव्य' इत्यत्र चेष्टाया अनुपयोगादिति भावः । तस्या भावादिति । यत्नरूपायाः प्रवृत्तेः सत्त्वादित्यर्थः । उपासनात्मकज्ञानसर्वभूतदयोदयहेतुपर्वसाम्यादिप्रतिसन्धानोपयिकमनोऽवधानस्य यत्नसाध्यत्वादिति भावः । आरम्भ इति । प्रयत्न इत्यर्थः ।

विधिरिति । लिङाद्यर्थ इत्यर्थः । शास्त्रवैयर्थ्यादिति । प्रयोजनवज्ज्ञानस्यैव तत्फलत्वादिति भावः । वैयर्थ्यमेवोपपादयति—अप्रतीतादेवेति । कुतश्चिदिति । इच्छारूपादित्यर्थः । इच्छाप्रत्यायने शास्त्रानुपयोगेऽपि तज्जनने उपयोगः स्यादित्यत्राह—न चेति । ज्ञानस्यैवेच्छाजनकतया तादृशज्ञानोत्पादन एव शास्त्रोपयोगस्य वक्तव्यत्वात् तज्ज्ञानविषयादेव विधिः स्यादिति भावः । तत्र परमतानि निराकृत्य स्वमतं व्यवस्थापयितुं विकल्पयति—स हीति । कर्तृधर्मः—प्रवर्त्यपुरुषधर्मः । चेष्टा इच्छा प्रयत्नो वा । कर्मधर्मः—कर्मणः फलस्यापूर्वस्य क्रियाया वा धर्मः कार्यत्वादिः । करणधर्मः—शब्दधर्मः अभिधाभावनाधर्म इष्टसाधनत्वं वा ।

स हि न स्पन्द एव; आत्मानमनुपश्येदित्याद्यव्याप्तेः; ग्रामं गच्छतीत्यादावतिव्याप्तेश्च। नापि तत्कारणं प्रयत्नः; तस्य सर्वाख्यातसाधारणत्वात्।

प्रयत्नस्य आख्यातार्थत्वसाधनम्

ननु न सर्वत्र प्रयत्न एव प्रत्ययार्थः; करोतीत्यादौ प्रकृत्यर्थातिरेकिणस्तस्याभावात्। सङ्ख्यामात्राभिधानेन प्रत्ययस्य चरितार्थत्वात्। ततो लिङादिवाच्य एव प्रयत्न इति-न कुर्यादित्यत्रापि तुल्यत्वात्। प्रयत्नमात्रस्य प्रकृत्यर्थत्वेऽपि तस्य पराङ्गतापन्नस्य प्रत्ययार्थत्वात् न तुल्यत्वमिति चेत्—न—तथापि तुल्यत्वात्। न चैकस्य तद्वाचकत्वेऽन्यस्य तद्विपर्यय आपद्येत। एको द्वौ बहव एषिषतीत्यादौ व्यभिचारात्। तत्र द्वितीयसङ्ख्येच्छादिकल्पने करोति प्रयतते इत्यादावपि तथा स्यात्। प्रत्येकमन्यत्र सामर्थ्यावक्लृप्तौ सम्भेदे तथा

आद्यकल्पं निराकरोति—इष्टहानेरिति। स्पन्दस्य विधित्वे आत्मानमनुपश्येदित्यादावव्याप्तेरित्यर्थः। अनिष्टाप्तेरिति। 'ग्रामं गच्छती'त्यादावतिव्याप्तेश्चेत्यर्थः। यत्नस्य विधित्वेऽप्युक्तदोषस्तुल्यः। तत्रातिरिक्तमपि दोषद्वयमाह—अप्रवृत्तेरित्यादि। यागयत्नवानिति शतशः श्रवणेऽपि प्रवृत्त्यजननेन स्वात्मकप्रवृत्तिं प्रति यत्नस्य हेतुतया व्याहतत्वेन च तस्य विधित्वासम्भव इति भावः। प्रवर्त्यगताया इच्छायाः विधित्वेऽप्याह—असत्त्वादिति। लिङश्रवणकाले इच्छाया असत्त्वात तस्याः स्वरूपात एव हेतुत्वेन तत्प्रत्ययस्यानुपयोगात् लिङा अर्थविशेषप्रत्यायनमन्तरा इच्छाजननस्य ज्ञानहेतुकत्वस्यागापत्तेरसम्भवाच्चेति भावः। तर्हि लिङः श्रवणदशायामपि सती फलेच्छा विधिरस्त्वित्यत्राह—सङ्करादिति। लिङा फलेच्छाप्रतिपादने स्वर्गकामपदसङ्करापत्तेरित्यर्थः। पौनरुक्त्यापत्तिरिति भावः।

अतिव्याप्तेश्चेति। लङादिस्थलेऽपि चेष्टासत्त्वादिति भावः। सर्वाख्यातेति। अतिव्याप्तितादवस्थ्यमिति भावः।

तुल्यत्वादिति। प्रकृत्यर्थातिरेकियत्नस्याभावेन लिङादिवाच्यत्वस्याप्यभावापत्त्या तुल्यत्वादित्यर्थः। तथापि तुल्यत्वादिति। करोतीत्यादावपि पराङ्गतापन्नस्य कर्तृसंबन्धिनः यत्नस्य प्रत्ययार्थत्वसंभवस्तुल्य इति भावः। प्रकृतिप्रत्यययोरन्यत्र समानार्थकत्वदर्शनादत्रापि प्रकृतिप्रत्यययोरर्थभेदाभावेऽपि न विरोध इत्याह—न चेति। एषिषतीति। धातुसनोरुभयोरपीच्छार्थकत्वादे-

कल्पनायास्तुल्यत्वात्। रथो गच्छतीत्यादौ तदसम्भवे का गतिरिति चेत्—तन्तवः पटं कुर्वन्तीत्यत्र या। लोकाचारोऽयमपर्यनुयोज्य इति चेत्—तुल्यम्। लिङः कार्यत्वे वृद्धव्यवहाराद्व्युत्पत्तौ सर्वं समञ्जसम्। आख्यातमात्रस्य तु न तथेति चेत्—न—विवरणादेरपि व्युत्पत्तेः। अस्ति च तदिह। किं करोति? पचति, पाकं करोतीत्यर्थः इत्यादिदर्शनात्।

तथापि फलानुकूलतापन्नधात्वर्थमात्राभिधाने तदतिरिक्तप्रयत्नाभिधानकल्पनायां कल्पनागौरवं स्यात्। अतो विवरणमपि तावन्मात्रपरमिति चेत्—भवेदप्येवम्, यदि पाकेनेति विवृणुयात्। न त्वेतदस्ति। धात्वर्थस्यैव पाकमिति साध्यत्वेन निर्देशात्। ततस्तं प्रत्येव किञ्चिदनुकूलतापन्नं प्रत्ययेनाभिधानीयमिति युक्तम्। तथापि तेन प्रयत्नेनैव भवितव्यम्, न त्वन्येनेति कुत इति चेत्-नियमेन तथा विवरणात्। बाधकं विना तस्यान्यथाकर्तुमशक्यत्वात्। अन्यथाऽतिप्रसङ्गात्।

कृधातोर्यत्नार्थकत्वसाधनम्

स्यादेतत्—यस्य कस्यचित् फलं प्रत्यनुकूलतापत्तिमात्रमेव करोत्यर्थः, न तु प्रयत्न

कार्यत्वमिति भावः। पटं कुर्वन्तीति। क्वचिद्यत्नाभावेऽपि कृञ इवाख्यातस्यापि औपचारिकः प्रयोग इति समः समाधिरिति भावः। लिङः यत्नार्थकत्वे वृद्धव्यवहारः प्रमाणम्; न तु लडादीनामिति वैषम्यमाशङ्कते—लिङ इति। कार्यत्वस्य कृतिसाध्यत्वरूपत्वादिति भावः। लडादीनां यत्नार्थकत्वे विवरणमेव मानमित्याह—विवरणादेरपीति।

फलानुकूलतापन्नेति। स्वरूपेण धात्वर्थः धातुना प्रत्याय्यते, प्रत्यये तु स एवार्थः फलानुकूलत्वेन फलोपधायकव्यापारत्वेनेति भावः। साध्यत्वेन निर्देशादिति। आख्यातार्थस्य धात्वर्थानुकूलत्वप्रतीत्या तदतिरेकसिद्धेरिति भावः। न च 'ओदनं पचती'त्यत्र पाकेन ओदनं करोतीति विवरणात् धात्वर्थस्य करणत्वमेवेति वाच्यम्। ओदनं प्रति करणतया तथा विवरणेऽपि आख्यातार्थभावनाकर्मत्वाविरोधात्। एतेन 'ज्योतिष्टोमेन यजेते'ति तृतीयान्तसामानाधिकरण्यमपि निर्व्यूढम्। तत्र फलकरणत्वस्यैवानुवादादिति। तथा विवरणादिति। यत्नार्थककरोतिना विवरणादिति भावः।

ननु करोतिः न यत्नार्थकः, किं तु फलानुकूलव्यापारसामान्यार्थकः। तस्मादाख्यातेनापि तद्रूपावच्छिन्न एवोच्यते, न तु यत्नत्वावच्छिन्न इति शङ्कते—स्यादेतदिति। यस्य कस्यचिद्धात्वर्थ-

एव। सोऽपि ह्यनेनैवोपाधिना प्रत्ययेन वक्तव्यः, न तु यत्नत्वमात्रेण; प्रयत्नपदेनाविशेषप्रसङ्गात्। तद्वरं तावन्मात्रमेवास्तु लाघवाय। अन्यथा त्वनुकूलत्वप्रयत्नत्वे द्वावुपाधी कल्पनीयौ; अचेतनेषु सर्वत्र गौणार्थास्तिङोऽसति बाधके कल्पनीया इति चेत्—अत्रोच्यते—

कृताकृतविभागेन कर्तृरूपव्यवस्थया।
यत्न एव कृतिः पूर्वा परस्मिन् सैव भावना ॥ ९ ॥

यत्नपूर्वकत्वं हि प्रतिसन्धाय घटादौ कृत इति व्यवहारात्। हेतुसत्त्वप्रतिसन्धानेऽपि यत्नपूर्वकत्वप्रतिसन्धानविधुराणामङ्कुरादौ तद्व्यवहारात् करोत्यर्थो यत्न एव तावदवसीयते। अन्यथा हि यत्किञ्चिदनुकूलपूर्वकत्वाविशेषात् 'घटादयः कृताः, न कृतास्त्वङ्कुरादय' इति कुतो व्यवहारनियमः। तेन च सर्वमाख्यातपदं विवियत इति सर्वत्र स एवार्थ इति निर्णयः। तथा च समुदिते प्रवृत्तं पदं तदेकदेशेऽपि प्रयुज्यते, विशुद्धिमात्रं पुरस्कृत्य ब्राह्मणे श्रोत्रियपदवत्। अन्यथाऽपि मध्यमोत्तमपुरुषगामिनः प्रत्ययाः,

---

स्यान्यस्य वा। अविशेषप्रसङ्गादिति। पर्यायताप्रसङ्गादित्यर्थः। तावन्मात्रमेवास्त्विति। फलानुकूलत्वमात्रं प्रवृत्तिनिमित्तमस्त्वित्यर्थः। यत्नत्वमात्रस्य प्रवृत्तिनिमित्तत्वे दोषान्तरमाह—अचेतनेष्विति। रथो गच्छतीत्यादौ यत्नत्वावच्छिन्नस्य बाधादिति भावः।

कृताकृतेति। घटादिः कृतः अङ्कुरादिरकृत इति विभागः। कृत्यः यत्नार्थकत्व एवोपपद्यते। अङ्कुरादेर्जलादिहेतुपूर्वकताग्रहेऽपि यत्नपूर्वकत्वाप्रतिसन्धानादिति भावः। कर्तृरूपं—कर्तृत्वं तदपि चेतने व्यवस्थितं तदा स्यात् यदि यत्न एव कृतिस्स्यात्, अन्यथा करणादिसाधारणं स्यादिति भावः। आख्यातस्य तद्वाचकत्वे यत्नपदपर्यायता स्यादित्यत्राह—पूर्वेति। परस्मिन्—उत्तरवर्तिनि धात्वर्थे पूर्वा साधनीभूता सा कृतिरेव भावना आख्यातार्थ इत्यर्थः. धात्वर्थानुकूलत्वेन यत्नबोधनात् न पर्यायत्वमिति भावः।

तेन च—करोतिना च, धात्वर्थानुकूलयत्नार्थकत्वे रथो गच्छतीति कथं प्रयोग इत्यत्राह—तथा चेति। तदेकदेशे—अनुकूलत्वमात्रावच्छिन्ने। श्रोत्रियपदवदिति। तस्य जन्मसंस्कारविद्यावृत्तसमुदायावच्छिन्ने मुख्यत्वादिति भावः। अचेतनगोचरस्य कतिपयप्रयोगस्य गौणत्वाश्रयणं तवाप्यवर्जनीयमित्याह—अन्यथापीति। अनुकूलव्यापारमात्राभिधानेऽपीत्यर्थः। मध्यमोत्तमेति।

प्रथमे पुरुषे जानाति, इच्छति, प्रयतते अध्यवस्यति, शेते, संशेते इत्यादयश्च गौणार्था एवाचेतनेषु। न च वृत्त्यन्तरेणापि प्रयोगसम्भवे शक्तिकल्पना युक्ता; अन्यायश्चानेकार्थत्वमिति स्थितेः। अत एवानुभवोऽपि, यावदुक्तं भवति पाकानुकूलवर्तमानप्रयत्नवान्, तावदुक्तं भवति पचतीति। एव तथाभूतातिवृत्तप्रयत्नोऽपाक्षीदिति, एवं तथाभूतभाविप्रयत्नः पक्ष्यतीति न तु पचतीति पाकानुकूलयत्किञ्चिद्वानिति। अन्यथाऽतिथावपि परिश्रमशयाने पचतीति प्रत्ययप्रसङ्गात्।

अपि च कर्तृव्यापार एव कृञर्थः। चेतनश्च कर्ता; अन्यथा तद्व्यवस्थाऽनुपपत्तेः। न ह्यभिधीयमानव्यापारवत्त्वं कर्तृत्वम्, अनभिधानदशायां कुर्वतोऽप्यकर्तृत्वप्रसङ्गात्। नाप्याख्यातप्रत्ययाभिधानयोग्यव्यापारशालित्वं कर्तृत्वम्, योग्यताया एवानिरूपणात्। फलानुगुणमात्रस्य सर्वकारकव्यापारसाधारणत्वात्। नापि विवक्षातो नियमः, अविवक्षादशायामनियमप्रसङ्गात्। स्वव्यापारे नेदमनिष्टमिति चेत्—एवं तर्हि 'स्वव्यापारे च कर्तृत्वं सर्वत्रैवास्ति कारके' इति न्यायेन करणादिविलोपप्रसङ्गः। न स्वव्यापारापेक्षया करणादिव्यवहारः, किं तु प्रधानक्रियापेक्षया। अस्ति हि कांचित् क्रियामुद्दिश्य प्रवर्तमानानां कारकाणामवान्तरव्यापारयोगः, न त्ववान्तरव्यापारार्थमेव तेषां प्रवृत्तिरिति चेत्—तर्हि

तयोस्सम्बोध्यवक्तृवाचित्वादचेतनस्य बोधोच्चारणासम्भवादिति भावः। अक्षादिपदवत् अर्थान्तरेऽपि शक्तिरेवास्तु किं गौण्येत्यत्राह—न चेति। अनुभवस्वारस्यमपि यत्नार्थकत्वमुपोद्बलयतीत्याह—अत एवेति। परिश्रमशयान इति। शयनस्य क्षुदावेदनद्वारा तत्परिहारफलकपाकानुकूलत्वादिति भावः।

कर्तृरूपव्यवस्थयेति कारिकांशं विवृणोति—अपि चेति। कर्तृव्यापार एवेति। कर्तृशब्दस्य कृञ्धातुनिष्पन्नत्वादिति भावः। तथापि कथं तावता यत्नार्थकत्वसिद्धिरित्यत्राह—चेतनश्चेति। 'स्वतन्त्रः कर्ते'ति पाणिनिलक्षणे स्वातन्त्र्यस्य चेतन एव स्वारसिकत्वादिति भावः। अभिधीयमानेति। आख्यातादिनेति भावः। अभिधानस्य विशेषणत्वे दोषमाह—अनभिधानेति। कर्तृत्वज्ञानाभावे तद्बोधकशब्दप्रयोगासम्भवात् कर्तृत्वज्ञाने शब्दाभिधानं, तदभिधाने कर्तृत्वज्ञानमित्यन्योन्याश्रयश्चात्र दोषः। उपलक्षणत्वेऽप्याह—नापीति। अनिरूपणादिति। अवच्छेदकानवधारणादिति भावः। फलानुगुण्यमेवावच्छेदकमस्त्वित्यत्राह—फलानुगुणेति। फलानुगुण्यमात्रस्येत्यर्थः। तदपेक्षया—प्रधानक्रियापेक्षया। स्वातन्त्र्यादीति आदिना ईप्सिततमत्वादिपरिग्रहः। 'स्वतन्त्रः कर्ते' त्यादनु-

तदपेक्षयैव कर्तृकर्मादिव्यवहारविशेषनियमे किं कारणमिति चिन्त्यताम्। स्वातन्त्र्यादीति चेत्—ननु तदेव किमन्यत् प्रयत्नादि समवायादिति विविच्याभिधीयतामिति। तस्मात् सर्वत्र समानव्यापार एवाख्यातार्थः।

प्रयत्नस्य आक्षेपलभ्यत्वमिति पक्षनिरासः

तथापि फलानुगुणतैवास्तु प्रत्ययस्य प्रवृत्तिनिमित्तं। प्रयत्नस्त्वाक्षेपतो लप्स्यत इति चेत्—न—

भावनैव हि यत्नात्मा सर्वत्राख्यातगोचरः।
तया विवरणध्रौव्यादाक्षेपानुपपत्तिः ॥ १० ॥

केन हि तदाक्षिप्येत। न तावदनुकूलत्वमात्रेण; तस्याः प्रयत्नत्वेनाव्यापनात्। न हि यत्नत्वैकार्थसमवाय्येवानुकूलत्वम्। अत एव न सङ्ख्यया; तस्याः सङ्ख्येयमात्रपर्यवसायित्वात्। कर्त्रेति चेत्—न—द्रव्यमात्रस्याकर्तृत्वात्। व्यापारवतश्चाभिधाने व्यापाराभिधानस्यावश्याभ्युपगमनीयत्वात्। नापि धात्वर्थेन तदाक्षेपः; विद्यते इत्यादौ तदसम्भवात्। न ह्यत्र धात्वर्थो भावनाऽपेक्षी; सत्ताया नित्यत्वात्। तत्र न भविष्यतीति

शासनादिति भावः। प्रयत्नादीति। आदिना ज्ञानचिकीर्षापरिग्रहः। समानेति। यत्नसमानेत्यर्थः। प्रयत्नात्मकव्यापार एवेति यावत्। नन्विह कथमेतदर्थलाभ इति चेदित्थम्। समानव्यापार इत्यत्र समानपदस्य ससम्बन्धिकार्थकत्वात् तदाकाङ्क्षया पूर्वपदोपस्थितस्य स्वतन्त्रव्यापारस्य सम्बन्धित्वानुसन्धाने स्वातन्त्र्यसमानस्य स्वातन्त्र्यात्मकस्य व्यापारस्य लाभात् स्वातन्त्र्यस्य चात्र प्रथमत एवोक्तेरिति।

अथ फलानुगुण्यमेवास्तु प्रवृत्तिनिमित्तमाख्यातस्य यत्नरूपविशेषलाभस्तु आक्षेपतस्यादिति शङ्कामनूद्य दूषयति—तथापीति। आक्षेपत इति। यत्नं विना पाकाद्यनुपपत्तेरिति भावः। आख्यातगोचरः—आख्यातप्रतिपाद्यः। तत्र हेतुमाह—तयेति। तया—भावनया। विवरणेति। पचति पाकं भावयतीति विवरणादिति भावः। आक्षेपानुपपत्तिम् इत्येतद्विवृणोति—केन हीति। कर्त्रेति। आख्यातवाच्येनेति शेषः। द्रव्यमात्रस्येति। निर्व्यापारस्येति भावः। व्यापारवत इति। यत्नात्मकव्यापारवत इत्यर्थः। व्यापारसामान्यस्याचेतनसाधारण्यात् न तद्वता यत्नाक्षेपसंभवः। अतः यत्नवदभिधाने यत्नस्याप्यभिधानात् कृतमाक्षेपेणेति भावः। न भविष्यतीति। आक्षेप इति शेषः। निरस्यति—नेति। पूर्वापरीभूतेति-हेतुफलभूतेत्यर्थः। पचतीत्यादाविव अत्रापि

चेत्—न—पूर्वापरीभूतभावनानुभवस्याविशेषात्। भावनोपरागेण ह्यतथाभूतोऽप्यर्थस्तथा-भासते इति। न च पदान्तरलब्धया भावनयाऽनुकूलतया प्रत्ययार्थस्यान्वयः; तद-सम्भवात्। न खलु प्रकृत्यैव साऽभिधीयते। धातूनां क्रियाफलमात्राभिधायित्वात्। अन्यथा पाक इत्यादावपि भावनानुभवप्रसङ्गात्। नापि चैत्र इत्यादिना पदान्तरेण; प्रकृति-प्रत्यययोरुभयोरप्यकारकार्थत्वात्। ओदनमित्यादेः कारकपदत्वात् तस्य च क्रियोपहितत्वात् तेनाभिधानमाक्षेपो वा। कथमन्यथा ओदनमित्युक्ते किं भुङ्क्ते पचति वेति विशेषाकाङ्क्षेति चेत्—न—पचतीत्युक्ते किमोदनं तेमनं वेति विशेषाकाङ्क्षादर्शनात्। सा चाक्षेपाभिधानयोर-न्यतरमन्तरेण न स्यात्। तस्यां दशायां न चेदाक्षेपः; नूनमभिधानमेवेति।

कर्ताप्याख्यातार्थ इति मतनिरासः

स्यादेतत्—अभिधीयतां तर्हि कर्ताऽपि। तदनभिधाने हि सङ्ख्येयमात्रमाक्षिप्य सङ्ख्या कथं कर्तारमन्वियात्, न तु कर्मादिकमपि। शाकसूपौ पचति शाकसूपौदनान्

साध्यतया धात्वर्थानुभवस्य अविशिष्टत्वादिति भावः। ततः किमित्यत्राह—भावनोपरागेणेति। अतथा-भूतः—पूर्वापरभावरहितः। तथा भासते—पूर्वापरभावेन भासते। धात्वर्थानुकूलतया भावना-भानादेव हि नित्योऽपि धात्वर्थः प्रकृते भावनासाध्य इव भासते इति वक्तव्यम्। तदनुरोधे आख्यात-वाच्यत्वं आक्षिप्तत्वं वा यत्नस्यावश्यकमिति भावः। तदसंभवादिति। पदान्तरेण भावनाया अलाभादिति भावः। प्रकृत्यैव—धातुनैव। क्रियाफलमात्राभिधायित्वादिति। लाघवात् फलमेव धात्वर्थः। पाकानन्तरमपि फलसत्त्वेन पचतीति प्रयोगप्रसङ्गस्त्वाख्यातवाच्यव्यापारविरहात् वारणीयः। तण्डुलादेः परसमवेतव्यापारजन्यफलशालित्वात् कर्मत्वम्। व्यापारस्तु धात्वर्थ आख्यातार्थो वेति न नियम इति मतमाश्रित्येदमुक्तम्। अन्यथा धातुनैव भावनाभिधाने प्रकृतिप्रत्यययोः चैत्रपदतदुत्त-रविभक्त्योः। अकारकार्थत्वादिति। कारकार्थकत्वे कारकत्वस्य क्रियानुकूलत्वरूपत्वात् भावनार्थक-त्वमपि संभाव्येतेति भावः। तर्हि कर्मवाचिपदेन तदभिधानं स्यादित्याशङ्कते—ओदनमिति। कर्मवाचिपदाप्रयोगेऽपि क्रियापदश्रवणेन विशेषाकाङ्क्षादर्शनेन क्रियापदेन भावनासामान्याभिधान-मावश्यकमिति समाधत्ते—पचतीत्युक्त इति।

एवं सति कर्तारमप्यभिधत्तामिति प्रतिबन्दीनाह—स्यादेतदिति। न तु कर्मादिकमिति। आक्षेपस्य तुल्यत्वादिति भावः। का गतिरिति। उभयोरेकवचनान्तत्वेन विरोधाप्रतिसन्धानादिति

पचतीत्यादौ विरोधनिरस्ता सङ्ख्या चैत्र इति कर्तारमविरुद्धमनुगच्छतीति चेत्- चैत्र ओदनं पचतीत्यत्र का गतिः। एकत्र निर्णीतः शास्त्रार्थोऽपरत्रापि तथा, यववराहादिवदिति चेत्--न--पच्यत इत्यादावपि तथाभावप्रसङ्गात्। चैत्राभ्यां चैत्रैरिति विरोधनिरस्ता सूप इत्यविरुद्धं कर्म समनुक्रामतीति चेत्। चैत्रमैत्राभ्यां शाकसूपौ पच्येते इत्यत्र का गतिः। अन्यत्र निर्णीतेनार्थेन व्यवहार इति चेत्—न-पचतीत्यादावपि तथाभावप्रसङ्गात्। तत्र पूर्वोक्त एव निर्णयः, पच्यते इत्यत्र त्वपर इति चेत्—न-विशेषाभावात्। आत्मनेपदपरस्मैपदाभ्यां विशेष इति चेत्—न-पच्यते, पचते पक्ष्यते इत्यादौ विप्लवप्रसङ्गादिति।

आख्यातार्थसंख्यान्वयविचारः

दृश्यते च समानप्रत्ययाभिहितेनान्वयस्सङ्ख्यायाः। तद्यथा भूयते, सुप्यत इत्यादौ। न हि तत्र कर्त्रा कर्मणा वाऽन्येनैव वा केनचिदन्वयः, किं तु भावेनैव। अनन्वये तदभिधायिनोऽनर्थकत्वप्रसङ्गात्। आक्षिप्तेन चान्वये तत्रापि कर्त्रैवान्वयापत्तेः। को हि सुप्यते स्वपितीत्यनयोः कर्त्राक्षेपं प्रति विशेषः।

भावः। एकत्र निर्णीत इति। विरुद्धवचनकर्मवाचिपदसमभिव्याहारे कर्तृगामित्वेन निश्चयात् समानवचनकर्मपदसमभिव्याहारेऽपि तथैव निश्चय इति भावः। तथाभावप्रसङ्गादिति। कर्त्राख्यातनिर्णीतशास्त्रार्थाभ्युपगमापत्तेरिति भावः। विरुद्धवचनपदोपस्थाप्यकर्त्रन्वयासंभवात् कर्मान्वय इत्याह—चैत्राभ्यामिति। का गतिरिति। वचनविरोधगतेरभावादिति भावः। अन्यत्र—विरुद्धवचनकर्तृवाचकपदसमभिव्याहारस्थले। पचतीत्यादावपीति। तथाभावेति। कर्मान्वयप्रसङ्गादित्यर्थः। यक्तदभावाभ्यां विशेषोक्तावप्याह—पक्ष्यत इति। कर्तृकर्मणोरेकरूपत्वात् न विशेषः सुवच इति भावः।

संख्येयसंख्ययोरेकप्रत्ययवाच्यत्वे परस्परान्वयो न स्यात्, विभिन्नपदबोध्ययोरेवान्वयदर्शनात् इत्यत्राह—दृश्यत इति। समानप्रत्ययः—एकप्रत्ययः। भावेनैवेति। आख्यातस्य तत्र भावपरत्वादिति भावः। तदभिधायिनः—संख्याभिधायिनः।

भावकर्मलकारस्थले विशेषं शङ्कते—स्यादेतदिति। कर्तारमेवेति। कारकेषु कर्तुरेव प्राथमिकत्वादिति भावः। कर्तर्यप्यनुशासनसत्त्वात् न विशेषः कश्चिदपीति परिहरति—नेति।

स्यादेतत्—'भावकर्मणोरि'त्याद्यनुशासनबलात्तावत् भावकर्मणी प्रत्ययवाच्ये। ततस्तदभिहिता सङ्ख्या ताभ्यामन्वीयते। यस्तु प्रत्ययो न तत्रोत्पन्नः, तदभिहिता सङ्ख्या 'मुख्यं वा पूर्वचोदनाल्लोकवत्' इति न्यायेन कर्तारमेवाश्रयत इति नियमः, न, विपर्ययप्रसङ्गात्। 'शेषात् कर्तरि परस्मैपदम्' 'कर्तरि शप्' इत्यनुशासनबलात् भावकर्तारौ प्रत्ययवाच्यौ, ततस्तदभिहिता सङ्ख्याऽपि ताभ्यामन्वीयते; यस्तु प्रत्ययो न तत्रोत्पन्नस्तदभिहिता सङ्ख्या तेनैव न्यायेन कर्मैव समाश्रयेदिति नियमोपपत्तेः। तस्मान्मतिकर्दममपहाय यथाऽनुशासनमेव गृह्यत इति प्राप्तम्। एवं प्राप्तेऽभिधीयते—

आक्षेपलभ्ये सङ्ख्येये नाभिधानस्य कल्पना।
सङ्ख्येयमात्रलाभेऽपि साकाङ्क्षेण व्यवस्थितिः॥ ११॥

सङ्ख्यापि तावदियं भावनानुगामिनी; यं यं भावनान्वेति तं तं सङ्ख्यापीति स्थितेः; एकप्रत्ययवाच्यत्वनियमात्। भावना च शुद्धं प्रातिपदिकार्थमात्रमाकाङ्क्षति। न हि व्यापारवन्तं व्यापार आश्रयते, आत्माश्रयात्। समवायं प्रति तदनुपयोगात्। विजा-

---

विपर्ययप्रसङ्गादिति। अयं भावः—भावकर्मणोरिव कर्तर्यप्यनुशासनमविशिष्टं, तथापि यदि भावकर्मणोरेव समानाभिधानश्रुत्या सङ्ख्यान्वयः कर्तरि तु कचित् कुतश्चित् न्यायादित्युच्यते, तदा भावकर्त्रोरेव समानाभिधानश्रुत्या सङ्ख्यान्वयः, कर्मणि तु कचित् कुतश्चित् न्यायादेवेति केनचिदुक्ते किं प्रतिवक्तव्यमिति। ननूक्तन्यायः कर्मणि न संभवति, मुख्यत्वाभावादिति चेत्, प्रथमान्तपदोपस्थाप्यत्वेन विशेष्यत्वादत्र कर्मणः प्रथमोपस्थितत्वरूपमुख्यत्वसत्त्वादुक्तन्यायप्रसरस्य न विरोध इत्याशयेनाह—तेनैव न्यायेनेति। मुख्यं वेत्युक्तन्यायेनैवेत्यर्थः। उद्देश्यत्वेन कर्मणोऽपि मुख्यत्वादिति भाव इत्यप्याहुः।

सङ्ख्यया सङ्ख्येयाक्षेपेऽपि तस्याः समानप्रत्ययाभिधेयभावनानुगामितया भावनासाकाङ्क्षेणैवान्वयोपगमात् न व्यवस्थानुपपत्तिरिति समाधत्ते—अभिधीयत इति। नाभिधानस्य कल्पनेति। अनन्यलभ्यः खलु शब्दार्थ इति भावः। सङ्ख्येयमात्रलाभे—सङ्ख्येयसामान्यलाभे। साकाङ्क्षेण-भावनासाकाङ्क्षेण। भावनानुगामिनीति। भावनाविशेष्यविशेषणभूतेत्यर्थः। एकप्रत्ययेति। आख्यातार्थप्रकारकबोधे कारणैक्यकृतं लाघवमभिप्रेतम्। शुद्धं—निर्व्यापारत्वेनोपस्थितं तद्व्यापार-

तीयव्यापारवतोऽङ्गत्वाच्च । न च द्वितीयाद्याः प्रातिपदिकविभक्तयः । ततः प्रथमा-निर्दिष्टैव भावनाऽन्वीयत इति तस्यान्वययोग्यतानियमात् सङ्ख्याऽपि तदनुगामिनी तेनैवान्वीयत इति नातिप्रसङ्गः, नञर्थवत् । यथा हि चैत्रो न ब्राह्मणो न गौरो न स्पन्दते न कुण्डलीत्यादौ विशेषणविशेष्यसमभिव्याहाराविशेषेऽपि नञा तदनभिधानाविशेषेऽपि नञर्थस्य विशेषणांशैरेवान्वयः; न विशेष्यांशेन ।

ननु बाधात् तत्र तथा । न हि विशेष्येण तदन्वये विशेषणोपादानमर्थवत् भवेत्, तन्निषेधेनैव विशेषणनिषेधोपलब्धेः उभयनिषेधे चावृत्तौ वाक्यभेदात्; अनावृत्तौ निराकाङ्क्षत्वादिति चेत् न—तुल्यत्वात् । समानप्रत्ययोपात्तभावनाऽऽक्षिप्तान्वयोपपत्तौ बाधकं विना

आश्रयत इत्युक्तौ दोषमाह—आत्माश्रयत्वादिति । विशिष्टे विशेषणबुद्धेः विशेष्यतावच्छेदकत्व-बुद्धिजन्यत्वादिति भावः । वैशिष्ट्यस्य विशेषणाद्भिन्नस्यैव विशेष्यतावच्छेदकत्वमित्युपगमात् कथञ्चि-दुक्तदोषवारणेऽपि दोषान्तरमाह—समवायं प्रतीति । व्यापारसम्बन्धं प्रति व्यापारविशेषणस्यानु-पयुक्तत्वादित्यर्थः । विजातीयव्यापारवत्त्वस्य व्यावर्तकत्वायोगेनानाकाङ्क्षितत्वादिति यावत् । कर्मत्वादि-मत्त्वस्य प्रयोजकत्वे पूर्वोक्तात्माश्रयाप्रसक्तावपि अनवस्था स्फुटेति दोषान्तरमाह—विजातीयेति । कर्मत्वादिमतो न भावनाश्रयत्वान्वययोग्यतेति भावः । कर्मत्वाद्यनुक्तौ न विरोधः स्यादित्यत्राह—न चेति । कर्मत्वादिमत्त्वस्योपस्थितत्वाविशेषेऽपि साकाङ्क्षैवान्वय इत्यत्र दृष्टान्तमाह—नञर्थवदिति । तमुप-पादयति—यथा हीति । गुणक्रियाद्रव्यनिषेधाभिप्रायाणि क्रमेणोदाहरणानि । नञा विशेषणान-भिधानात्तदभाव एवाभिहितस्स्यादित्यत्राह—नञा तदनभिधानेति । विशेष्यवद्विशेषणस्याप्यनभि-धानं तुल्यम्, अभावमात्राभिधायकत्वादिति भावः ।

नञर्थवैषम्यं शङ्कते—नन्विति । तन्निषेधेनैव—विशेष्यनिषेधेनैव । विशेषणनिषेधेति । विशेषमाश्रयमन्तरा गुणादिविशेषणानामसम्भवादिति भावः । चैत्रादिविशेष्यव्यक्त्यतिरिक्ते गौरत्वादि-संभवेन तन्निषेधसार्थक्यं मन्वानं प्रत्याह—उभयनिषेधे चेति । निराकाङ्क्षत्वादिति । विशेष्या-न्वयेनैव एकस्य नञः आकाङ्क्षानिवृत्तेरिति भावः । भावनान्वयिनि अन्वयेन सङ्ख्याया अपि नैराकाङ्क्ष्यात् न वैषम्यमिति परिहरति—न तुल्यत्वादिति । नन्वस्तु भावनाक्षिप्ते सङ्ख्यान्वयः, तथापि द्वितीयान्तोपस्थाप्यस्य कुतो भावनया नाक्षेपः, क वा तत्र भावनान्वयः इत्यत्राह—भावनाया-

सन्निहितत्यागेन व्यवहितपरिग्रहस्य गुरुत्वात् । भावनायाश्च सामान्याक्षेपेऽपि साकाङ्क्ष-परित्यागे निराकाङ्क्षान्वयानुपपत्तेः । न ह्यन्यतराकांक्षा अन्वयहेतुः, अपि तूभया-काङ्क्षा । प्रातिपदिकार्थो हि फलेनान्वयमलभमानः क्रियासम्बन्धमपेक्षते, भावनाऽपि व्या-पारभूता सती व्यापारिणमित्युभयाकाङ्क्षा अन्वयहेतुः । कटं कटेनेत्यादि तु कारकतयैव फलसमन्वितं न व्यापारान्तरमपेक्षत इति निराकाङ्क्षमिति । अत एवास्यते सुप्यत इत्यादौ नाक्षिप्तेनान्वयः । न हि चैत्रेणेति तृतीयान्तशब्दस्य भावनायामाकाङ्क्षाऽस्ति । भाव्या-काङ्क्षाऽस्तीति चेत्—न—फलेन शयनादिधात्वर्थेनान्वयात् । फलसंबन्धिनश्चात्र कर्त्रनति-रेकात् । न हि शयनाद्या धात्वर्थाः कर्त्रतिरेकिसंबद्धाः । न च फलतत्सम्बन्धिव्यति-रेकेणान्यो भाव्यो नाम, यमपेक्षेत ।

अभिधानानभिधानविचारः

स्यादेतत्—किमिति न प्रयुज्यते कटः करोति चैत्रमित्यादि, अभिहितानभिहितव्य-वस्थाऽभावादिति चेत्—न, चैत्रमिति प्रथमान्तस्यासाधुत्वात् । द्वितीयान्तस्य तु कर्मवचन-

---

श्चेति । प्रथमान्तपदोपस्थाप्यस्य च भावनायाश्च परस्पराकाङ्क्षया उभयाकाङ्क्षासंभवः । न तु द्विती-याद्यन्तोपस्थाप्यस्य द्वितीयायुक्तफलादिसंबन्धेनैव नैराकाङ्क्ष्यादित्याह—प्रातिपदिकार्थो हीति । कारकतयैव फलसमन्वितमिति—कारकतायाः क्रियानुकूलत्वरूपत्वेन तत्तत्क्रियात्मकफलसम्बन्धः स्फुट इति भावः । अत एव—उभयाकाङ्क्षाया अन्वयहेतुत्वादेव । नाक्षिप्तेनान्वय इति । कर्त्रेति शेषः । तदुपपादयति—नहीति । तृतीयोक्तव्यापारान्वयेन कर्तुः व्यापारनिराकाङ्क्षत्वादिति भावः । भाव्याकाङ्क्षा—फलाकाङ्क्षा । फलेनेति । अकर्मकस्थले धात्वर्थस्यैव फलतया तदन्वयेनैव फलाकाङ्क्षानिवृत्तेरिति भावः । ननु क्रियाजन्यफलशालि भाव्यमिति चेत् तत्राह—फलसंबन्धिन इति । कर्त्रनतिरेकादिति । न हि कर्तुः भाव्यत्वमिति भावः । फलतच्छालिव्यतिरिक्तमन्यत् किञ्चिदिह भाव्यं स्यादिति शङ्कां निराकरोति—न चेति ।

आख्यातेन कर्त्राद्यनभिधाने कर्तृकर्मलकारसमभिव्याहारे कर्त्रादिवाचकपदात् प्रथमाद्वितीयादि-विभक्तिप्रयोगनियमानुपपत्तिरिति शङ्कते—स्यादेतदिति । चैत्रमिति प्रथमान्तं द्वितीयान्तं वेति विकल्प्य क्रमेण दूषयति—चैत्रमिति । असाधुत्वादिति । प्रथमायां पुल्लिङ्गे अमः अननुशासना-

त्वेन तत्संबन्धात् भाव्यानपेक्षिणी भावना भावकमात्रमपेक्षेत । न च कटस्य चैत्रं प्रतिभावकत्वं, विपर्ययात् । अनाप्तेन तु विवक्षायां प्रयुज्यत एव । प्रयुज्यतां तर्हि कटः करोति चैत्र इत्यादि—न—नित्यसन्दिग्धत्वेन वाक्यार्थासमर्पकत्वात् । ततस्तदुपपत्तये विशेषस्य व्यञ्जनीयत्वात् । व्यज्यतां तर्हि तृतीयया चैत्रेणेति, एवं देवदत्तः क्रियते कटमिति व्यज्यतां द्वितीययेति चेत्—न—अप्रयोगात् । न ह्यनाप्तेनाप्येवंप्रयाणि प्रयुज्यन्ते । लक्षणाविरोधेन कुत एतदेवेति चेत्—लोकस्यापर्यनुयोज्यत्वात् । न हि गार्गिकयेति पदं साधिवति श्लाघाऽभिधायिपदसन्निधिमनपेक्ष्य प्रयुज्यते । तस्य तदुपाधिनैव विहितत्वादिति चेत्—एतदेव कुतः ? लोके तथैव प्रयोगदर्शनादिति चेत्—तुल्यम् । करोतीत्यादिकर्मविभक्तिसमभिव्याहारेणैव प्रयुज्यते, क्रियत इति कर्तृविभक्तिसमभिव्याहारेणैवेति किमत्र क्रियताम् । इममेव विशेषमुररीकृत्यानभिहिताधिकारानुशासनेन ह्येतावान् परामर्शस्सर्वेषां हृदि पदमादधातीत्यभिधानानभिधानविभाग एव व्युत्पादनदशायां पेशल इति ।

कालत्रयापरामृष्टा भावना लिङर्थ इति पक्षस्य निरासः

स्यादेतत्—भवतु सर्वाख्यातसाधारणी भावना ; कालविशेषसम्बन्धिनी सा लडाद्यर्थः,

---

दिति भावः । विपर्ययादिति । कटं प्रत्येव चैत्रस्य भावकत्वादिति भावः । नित्यसन्दिग्धत्वेनेति । भाव्यभावकसन्देहनियमेनेत्यर्थः । विशेषाभिव्यञ्जकद्वितीयादिविभक्त्यश्रवणादिति भावः । वाक्यार्थेति । वाक्यार्थानिश्चायकत्वादित्यर्थः । अप्रयोगादिति । पूर्वप्रयोगाभावादित्यर्थः । स एव कुत इत्याशङ्कते—लक्षणेति । व्याकरणाद्यविरोधेनेत्यर्थः । अपर्यनुयोज्यत्वादिति । तदनुसारेणैव व्याकरणप्रवृत्तेरिति भावः । तदुपाधिनैव विहितत्वादिति । 'गोत्रचरणाच्छ्लाघात्याकारतदवेतेष्वि'त्यनेन श्लाघाद्युपाधिनैव वुञो विधानात् । गार्गिकया श्लाघत इति । गार्ग्यत्वेन विकत्थत इत्यर्थे प्रयोग इति भावः । तथाविधान एव किं कारणमिति पृच्छति—एतदेवेति । तर्ह्यनभिहिताधिकारे द्वितीयाद्यनुशासनमनर्थकमित्यत्राह—इममेवेति । पूर्वप्रयोगनियममेवेत्यर्थः । प्रथमान्तार्थविशेषणतया कृत्याद्यभिधानेन कर्त्राद्यभिधानादिविभागः बालानां निरुक्तप्रयोगनियमव्युत्पादनार्थ इति भावः ।

अथ यत्नस्य सर्वाख्यातसाधारण्येऽपि कालवैशिष्ट्यभानाभानाभ्यां अस्ति विशेष इति शङ्कते—स्यादेतदिति । यत्नपदेनेति । कालविशेषाबोधकत्वादिति भावः । यागयत्नवानिति । यागयत्नेति

कालत्रयापरामृष्टा लिङर्थ इति चेत्—न, यत्नपदेन समानार्थत्वप्रसङ्गात् । विषयोपरागानुपरागाभ्यां विशेष इति चेत्—न, यागयत्न इत्यनेन पर्यायतापत्तेः । कर्तृसङ्ख्याभिधानानभिधानाभ्यां विशेष इति चेत्—न, यागयत्नावित्यनेन साम्यापत्तेः । इष्ट एवायमर्थ इति चेत्—न, इतो वत्सरशतेनाप्यप्रवृत्तेः । फलसमभिव्याहाराभावात् न प्रवर्तत इति चेत्—न, स्वर्गकामो यागयत्नवानित्यतोऽप्यप्रवृत्तेः । तत् कस्य हेतोः ? न हि यत्नो यत्नस्य हेतुः यत्नप्रतीतिर्वा यत्नस्य कारणम्; अपि त्विच्छा ।

इच्छाया विध्यर्थत्वनिरासः

न च साऽपि प्रतीता यत्नजननी, येन सैव विध्यर्थ इत्यनुगम्यताम्, अपि तु सत्तया । न च लिङः श्रुतिकाले सा सती । न च लिङेव तां जनयति; अर्थविशेषमप्रत्याययन्त्यास्तस्यास्तज्जनकत्वे व्युत्पत्तिग्रहणवैयर्थ्यात् । अनुपलब्धलिङश्चेच्छानुत्पत्तिप्रसङ्गादिति । एतेन वृद्धव्यवहाराद्व्युत्पत्तिर्भवन्ती बालस्यात्मनि प्रवृत्तिहेतुर्योऽवगतस्तमेवाश्रयेत्, स्वयञ्च कुर्यामिति सङ्कल्पादेवायं प्रवृत्तः, ततस्स एव लिङर्थ इति निरस्तम् । कुर्यामिति

विषयोपरक्तयत्नस्य मतुपा कर्तुः एकवचनेन तत्सङ्ख्यायाश्चाभिधानादिति भावः । अप्रवृत्तेरिति । यजेतेत्यनेनेव यागयत्नवानिति वाक्येन सहस्रशः श्रुतेनापि प्रवृत्त्यदर्शनात् समानार्थत्वं न युज्यत इति भावः । एतेन 'इष्टहानेरि'ति कारिकास्थमप्रवृत्तेरित्येतद्व्याख्यातम् । फलसमभिव्याहाराभावादिति । 'स्वर्गकामो यजेते'ति विधिवाक्येनेव यत्नवानिति वाक्यात् भावनाया इष्टभाव्यकत्वानवगमात् न प्रवृत्तिरुदेतीति भावः । फलबोधकपदसमभिव्याहारेऽपि यागयत्नवानिति वाक्यात् न प्रवृत्तिरित्याह—नेति । उक्तवैषम्यहेतुमर्थभेदं वक्तुं प्रश्नमुपक्षिपति—तदिति ।

कारिकास्थ'मसत्त्वादि'त्येतदभिप्रेत्याह—न च लिङ इति । प्रत्ययत्यागादित्येतत् व्याख्याति—न च लिङेवेति । इच्छां प्रति प्रत्ययस्य हेतुत्वत्यागादित्यर्थः । व्युत्पत्तिग्रहणवैयर्थ्यादिति । अव्युत्पन्नानामपि लिङादिश्रवणादिच्छापत्तिरिति भावः । लिङ एवेच्छाहेतुत्वे व्यतिरेकव्यभिचार इत्याशयेनाह—अनुपलब्धेति । सङ्कल्प एव लिङर्थ इति मतमपि निरस्तमित्याह—एतेनेति । यत्नेच्छयोः विध्यर्थत्वनिरसनेनेत्यर्थः । स्वात्मनीति । यत्नस्यैव यत्नं प्रति हेतुत्वे स्वस्य स्वपूर्ववृत्तित्वरूपकारणत्वविरोध इत्याशयः । एतेन कारिकास्थ 'विरोधत' इति व्याख्यातम् । निर्वग्राहि-

प्रयत्नो वा स्यादिच्छा वा ? नाद्यः, स्वात्मनि वृत्तिविरोधात् । न द्वितीयः, सा हि सत्तयैव प्रयत्नोत्पादिनी । न च लिङः श्रुतिकाले सा सतीत्युक्तम् । फलेच्छा तु निसर्गतोऽहितया सत्यपि न प्रयत्नं प्रति हेतुः; अन्यविषयत्वात् । तदर्थश्च शास्त्रवैयर्थ्यात् । तस्याः कारणान्तरत एव सिद्धेस्तत्प्रतीत्यर्थमपि शास्त्रानपेक्षणात् । तस्याः मनोवेद्यत्वात् । अप्राप्ते च शास्त्रानवकाशात् । तदभिधाने च स्वर्गकाम इति कर्तृविशेषणपौनरुक्त्यात् । तदा हि यजेतेत्यस्यैव यागकर्ता स्वर्गकाम इत्यर्थस्स्यात् ।

यदि च फलविषयैव साधनविषयं प्रयत्नं जनयेत्, अन्यत्रापि प्रसुवीत, नियामकाभावात् । हेतुफलभाव एव नियामक इति चेत्—न—अज्ञातस्य तस्य नियामकत्वे लिङं विनापि स्वर्गेच्छातो यागे प्रवृत्तिप्रसङ्गात् । ज्ञातस्य तु तत्साधनत्वस्य नियामकत्वे तदिच्छैव तत्र प्रवर्तयतु; यो यत्कामयते स तत्साधनमपि कामयत एवेति नियमात् । न च सा

तथा स्वभावसिद्धतया स्वसमानविषयकज्ञानेतरनिरपेक्षतया अन्येच्छानधीनतयेति यावत् । सत्यपीति । लिङः श्रवणकाल इति शेषः । शास्त्रवैयर्थ्यादिति । फलेच्छाया उत्पत्तौ ज्ञप्तौ वा शास्त्रस्याहेतुत्वादिति भावः । तदेवोपपादयति—तस्या इति । कारणान्तरतः—फलज्ञानात् । प्राप्ते चेति । अप्राप्ते हि शास्त्रमर्थवदिति भावः । दूषणान्तरमाह—तदभिधाने चेति । फलेच्छाभिधाने चेत्यर्थः । कर्तृविशेषणेति । स्वर्गकाम इत्यस्य पौनरुक्त्यं, लिङैव स्वर्गरूपफलकामनाया उक्त्युपगमादिति भावः । एतेन सङ्करादिति कारिकांशस्य फलेच्छाप्रतिपादने स्वर्गकामलिङ्पदयोः सङ्कर इत्यर्थ उक्तः ।

फलेच्छाया असमानविषयप्रयत्नजनकत्वोपगमे अनिष्टमाह—यदीति । अन्यत्रापि—असाधनेऽपि । असमानविषयकत्वाविशेषादिति भावः । हेतुफलभाव इति । फलेच्छा तत्साधन एव प्रवृत्तिं जनयतीति भावः । तदिच्छैव—साधनेच्छैव । साधनेच्छा न स्वत इत्यत्राह—य इति । सा—साधनेच्छा । तदानीम्—लिङ्श्रवणकाले । तज्ज्ञानमेव—साधनेच्छाज्ञानमेव । एवकारेण इच्छाव्यवच्छेदः । लिङधीनेच्छाज्ञानमेव प्रवर्तकमित्यत्राह—लिङो वेति । इच्छाज्ञानेऽपि इच्छोत्पादानियमादिति भावः । स्वसंबन्धितयेति । स्ववृत्तितया यदेच्छां प्रत्येति तदा प्रवर्तत इति भावः । तदनभिधान इति । मध्यमपुरुषस्थले खलु संबोध्यसंबन्धितया क्रियापदार्थावगम इति भावः । न केवलं विधेरविधित्वापत्तिः, किं त्वविधेरपि विधित्वापत्त्या प्रवर्तकत्वापत्तिरित्याह—ओदनकाम इति ।

तदानीं सती । न च तज्ज्ञानमेव प्रयत्नजनकम्; तच्च लिङा क्रियत इति युक्तम्; स्वर्गकामो यागचिकीर्षाऽनित्यतोऽपि प्रवृत्तिप्रसङ्गात् । लिङोवेच्छां प्रतीत्यानिच्छन्नपि सर्वः प्रवर्तेत । स्वसम्बन्धितया तदवगमस्तथा न तु सामान्यत इति चेत्—न—प्रथमपुरुषेण तदनभिधाने तस्याविध्यर्थत्वप्रसङ्गात् । ओदनकामस्त्वं पाकचिकीर्षाऽनित्यतोऽपि प्रवृत्त्यापत्तेश्च ।

अपि च सङ्कल्पज्ञानाद्यदि प्रयत्नो जायेत, तथापि सङ्कल्पस्य कुतो जन्म किमर्थश्च ? सङ्कल्पज्ञानादेव, प्रयत्नार्थं चेति चेत्—नन्विच्छाविशेषः सङ्कल्पः, स तावत् सुखे स्वभावतः, तत्साधने चौपाधिकः, सङ्कल्पविषयस्तु कथम् ? तत्साधनत्वादेवेति चेत्—तर्हि तत्साधनत्वज्ञानात्, न तु सङ्कल्पस्वरूपज्ञानात् भवितुमर्हतीति । अन्यथेष्टसाधनताज्ञानमप्यनर्थकमापद्येत ।

दूषणान्तरमाह—अपि चेति । सङ्कल्पज्ञानादिति । लिङधीनादिति भावः । कुतो जन्मेति । लिङस्तज्ज्ञान एव हेतुत्वादिति भावः । किमर्थमिति । प्रवृत्तेः सङ्कल्पज्ञानादेवोत्पत्तेरभ्युपगमादिति भावः । सङ्कल्पज्ञानादेवेति । सङ्कल्पस्य जन्मेति संबन्धः । प्रयत्नार्थश्चेति । किमर्थश्चेत्यस्योत्तरं सङ्कल्पद्वारकं तज्ज्ञानस्य प्रवृत्तिहेतुत्वमिति भावः । सङ्कल्पविषयस्त्विति । सङ्कल्पज्ञानजन्मा सङ्कल्पः सङ्कल्पविषयक एव स्यात् । इच्छायाः कारणज्ञानसमानविषयकत्वनियमात्, स च कथं स्यात् तद्विषयसङ्कल्पे सुखत्वतत्साधनत्वयोरन्यतरस्याप्यभावादिति भावः । तत्साधनत्वादेवेति । परम्परया तत्साधनत्वादिति भावः । वस्तुतस्तु सुखे तत्साधने वा सुखत्वज्ञानात् तत्साधनत्वज्ञानाद्वा सङ्कल्पो भवितुमर्हति । अतः प्रकृते सङ्कल्पज्ञानजन्मा प्रयत्नजनकः यस्सङ्कल्पः तद्विषयः कथं किं सुखस्वभावात उत तत्साधनत्वादिष्यत इति प्रश्नो विवक्षितः । तत्रोत्तरं—तत्साधनत्वादिति । एवं सति सङ्कल्पगोचरसङ्कल्पस्य प्रयत्नं प्रति जनकत्वेन पूर्वमप्रसक्तत्वात् तदाक्षेपः, सङ्कल्पस्य सुखं प्रति साक्षादसाधनत्वेन तत्साधनत्वादिति समाधानं इष्टसाधनताज्ञानस्य हेतुत्वोपगमेऽपि विषयज्ञानहेतुतायाः दुरपह्नवत्वात् न तु सङ्कल्पस्वरूपज्ञानादिति तन्निरासश्च नोपपद्यत इति शङ्काया नावकाशः । तत्साधनज्ञानादेवसङ्कल्पसंभवे लिङा सङ्कल्पज्ञापनमनर्थकमित्याह—तर्हीति । सङ्करप्रसङ्ग इति भावः । सङ्कल्पस्यप्रवर्तकत्वानुपगमे लोकवेदविरोध इत्यत्राह—तस्मादिति । ज्ञानमेव कर्तृधर्मो विधिरस्त्वित्यत्राह—ज्ञानं चेति ।

तस्मात् सङ्कल्पः प्रवर्तक इत्यभ्युपेयते, किं तु सत्तामात्रेण, न तु ज्ञात इति नासौ विधिः। ज्ञानञ्च विषयोपहारेणैव व्यवहारयतीति तद्विषय एवावशिष्यत इति कर्तृधर्मव्युदासः।

अस्तु तर्हि कर्मधर्मः। नेत्युच्यते—

अतिप्रसङ्गात् न फलं नापूर्वं तत्त्वहानितः।
तदलाभात् न कार्यञ्च न क्रियाऽप्यप्रवृत्तितः॥ १२॥

अपूर्वस्य विध्यर्थत्वनिरासः

कर्म हि फलं वा स्यात्। तत्कारणमपूर्वं वा, तत्कारणं क्रिया वा? न प्रथमः, फलेच्छायाः प्रवृत्तिं प्रत्यहेतुत्वात्; अतिप्रसङ्गादित्युक्तत्वात्। न द्वितीयः, अव्युत्पत्तेः। लिङो हि प्रवृत्तिनिमित्तमपूर्वत्वं वा स्यात्, कार्यत्वं वा स्यात्, उभयं वा। न प्रथमः; शब्दप्रवृत्तिनिमित्तस्यापूर्वत्वस्य प्रमाणान्तरादवगतावपूर्वत्वव्याघातात्। अनवगतावव्युत्पत्तेः। संबन्धिनोऽनवगमे संबन्धस्य प्रत्येतुमशक्यत्वात्। तत एवावगताावितरेतराश्रयदोषात्। न

अतिप्रसङ्गादिति। फलस्य विध्यर्थत्वे तज्ज्ञानस्य तदिच्छाद्वारा प्रवृत्तिं प्रति हेतुत्वमुपेतव्यम्, तच्च न संभवति। अन्यविषयकेच्छाया अन्यविषयकप्रवृत्तिहेतुत्वेऽतिप्रसङ्गादिति भावः। तत्त्वहानित इति। अपूर्वत्वहानित इत्यर्थः। शाब्दबोधात्पूर्वं व्युत्पत्तिग्रहावसर एवाधिगतत्वावश्यम्भावादिति भावः। अस्तु कार्यत्वावच्छिन्ने शक्तिः, कार्यत्वावच्छिन्नं च पूर्वमुपस्थितमेवेति न व्युत्पत्तिग्रहानुपपत्तिः। अथाप्याशुविनाशियागादिकार्याणां स्वर्गादिकालान्तरभाविफलसाधनसामर्थ्यानुपपत्त्या अपूर्वकार्यसिद्धिरित्यत्राह—तदलाभादिति। फलरहितनित्यकर्मादिस्थले तदलाभस्स्यादिति भावः। क्रियाकार्यमेव तत्र लिङर्थ इत्यत्राह—न क्रियेति। अप्रवृत्तित इति। क्रियाया दुःखमयत्वेन तज्ज्ञानस्य प्रवृत्तिं प्रत्यहेतुत्वादिति भावः।

संबन्धिनः—शक्यस्य। सम्बन्धस्य—शक्तिरूपस्य। तत एव—लिङादित एव। इतरेतरेति। लिङादिना अपूर्वावगतौ तत्र शक्तिग्रहः, शक्तिग्रहेऽपूर्वावगतिरित्यन्योन्याश्रय इति भावः। गन्धवत्त्वेनोपनीतायामिति। गन्धवत्त्वेनोपस्थितायामित्यर्थः। अपूर्वे प्रवर्तत इति। कार्यत्वेनोपस्थितिसंभवादिति भावः। सन्देह इति। गन्धवत्त्वं पृथिवीत्वं वा प्रवृत्तिनिमित्तमित्याकारके इति भावः।

च गन्धवत्त्वेनोपनीतायां पृथिव्यां पृथिवीशब्दवददूरविप्रकर्षेण कार्यत्वेनोपनीतेना पूर्वत्वेन निमित्तेनापूर्वे प्रवर्तते लिङिति युक्तम् । तत्रोभयोरपि प्रतीयमानत्वेन सन्देहे कल्पनागौरव-पुरस्कारेण पृथिवीत्व एव सङ्गतिविश्रान्तेरुपपत्तेः । न त्वत्रापूर्वत्वप्रतीतिः ।

स्यादेतत्–कार्यत्वमुपलक्षणीकृत्य तावदेषा लिङ् प्रवृत्ता । तदुपलक्षितश्च यागो वा यत्नो वाऽन्यो वा शब्देतरप्रमाणगोचरो नाधिकारिविशेषणस्वर्गसाधसमर्थः । न चाकाम्यफले कामी नियोक्तुं शक्यते । ततोऽन्यदेवालौकिकं किञ्चिदनेनोपलक्ष्यते, यो लिङादिप्रवृत्ति-गोचर इति किमनुपपन्नमिति चेत्–न, उपलक्षणं हि स्मरणमनुमानं वा । उभयमप्यनवगत-संबन्धेनाशक्यम् । न हि संस्कारवन्मनोवददृष्टवद्वा कार्यत्वमपूर्वत्वमुपलक्षयति, ज्ञाना-पेक्षणात् । ततो हस्तीव हस्तिपक, धूम इव धूमध्वजं तत्सम्बन्धज्ञानादुपलक्षयेत्, न त्वन्यथा । तथा च न्यायसम्पादनाऽप्यरण्ये रुदितम् । न हि युक्तिसहस्रैरप्यविदिते सङ्गति-ग्रहोऽविदितसङ्गतिर्वा शब्दः प्रवर्तत इति ।

एतेन भेदाग्रहात् क्रियाकार्ये व्युत्पत्तिरिति निरस्तम्, न ह्यज्ञाते भेदाग्रहो व्यव-हाराङ्गम्, अतिप्रसङ्गात् । किं चापूर्वत्वे प्रवृत्तिनिमित्ते कल्प्यमाने लौकिकी लिङनर्थिका

कल्पनागौरवेति । सखण्डधर्मस्य शक्यतावच्छेदकत्वोपगमे गौरवादित्यर्थः । न त्वत्रापूर्वत्व-प्रतीतिरिति । इदमुपलक्षणम्—कल्पनागौरवादिविनिगमकमपि दुर्लभमिति भावः । अत्रापूर्वत्वस्य विशेषरूपेण प्रवृत्तिनिमित्तत्वासंभवेऽपि कार्यत्वोपलक्ष्यतावच्छेदकतया उपलक्ष्यतया वा निमित्तत्वं स्यादिति शङ्कते—स्यादेतदिति । नाधिकारीति । यागादीनामाशुतरविनाशित्वादिति भावः । अस्तु यागादिरूपफलार्थमेव तत्प्रवृत्त्यादिकमित्यत्राह—न चेति । अकाम्येति । यागस्य स्वत इष्टत्वा-भावादिति भावः । स्वरूपत एव कार्यत्वमुपलक्षकं स्यादित्यत्राह—न हीति । स्वरूपतो हेतुत्वे संस्कारादृष्टादिवत् ज्ञाननिरपेक्षहेतुत्वप्रसङ्गेन लिङादिप्रयोगविरहेऽप्युपलक्षकतापातात् संबन्धज्ञानसापेक्ष-हेतुकत्वमेव धूमादिवत् स्वीकर्तव्यमिति भावः । न्यायसम्पादनेति । यागादिकार्याणामयोग्यत्वप्रति-सन्धानादिरपीत्यर्थः । अरण्येरुदितम्—अकिञ्चित्करम् । उपपादयति—न हीति ।

भेदाग्रहादिति । वैदिकस्थायिकार्यभेदाग्रहादित्यर्थः । क्रियाकार्ये—पाकादिरूपे । निरस्तमित्यत्र हेतुमाह—न हीति । अज्ञानेन स्थायिकार्येण भेदाग्रहात् क्रियाकार्ये न लिङः

प्रसज्येत। तत्रोपलक्षणीयाभावात्। तत्र कार्यत्वमेव प्रवृत्तिनिमित्तमिति यदि, प्रकृतेऽपि तथैवास्तु क्लृप्तत्वात् सम्भवाच्चेति।

अस्तु तर्हि तदेव प्रवृत्तिनिमित्तम्, तर्कसम्पादनया त्वपूर्वव्यक्तिलाभ इति चेत्—न, नित्यनिषेधापूर्वयोरलाभप्रसङ्गात्। न चास्मिन् पक्षे एकत्र निर्णीतेन शास्त्रार्थेनान्यत्र तथैव व्यवहार इति सम्भवति, कार्यत्वस्यैव प्रवृत्तिनिमित्तत्वेन निर्णीतत्वात्, नत्वपूर्वत्वस्य। न्यायसम्पादनायाश्च तत्रासम्भवात्। फलानुगुण्येन हि व्यक्तिविशेषो लभ्यते। न च तत्तत्र श्रूयते। न चाश्रुतमपि कल्पयितुं शक्यते, बीजाभावात्। तद्धि विध्यन्यथाऽनुपपत्त्या कल्प्येत कार्यत्वप्रत्ययान्यथाऽनुपपत्त्या वा लोकवत्। न प्रथमः; भवतां दर्शने तस्योपेयरूपत्वात्। यतः श्रुतस्वर्गफलत्वेऽपि साध्यविवृद्धिरुच्यते। न द्वितीयः, शब्दबलेन तत्प्रत्यये तदनपेक्षणात्। लोके हि तत्प्रत्यय इष्टाभ्युपायताधीनः, न तु वेदे इत्यभ्युपगमात्। अन्यथेष्टाभ्युपायतैव प्रथमं वेदादवगन्तव्या; प्रमाणान्तराभावात्; ततः कार्यतेत्यानुमानिको विधि-

---

व्युत्पत्तिस्स्यात्। अन्यथा अज्ञानभेदाग्रहस्य सर्वत्र सत्त्वात् तत्तद्व्यवहारः स्यादिति भावः। क्रियाकार्ये उक्तरीत्या भेदाग्रहात् व्युत्पत्त्यसंभवात् लौकिकलिङः निरर्थकत्वं प्रसञ्जयति—किञ्चेति। उपलक्षणीयाभावात्—अपूर्वस्याभावात्। प्रकृतेऽपि—वैदिकलिङापि।

अथ कार्यत्वमेव प्रवृत्तिनिमित्तं स्यादिति शङ्कते—अस्त्विति। अलाभप्रसङ्गादिति। फलश्रवणाभावेन तत्साधनत्वानुपपत्तितर्कसम्पादनाया अप्रसक्तेरिति भावः। काम्यविध्यनुरोधेन नित्यनिषेधयोरप्यपूर्वलाभ इत्युक्तिं निरस्यति—न चास्मिन् पक्षे इति। कार्यत्वस्यैव लिङ्प्रवृत्तिनिमित्तत्वपक्षे इत्यर्थः। एकत्र—काम्यविधौ। न त्वपूर्वत्वस्येति। तत्त्वहानेरिति भावः। योग्यतापरामर्शात् तल्लाभः स्यादित्यत्राह—न्यायेति। असम्भवः कुत इत्यत्राह—फलानुगुण्येनेति। कालान्तरभाविफलजनकत्वोपपत्तये खलु स्थायिकार्यमुन्नीयत इति भावः। बीजं विकल्प्य दूषयति—तद्धीति। फलं हीत्यर्थः। विध्यन्यथाऽनुपपत्त्येति। कार्यत्वान्यथाऽनुपपत्त्येत्यर्थः। इष्टफलसाधनत्वमन्तरा कार्यत्वानुपपत्तेरिति भावः। लोकवदिति। पाकादेरिष्टसाधनत्वेन कार्यत्वतत्प्रत्ययवदिति भावः। ननु यत्र स्वर्गादिफलश्रवणं तत्रापूर्वस्य कार्यस्य कथमुपेयत्वमिति चेत्—तत्राह—यत इति। साध्यविवृद्धिः—फलपरम्परा। कार्यमेव स्वर्गपर्यन्तं व्याप्नोतीति भावः। तत्प्रत्यये—कार्यत्वप्रत्यये। तदनपेक्ष-

विधाभिप्रायाभावात् । भावे वा न राजशासनानुवादिनोऽभिप्राय आज्ञा, किं नाम राज्ञ एवेति लौकिकोऽनुभवः ।

श्रुत्या ईश्वरसाधनम्

श्रुतेः खल्वपि—कृत्स्न एव हि वेदोऽयं परमेश्वरगोचरः ।
स्वार्थद्वारैव तात्पर्यं तस्य स्वर्गादिवद्विधौ ॥ १६ ॥

न सन्त्येव हि वेदभागाः, यत्र परमेश्वरो न गीयते । तथा हि– स्रष्टृत्वेन पुरुषसूक्तेषु, विभूत्या रुद्रेषु, शब्दब्रह्मत्वेन मण्डलब्राह्मणेषु, प्रपञ्चं पुरस्कृत्य निष्प्रपञ्चतयोपनिषत्सु, यज्ञपुरुषत्वेन मन्त्रविधिषु, देहाविर्भावैरुपाख्यानेषु, उपास्यत्वेन च सर्वत्रेति । सिद्धार्थतया न ते प्रमाणमिति चेत्–न–तद्धेतोः कारणदोषशङ्कानिरासस्य भाव्यभूतार्थसाधारणत्वात् ।

अन्यत्रामीषां तात्पर्यमिति चेत्—स्वार्थप्रतिपादनद्वारा, शब्दमात्रतया वा ? प्रथमे स्वार्थेऽपि प्रामाण्यमेषितव्यम् । तस्यार्थस्यानन्यप्रमाणकत्वात् । अत एव तत्र तस्य स्मारकत्वमित्यपि मिथ्या । तत्प्रतिपादकत्वेऽपि न तत्र तात्पर्यमिति चेत्—स्वार्थपरित्यागेन ज्योतिश्शास्त्रवदन्यत्रापि तात्पर्ये को दोषः ? अन्यथा स्वर्गनरकव्रात्यश्रोत्रियादिस्वरूपप्रतिपादकानामप्रामाण्ये बहु विप्लवेत । तत्राबाधनात् तथेति चेत्–तुल्यम् । न च तादृगर्थः

तदसंभवादिति भावः । अर्थतात्पर्योपगमेऽप्याह–भावे वेति । ईश्वरस्वरूपबोधकानां श्रुतिवाक्यानां सिद्धार्थकत्वेन कार्य एव तात्पर्यात् न स्वार्थे प्रामाण्यमित्यत्राह—स्वार्थद्वारैवेति । स्वर्गादिवाक्यवत् स्वार्थेऽपि तात्पर्यात् प्रामाण्यं दुरपह्नवमिति भावः । तद्धेतोः—प्रामाण्यहेतोः ।

अर्थवादानां विध्येकवाक्यत्वेन कार्य एव तात्पर्यात् न सिद्धार्थे प्रमाण्यमिति शङ्कते–अन्यत्रेति । विध्येकवाक्यत्वं किं वाक्यैकवाक्यतया उत पदैकवाक्यतयेति विकल्पयति—स्वार्थेति । स्वघटकनिखिलपदार्थान्वयप्रतिपादनद्वारेणेत्यर्थः । शब्दमात्रतयेति । स्वघटकपदार्थान्वयमप्रतिपाद्य प्रशस्त्यादिरूपैकार्थलक्षकतयेत्यर्थः । अनन्यप्रमाणकत्वादिति । अप्राप्ते शास्त्रप्रामाण्यावश्यम्भावादिति भावः । अत एव—प्रमाणान्तरानधिगतार्थकत्वादेव । ज्योतिश्शास्त्रवदिति । दर्शादिकालपरशास्त्रस्य दर्शादिकाले तात्पर्ये सत्यपि दर्शादियागादावपि तात्पर्यदर्शनादिति भावः । द्वितीयकल्पाश्रयणे दोषमाह—अन्यथेति । अप्रामाण्य इति । स्वार्थे इति शेषः । तादृगर्थः—नित्यज्ञाना-

स्स्यात्, न शाब्दः। आनुमानिकं फलमस्तु, यत्कर्तव्यं तदिष्टाभ्युपाय इति व्याप्तेरित्यपि न युक्तम्; सुखेन व्यभिचारात्। अन्यत्वे सतीति चेत्— न, दुःखाभावेन व्यभिचारात्। फलं विहायेति चेत्—तदेव किमुक्तं स्यात्। इष्टं स्वभावत इति चेत् - तर्हि ततोऽन्यदनिष्टं स्यात्, तच्च कर्तव्यमिति व्याघातः। तत्साधनमिति चेत्— तत्साधनत्वे सतीति साध्याविशिष्टं विशेषणम्। स्वभावतो नेदमनिष्टम्, कर्तव्यं च, ततो नूनमिष्टसाधनमिति साधनार्थ इति चेत्—न, स्वभावतो नेदमिष्टमित्यसिद्धेः। अनन्योद्देशप्रवृत्तकृतिव्याप्तत्वात्। अन्यथा तदसिद्धेः। ततो व्याघातादन्यतरापाय इति।

अस्तु नित्यनिषेधापूर्वयोरलाभः, किं नश्छिन्नमिति चेत्— किं नःछिन्नम्, यदा कामाधिकारेऽपि तदलाभः। न हि लिङा कार्यं स्वर्गसाधनमुक्तम्। नापि स्वर्गकामपद-

---

णात्—इष्टसाधनत्वानपेक्षणादित्यर्थः। तर्हि लोके कथं तदपेक्षणमित्यत्राह—लोके हीति। इष्टाभ्युपायताधीनः—लिङ्गज्ञानाधीन इति भावः। वैदिककार्यस्यानन्यार्थतयैव प्रतिपत्तेः पराभ्युपगमादिति विशेषः। अन्यथा वेदेऽपि इष्टाभ्युपायताधीनत्वे। अस्तु शब्दो विधिः, तथापि फलमनुमानतः सिद्ध्यतीति शङ्कते—अनुमानिकमिति। व्यभिचारादिति। उद्देश्यतात्मककृतिविषयत्वस्य सुखादाविष्टसाधनतारहिते सत्त्वादिति भावः। अन्यत्वे सतीति। सुखान्यत्वे सतीति हेतुर्विशेषणीय इति भावः। फलं विहायेति। फलान्यत्वं हेतुविशेषणमिति भावः। व्याघात इति। अनिष्टस्य कर्तव्यत्वविरोध इति भावः। इष्टसाधनत्वे सतीति हेतुविशेषणात् न व्यभिचार इति शङ्कते—तत्साधनमिति। साध्याविशिष्टमिति। इष्टसाधनत्वस्यैव साध्यत्वादिति भावः। स्वभावत इति। अन्येच्छानधीनेच्छाविषयतारहितत्वे सति कर्तव्यत्वं हेतुरस्त्विति भावः। असिद्धेरिति। तन्मतेऽपूर्वस्य स्वतः काम्यतया विशेषणासिद्धिरिति भावः। अन्यथा—नित्यापूर्वस्याप्यन्योद्देश्यकत्वे। तदसिद्धेः—नित्यापूर्वत्वासिद्धेः। अन्यतरापाय इति। अनन्योद्देशप्रवृत्तकृतिव्याप्यत्वेष्टसाधनत्वान्यतरापाय इत्यर्थः।

कामाधिकारेऽपीति। काम्यानुष्ठानेऽपीति भावः। तदलाभः—अपूर्वालाभः। ननु स्वर्गकामो यजेतेत्यत्र स्वर्गसाधनत्वाभिधानात् तदन्यथानुपपत्त्याऽपूर्वलाभ इति शङ्कायां प्रतिवक्ति—न हीति। अत्र केवललिङा स्वर्गसाधनत्वाभिधानं, उत स्वर्गकामपदसमभिव्याहृतेनेति विकल्पोऽभिप्रेतः।

समभिव्याहारान्यथाऽनुपपत्त्या तल्लब्धं, ब्राह्मणत्वादिवदधिकार्यवच्छेदमात्रेणैवोपपत्तेः। न चेदमनुमानम्—यस्य यदिच्छातो यत्कर्तव्यं, तत्तस्येष्टसाधनमिति। अन्येच्छया स्वाभाविककर्तव्यत्वासिद्धेः। तदिच्छयैव तत्कर्तव्यतायास्सुखेनानैकान्तिकत्वात्। औपाधिककर्तव्यतायाश्चेष्टसाधनत्वमप्रतीत्य प्रत्येतुमशक्यत्वात्। किमनया विशेषचिन्तया। प्रतीयते तावच्छब्दादन्यदिच्छतोऽन्यत्कार्यमिति। एतावतैवानुमानमिति चेत् — नन्वन्वितमभिधानीयम्, योग्यश्चान्वीयते। अन्यदिच्छतश्चान्यत् कर्तव्यमन्वयायोग्यम्, तत्कथमभिधीयताम्। तत एव तत्साधनत्वसिद्धिरिति चेत्—एवं तर्हीष्टसाधनतैकार्थसमवायिकर्तव्यत्वाभिधानादनुमानानवकाशः। न चान्विताभिधानेऽपि तत्साधनत्वसिद्धिः, अधिकार्यवच्छेदमात्रेणाप्यन्वययोग्यतोपपत्तेः।

कार्यत्वविचारः

न च कार्यत्वमपूर्वे सम्भवति। तद्धि कृतिव्याप्यता चेत्—व्रीह्यादिष्वेव; सिद्धत्वात्। कृतिफलत्वं चेत्—यागस्यैव; ततस्तस्यैवाहत्योत्पत्तेः। कृत्युद्देश्यता चेत्—स्वर्गस्यैव;

ब्राह्मणत्वादिवदिति। 'ब्राह्मणाः सत्रमासीरन्' इत्यादौ ब्राह्मणत्वादिकं यथाऽधिकारे विशेषणं तद्वत् 'स्वर्गकामो यजेते'त्यत्रापि स्वर्गकामपदमधिकारिविशेषणपरमिति भावः। अनुमानात् स्वर्गसाधनत्वसिद्धिरस्त्वित्यत्राह—**न चेदमिति**। इच्छातः कर्तव्यमित्यत्र किमन्यविषयकेच्छा उत तद्विषयकेच्छा विवक्षितेति विकल्प्य क्रमेण दूषणमाह—**अन्येच्छयेति**। **स्वाभाविकेति**। अनन्योद्देशप्रवृत्तकृतिव्याप्यत्वासिद्धिरिति भावः। प्रथमकल्पेऽप्यौपाधिककर्तव्यतासिद्धिरेवास्त्वित्यत्राप्याह—**औपाधिकेति**। **तत एव** — शब्देनान्विताभिधानादेव। **अनुमानानवकाश इति**। शब्देनैवाभिधानादिति भावः। अस्तु शाब्द्येव स्वर्गादीष्टसाधनतासिद्धिः तथाप्यपूर्वलाभो निष्प्रत्यूह इत्यत्राह—**न चेति**। **अधिकार्यवच्छेदेति**। ब्राह्मणत्वादिवदिति भावः।

अपूर्वस्य कार्यत्वमेव न संभवतीत्याह—**न चेति**। अत्र कार्यत्वं किं कृतिव्याप्यत्वं, किं वा कृतिफलत्वं कृत्युद्देश्यत्वं वेति त्रिधा विकल्पो बोध्यः। **कृतिफलत्वं**—कृत्यनन्तरभावित्वम्। कृत्युद्देश्यत्वं अनन्योद्देशप्रवृत्तकृतिव्याप्यत्वम्। **औपाधिकी**—इष्टसाधनत्वाधीना। कालान्तरभावित्वात् स्वर्गस्य तत्साधनत्वं यागस्य न स्यादिति शङ्कते—**कालेति**। स्वर्गपर्यन्तस्थायि-

निसर्गसुन्दरत्वात्। न त्वपूर्वस्य; तद्विपरीतत्वात्। स्तमपानादिवदौपाधिकीति चेत्—साऽपि यागस्यैव। स्वर्गस्य साध्यत्वस्थितौ यागस्यैव साधनत्वेनान्वयात्। कालव्यवधानात् नैतन्निर्वहतीति चेत्—यथा निर्वहति, श्रुतानुराधेन तथा कल्प्यताम्। व्यापारद्वारा कथञ्चित् स्यात्। न तु भिन्नकालयोर्व्यापारव्यापारिभावः। कारणत्वं च व्यापारेण युज्यते। अव्यवधानेन पूर्वकालनियमश्च तत्त्वम्। अन्यथाऽतिप्रसङ्गादिति चेत्—न—पूर्वभावनियममात्रस्य कारणत्वात्। कार्यानुगुणावान्तरकार्यस्यैव व्यापारत्वात्। कृषिचिकित्सादौ बहुलं तथा व्यवहारात्। लाक्षणिकोऽसाविति चेत्-न-मुख्यार्थत्वे विरोधाभावात्। अस्तु तर्हि पुत्रेण हते ब्रह्मणि चिरध्वस्तस्य पितुः तमवान्तरव्यापारीकृत्य कर्तृत्वम्। तथा च लोकयात्राविप्लव इति चेत्—न—सत्यपि सुते कदाचित् तदकरणात्, तस्मिन्नसत्यपि कदाचित् करणादनिर्वाहकतया तस्य व्यापारत्वायोगात्। यं जनयित्वैव हि यं प्रति यस्य पूर्वभावनिर्वाहः स एव तं प्रति तस्य व्यापारो नापरः। यथाऽनुभवस्य स्मरणं प्रति संस्कारः।

व्यापारकल्पनात् न दोष इत्याशयेन प्रत्याह—यथेति। शङ्कते—व्यापारेति। प्रकृते तु तथा न भवतीति भावः। कुत इत्यत्राह —न त्विति। कपालतत्संयोगयोरिव समानकालीनयोरेव तथाभाव इति भावः। दूषणान्तरमाह—कारणत्वं चेति। कारणत्वमस्ति चेत् व्यापारद्वारेण तन्निर्वाहो युक्तः, प्रकृते कारणत्वस्यैवासंभवात् न व्यापारकल्पनं युक्तमिति भावः। कुतो न कारणत्वमित्यत्राह —अव्यवधानेनेति। अतिप्रसङ्गादिति। पुत्रादिकृते कार्ये पित्रादीनामपि कारणत्वप्रसङ्ग इति भावः। कारणत्वेऽव्यवधानं न तन्त्रं, गौरवादित्याशयेन समाधत्ते नेति। उक्तातिप्रसङ्गवारणाय व्यापारस्वरूपं दर्शयति— कार्यानुगुणेति। यं विना यस्य कारणत्वं न निर्वहति स एव तस्य व्यापार इति भावः। पुत्रादीनामुक्तावान्तरकार्यत्वाभावात् न व्यापारत्वमित्याशयः। कृषीति। आषाढकर्षणादेर्हेमन्तसस्यफलादिहेतुत्वव्यवहारादिति भावः। असौ—उक्तव्यवहारः। आशयमजानानः पुनश्शङ्कते—अस्तु तर्हीति। आशयमुद्घाटयति—सत्यपीति। अनुरूपं दृष्टान्तमाह—यथेति। कार्यसहभावस्यापि कारणत्वप्रयोजकत्वे कदाचित् जन्यजनकमात्रस्य व्यापारत्वे च परस्याप्यनिष्टं प्रसञ्जयति—न चेदेवमिति। हन्तृत्वं न स्यादिति। हननकाले हन्तुरभावादिति भावः। यद्वा साक्षादव्यवधानस्यैव कारणत्वं प्रति प्रयोजकत्वोपगमेऽनिष्टमाह—न चेदेवमिति। न

तस्य ह्यन्वयव्यतिरेकानुविधाने सिद्धे तदन्यथाऽनुपपत्त्या संस्कारः कल्प्यते, न त्वन्यथा—तथेहापि। न चेदेवम्—तवापि ब्रह्मभिदुरशरविमोकसमयहतस्य हन्तृत्वं न स्यात्। स्याच्च स्वनिवेशनशयानस्य तत्पितुरिति। एतेनोभयं वेति निरस्तम्।

अस्तु तर्हि क्रियाधर्म एव कार्यत्वं विधिः। सर्वो हि कर्तव्यमेतदिति प्रत्येति। ततः कुर्यामिति सङ्कल्प्य प्रवर्तत इति चेत्—न, कर्तव्यं मयेति कृत्यध्यवसायार्थो वा स्यात्, कर्तव्यं मयेत्युचितार्थो वा स्यात्? तत्र प्रथमस्सङ्कल्पात् न भिद्यते। व्यवहितकार्यसङ्कल्पो हि कर्तव्यो मयेति, सन्निहितकार्यसङ्कल्पस्तु कुर्यामिति। स च न लिङर्थः। सत्तामात्रेण प्रवर्तनादित्युक्तम्। तदेतत् कर्तव्यतायां जातायां प्रवर्तत इति वस्तुस्थितौ भ्रान्तैर्ज्ञातायामिति गृहीतम्। औचित्यं तु क्रियाधर्मः प्रागभाववत्त्वं, तस्मिन् सति शक्यत्वं वा, तस्मिन् सति कर्तारं प्रत्युपकारकत्वं वा? प्रथमे कुतश्चिदपि न निवर्तेत। द्वितीये दुःखेऽपि तथाविधे प्रवर्तेत। तृतीये तु वक्ष्यते।

स्यादिति। शरविमोकसमय एव हतस्य कतिपयक्षणानन्तरभाविब्रह्मभेदनाव्यवधानासंभवादिति भावः। स्याच्चेति। अव्यवधानसत्त्वादिति भावः। एतेनेति। अपूर्वत्वस्य प्रवृत्तिनिमित्तत्वासम्भवोपपादनेन। उभयं वेति। कार्यत्वमपूर्वत्वं चेत्युभयं वेत्यर्थः।

कृत्यध्यवसायः—कृतिविषयकेच्छा कृत्यनुकूला वा। उचितार्थः—अर्हार्थः। कर्तव्यं ममेत्यस्य सङ्कल्परूपत्वे ततः कुर्यामित्यस्य को भेद इत्यत्राह—व्यवहितेति। स चोभयविधोऽपि सङ्कल्पः न लिङर्थः सत्तयैव प्रवर्तकस्य ज्ञानानपेक्षणादिति भावः। उचितार्थकत्वं त्रिधा विकल्प्य दूषयति—औचित्यं त्विति। शक्यत्वं—कृतिसाध्यत्वम्। कुतश्चिदपीति। असाध्यात् चन्द्रानयनादेरपीत्यर्थः। वक्ष्यत इति। इष्टसाधनत्वविधित्वनिरसनावसर इति भावः।

करणं हीति। किंशब्दः करणं तदर्थो भावनादिर्वा। एवं क्रमेण किं शब्दधर्मः अभिधा करणधर्म इत्युच्यते उत भावनादिधर्मः इष्टसाधनतेति विकल्पो विवक्षितः। भावनादीत्यादिपदात् धात्वर्थपरिग्रहः। अर्थात्मिकायां भावनायां लिङादिशब्दानां यः पुरुषं प्रति प्रयोजकव्यापारः सा द्वितीया शब्दधर्मोऽभिधात्मिका भावना विधिरिति भाट्टैरुच्यते। तां निरस्यति—न प्रथम इति।

करणधर्मस्य विध्यर्थत्वनिरासः

अस्तु तर्हि करणधर्मः—न—करणं हि शब्दः, तद्धर्मोऽभिधा वा स्यात्—तदर्थो भावनादिर्वा तद्धर्म इष्टसाधनता वा न प्रथमः—

अभिधायाः विध्यर्थत्वनिरासः

असत्त्वादप्रवृत्तेश्च नाभिधाऽपि गरीयसी।
बाधकस्य समानत्वात् परिशेषोऽपि दुर्लभः ॥ १३ ॥

सङ्गतिप्रतिसन्धानाधिकायां तस्यां प्रमाणाभावात्। अन्यसमवेतस्यापूर्ववदन्यव्यापारत्वेनाप्युपपत्तेः। विषयतयाऽपि च स्वव्यापारं प्रति लिङ्गवद्धेतुभावाविरोधात्। अधिकत्वेऽपि ततोऽप्रवृत्तेः। बालानां तदभावेऽपि तद्भावात्। शब्दान्तरेण तच्छ्राविणामप्यप्रवृत्तेः। न च विलक्षणैव सा लिङो विषयः। तद्वैलक्षण्यं प्रतीतिं प्रति चेत्, अर्थविशेषोऽपि स्यात्। प्रवृत्तिमात्रं प्रति चेत्—अभिधासमवेतं तदिति कुतः? तत्सन्निधानादिति

असत्त्वादिति। सङ्गतिप्रतिसन्धानातिरिक्तायां तस्यां मानाभावादिति भावः। अप्रवृत्तेरिति। लिङादिव्यतिरिक्ताभिधाशब्दादिना तत्प्रतीतावप्यप्रवृत्तेरित्यर्थः। इतरबाधेन परिशेषात् सिद्धिरित्यत्राह—बाधकस्येति। शब्दान्तरेणाभिधाप्रतीतावप्यप्रवृत्तेः प्रवृत्तिहेतुत्वबाधस्य तुल्यत्वादिति भावः।

तत्समवेतः तद्व्यापारस्स्यात्, स्वेतरात्मसमवेतस्य तु सङ्गतिप्रतिसन्धानस्य शब्दव्यापारत्वं न संभवतीत्यत्राह—अन्येति। यागादन्यस्मिन् पुरुषे समवेतमपूर्वं यथा यागस्य व्यापारः तथेति भावः। सङ्गतिप्रतिसन्धानस्य शब्दजन्यत्वे मानाभावेन तद्व्यापारत्वं न स्यादित्यत्राह—विषयतयेति। लिङ्गवदिति। परामर्शव्यापारं प्रति हेतुभूतानुमितिकरणलिङ्गवदित्यर्थः। इदं च ज्ञानसामान्ये विषयस्य हेतुत्वमिति परमतान्वारोहेण। अन्वयव्यभिचारं वक्ष्यन् व्यतिरेकव्यभिचारमाह—बालानामिति। तदभावेऽपि—अभिधाज्ञानाभावेऽपि। शब्दान्तरेण—अभिधादिपदान्तरेण। लिङधीनविलक्षणाभिधानबोधस्यैव प्रवर्तकत्वात् नायं दोष इत्यत्राह—न चेति। अभिधादिपदान्तरार्थात् लिङर्थस्य स्वरूपतो वैलक्षण्ये तु न प्रसिद्धा अभिधा लिङर्थस्स्यात्। अर्थावैलक्षण्ये प्रतीतिवैलक्षण्यं दुर्वचम्। अर्थज्ञानावैलक्षण्येऽपि प्रवर्तकत्वमिह वैलक्षण्यमिति चेत्; तदभिधागतमित्यत्र न नियामकमस्तीति भावः। तत्सन्निधानादिति। प्रवृत्त्यभिधयोः बुद्धिकृतसन्निधानादिति भावः। अनियमादिति।

चेत्—न—अनियमात् । अन्यस्य सर्वस्य निषेधादिति चेत्—न—प्रवृत्तिहेतुत्वनिषेधस्य तुल्यत्वात् । तत्सन्निधिनिषेधस्य चाशक्यत्वात् । शब्दैकवेद्यत्वे चाव्युत्पत्तेः । प्रवृत्त्यन्यथाऽनुपपत्तिसिद्धे व्युत्पत्तिरित्यपि वार्तम्—न हि प्रवृत्तिहेतुः कश्चिदस्तीति प्रवर्तते ।

इष्टसाधनतायाः विध्यर्थत्वशङ्का

इष्टसाधनता तु स्यात् । सर्वो हि मया क्रियमाणमेतन्मम समीहितं साधयिष्यतीति प्रतिसन्धत्ते, तत इच्छति कुर्यामिति. ततः करोतीति सर्वानुभवसिद्धम् । तदयं व्युत्पित्सुः यज्ज्ञानात् प्रयत्नजननीमिच्छामवाप्तवान्, तज्ज्ञानमेव लिङ्श्राविणः प्रवृत्तिकारणमनुमिनोति । ततश्च कर्तव्यतैकार्थसमवायिनी इष्टसाधनता लिङर्थ इत्यवधारयति । न च वाच्यम्—एवं चेत् वरं कर्तव्यतैवास्तु, अवश्याभ्युपगमनीयत्वात् ; कृतमिष्टसाधनतयेति—यथा हि नेष्टसाधनतामात्रं प्रतीत्य प्रवर्तते, असाध्येषु व्यभिचारात्—तथा प्रयत्नविषयसमवायिनीमिष्टसाधनतामधिगम्याधिकारी प्रवर्तते इत्यनुभवः । तत्र विषयो धातुना, भावनाऽऽख्यातमात्रेण, शेषं तु तद्विशेषेण लिङा इत्येवमिष्टाभ्युपायतायामधिगतायामन्वयबलात् तद्विषयस्येष्टसाधनत्वावगतिरिति कर्तव्यतैकार्थसमवायिनीष्टाभ्युपायता लिङः प्रवृत्तिनिमित्तमित्युक्तम् ।

धात्वर्थादेरपि बुद्धिसन्निधानादिति भावः । बाधकस्य समानत्वादित्युत्तरार्धं शङ्कोत्तराभ्यां विवृणोति—अन्यस्येति । नन्वपूर्वा अभिधा लिङभिधीयते, यतः प्रवृत्तिरित्यत्राह—शब्दैकवेद्यत्व इति । लिङेकवेद्यत्व इति अर्थः । मानान्तरादनधिगतत्वेन तत्र न शक्तिग्रहसंभव इति भावः । प्रवृत्त्यन्यथानुपपत्तीति । विशेषरूपेणानवगतेऽपि प्रवृत्तिहेतुत्वेन सामान्यरूपेण व्युत्पत्तिसम्भव इति भावः ।

द्वितीयः पक्षः सम्भवितुमर्हतीत्याह—इष्टसाधनतेति । असाध्य इष्टसाधनताज्ञानेऽपि प्रवृत्त्यनुदयादाह—मया क्रियमाणमिति । फलितमाह—ततश्चेति । ननु तर्हि लाघवात्कर्तव्यतैव लिङर्थोऽस्त्विति शङ्कामनूद्य परिहरति—न चेति । यद्यप्युभयमप्यावश्यकं, तथापि कर्तव्यताया अन्यलभ्यत्वात् इष्टसाधनतामात्रं लिङर्थ इत्याशयं स्फुटयति—यथा हीति । इष्टसाधनतामधिगम्येति । कृतिसाध्यतयाऽवगतेऽपि विषभक्षणादावप्रवृत्तेरिति भावः । शेषन्तु—इष्टसाधनत्वन्तु । अन्वयबलात्—भावनान्वयबलात् । तद्विषयस्य—भावनाविषयस्य धात्वर्थस्य भावनाधर्मस्य । इष्टसाधनत्वस्य तद्विषयधात्वर्थद्वारकत्वादिति भावः ।

कः पुनरस्येष्टसाधनताऽभिधाने ज्योतिष्टोमेनेति तृतीयया न भवितव्यमिति तु देश्यमवैयाकरणस्यावधीरणीयमेव । तत्संख्याभिधानं हि तदभिधानमाख्यातेन । न च तत् प्रकृते । न च यागेष्टसाधनताऽभिधानं लिङा, किन्त्वन्वयबलात् तल्लाभ इत्युक्तम् ।

यत्तु सिद्धोपदेशादपि प्रतीयते इष्टसाधनता ; न चातः सङ्कल्पात्मा प्रवृत्तिरस्तीति देश्यम्—तत्र समुत्कटफलाभिलाषस्य समर्थस्य तत्साधनताऽवगमेऽपि न प्रवृत्तिरिति कः प्रतीयात् । सर्वपक्षसमानं चैतत् समानपरीहारं चेति किं तेन ।

इष्टसाधनतायाः लिङर्थत्वनिरासः

अत्राभिधीयते—अस्तु प्रयत्नविषयसमवायिनीष्टसाधनता प्रवृत्तिहेतुः । तथाहि नासौ लिङर्थः, सन्देहात् । सा हि किं साक्षादेव लिङाऽवगम्यते, स्तनपानादावनुमानादिव

तृतीयया न भवितव्यमिति । लिङाख्यातेन इष्टस्वर्गादिकरणत्वाभिधानादिति भावः । देश्यम्—चोद्यम् । न च तत्प्रकृत इति । यजेतेति कर्तुरेव सङ्ख्यया अभिधानादिति भावः । कारकाभिधानमेव तदभिधानमित्युपगमेऽपि न दोष इत्याह—न चेति । कारणताया अभिधानेऽपि तद्विशिष्टस्य करणस्य यागादेराख्यातेनानभिधानादिति भावः । यद्वा भावनागतेष्टसाधनत्वस्यैव लिङाभिधानं समानाभिधानश्रुतेः न तु यागादिधात्वर्थगतस्य । तस्येष्टसाधनभावनान्वयादार्थिकोऽवगम इत्युक्तं परमतानुरोधेन । अतः धातुसमानाधिकरणपदोत्तरमनभिहिताधिकारीयतृतीयया नानुपपत्तिरिति भावः ।

सिद्धोपदेशादिति । इष्टसाधनं याग इत्यादिवाक्यादित्यर्थः । सङ्कल्पात्मेति । कुर्यामिति सङ्कल्परूपा- आद्यप्रवृत्तिरित्यर्थः । न प्रवृत्तिरिति । नञ्रहितोऽपि पाठः तदा तत्र देश्ये कः प्रतीयादित्यन्वयः । इतिर्हेतौ । प्रवृत्तिसत्त्वात् न प्रवृत्तिरित्युक्तचोद्ये को वा विश्वसेदिति भावः । पूर्वत्र न प्रवृत्तिरित्येतत् कः श्रद्दधीतेति । अनुत्कटाभिलाषस्य प्रवृत्त्यभावस्तु तुल्य इत्याह—सर्वपक्षेति । इष्टसाधनतेतरविधित्ववादिनिखिलपक्षसाधारणमित्यर्थः । लिङादिकं विना पदान्तरेण तत्तदर्थाभिधानेऽनुत्कटफलाभिलाषस्य प्रवृत्त्यभावादिति भावः ।

इष्टसाधनताविधिपक्षे दूषणमाह—अत्राभिधीयत इति । कुतश्चिदिति । आप्ताभिप्रायादित्यर्थः । समयः—सङ्केतः । नाभिधीयत इति । किन्त्वनुमीयत इति भावः ।

बालेन; किं वा तत्प्रतिपादितात् कुतश्चिदर्थादनुमीयते, चेष्टाविशेषानुमितादिवाभिप्रायविशेषात् समयाभिज्ञेनेति सन्दिह्यते। एवञ्च सति सा नाभिधीयत इत्येव निर्णयः—

हेतुत्वादनुमानाच्च मध्यमादौ नियोगतः।
अन्यत्र क्लृप्तसामर्थ्यात् निषेधानुपपत्तितः ॥ १४ ॥

तथाहि—अग्निकामो दारुणी मथ्नीयादिति श्रुत्वा कुत इत्युक्ते वक्तारो वदन्ति, यतस्तन्मन्थनादग्निरस्य सिध्यतीति। 'तरति मृत्युं योऽश्वमेधेन यजत' इत्यादाविष्टाभ्युपायतायामेवावगतायामनुमिमते तान्त्रिकाः यत्, 'अश्वमेधेन यजेत मृत्युब्रह्महत्यातरणकाम' इत्यादिविधिम्; निन्दया च निषेधम्; तद्यथा—'अन्धं तमः प्रविशन्ति ये के चात्महनो जना' इत्यतः नात्मानं हन्यादिति। कुर्याः कुर्यामित्यत्र विधिविहितैव लिङ् नेष्टाभ्युपायतामाह—किन्तु वक्तृसङ्कल्पम्। न हीष्टाभ्युपायो ममायमिति कुर्यामिति पदार्थः; किं तु तत्प्रतिपत्तेरनन्तरं योऽस्य सङ्कल्पः कुर्यामिति, स एव। सर्वत्र चान्यत्र वक्तुरेवेच्छाऽभिधीयते लिङेत्यवधृतम्। तथा ह्याज्ञाऽध्येषणानुज्ञासंप्रश्नप्रार्थनाऽऽशंसा लिङि नान्यच्चकास्ति। यां वक्तुरिच्छामननुविदधानस्तत्क्षोभात् बिभेति, सा आज्ञा। या तु श्रोतुः पूजासम्मानव्य-

---

कुत इत्यत्राह—हेतुत्वादिति। विधिश्रवणानन्तरं क्वचित् विधेयार्थप्रवृत्तिहेतुजिज्ञासायां इष्टसाधनताया हेतुत्वेन निर्देशदर्शनादिति भावः। अनुमानादिति। क्वचिदिष्टसाधनत्वश्रवणात् विध्यनुमानादित्यर्थः। यदीष्टसाधनत्वमेव विधिस्स्यात् तदा श्रवणेन सिद्धे तत्र पुनरनुमितिः नोपपद्येतेति भावः। मध्यमादाविति। कुर्याः कुर्यामिति मध्यमोत्तमपुरुषयोरित्यर्थः। इष्टसाधनताबुद्ध्यधीनसङ्कल्पस्यैव तत्रावगमादिति भावः। अन्यत्रेति। आज्ञाध्येषणादाविच्छाबोधनसामर्थ्यस्यैव क्लृप्तत्वादिति भावः। निषेधेति। न हन्यादित्यादौ इष्टसाधनत्वाद्यभावस्यानुपपत्तेरिति भावः।

कारिकास्थस्य 'हेतुत्वादि' त्यस्याशयमाह—अग्निकाम इत्यादिना। अनुमानादित्यस्य भावमाह—तरति मृत्युमित्यादिना। इष्टानिष्टसाधनताश्रवणमात्रादपि विधिनिषेधौ क्वचिदुन्नीयेते इति भावः। कारिकाया द्वितीयपादं विवृणोति—कुर्या इति। तत्प्रतिपत्तेरिति। इष्टसाधनताप्रतिपत्तेरित्यर्थः। तृतीयपादार्थमाह—सर्वत्र चेति। आज्ञादिपदानामर्थं निर्वक्ति—यामित्यादिना। तत्क्षोभात्—वक्तृकोपात्।

ञ्जिका, सा अध्येषणा। वारणाभावव्यञ्जिका अनुज्ञा! अभिधानप्रयोजना संप्रश्नः। लाभेच्छा प्रार्थना। शुभाशंसनमाशीरिति।

न च विधिविकल्पेषु निषेध उपपद्यते। तथा हि—यदाऽभिधा विधिः, तदा न हन्यात्। हननभावना नाभिधीयत इति वाक्यार्थो व्याघातान्निरस्तः। यदा कालत्रया-परामृष्टा भावना, तदा नेति संबन्धेऽत्यन्ताभावो मिथ्या। यदा कार्यं, तदा, न हन्यात्—न हननं कार्यमित्यनुभवविरुद्धम्; क्रियत एव यतः। न हननेन कार्यं हननकारणकं कार्यं नास्तीत्यर्थ इत्यपि नास्ति। दुःखनिवृत्तिसुखावाप्त्योरन्यतरस्य तत्र सद्भावात्।

हननकारणकमदृष्टं नास्तीत्यर्थ इति तु निरातङ्कं दुष्टार्थिनं प्रवर्तयेदेवेति साधु शास्त्रार्थः। अहननेनापूर्वं भावयेदिति त्वशक्यं कारणस्यानादित्वेन कार्यस्यापि तथाभाव-प्रसङ्गात्, भावनायाश्च तदविषयत्वात्। अहननसङ्कल्पेनेति यावज्जीवमविच्छिन्नतत्सङ्कल्प-स्यात्। सकृत्कृत्वैव वा निवृत्तिः पश्चाद्धन्यादेवाविरोधात्। सम्पादतो ह्यनेन नियो-गार्थः। यावद्यावद्धननसंकल्पवान् तावत्तावद्विपरीतसङ्कल्पेनापूर्वं भावयेदिति वाक्यार्थः, तथा-

---

चतुर्थपादं व्याख्याति— विधिविकल्पेष्विति। मतभेदेन अभिधा भावना कार्यमदृष्टमपूर्व-मिष्टसाधनत्वं वा विधिरित्यादिविभिन्नकल्पेष्वित्यर्थः। व्याघातादिति। हननभावनेत्यभिधाय नाभि-धीयत इत्युक्तिः व्याहतेति भावः। अभिधा नाम लिङादिशब्दनिष्ठं धर्मान्तरमित्युक्तावपि सा नास्ती-त्युक्ते सिद्ध्यसिद्धिभ्यां व्याघात इत्याशयः। भावनाविधिपक्षेऽप्याह—यदा कालत्रयेति। काल-त्रयापरामृष्टेति। वर्तमानादिकालसंबन्धिनी भावना सर्वाख्यातसाधारणी आख्यातसामान्यार्थः। कालासंबन्धिनी तु भावना लिङर्थ इति पक्षेऽपीति भावः। भावनेति। विधिरित्यनुषज्यते। एवं पक्षान्तरानुवादकवाक्येऽपि बोध्यम्। मिथ्येति। यदा कदाचित् भावनायाः सत्त्वात् तत्संबन्धा-भावो बाधित इति भावः। कार्यविधिपक्षे धात्वर्थकरणककार्यनिषेधः स्यादित्यत्राह—न हननेनेति।

निरातङ्कमिति। दुरदृष्टसंभावनयैव हि भयप्रसक्तिरिति भावः। अपूर्वविधिपक्षे नञो धातु-नान्वयेऽप्याह—अहननेनेति। हननप्रागभावेनेत्यर्थः। तद्भावनाया आदिमत्त्वात् नोक्तदोष इत्यत्राह—भावनायाश्चेति। प्रागभावस्य भावनासाध्यत्वाभावादिति भावः। सङ्कल्पविधिपक्षेऽप्यनुप-पत्तिमाह—अहननसङ्कल्पेनेतीति। स यावज्जीवं सकृद्वा शास्त्रार्थ इति विकल्प्याद्यं प्रत्याह—

भूतस्याधिकारित्वादित्यपि वार्तम्—तदश्रुतेः। प्रसक्तं हि प्रतिषिध्यते, नाप्रसक्तमिति चेत्—न वै किञ्चिदिह प्रतिषिध्यते; तदभावः प्रतिपाद्यत इति निषेधार्थः; अहननकरणकमपूर्वं वाक्यार्थः। किं च न हन्यादित्यहननेनापूर्वस्य कर्तव्यताप्रत्ययो जातो वेदात्; जातश्च हननक्रियायां रागात्। निष्फलाच्च कार्यादपेक्षितफलं गरीय इति न्यायेन हन्यादेवेत्यहो वेदव्याख्यानकौशलमास्तिक्याभिमानिनो मीमांसकदुर्दुरूढस्य।

इष्टसाधनतापक्षेऽपि, न हन्यात्—न हननभावना इष्टाभ्युपाय इति वाक्यार्थः। तथा चानिष्टसाधनत्वं कुतो लभ्यते। न हीष्टसाधनं यन्न भवति तदवश्यमनिष्टसाधनं दृष्टम्, यथा सविषमन्नं न भुञ्जीथा इति। तेन वेदेऽप्यनुमास्यत इत्यपि न साधीयः—प्रतिषेधार्थस्यैव चिन्त्यमानत्वात्। न हि कर्तव्यत्वस्येष्टसाधनत्वस्य भावनाया वाऽभावः प्रतिपादयितुं शक्यते; लौकिकप्रमाणसिद्धत्वात्। तथापि प्रतिपाद्यते तावदिति चेत्—न—पाषण्डागमनिषेधेनानेकान्तात्। नासौ प्रमाणमिति चेत्—न—अर्थविपर्ययप्रतिपादनाविशेषेऽस्यापि तथाभावात्।

यावज्जीवमिति। सुषुप्त्यादौ तदसम्भवादिति भावः। नियोगार्थः—विध्यर्थः। नेक्षेतोद्यन्तमादित्यमित्यादाविव। तथाभूतस्य—हननसङ्कल्पवतः। वार्तमिति फल्गु निस्सारमित्यर्थः। तदश्रुतेरिति। हननसङ्कल्पवतो विपरीतसङ्कल्पवत्त्वाश्रुतेरित्यर्थः। अथवा सङ्कल्पस्यैवाश्रुतेरित्यर्थः। अश्रुतमप्यर्थाल्लभ्यत इत्याह—प्रसक्तं हीति। तत्प्रसङ्गश्च तत्करणसङ्कल्प एव तस्यैवाद्यप्रवृत्तिरूपत्वादिति भावः। अत्र नञा हननं प्रतिषिध्यते येन तत्प्रसक्तिरपेक्ष्येत। किं तु हननानुत्पादः प्रतिपाद्यते। अतो न पूर्वोक्ताधिकारलाभ इत्याशयेन समाधत्ते—न वेति। ततश्च निष्पन्नं वाक्यार्थमाह—अहननकरणकमिति। ततश्च पूर्वोक्तदोषान्न विमुक्तिरिति भावः। अपि च महानुपप्लवः स्यादित्याह—किं चेति। निष्फलाच्चेति। अहननापूर्वस्य निष्फलत्वादिति भावः।

इष्टसाधनताविधिपक्षेऽपि अनुपपत्तिमाह—इष्टसाधनतापक्षेऽपीति। उपेक्षणीयस्यापीति। इष्टानिष्टसाधनतारहितस्य लोष्टकाष्ठादेरपीत्यर्थः। तत्र व्यभिचार इति भावः। प्रकारान्तरेण व्याप्तिमाह—यदिति। कर्तव्यत्वादेरभावप्रतिपादनमेव प्रतिषेधार्थ इत्यत्राह—न हीति। हननकर्तव्यत्वादेः प्रमाणसिद्धत्वेन तदभावप्रतिपादनासंभवादिति भावः। प्रमाणान्तरविरुद्धस्यापि प्रतिपादनोपगमेऽनैकान्त्यमाह—पाषण्डेति। तत्र यागादीनामपि निषेधादनिष्टसाधनत्वप्रसङ्ग इति भावः।

तात्पर्यतः प्रामाण्यमिति चेत्—न, विधिनिषधयोरनन्यपरत्वात्; न विधौ परश्शब्दार्थ इति वचनात्। तथापि निषेधे तथा भविष्यतीति चेत्—न, अविनाभावतदुद्देशप्रवृत्त्योरभावात्। नाप्यसुराविद्यादिवदस्य नञो विरोधिवचनत्वम्। क्रियासङ्गतत्वात्; असमस्तत्वाच्च। तस्मात्—

वक्त्रभिप्रायस्य विध्यर्थत्वसाधनम

विधिर्वक्तुरभिप्रायः प्रवृत्त्यादौ लिङादिभिः।
अभिधेयोऽनुमेया तु कर्तुरिष्टाभ्युपायता ॥ १५ ॥

तत्र स्वयङ्कर्तृकक्रियेच्छाऽभिधानं कुर्यामिति। सम्बोध्यकर्तृकक्रियेच्छाभिधानं कुर्या इति। शेषकर्तृकक्रियेच्छाऽभिधानं कुर्वीतेति। तथाचाग्निकामो दारुणी मथ्नीयादित्यस्य लौकिकवाक्यस्यायमर्थस्सम्पद्यते, अग्निकामस्य दारुमथने प्रवृत्तिर्ममेष्टेति। ततः श्रोताऽनु-

---

प्रमाणप्रतिषिद्धत्वं व्याप्यमस्त्वित्यत्राह—अर्थविपर्ययेति। प्रमाणान्तरविरुद्धार्थप्रतिपादकत्वाविशेषे पाषण्डागमवत् न कलञ्जं भक्षयेदित्यादिनिषेधस्यापि प्रामाण्यं दुर्वचमिति भावः। गङ्गायां घोष इत्यादौ तीरादाविव न कलञ्जं भक्षयेदित्यत्रानिष्टसाधनत्वे तात्पर्यमित्यत्राह—विधिनिषेधयोरिति। अविनाभावेति। शक्यार्थाविनाभूत एव तात्पर्यमपीति भावः। तदुद्देशेति। अनिष्टसाधनत्वाद्यर्थान्तरप्रतिपादनोद्देशेन निषेधप्रवृत्तेरित्यर्थः। साक्षाद्धननिवृत्तिप्रतिपिपादयिषया हि तत्प्रवृत्तिरिति भावः। नञः विरुद्धवचनत्वमुपगम्यानिष्टसाधनत्वप्रतिपादनोक्तिरपि न सङ्गच्छत इत्याह—नापीति। पर्युदासस्थले तत्रापि समस्त एव तत्संभव इति भावः। एवं परमतेष्वनुपपत्तिमुक्त्वा स्वमतं वक्तुमारभते—तस्मादिति। नियोक्तृधर्मो वेति। पूर्वमुपक्षिप्तं सिद्धान्तयति—विधिरिति। प्रवृत्त्यादिविषयकवक्त्रभिप्रायात्मको विधिः लिङादिभिरभिधेय इत्यर्थः। तर्हि प्रवर्तकमिष्टसाधनताज्ञानं केन जायत इत्यत्राह—अनुमेयेति। अनुमानप्रकारः स्वयमेव वक्ष्यते। अभिप्रायार्थकत्वे तुल्येऽपि मध्यमोत्तमयोः प्रथमपुरुषापेक्षया विलक्षणबोधनकत्वं दर्शयति—तत्रेति। मध्यमादावयोगत इत्युक्तमत्र न प्रसज्यत इति भावः। वेदे लिङर्थवक्त्रभिप्रायज्ञानादिष्टसाधनत्वानुमानोपपादनाय लौकिकलिङं निदर्शयति—तथा चेति। एवं वेदेऽपि 'स्वर्गकामो यजेत'इत्यादौ

मिनोति, नूनं दारुमथनयत्नोऽग्नेरुपाय इति । यद्विषयो हि प्रयत्नो यस्याप्तेनेष्यते, स तस्यापेक्षितहेतुः; तथा तेनात्रगतश्च, यथा ममैव पुत्रादेर्भोजनविषय इति व्याप्तेः । विषं न भक्षयेदित्यस्य तु विषभक्षणगोचरा प्रवृत्तिर्मम नेष्टेत्यर्थः । ततोऽपि श्रोताऽनुमिनोति, नूनं विषभक्षणभावना अनिष्टसाधनम् । यद्विषयो हि प्रयत्नः कर्तुरभिमतसाधकोप्याप्तेन नेष्यते, स ततोऽधिकतरानर्थहेतुः, तथा तेनात्रगतश्च; यथा ममैव पुत्रादेः क्रीडा कर्दमविषभक्षण विषय इति व्याप्तेः ।

लौकिक एव वाक्येऽयं प्रकारः कदाचिद् बुद्धिमधिरोहति न तु वैदिकेषु, तेषु पुरुषस्य निरस्तत्वादिति चेत्—न । निरासहेतोरभावात् । तदस्तित्वेऽपि प्रमाणं नास्तीति चेत्—मा भूदन्यत्; विधिरेव तावत् गर्भ इव पुंयोगे प्रमाणं श्रुतिकुमार्याः; किमत्र क्रियताम्? लिङो वा लौकिकार्थातिक्रमे 'य एव लौकिकाः त एव वैदिकास्त एव चैषामर्थाः' इति विप्लवेत । तथा च जवगडदशादिवदनर्थकत्वप्रसङ्ग इति भव सुस्थः ।

स्यादेतत्—वक्तॄणामुपाध्यायानामेवाभिप्रायो वेदे विधिरस्तु । कृतं स्वतन्त्रेण वक्त्रा परमेश्वरेणेति चेत्—न—तेषामनुवक्तृतयाऽभ्यासाभिप्रायमात्रेण प्रवृत्तेः शुकादिवत् तथा-

---

स्वर्गकामस्य यागप्रवृत्तिराप्तेष्टेति विधिवाक्यादवगमे पश्चादनुमिनोति । स्वर्गकामस्य यागप्रयत्नः स्वर्गरूपेष्टसाधनं स्वर्गकामकर्तव्यतया आप्तेनेष्यमाणत्वात् यद्यत्कामकर्तव्यतया आप्तेनेष्यमाणं तत्तत्कामस्य तदिष्टसाधनमिति भोजनादौ व्याप्तिदर्शनादिति भावः । लोकरीतिरियमपौरुषेये वेदे न प्रवर्तितुमर्हतीत्याक्षिपति—लौकिकेति

बाधकाभावमात्रेण न पुरुषसिद्धिः साधकाभावादिति शङ्कते— तदस्तित्वेऽपीति । परिहरति—माभूदन्यदिति । पूर्वमुक्तानां कार्यायोजनादीनां मानत्वानभ्युपगमेऽपि विधिरेव स्वयमेकाकी पुरुषं साधयितुं पर्याप्तं प्रमाणमिति भावः । अर्थभेदोपगमे लोकवेदाधिकरणविरोधमप्याह—लिङो वेति । तन्न्यायानुपगमेऽनिष्टमाह—तथा चेति । अनर्थकत्वेति । अर्थभेदे व्युत्पत्त्यसंभवादिति भावः ।

अथ विधिरुपाध्यायाद्यभिप्रायबोधनादन्यथासिद्धः नेश्वरे प्रमाणं भवितुमर्हतीति शङ्कते—स्यादेतदिति । अभ्यासाभिप्रायमात्रेणेति । मात्रशब्देनार्थगोचराभिप्रायव्यच्छेदः असर्वज्ञत्वेन

क्वचित् दृष्ट इति चेत्—स्वर्गादर्थोऽपि तथा । तन्मिथ्यात्वे तदर्थिनामप्रवृत्तौ विधानानर्थक्यप्रसङ्ग इति चेत्—इहापि तदुपासनाविधानानर्थक्यप्रसङ्गः । तन्मिथ्यात्वे हि सालोक्यसायुज्यादिफलमिथ्यात्वे कः प्रेक्षावांस्तमुपासीतेति तुल्यमिति ।

वाक्यहेतुना ईश्वरसाधनम्

वाक्यादपि । संसर्गभेदप्रतिपादकत्वं ह्यत्र वाक्यत्वमभिप्रेतम् । तथा च यत्पदकदम्बकं यत्संसर्गभेदप्रतिपादकं, तत् तदनपेक्षसंसर्गज्ञानपूर्वकं यथा लौकिकम्; तथा च वैदिकमिति प्रयोगः । विपक्षे च बाधकमुक्तम् ।

संख्याविशेषहेतुना ईश्वरसाधनम्

सङ्ख्याविशेषादपि—

स्यामभूवं भविष्यामीत्यादिसंख्या च वक्तृगा ।
समाख्यापि न शाखानामाद्यप्रवचनादृते ॥ १७ ॥

कार्यतया हि प्राक् सङ्ख्योक्ता, सम्प्रति तु प्रतिपाद्यतयोच्यते । तथाहि—उत्तमपुरुषाभिहिता सङ्ख्या वक्तारमन्वेतीति सुप्रसिद्धम् । अस्ति च तत्प्रयोगः प्रायशो वेदे ।

दिमानसंसारी परमेश्वरः । सायुज्यं—समानभोगत्वम्, आदिना सारूप्यादिपरिग्रहः संसर्गभेदप्रतिपादकत्वमिति व्यवहारे व्यवहर्तव्यज्ञानस्य हेतुतया संसर्गभेदप्रतिपादकवाक्यव्यवहारहेतुभूतज्ञानाश्रयतया ईश्वरसिद्धिरिति भावः । विपक्षे बाधकं वक्तृयथार्थज्ञानरूपगुणाभावे प्रामाण्याभावप्रसङ्गः ।

अथ संशयाविशेषादित्येतत् वैदिकोत्तमपुरुषप्रतिपाद्यसंख्यापरतया वैदिकसमाख्यापरतया च योजयति—स्यामभूवमित्यादिना । वक्तृगेति । उत्तमपुरुषाभिहितसंख्याया वक्तृगामित्वादिति भावः । समाख्येति । काठकादिसमाख्येत्यर्थः । आद्येति । प्रवचनसामान्यस्यातिप्रसक्तत्वादिति भावः । कार्यतयेति । ईश्वरीयापेक्षाबुद्धिकार्यतयेत्यर्थः । अनन्वयप्रसङ्गादिति । अन्यत्र संख्यान्वयहेतुभूताया भावनान्वयसामग्र्या अभावादिति भावः । अन्यथाकरणेति । अन्यस्योपाध्यायेभ्यः प्रकर्षस्यानुवक्तुर्दुर्वचत्वादिति भावः । अविप्लुतस्वरवर्णाद्युच्चारणादिकमस्तु प्रकर्ष इत्यत्राह—कति चेति ।

ततस्तदभिहितया तयाऽपि स एवानुगन्तव्यः। अन्यथाऽनन्वयप्रसङ्गात्। अथ वा समाख्या-विशेषः संख्याविशेष उच्यते। काठकं कालापकमित्यादयो हि समाख्याविशेषाः शाखा-विशेषाणामनुस्मर्यन्ते। ते च न प्रवचनमात्रनिबन्धनाः; प्रवक्तॄणामनन्तत्वात्। नापि प्रकृष्टवचननिमित्ताः; उपाध्यायेभ्योपि प्रकर्षे प्रत्युतान्यथाकरणदोषात्। तत्पाठानुकरणे च प्रकर्षाभावात्। कति चानादौ संसारे प्रकृष्टाः प्रवक्तार इति को नियामक इति। नाप्याद्यस्य वक्तुः समाख्येति युक्तम्; भवद्भिस्तदनभ्युपगमात्। अभ्युपगमे वा स एवास्माकं वेदकार इति वृथा विप्रतिपत्तिः।

स्यादेतत्—ब्राह्मणत्वे सत्यवान्तरजातिभेदा एव कठत्वादयः। तदध्येया तदनुष्ठे-यार्था च शाखा तत्समाख्यया व्यपदिश्यत इति किमनुपपन्नम्। न, क्षत्रियादेरपि तत्रैवा-धिकारात्। न च यो ब्राह्मणस्य विशेषः, स क्षत्रियादौ सम्भवति। न च क्षत्रियादेरन्यो वेद इत्यस्ति। न च कठाः काठकमेवाधीयते, तदर्थमेवानुतिष्ठन्तीति नियमः; शाखासञ्चा-रस्यापि प्रायशो दर्शनात्। प्रागेवायं नियम आसीत्; इदानीमयं विप्लवत इति चेत्—विप्लव एव तर्हि सर्वदा, कठाद्यवान्तरजातिविप्लवादित्यगतिरेवेयम्। तस्मादाद्यप्रवक्तृ-वचननिमित्त एवायं समाख्याविशेषसंबन्ध इत्येव साध्विति।

मामूत् प्रवचननिमित्ता समाख्या, किन्त्वध्येतृनिमित्ता वा स्यात् अर्थानुष्ठाननिमित्ता वा इत्या-शङ्कते—स्यादेतदिति। अवान्तरजातीति। ब्राह्मणत्वव्याप्यजातिविशेषा इत्यर्थः। कठादि-जातीयाः यामधीयते यदुक्तानर्थाननुतिष्ठन्ति वा सा शाखा काठकादिसमाख्यया व्यपदिश्यत इति भावः। ब्राह्मणविशेषमात्राध्येयानुष्ठेयार्थशाखाया अभावात् प्रवचनवदध्ययनानुष्ठानयोरप्यविशेषात् न युक्तमुक्तं समाख्याप्रवृत्तिनिमित्तमिति दूषयति—नेति। तन्मात्रकर्तृकाध्ययनादिनिमित्तकं समाख्यान-मित्यपि न वक्तुं शक्यमित्याह—न चेति। स्वमात्राध्येतृपुरुषाख्यानिबन्धनं समाख्यानमित्यपि न युक्तमित्याह—न च कठा इति। शाखासञ्चारः—शाखान्तराध्ययनादिः। अयं नियमः—शाखाविशेषाध्ययनादिनियमः। कदाचित् उक्तनियमविप्लवोपगमे समाख्याविप्लवः सार्वदिकः स्यादि-त्याह—विप्लव एवेति। समाख्याविप्लव एवेत्यर्थः। कुत इत्यत्राह—कठादीति। जाति-विशेषनियताध्ययनकत्वविप्लवादिति भावः। उपसंहरति—तस्मादिति। कठादिशरीरमधिष्ठाय सर्गादावीश्वरेण कृता शाखा काठकसमाख्येति भावः।

ईश्वरे योगजप्रत्यक्षमपि प्रमाणमिति निरूपणम्

स एवं भगवान् श्रुतोऽनुमितश्च कैश्चित् साक्षादपि दृश्यते प्रमेयत्वात् घटवत्। ननु तत्सामग्रीरहितः कथं द्रष्टव्यः ? सा हि बहिरिन्द्रियगर्भा मनोगर्भा वा तत्र न सम्भवति; चक्षुरादेर्नियतविषयत्वात्; मनसो बहिरस्वातन्त्र्यात्। तदुक्तं-हेत्वभावे फलाभावादित्यादि, न-कार्यैकव्यङ्ग्यायास्सामग्र्या निषेद्धुमशक्यत्वात्।

अपि च दृश्यते तावद्बाहिरिन्द्रियोपरमेऽपि असन्निहितदेशकालार्थसाक्षात्कारः। न च स्मृतिरेवासौ पटीयसी, स्मरामि, स्मृतं वेति स्वप्नानुसन्धानाभावात्; पश्यामि, दृष्टमित्यनुव्यवसायात्। न चारोपितं तत्रानुभवत्वम्, अबाधनात्। अननुभूतस्यापि स्वशिरश्छेदनादेरवभासनाच्च। स्मृतिविपर्यासोऽसाविति चेत्-यदि स्मृतिविषये विपर्यास इत्यर्थः तदाऽनुमन्यामहे। अथ स्मृतावेवानुभवत्वविपर्यास इति; तदा प्रागेव निरस्तः। न च सम्भवत्यपि। न ह्यन्येनाकारेणाध्यवसितोऽन्येन ज्ञानावच्छेदकतयाऽध्यवसीयते। तथा च स घट इत्युत्पन्नायां स्मृतौ भ्राम्यतस्तं घटमनुभवामीति स्यात्, न त्विमं घटमिति। न ह्ययं घट इति स्मृतेराकारः। तस्मादनुभव एवासौ स्वीकर्तव्यः।

एवमीश्वरस्य मननव्यपदेशभाजमुपासनां प्रतिज्ञातां परिसमाप्य योगजप्रत्यक्षप्रमाणमप्युपपादयति—स एवमित्यादिना। घटवत् प्रमेयत्वात् साक्षाद्दृश्यत इत्यनुमीयत इति भावः। अत्र प्रत्यक्षसामग्रीमत्त्वमुपाधिरित्याशङ्कते—नन्विति। साधनाव्यापकत्वमुपपादयति—सा हीति। साधनाव्यापकत्वमसिद्धमिति परिहरति—नेति। चक्षुराद्यघटितसामग्र्यापि साक्षात्कारं क्वचिद्दर्शयति—अपि चेति। पटीयसीति। विशदतमेत्यर्थः। जागरस्मृतिव्यावर्तनायेदम्। अबाधनादिति। उत्तरकाले बाधाभावे आरोपत्वासिद्धिरिति भावः। अननुभूतस्यापीति स्मृतित्वानुपपत्तिसूचनाय। अनुमन्यामह इति। अनुभवत्वाप्रतिक्षेपादिति भावः। प्रागेव निरस्त इति। पूर्वाननुभूतगोचरत्वेन स्मृतित्वानुपपत्तेरिति भावः। अदृष्टविशेषसहकृतेन जन्मान्तरानुभवेन निर्वाह इत्युक्तावप्याह—न चेति। अन्येनाकारेणेति। तत्त्वादिनेत्यर्थः। अध्यवसितः—ज्ञानविषयः। अन्येन—इदन्त्वादिना। स्वाप्नज्ञानस्य वस्तुतः स्मृतित्वे तत्त्वेन विषयावगाहित्वनियमात् तत्प्रतिसन्धानस्य ज्ञानांशे इदन्त्वेन विषयावगाहित्वासंभवेन इमं घटमनुभवामीत्याद्याकारता नोपपद्येतेति भावः।

अस्ति च स्वप्नानुभवस्यापि कस्यचित् सत्यत्वम्, संवादात्। तच्च काकतालीयमपि न निर्निमित्तम्। सर्वस्वप्नज्ञानानामपि तथात्वप्रसङ्गात्। हेतुश्चात्र धर्म एव। स च कर्मजवत् योगजोऽपि योगविधेरवसेयः; कर्मयोगविध्योस्तुल्ययोगक्षेमत्वात्। तस्मात् योगिनामनुभवो धर्मजत्वात् प्रमा, साक्षात्कारित्वात् प्रत्यक्षफलं; धर्माननुगृहीतभावनामात्रप्रभवस्तु न प्रमेति विभाग इति। अतस्तत्सामग्रीविरहोऽसिद्धः।

तथापि विपक्षे किं बाधकमिति चेत्—'द्वे ब्रह्मणी वेदितव्ये' इत्यादियोगविधिवैयर्थ्यप्रसङ्गः, अशक्यानुष्ठानोपायोपदेशकत्वात्। न चासाक्षात्कारिज्ञानविधानमेतत्; अर्थज्ञानावधिनाऽध्ययनविधिनैव तस्य गतार्थत्वादिति। एतेन परमाण्वादयो व्याख्याता इति।

एवं स्वप्नज्ञानवत् चक्षुरादीन्द्रियनिरपेक्षप्रत्यक्षोपगमेऽपि तस्य न प्रामाण्यं स्यात् विशेषणवद्विशेष्यसन्निकर्षादेर्गुणस्याभावादित्यत्राह—अस्ति चेति। निर्निमित्तमिति। तथा च सन्निकर्षादिव्यतिरिक्तमपि धर्मादिकं किञ्चित् निमित्तमुपगन्तव्यमिति भावः। धर्म एवेति। स्वप्नज्ञानत्वाविशेषेऽपि धर्मसत्त्वे प्रमात्वं तदभावे तदभाव इति भावः। योगिप्रत्यक्षस्य प्रमात्वे कामुकपरिभावितकामिनीदर्शनस्याप्रमात्वे च हेतुभेदं प्रदर्शयन्नुक्तानुमानस्यानौपाधिकत्वमुपसंहरति—तस्मादिति। वेदितव्ये इति वेदनमत्र साक्षात्कारपरमिति भावः। परमाण्वादय इति। प्रमेयत्वात् कस्यचित् प्रत्यक्षा इत्यर्थः।

तदेवं मतान्तरसिद्धे ईश्वरे तदुक्तानि वेदवाक्यादीन्यपि प्रमाणयति—तदेनमिति। तत्र ज्ञातृत्वनित्यज्ञानवत्त्वएकत्वकरणानधीनज्ञानविकासवत्त्वउपास्यत्वकर्माराध्यत्वशरण्यत्वादिधर्मैः ईश्वरः प्रतिपाद्यत इति भावः। तथा 'न द्रष्टुः दृष्टेः विपरिलोपो विद्यत' इति नित्यज्ञानवत्त्वं, अत एव ज्ञातृत्वं, 'एकमेवाद्वितीयमि'ति निरस्तसमाभ्यधिकत्वं 'पश्यत्यचक्षुरि'ति करणनिरपेक्षदर्शनादिमत्त्वं 'द्वे ब्रह्मणी' इत्युपास्यत्वं 'यज्ञेने'ति कर्माराध्यत्वं च प्रख्याप्य एवगुणविशिष्ट ईश्वरः विष्णुरूप इति ख्यापयितुं 'यज्ञो वै विष्णुरि'त्यादीति निगमयति—तदेनमेवमिति। अस्मिन्नर्थे गीतास्मृतिसंवादं प्रकाशयति—स्मर्यते चेति। यज्ञायाचरत इति। यज्ञनिष्पत्तये प्रवर्तमानस्य प्राचीनं बन्धकं कर्म निश्शेषं क्षीयत इत्यर्थः। हिरण्यगर्भोक्तं योगशास्त्रमपि ईश्वरे संवादयति—अनुशिष्यत इति। विविदिषावाक्यं एकविज्ञानेन सर्वविज्ञानप्रतिज्ञावाक्यं च तदेकविषयमित्याह—तमिममिति। एवं

ईश्वरे शब्दोऽपि प्रमाणम्

तदेनमेवम्भूतमधिकृत्य श्रूयते—'न द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इति। 'एकमेवाद्वितीयमि'ति 'पश्यत्यचक्षुः स शृणोत्यकर्ण' इति 'द्वे ब्रह्मणी वेदितव्ये परं चापरमेव चे'ति 'यज्ञेन यज्ञमयजन्त देवा' इति 'यज्ञो वै विष्णुरि'त्यादि। स्मर्यते च—'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' इति 'मदर्थं कर्म कौन्तेय मुक्तसङ्गस्समाचर' इति 'यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धन, इति 'यज्ञायाचरतः कर्म समग्रं प्रविलीयत' इत्यादि। अनुशिष्यते च साङ्ख्यप्रवचने ईश्वरप्रणिधानम्। तमिमं ज्योतिष्टोमादिभिरिष्टैः, प्रासादादिना पूर्तेन, शीतातपसहनादिना तपसा, अहिंसादिभिर्यमैः, आसनप्राणायामादिना योगेन महर्षयोऽपि विविदिषन्ति। तस्मिन् ज्ञाते सर्वमिदं ज्ञातं भवतीत्येवं विज्ञाय श्रुत्वैकतानस्तत्परो भवेत्। यत्रेदं गीयते—'मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु। मामेवैष्यसि युक्त्वैव-

---

तस्य सर्वकर्मसमाराध्यत्वे सर्वोपास्यत्वे उपासकप्राप्यत्वे सर्वफलप्रदत्वे सर्वेश्वरत्वे सर्वभूतसुहृत्त्वे मोक्षप्रदत्वे च भगवद्गीतां प्रमाणयति—यत्रैवमिति। युक्त्वैवमात्मानमित्यत्रात्मशब्दो मनःपरः। एवंरूपेण मदनुभवसमर्थं मनः प्राप्य मदनुभवयजननमस्कारादि कृत्वा मामेवैष्यसीति भावः।

एवं सम्यङ्निरूपितेऽपीश्वरे ये पुनः प्राचीनदुर्वासनया न श्रद्दधते तान् प्रत्याह—इत्येवमिति। शैलसारः—पाषाणः, अयो वा। तत्तुल्याशयाः ईश्वरसद्भावविषयीकरणायोग्यमनोवृत्तिकत्वादिति भावः। सन्तु कठोरहृदयाः किं ते दण्डनीयाः, तेषु किं कर्तव्यमित्यत्राह—किन्त्विति। अद्य प्रक्रान्तसर्वेश्वरप्रतिकूलवृत्तयोऽपि यादृच्छिकसुकृतप्रसक्तिकाले भवतैव दयया प्रकृष्टभगवद्योगिनः सङ्कल्पयितव्या इत्यर्थः।

स्वविषये प्रार्थ्यते—अस्माकं त्विति। तुना उक्तश्रद्धामान्द्यव्यवच्छेदः। निसर्गसुन्दरेति। चेतोनिमज्जनहेतुगर्भं विशेषणम्। गीताचार्यविग्रहो मनसि परिवर्तते। अद्धा—तत्त्वम्। आनन्दनिधे इति स्वरूपगुणानुसन्धानम्। भगवद्ध्याने सत्यपि निसर्गचपलात् तत्र निष्ठा न लभ्यत इति निर्विद्यते तथापीति। अपेक्षितमर्थ्यते—तन्नाथेत्यादिना। ईश्वरध्यायिनां न नरकप्रसक्तिः, न तेषां

वमात्मानं मत्परायणः'। 'भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्। सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति' इति ॥

इत्येवं श्रुतिनीतिसंप्लवजलैर्भूयोभिराक्षालिते
येषां नास्पदमादधासि हृदये ते शैलसाराशयाः।
किं तु प्रस्तुतविप्रतीपविधयोऽप्युच्चैर्भवच्चिन्तकाः
काले कारुणिक त्वयैव कृपया ते भावनीया नराः ॥ १८ ॥

अस्माकं तु निसर्गसुन्दर चिराच्चेतो निमग्नं त्वयी—
त्यद्धाऽऽनन्दनिधे तथापि तरलं नाद्यापि सन्तृप्यते।
तन्नाथ त्वरितं विधेहि करुणां येन त्वदेकाग्रतां
याते चेतसि नाप्नुवाम शतशो याम्याः पुनर्यातनाः ॥ १९ ॥

यमसालोक्यम्, न च ते नरकौकसः इत्यादिश्रवणादिति भावः। इत्थमीश्वरसाधकतया निर्मितस्यास्य प्रबन्धस्य परमप्रयोजनतया तत्पदसमर्पणतः तत्प्रीतिमेवादरेणाभ्यर्थयते—इत्येष इति। यद्वासये-दिति—यद्यामोदयेदित्यर्थः। दक्षिणवामकौ—दक्षिणसव्यहस्तौ, अनुकूलप्रतिकूलौ च। यथा वा ईश्वरसमर्पणाय कुसुमाञ्जलिं कुर्वतः अञ्जलिमध्यस्थकुसुमे सव्यदक्षिणहस्तयोः वासनापादने तदभावे वा नादरः। तथैतद्ग्रन्थकर्तुरपि सेश्वरनिरीश्वरवादिनोः एतद्ग्रन्थविषयैः सन्तोषापादने तदभावेऽपि चेति भावः। अमरेशगुरोः—इन्द्रगुरोः, ब्रह्मणः गुरुः विष्णुः, "इन्द्रोह वै देवानामभिप्रवव्राज विरोचनोऽसुराणां तौ हासंविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये" इत्यादि-श्रुतेरिति भावः। तथा च निश्रेयसाधिगम एव परमप्रयोजनमिति सूचितम्।

इत्येष नीतिकुसुमाञ्जलिरुज्ज्वलश्री—
यद्वासयेदपि च दक्षिणवामकौ द्वौ ।
नो वा ततः किममरेशगुरोर्गुरुस्तु
प्रीतोऽस्त्वनेन पदपीठसमर्पणेन ॥ २० ॥

इति न्यायकुसुमाञ्जलौ पञ्चमस्तबकः सम्पूर्णः ।

इति शतक्रतुतार्किकदेशिकोत्तमनृसिंहसुधीन्द्रकृपाभरः ।
विबुधनाथमुखेन सुमाञ्जलेर्विवरणादतनोन्नयवासनाम् ॥

शीतोदके शके तुर्ये बोधने कुसुमाञ्जलेः ।
वासनाधीयमाना श्रीवासमामोदयत्वियम् ॥

इति न्यायवासनाभिधायां न्यायकुसुमाञ्जलिटीकायां पञ्चमस्तबकः ।

— * —

कुसुमाञ्जलिकारिकासूची